॥श्रीः॥

चौखम्भा राजमाता ग्रन्थमाला

श्रीपिङ्गलाचार्यविरचितं

छन्दःशास्त्रम्

श्रीहलायुधभट्टविरचितया मृतसंजीवन्याख्यया
वृत्त्या समेतम्

जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितश्रीदुर्गाप्रसाद-
तनयेन पण्डितकेदारनाथेन, मुम्बापुरवासिना पणशी-
करोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा च
संशोधितम्

चौखम्भा पब्लिशर्स
प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक
वाराणसी (भारत)

रघु० लालसिंह

20.04.2004

॥ श्रीः ॥

चौखम्भा राजमाता ग्रन्थमाला

२

श्रीपिङ्गलाचार्यविरचितं

छन्दःशास्त्रम्

श्रीहलायुधभट्टविरचितया मृतसंजीवन्याख्यया
वृत्त्या समेतम्

*जयपुरमहाराजाश्रितेन महामहोपाध्यायपण्डितश्रीदुर्गाप्रसाद-
तनयेन पण्डितकेदारनाथेन, मुम्बापुरवासिना पणशी-
करोपाह्वलक्ष्मणतनुजनुषा वासुदेवशर्मणा च
संशोधितम्*

चौखम्भा पब्लिशर्स
प्राच्य-विद्या, आयुर्वेद एवं दुर्लभ ग्रन्थों के प्रकाशक
वाराणसी (भारत)

CHAUKHAMBHA RAJMATA SERIES

NO. 2

CHANDAS ŚĀSTRAM

by

ŚRĪ PIṄGALĀCĀRYA

With the Commentary Mṛtasañjīvanī

by

ŚRĪ HALĀYUDHA BHAṬṬA

Edited by

PAṆḌITA KEDĀRANĀTHA

Son of

MAHĀMAHOPĀDHYĀYA PAṆḌITA DURGĀPRASĀDA

and

VĀSUDEVA LAXMAṆA ŚĀSTRĪ PAṆAŚĪKARA

CHAUKHAMBHA PUBLISHERS

A House of Ayurvedic & Indological Books

VARANASI (INDIA)

छन्दःशास्त्रस्य भूमिका।

तत्र छन्दःसमीक्षास्थश्छन्दस्तत्त्ववादः—

अथ किमिदं छन्द? इति पृच्छामः।

"ननु च भोः! यदि कश्चिद्ब्रूयात्—कः खलु ब्राह्मण? इति, सोऽयं त्रिविधः पर्यनुयोगो भवति—लक्ष्यापेक्षः, लक्षण्यापेक्षः, लक्षणापेक्षश्च। तदतस्त्रिविधः समाधिर्भवति—असौ देवदत्तो ब्राह्मण इति लक्ष्यापेक्षः, कश्यपाङ्गिरोभृगवत्रिवसिष्ठविश्वामित्रागस्त्याख्याः सप्तैव ब्राह्मणजातयो भवन्ति इति लक्षण्यापेक्षः,

'विद्या योनिः कर्म चेति त्रयं ब्राह्मण्यलक्षणम्।
सेवा संग्रहवृद्धिश्च कालयापश्च पातनम्॥
जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च।
अहोरात्राश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः॥
कर्मणा ब्राह्मणो जातः करोति ब्रह्मभावनाम्।
स्वधर्मनिरतः शुद्धस्तस्माद्ब्राह्मण उच्यते॥
जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च।
एभिर्युक्तो हि यस्तिष्ठेन्नित्यं स द्विज उच्यते॥
धृतिः क्षमा दयास्तेयं शौचमिन्द्रियनिग्रहः।
विद्या चैव तपः सत्यं नवकं ब्रह्मलक्षणम्॥' इति लक्षणापेक्षश्च।

एवमेवेदं यददः पर्यनुयुज्यते किमिदं छन्द? इति; सोऽयं त्रिविधः पर्यनुयोगो भवति—लक्ष्यापेक्षः, लक्षण्यापेक्षः, लक्षणापेक्षश्च। तदतस्त्रिविधः समाधिर्भवति—

'अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म्। होता॑रं रत्न॒धात॑मम्॥' (ऋ. १ अ. १ अ. १ व.) इतीदं छन्द इति लक्ष्यापेक्षः, गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्याख्याः सप्तैव छन्दोजातयो भवन्तीति लक्षण्यापेक्षः, 'यदक्षरपरिमाणं तच्छन्दः' 'मात्राक्षरसंख्यानियता वाक् छन्द' इति लक्षणापेक्षश्च।

तदित्थं सिद्धं प्रतिवचनमितीदं छन्द इति चेत्; न सिद्धम्। कुत एतत्?। यदक्षरपरिमाणं तच्छन्द इति हि लक्षणमुच्यते, तत्तावदपर्याप्तं भवति। पृथिवी गायत्री अन्तरिक्षं त्रैष्टुभम्, द्यौर्जागती। अग्निर्गायत्रः, इन्द्रस्त्रैष्टुभः, विश्वेदेवा जागताः। तेजो वै ब्रह्मवर्चसं गायत्रम्, ओजो वा इन्द्रियं वीर्यं त्रिष्टुप्, पशवो जागताः। ब्रह्म गायत्रम्, क्षत्रं त्रैष्टुभम्, विड् जागतम्। ब्राह्मणो गायत्रः, क्षत्रियस्त्रैष्टुभः, वैश्यो जागतः। चतुर्विंशत्यक्षरा वाग्गायत्री, चतुश्चत्वारिंशदक्षरा वाक् त्रैष्टुभी, अष्टचत्वारिंशद-

ष्टुप् वाग् जागती, इत्येवमनेकधा लक्षण्याः श्रूयन्ते । ताश्च सर्वा एवैता गायत्र्य-त्रिष्टुभो जगत्यश्च लक्षण्यमर्हन्ति । तत्र यदुच्यते—'अक्षरपरिमाणं छन्द इति'; वाचिकेष्वेवैतदवकाशं लभते, नान्यत्रेत्यनैकान्तिकं भवति । न चानैकान्तिके लक्षण-शब्दः प्रवर्तते । तस्मादलक्षणमेतत् । स्यादेव तु तेषु तेषु सर्वेष्वनुगतः कश्चन विल-क्षणो धर्मो यदनुरोधेन छन्दःशब्दः प्रवर्तते । तमेतं धर्मं पृच्छामः—किमिदं छन्द इति ॥

अथ लक्षण्योपपरीक्षा—

यान्येतानि गायत्र्यादीन्यभिधानानि श्रूयन्ते; किमेते यदृच्छाशब्दाः, उत रूढाः, योगरूढाः, यौगिकरूढाः, यौगिका वा ? । अथवा क्वचिन्मुख्याः, अपरत्र भक्त्या प्रयु-ज्यन्ते ? । तत्र तावत्—'गायतो मुखादुदपतत्' इति गायत्र्याः, 'गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभति' इत्यनुष्टुभश्च निर्वचनश्रवणात्, 'गायन्तं त्रायते यस्मा-द्गायत्रीत्युच्यते बुधैः ।' इत्यादिस्मरणाच्चावयवार्थस्फोटाच्च नैते यदृच्छाशब्दा इति शक्यं वक्तुम् । नाप्येते रूढा भवितुं युज्यन्ते । "तदाहुर्यदन्यानि छन्दांसि वर्षीयांसि भूयोऽक्ष-रतराणि, अथ कस्मादेतां बृहतीत्याचक्षत इति । एतया हि देवा इमांल्लोकानाश्नुवत । ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत, दशभिरंतरिक्षम्, दशभिर्दिवम्, चतुर्भिश्चतस्रो दिशः, द्वाभ्यामेवास्मिन् लोके प्रत्यतिष्ठन्, तस्मादेनां बृहतीत्याचक्षते ॥" (ऐ. ब्रा.) इत्येवमादिभिः श्रुतिभिरेषामवयवार्थसापेक्षत्वावगमात् । न चाप्येते योगरूढा भवन्ति । "सप्तधा वै वागवदत्" । 'अक्षरेण मिमते सप्तवाणीः' इत्येवमादिश्रुतिसिद्धेषु वाग्विच्छित्तिविशेषेष्वेव तु भवानिदानीं गायत्र्यादीन् शब्दानाचष्टे । तत्र नैतेषु गाय-त्र्यादीनामवयवार्थसमन्वयः स्वारस्येन शक्यते कर्तुम् । शुद्धं यौगिकत्वमप्यत एव प्रत्याख्यातं भवति । द्रव्यशब्दत्वगुणशब्दत्वक्रियाशब्दत्वानामन्यतमस्याप्यत्र दुःस्थ-त्वात् । तत्तर्हि स्यादेवम्—न केवलं वाग्विशेषा एवैतेषां गायत्र्यादिशब्दानां विषया भवन्तीति, किं तर्हि—सन्त्येव केचिदन्येऽपि साध्यदेवादयो द्रविणादयो वा वेदप्रसिद्धा गायत्र्यादिशब्दप्रतिपाद्याः, अथ वाग्विशेषाश्च । तेषु क्वचिदिमे यौगिकाः, अपरत्र रूढाः स्युः । अथवा क्वचिन्मुख्या अपरत्र भक्ताः स्युः । तत्र न ज्ञायते कुत्र कीदृशा ? इति । किंच भूयसा श्रूयते गायत्र्यादीनामाच्छादकत्वाच्छन्दस्त्वमस्तीति । तत्र न ज्ञायते कथमेषां वाग्विशेषाणां साध्यदेवानां द्रविणानामन्येषां वा किमाच्छादकत्व-मस्तीति । आच्छादकत्वमेवैतच्छन्दःशब्दस्य प्रवृत्तिनिमित्तमुत गायत्र्यादिशब्दसंबन्ध-मात्रमथवान्यदेव किंचित् ? । तस्मादुत्तिष्ठते जिज्ञासा—किमिदं छन्द ? इति ॥

अथाप्येतदन्यथान्यथा बहुधा श्रूयते वेदे । तथाहि—

(१) "एते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ ।
त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति ।" इति ।

तदेतन्न ज्ञायते—कथं ते सप्तभिश्छन्दोभिरागच्छन्ति, कानि वा तत्र छन्दांसि ? ॥

(२) "छन्दांसि वा अन्योन्यस्यायतनमभ्यध्यायन् । गायत्री, त्रिष्टुभश्च जगत्यै

चायतनमभ्यध्यायत् । त्रिष्टुब्, गायत्र्यै च जगत्यै च । जगती, गायत्र्यै च त्रिष्टुभश्च । ततो वा एतं प्रजापतिर्व्यूढच्छन्दसं द्वादशाहमपश्यत्, तमाहरत्, तेनायजत । तेन स सर्वान् कामान् छन्दांस्यगमयत् ।" इति श्रूयते ।

तत्र न ज्ञायते—कथं द्वादशाहेन छन्दसामन्योन्यायतनसंसिद्धिः । कानि वा तत्र छन्दांसि ? ॥

(३) "अहर्वै देवा अश्रयन्त रात्रीमसुराः ते समावद्वीर्या एवासन् । न व्यावर्तन्त । सोऽब्रवीदिन्द्रः—कश्चाहं चेमानितोऽसुरान् रात्रीमन्वेष्याव इति । स देवेषु न प्रत्यविन्दत् । तं वै छन्दांस्येवान्ववायन्, तस्मादिन्द्रश्चैव छन्दांसि च रात्रीं वहन्ति ॥" इति श्रूयते ।

तत्र न ज्ञायते—कथमेतानि छन्दांसि तमिन्द्रमन्ववायन्, कानि वा तत्र छन्दांसि ? ॥

(४) "देवा वा असुरैर्युद्धमुपप्रायन् विजयाय । तानग्निर्नान्वकामयतैतुम् । तं देवा अब्रुवन्—अपि त्वमेहि, अस्माकं वै त्वमेकोऽसीति । स त्रिश्रेणिर्भूत्वा त्र्यनीकोऽसुरान् युद्धमुपप्रायद् विजयाय । त्रिश्रेणिरिति—छन्दांस्येव श्रेणीरकुरुत । त्र्यनीक इति—सवनान्येवानीकानि । तानसंभाव्यं पराभावयत्" ॥ इति श्रूयते ।

तत्र न ज्ञायते—कथं छन्दांसि श्रेणयोऽभूवन् कानि वा तत्र छन्दांसि ? ॥

(५) सर्वाणि छन्दांस्येतशप्रलाप इत्याम्नायते । एतशो ह्ययं सूर्याश्वः संज्ञायते ।

> 'उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।
> यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥'
>
> (ऋ. ५ अ. ५ अ. १० व.)

इत्येवनादिमन्त्रव्याख्याने तथैव प्रतिपत्तेः ।

तथा च न ज्ञायते—कथमेषां छन्दसामैतशप्रलापत्वम्, कानि वा तत्र छन्दांसि ? ॥

अलं निदर्शनया । एवमादयो हि भूयांसश्छन्दसामुच्चावचवादाः श्रूयन्ते । तत्र न ज्ञायते—कथं कथमेते वादा उपपद्यन्ते कानि वा तत्र छन्दांसि ? । किमेकमेवैतेषां छन्दसां छन्दस्त्वमुत भिद्यते प्रत्यर्थमिति पृच्छामः—किमिदं छन्द ? इति ॥

अथ यदप्युक्तं लक्ष्यापेक्षं प्रतिवचनं, तदपि नैवावकल्पते । **'अग्निमीळे पुरोहितम्'** इत्यत्र हि किं नाम छन्दो विवक्षितं भवताम् ? । किं तावदयं संपूर्णो मन्त्रश्छन्दः स्यात् ? । नेत्याह ।

> 'ऋचां दशसहस्राणि ऋचां पञ्चशतानि च ।
> ऋचामशीतिः पादश्च पारणं संप्रकीर्तितम् ॥' (च. व्यू. १)

इत्येवं हि दाशतये मन्त्राः संख्यायते, छन्दांसि पुनः सप्तैवेति विग्रयभेदो विज्ञायते ॥

किं तर्हि यत्तावत्पदानि तच्छन्दः ? । नेत्याह—

> 'शाकल्यदृष्टे पदलक्षमेकं सार्धं च वेदे त्रिसहस्रयुक्तम् ।
> शतानि चाष्टौ दशकद्वयं च पदानि षट् चेति हि चर्चितानि ॥' (च. व्यू. १)

इत्येवं हि पदसंख्यानं स्मर्यते, छन्दांसि पुनः सप्तैवेति विषयभेदो विज्ञायते । अथ किमेतान्यक्षराण्येव छन्दः ? । नेत्याह—

'चत्वारि वाव शतसहस्राणि द्वात्रिंशच्चाक्षरसहस्राणि' इत्येवमक्षरसंख्यानं स्मर्यते । तस्मान्न तावदक्षराणि छन्दः स्यात् । अथ किं यदत्रैते वर्णाः श्रूयन्ते, तच्छन्दः ? । नेत्याह—वर्णा हि ते भवन्ति । व्यभिचरन्ति च ते ते वर्णाः, अथाप्यनुवर्तते छन्दस्त्वमतो नैते वर्णाश्छन्दः स्यात् । किं यदयं वर्णक्रमस्तच्छन्दः ? । नेत्याह—क्रमो हि नाम पौर्वापर्यम् । न चानन्तर्भाव्यवर्णरूपं पौर्वापर्यं शक्यतेऽध्यवसातुम् । तथा च वर्णव्यभिचारे क्रमातिचारः प्राप्नोति, अथाप्यनुवर्तते छन्दस्त्वमतो नैष वर्णक्रमश्छन्दः स्यात् ॥ अथ यदयं गुरुलघुक्रमस्तच्छन्दः ? । नेत्याह—यत्रापि नैवं गुरुलघुक्रमस्तत्रापीष्यते छन्दोव्यवहारः । स न स्यात् अथोच्येत । नोच्यते त्विदमित्थं गुरुलघुक्रमश्छन्द इति ॥ किं तर्हि यथाकथंचित्क्रियमाणो गुरुलघुक्रमश्छन्दः स्यात् ? । नैतदेवमपि शक्यं वक्तुम् । गद्यपद्यविवेकस्तर्हि व्याहन्येत । यथाकथंचित्क्रमस्य छन्दस्त्वेऽभ्युपगम्यमाने तदवच्छेदकभेदासंभवात् सप्त छन्दांसीति व्यवहारोपि न प्राप्नोति । तस्मान्नैषोपि गुरुलघुक्रमश्छन्दः स्यात् ॥ अथ यदत्रत्यमक्षरपरिमाणं तच्छन्द इति चेन्नैतदपि शक्यं विज्ञातुम्, यत्रापि नैतदक्षरपरिमाणं तत्रापीष्यते छन्दोव्यवहारः । स न स्यात् ॥ अथ यथाकथंचिदक्षरपरिमाणं छन्द इति चेन्नैतदप्यस्ति । क्रमवादेन प्रत्युक्तत्वात् ॥ अथ किमनेन मन्त्रेण यत्प्रतिपाद्यते, सा विद्या छन्दः ? । नेत्याह—विद्या हि नाम सा अर्थविषयिणी स्यात्, शब्दविषयं तु छन्दः प्रतिपद्यते—इति विषयभेदो भवति । ननु च भोः ! न मन्त्रबोध्योऽर्थ एव विद्या स्यात्, किं तर्हि मन्त्रस्यापीष्यते विद्याशब्देन व्यपदेशः । तथा च मन्त्रत्रैविध्याद् ऋग्यजुःसामानीति त्रैविद्यमुपदिश्यते । गद्यपद्यगानानि चैतानि ऋग्यजुःसामानि न छन्दसोऽतिरिच्यन्ते । पद्यादित्रैविध्येन छन्दस्त्रैविध्यस्य सांप्रदायिकैरभ्युपेतत्वात् ॥ सत्यमेतत् । यदि हि नाम पद्यमृक्, गद्यं यजुः, गेयं साम—इत्येवाभिप्रेतं भवताम्; सत्तर्हि नूनमेषां भेदाभेदप्रयोजकधर्मानप्युदाहरिष्यति—भवान् किंनिबन्धनोऽयं भेदः ? पद्यमितराभ्यामतिरिच्यते गद्यमितराभ्यामिति । अथ कस्मात् पुनः पद्यमपि छन्दो गद्यं च गेयं चेति ? । तदर्थमिदं पृच्छामः—किमिदं छन्द ? इति ॥

(इति छन्दस्तत्त्ववादे प्रश्नग्रन्थः ।)

अत्रोच्यते—प्राणमात्रा छन्दः । सर्वं चेदं स्थावरजङ्गमं सप्राणमेवेह जीवति । प्राणधारणं हि जीवनम् । अतः प्राणापगमे निर्जीवं विनश्यति सर्वम् । स च प्राणः सर्वत्र व्यक्तिभेदभिन्नया कयाचिन्नियतयैव मात्रयावस्थाय स्वप्रणीतं स्वायत्तं शरीरमधितिष्ठतीति प्रतिपद्यते । तत्र वाचिकप्राणः स्वर इत्युच्यते । तन्मात्रा वाचिकच्छन्दः । एवं भौतिकप्राणो वैश्वानरः, तन्मात्रा च भौतिकच्छन्द इत्यनुसंधेयम् । मात्रा च पुनरवच्छेदः । यद्यपि च नियतासु वाक्षु प्रयुञ्जते छन्दःशब्दम्; अथापि नैतावता वागेव छन्दःशब्दवाच्येति भ्रमितव्यम् । नीलश्वेतादिशब्दानां गुणवाचकतया जाति-

शब्दत्वेऽपि गुणिपरत्वेनोपचाराद् गुणशब्दत्ववदस्य छन्दःशब्दस्यापि गुणशब्दत्वव्यवहारोपपत्तेः। तस्मादवच्छेदश्छन्द इत्येव सिद्धान्तः। स च मानेन वा प्रतिष्ठया वा तुलितकेन वा क्रियमाणो वस्तुस्वरूपमर्यादाबन्धः। ननु—'स च्छन्दोभिश्छन्नस्तस्माच्छन्दांसीत्याचक्षते।' 'ते छन्दोभिरात्मानमाच्छादयन्, यदेभिराच्छादयन्, तच्छन्दसां छन्दस्त्वम्।' 'ते छन्दोभिरात्मानं छादयित्वोपायन्, तच्छन्दसां छन्दस्त्वम्।' 'छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणः।' 'गायत्रेण छन्दसा त्वा छादयामि' इत्याद्यसकृन्निर्वचनश्रवणादाच्छादकस्य छन्दस्त्वं लभ्यते, नत्ववच्छेदस्य। आच्छादकानामवच्छेदकत्वसंभवेऽपि अवच्छेदकानामाच्छादकत्वासंभवात्। अत एव तु लोकेऽपि मानस्य प्रतिष्ठायास्तुलितकस्य वा छादकत्वाप्रसिद्धिः—इति चेन्न; अप्रसिद्धेरप्रसिद्धेः। तथा हि—केयमप्रसिद्धिः? । लौकिकानामप्रतिपत्तिर्वा, स्वरूपतोऽसत्त्वं वा? । नाद्यः, न हि लौकिकानामप्रतिपत्त्या प्रमाणसिद्धोऽर्थः शक्यमनभ्युपगन्तुम्; प्रतिपत्तिमात्रेण वा प्रमाणान्तरैरसिद्धः शक्यं स्वीकर्तुम्। व्यवहारसिद्धिप्रवणा हि लौकिका न वस्तुसत्त्वमपेक्षन्ते। 'शब्दज्ञानानुपाती वस्तुशून्यो विकल्प' इति पातञ्जलोक्तरीत्या विकल्पवृत्त्या व्यवहर्तामसत्यप्यर्थे प्रतिपत्तिदर्शनात्। अत एवारूपत्वे प्रमाणतः सिद्धेऽपि हास्यशृङ्गारकीर्त्यादीनां शुक्लत्वं, प्रेमानुरागवीरादीनां रक्तत्वं, क्रोधापकीर्त्यादीनां कृष्णत्वमद्भुतं व्यवहारतः प्रतिपद्यन्तेन तु सन्तमर्थम्॥

१–'अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि। दधुज्ज्योतिर्जनेभ्यः॥ १॥'

(ऋ. ८ अ. ८ अ. १४ व.)

२–'प्रजाहं तिस्रो अत्यायमीयुर्न्यश्न्या अर्कमभितो विविश्रे।
बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश॥'

(ऋ. ६ अ. ७ अ. ८ व.)

३–'इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।
विश्वभ्राड् भ्राजो महिसूर्यो दृश उरु पप्रथे सह ओजो अच्युतम्॥'

(ऋ. ८ अ. ८ अ. २८ व.)

४–'एषो ह देवः प्रदिशो नु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
स एष जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः॥'

(यजु. ३२ अ. ३ क. ४ मं.).

५–'एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः।
एकैवोषाः सर्वमिदं विभात्येकं वा इदं विबभूव सर्वम्॥'

(ऋ. ६ अ. ७ अ. २९ व.)

६–'सोमः पूषा च चेततुर्विश्वासां सुक्षितीनाम्। देवत्रा रथ्योर्हिता॥'

(सा. २ प्र. २ अ. ६ द.)

७–'अहं परस्तादहमवस्तात् यदन्तरिक्षं तदु मे पिताभूत्।
अहं सूर्यमुभयतो ददर्श अहं देवानां परमं गुहा यत्॥'

इत्येवमादिभिर्वेदप्रमाणैः सिद्धेऽपि सूर्यस्य स्थिरत्वे, पृथिव्याश्चलत्वे वैपरीत्येनानृतं व्यवहारतः प्रतिपद्यन्ते, न तु सन्तमर्थम् ॥

"स एष वा न कदाचनास्तमेति, नोदेति । तं यदस्तमेतीति मन्यन्ते, अह्न एव तदन्तमित्वा अथात्मानं विपर्यस्यते । रात्रीमेवावस्तात् कुरुते, अहः परस्तात् ॥ अथ यदेनं प्रातरुदेतीति मन्यन्ते—रात्रेरेव तदन्तमित्वा अथात्मानं विपर्यस्यते; अहरेवावस्तात् कुरुते, रात्रीं परस्तात् । स वा एष न कदाचन निम्लोचति ॥" इत्येवमैतरेयादिश्रुत्या स्पष्टमेवाहोरात्रयोः पृथिवीगतिनिमित्तकत्वे सिद्धेऽप्यनृतं सूर्यगतिनिमित्तकत्वं सूर्यास्तमनं च व्यवहारतः प्रतिपद्यन्ते, न तु सन्तमर्थम् ॥

एवं घटशब्दप्रयोजकाकाराकारितान्तःकरणवृत्त्यवच्छिन्नचैतन्यस्यैकत्वात्तदभिन्नतयैवैकत्वेन प्रतिपन्नस्य मृत्तिकाणुविलक्षणसंनिवेशात्मकघटरूपावच्छिन्नचैतन्यस्य घटत्वतया तदवच्छेदेन घटशब्दसंकेतसिद्ध्या तत्तद्व्यवहारोपपत्तौ सिद्धायामपि समवायेनावयवेषूत्पन्नोऽवयवातिरिक्तोऽपूर्वः कश्चिदवयवी घटशब्दवाच्य इत्येवमनृतं व्यवहारतः प्रतिपद्यन्ते, न तु सन्तमर्थम् ॥

किं बहुना? लोके हि सर्वत्रैवार्थे प्रतिपत्तिस्त्रिविधा दृष्टा—पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी चेति । पारमार्थिकी, आर्थिकी, वास्तविकीत्यनर्थान्तरम् । व्यावहारिकी, औपयौगिकी, औपचारिकीत्यनर्थान्तरम् । प्रातिभासिकी, आध्यासिकी, वैकल्पिकीत्यनर्थान्तरम् । यथा काचे स्फटिकबुद्धिराध्यासिकी, काचे काचबुद्धिरौपयौगिकी, काचे मृद्बुद्धिरार्थिकी । एवं पृथिव्यपेक्षया सूर्यस्य कूटस्थता वास्तविकी, पृथिवीं परितः सूर्यस्य वार्षिकगतिः पूर्वाभिमुखीना औपचारिकी, पृथिवीं परितः सूर्यस्य दैनंदिनगतिः पश्चिमाभिमुखीना प्रातिभासिकी—इत्येवं सर्वत्र त्रैविध्यं द्रष्टव्यम् । तत्र प्रातिभासिक्या मिथ्यात्वमेव, वास्तविक्याः सत्यत्वमेव, व्यावहारिक्याः सत्यासत्यत्वम् । अन्यथा सतोऽपि व्यवहारसिद्ध्यनुरोधेनान्यथा प्रकल्पितरूपस्य लोके उपयोगदर्शनात् ॥

एतदभिप्रायेणैव 'नानृतं वदेत्' इति प्रतिज्ञाय—"अथो खल्वाहुः—कोऽर्हति मनुष्यः सर्वं सत्यं वदितुम् । सत्यसंहिता वै देवाः, अनृतसंहिता मनुष्याः ।" इत्यैतरेयके, 'द्वयं वा इदं न तृतीयमस्ति सत्यं चैवानृतं च । सत्यं देवाः, अनृतं मनुष्याः ।' इति शतपथश्रुतौ च व्यवहारसापेक्षत्वेऽनृतनिष्ठत्वान्मनुष्यत्वम्, वस्तुतद्रूपसापेक्षत्वे तु सत्यनिष्ठत्वादेकत्वमुपदिष्टं महर्षिभिः । अत एव च—'शतं वर्षाणि जीव्यासमित्याह । तदेतन्नाद्रियेत । अपि हि भूयांसि शताद्वर्षेभ्यः पुरुषो जीवति ॥' इति शतपथश्रुतौ स्पष्टमेव लौकिक्याः प्रतिपत्तिमूलकव्यवहारस्यानादरणीयत्वमुपदिश्यते । तस्मान्नैतादृशलौकिकप्रतिपत्त्यभावमनुरुध्य कश्चिदर्थः प्रमाणसिद्धः शक्यते प्रत्याख्यातुमिति दिक् ।

अथ न स्वरूपतोऽस्मत्पक्षप्रसिद्धिः । छान्दसत्वस्यैव छन्दःपदशक्यतावच्छेदकतया तत्र तदसत्त्वानवक्लृप्तेः । न च स्यादेवमाच्छादकत्वं यदि तावच्छन्दस्त्वं मानादीनां प्रमाणसिद्धं स्यादिति वाच्यम्; 'मा च्छन्दः, प्रमा च्छन्दः प्रतिमा च्छन्दः' इति श्रुत्या

छन्दस्त्वस्य तेषु वचनतः सिद्धेः । संख्यादिपरिच्छेदे माशब्दस्य, तत्तदर्थायतनभूतायामाशयपदवाच्यायां वस्तुप्रतिष्ठायां प्रमाशब्दस्य, तुलितके च प्रतिमाशब्दस्य व्याख्यास्यमानत्वात् । नन्वेवं तर्हि तदुभयवचनप्रामाण्यान्मानत्वं प्रतिष्ठात्वं तुलितकत्वमथाच्छादकत्वं चैतानि शक्यतावच्छेदकानि स्युः ! न त्वेतावतापि मानाद्यवच्छेदानामाच्छादकत्वं सिद्ध्यतीति चेत्—न, 'यदेभिराच्छादयन् तच्छन्दसां छन्दस्त्वम्' इत्येवमादीनां छादकत्वस्यैव छन्दःपदप्रवृत्तिनिमित्तत्वमभ्युपगच्छन्तीनां श्रुतीनां छन्दःपदाभिधेयेषु तेष्ववच्छेदेष्वाच्छादकत्वस्यास्तित्वबोधने एव तात्पर्यावसायात् । तत्तर्हि कीदृगाच्छादकत्वमवच्छेदानामिष्टमिति चेत्,—नेतरदितराच्छादकधर्मादिति गृहाण । ननु च भोः—येनैव सता तद्वस्तुस्वरूपं न प्रतिपद्यते, तिरोहितं भवति, तस्मिन्नन्तर्धानप्रधाने संवरणे आच्छादनशब्दो दृष्टः । 'घटाच्छादितः प्रदीपः, वस्त्राच्छादितं द्रव्यम्, रजसाच्छादिते भानौ, 'स्तनयुगपरिणाहाच्छादिना वल्कलेन,'

> 'न हया न रथो वीर! न यन्ता मम दारुकः ।
> अदृश्यन्त शरैश्छन्नास्तथाहं सैनिकाश्च मे ॥' (म. भा. वन. २०।२४)

इत्यादिषु दीपादीनां घटादिद्रव्यैस्तिरोधानेनाप्रतिपत्तिदर्शनात् । प्रकृते पुनर्नैतदेवं दृश्यते । न चावच्छेदेन सता तदवच्छिन्नं किंचिदन्तर्धत्ते, तस्मादनाच्छादका अवच्छेदाः प्रतिपद्यन्ते—इति चेत्सत्यम् । उच्यते—न केवलमन्तर्धानमेवाच्छादनशब्दस्य विषयः, किं तर्हि बहवो विषयास्तच्छब्दस्योपलभ्यन्ते । तथा हि—'अन्नाच्छादनभागयम्', 'आच्छाद्य चार्हयित्वा च श्रुतशीलवते स्वय'मित्यादिषूपसंव्यानम् १, 'आभूषणाच्छादिताङ्गी' 'छदयति सुरलोकं यो गुणैर्यं च युद्धे सुरयुवतिविमुक्ताश्छादयन्ति स्रजश्च ।' इत्यादिषु पर्याधानम् २, 'चन्दनच्छन्नगात्रः', 'तैलाच्छन्नं कलेवरम्', 'घृताच्छन्नं व्यञ्जनम्' इत्यादिषु चर्चितकत् ३, 'मेघच्छन्नेऽह्नि दुर्दिनम्', 'कण्टकच्छन्नमार्गेषु' इत्यादिष्ववरोधः ४, 'ईशावास्यमिदं सर्वम्', 'आच्छाद्यते त्वद्यशसा समस्तम्' इत्यादिषु व्याप्तिः ५, 'छादयन्नाननं वेगैरर्दयन्नङ्गभञ्जनैः । निरुच्यते छर्दिरिति दोषो वक्त्रं प्रधावितः' ॥ (सुश्रुतः) इत्येवमादिषु दूषितकरणम् ६, 'निचितं तु हंसपक्षैः कृकवाकुमयूरसारसानां च । दौकूलेन नवेन तु समन्ततश्छादितं शुक्लम् ॥ दण्डार्धविस्तृतं दण्डमावृतं रत्नभूषितमुदग्रम् ॥ नृपतेस्तदातपत्रं कल्याणकरं विजयदं च ॥ अन्येषामुष्णघ्नं प्रसादपट्टैर्विभूषितशिरस्कम् । व्यालम्बिरत्नमालं छत्रं कार्यं च मायूरम्' ॥ (बृहत्संहिता ।) इत्येवमादिषु स्वरूपकरणम् ७, 'अग्निमन्तश्छादयसि' (अथ. ९।३।१४), 'अन्नं छादयेदाज्येन' (कात्यायनश्रौतसूत्रम् ४।६।५) इत्येवमादिषूर्जनम् ८, 'छन्ने स्थाने समासीनः' इत्यादिषु विविक्तम् ९, 'गर्गश्च गोकुले तत्र वसुदेवप्रणोदितः । प्रच्छन्न एव गोपानां संस्कारानकरोत्तयोः ॥' (विष्णुपु. ५. अं. ६ अ.) इत्यत्राविज्ञानत्वम् १०. 'गायत्रेण छन्दसा त्वा छादयामि, त्रैष्टुभेन छन्दसा त्वा छादयामि, छादयन्ति ह वा

एनं छन्दांसि पापात्कर्मणः' इत्यादिषु गोपनं च ११, इत्येवमनेके विषयाश्छादनस्य भवन्ति । न चैतेषु छायस्यान्तर्धानमेव दृष्टमथाप्यनुवर्तते स आच्छादनशब्दः । तदित्थं सिद्धेऽनैकार्थ्ये यदिदं गोपनापरपर्यायमाच्छादनं रक्षाभिप्रायं तदिहावच्छेदकानुगतं द्रष्टव्यम् ॥ अवच्छेदावच्छिन्नस्य स्वरूपतोऽप्रच्यवनेन सुगुप्तत्वात् ॥

अथान्यः प्रत्यवतिष्ठते—नेदमनैकार्थ्यं युक्तम्; प्रकरणोपलभ्यार्थे शक्तिस्वीकारानावश्यकत्वात् । वस्तुतस्तु अपवारणे छादयतिः प्रतिपन्नः । तच्च द्विविधम्—एकदिग्वर्तित्वे आवरणमथानेकदिग्वर्तित्वे संवरणं च । इदं च संवरणं वस्तुतः स्वरूपाननुगतमपि द्वेधा—पृथग्दृष्टमपृथग्दृष्टं च । तथा हि—मेघच्छत्रभित्त्यादीनामावरकत्वेनोपसंवीतघटादीनां बहिरवस्थानां दिग्देशकालसंख्यापरिमाणादीनां व्याप्यवर्तिनां च संवरकत्वेन प्रतिपत्तिः । अनेकदिग्वर्तिनोऽप्येकदिग्वर्तित्वाव्यतिरेकात् संवरणेऽप्यावरणशब्दो लब्धावसर इत्यन्यदेतत् । उभयोरेवानयोर्दृष्टिसम्बन्धप्रतिबन्धकत्वमेवाच्छादनशब्दप्रवृत्तिनिमित्तम् । प्रतिबन्धकतावच्छेदकं च दृग्दृश्यान्तरालवर्तित्वं व्यवधानापरपर्यायम् । मेघच्छन्नेऽह्नीत्यत्राहःशब्दस्याहःप्रवर्तकसूर्यपरतया सूर्यांशुपरतया वा विवक्षणात्तददर्शनं मेघावरणप्रयोज्यं द्रष्टव्यम् । ईशावास्यमित्यत्र तु नायमाच्छादनकर्मा वसिधातुः, किं तु निवासार्थः; 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'नेन्द्राहते पवते धाम किंचन' इत्यादिश्रुत्यन्तरैकवाक्यतया सर्वत्रैवास्य विद्यमानत्वे तत्तात्पर्यात् । अथवा—अस्त्वेवाच्छादनार्थः । तात्त्विकदृष्टेर्महर्षेर्यत्र यत्रैव दृष्टिः प्रवर्तते, तत्र तत्रैव परमेश्वरादन्यन्न दृश्यते—इत्येकस्य तस्य द्वैतदृष्ट्यपवारकत्वेन विवक्षणादाच्छादकत्वोपपत्तेः । एतेन 'आच्छाद्यते त्वद्यशसा समस्तम्' इत्यादयो व्याख्याताः । 'गूढालंकारवाक्येऽर्थः प्रच्छन्नः' इत्यादावप्यनुभवात्मकदृष्ट्यपवारणादेवार्थस्य तत्त्वमुपपद्यते—इति विवेक्तव्यम् । तथा च छन्नाच्छादितादीनां प्रतिबद्धदर्शनार्थकत्वादवच्छेदावच्छिन्नानां चानवरुद्धदर्शनत्वेनाभिप्रेतत्वान्नावच्छेदानाच्छादकत्वम्, अनाच्छादकत्वाच्च नावच्छेदश्छन्द इति चेत्; अत्रोच्यते—नैकान्ततस्तावद् दृगवरोधकस्यैवाच्छादकत्वं वक्तुं शक्यम्, एकान्ते स्थितवतां पुंसां छन्ने स्थाने तिष्ठाम इति प्रतिपत्तिदर्शनात् । 'न च वर्षातपात् कृच्छ्रं छत्राच्छादितवर्ष्मणः', इत्यादौ च सर्वात्मना दृश्यमानस्यापि पुंसश्छत्रच्छन्नत्वोपचारात् । एवं दृष्टिप्रतिबन्धनैरपेक्ष्येऽपि केवलं वर्षातपावश्यायाद्यवरोधकानां गृहच्छदीनां चन्द्रातपादीनां वाच्छादकत्वमुपचर्यते । अत एव च 'काचेनाच्छादिते दीपे न लब्धावसरोऽनिलः' इत्येवमादयो व्यवहारा अपि सिद्धार्थाः । तस्मादितरसंबन्धापवारकत्वमेवाच्छादकत्वमिति निष्कर्षः । विशेषधर्मावच्छिन्ने शक्तिमभ्युपगम्य विशेषान्तरे लाक्षाणिकत्वस्वीकारापेक्षया सामान्यधर्मावच्छिन्ने शक्तिस्वीकारस्य न्याय्यत्वात् । इतरत्वं च क्वचिद् दृष्टेः, क्वचित्तु नाष्ट्राख्यानां प्रतिविघातकानामर्थानाम् । तत्र दृष्टिसंबन्धापवारणे छन्नस्य गुप्तत्वमप्रकाशात्मकं गूढत्वापरपर्यायम् । दोषसंबन्धापव

---

(१) नाष्ट्रा—इति वेदमन्त्रेषु बहुधा प्रयुक्तो वैदिकशब्दः कार्यमात्रके विघ्ने रूढः.

रणे तु तस्य गुप्तत्वं नाह्याग्रहीतत्वात्मकं रक्षितत्वापरपर्यायमिति तात्पर्यभेदोऽप्यव-धीयते। तथा सावच्छेदानामप्यवच्छिन्नस्वरूपानुगततयावदवयवप्रख्यावकदोषसंबन्धाप-वारकतया सिद्धमेव स्वरूपच्छादकत्वं छन्दःशब्दप्रवृत्तौ निमित्तं द्रष्टव्यम्। दृश्यते हि केन-चिदवच्छेदेनावच्छिन्ने ऋगादौ वाग्विशेषे ब्राह्मणादावर्थविशेषे वा तत्स्वरूपोपघातकविरु-द्धावच्छेदसंबन्धापरवारणात्मकगुप्तिसाधनतया तदवच्छेदे छन्दोव्यपदेशः। इदं तु बोध्यम्—आच्छादकत्वाविशेषेऽप्येकदिग्वर्तिन्यावरणे छन्दःशब्दो नोपचर्यते। संव-रण एव छन्दतेः प्रतिपन्नत्वात्। तत्राप्यपृथग्दृष्टे व्याप्यवर्तिन्येवायं छन्दतिः प्रायेण विषयं लभते। तथा च "वासुदेव! सर्वच्छन्दक! हरिहय! हरिमेधः! महा-यज्ञ!"—इति महाभारतप्रयोगो भवति। छन्दयति संवृणोति रक्षति स रक्षक इत्य-र्थात्। तदित्थमैकार्थ्येऽपि सिद्धमवच्छेदानामाच्छादकत्वाच्छन्दस्त्वमित्यलम्॥

अथ के तेऽवच्छेदा इति विचार्यते। गुणसमवायो हि वस्तुशब्देनाख्यायते। गुणो धर्मो भाव इत्यनर्थान्तराणि। तेषां समवायश्चैकात्म्येनावस्थानम्। लोकव्य-वहारे च समवायस्य प्राधान्यात्तदनुरोधेन तदन्तःप्रविष्टानामर्थानां गुणत्वम्। समवाये चैते ध्रियन्ते तैर्वा समवायो ध्रियत इत्येषां धर्मत्वम्। तैरेव सद्भिस्तद्वस्तु तदितरवस्तुवै-लक्षण्येन भवतीत्येषां भावत्वम्। सर्वेषां वस्तुधर्माणां समवायेन सत्ताग्रहणं सत्तैव वा भावः। तात्स्थ्यात्तदनतिरेकाच्चासौ समवायोऽपि भावशब्देन सत्त्वशब्देन चोप-चर्यते—इत्यन्यदेतत्। एते वस्तुधर्माः पञ्चधा व्यवच्छिद्य गृह्यन्ते—आश्रयभावाः, प्रयोजकभावाः, स्थायिभावाः, व्यञ्जकभावाः, संचारिभावाश्चेति। तत्राश्मसंमिते वस्तु-न्यग्नेः, अप्संमिते वस्तुनि सोमस्य, वायुसंमिते वस्तुनीन्द्रस्य, तेजःसंमिते वस्तुन्या-दित्यस्यालम्बनत्वात्तस्य तस्य तत्र तत्राश्रयभावत्वम्।

"अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्।"—(ऋ. ३ अ. ३ अ. १७ सू) इति मन्त्रवर्णमनुरुध्यतां तु सर्वत्रैवाग्नेरेवाश्रयभावत्वमिति मतमेतत्।

अथ—

"सवित्रा प्रसवित्रा, सरस्वत्या वाचा, त्वष्ट्रा रूपैः, पूष्णा पशुभिः, इन्द्रेणास्मे, बृहस्पतिना ब्रह्मणा, वरुणेनौजसा, अग्निना तेजसा, सोमेन राज्ञा, विष्णुना दशम्या, देवतया प्रसूतः प्रसर्पामि॥" (वाजसनेयि. अ. १. १० य १०)

इत्येवमादिमन्त्रबोधितानां शरीरगतभिन्नभिन्नकर्माधिकारविनियुक्तानां तेषां तेषां देवानां प्रयोजकभावत्वम्।

प्रयोजकत्वं च—

"सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचं सुवन्ताम्। ते ते प्राणं सुवन्ताम्। ते ते चक्षुः सुवन्ताम्। ते ते श्रोत्रं सुवन्ताम्।"

इत्यादिमन्त्रलक्षणोदितया तत्तद्धर्मविशेषाणां प्रसेवात्मकत्वम्।

अत एव—

"सोमस्य त्वा द्युम्नेनाभिषिञ्चामि, अग्नेस्तेजसा, सूर्यस्य वर्चसा इन्द्रस्येन्द्रियेण, मित्रावरुणयोर्वीर्येण, मरुतामोजसा।" इति (तै. सं.)

एवमादिमन्त्रैः सोमाद्यधिदैवतानामध्यात्मं द्युम्नादिधर्मरूपेण परिणतावस्थत्वमेव तत्तद्धर्मप्रयोजकत्वं बोध्यते। एत एव च देवप्रयुक्ता धर्मास्तदात्मनः स्वभाव इत्युच्यते तस्य द्वैविध्यमाहोज्ज्वलदत्तः—

'बहिर्हेत्वनपेक्षी तु स्वभावोऽथ प्रकीर्तितः।
निसर्गश्च स्वभावश्च इत्येवं भवति द्विधा॥ १॥
निसर्गः सुदृढाभ्यासजन्यः संस्कार उच्यते।
अजन्यस्तु स्वतःसिद्धः स्वरूपो भाव उच्यते॥ २॥'

एतत्संस्कारात्मकनिसर्गसिद्ध्यर्थमेवाध्ययनतपश्चर्यायोगाभ्यासादिकर्माण्युपयुज्यन्त इत्यप्यवधेयम्॥ उपादानद्रव्याणि स्थायिभावाः। एवमेते त्रयो भावा उक्ताः, ते च प्राणिनामात्मभूता इष्यन्ते। तत्रापि आश्रयभावो जीवात्मा, प्रयोजकभावोऽन्तरात्मा, स्थायिभावो भूतात्मा। यस्य सत्तया यस्य सत्ता स तस्यात्मा। स च प्रत्यर्थं त्रेधेति तत्र तत्रोपेक्ष्यम्। अथ येऽनात्मभूता अप्यपृथक्भूता विशेषतो व्यभिचारिणोऽपि सामान्यतो नित्यानुगता बाह्यार्थास्ते व्यञ्जकभावा दिग्देशकालसंवित्संख्यापरिमाणसाधर्म्याणि। एत एव व्यञ्जकभावा इहावच्छेदकशब्देनेष्यन्ते। एतैरवच्छिन्नमेव किंचिद्वस्तु व्यज्यते। तत्र परिमाणं नामावयवसंनिवेशानुरोधेन जायमानमणुत्वमहत्त्वह्रस्वत्वदीर्घत्वादिरूपम्। साधर्म्यं तु समानद्रव्यगुणकर्मकत्वम्। नैतान्यवच्छेदकवस्तु किंचिदपि स्वरूपं धत्त इत्यवच्छेदकानामेषां तद्वस्तुस्वरूपस्थितिनियामकप्राणमात्रारूपाणां तद्वस्तुच्छन्दस्त्वमिष्यते। अथान्ये व्यभिचारिणः सर्वे धर्माः संचारिभावाः। यथा आर्द्रत्वोष्णत्ववेशभूषादयः सांयौगिकार्थाः। एतेऽप्यनात्मभूता एव। तेषां सत्त्वासत्त्वयोस्तद्वस्तुस्वरूपस्य तटस्थत्वात्। तदित्थं प्रत्यर्थं धर्माणां पञ्च प्रकरणानि। तत्र चतुर्थप्रकरणपदार्था अवच्छेदा इति संसिद्धम्॥

तत्र तावद्दिग्देशकालसंवित्संख्याप्राधान्येन गृहीतास्तेऽवच्छेदा इतरे गुणा वा तद्वस्तुनो व्यक्तिः। एतेषां भेदकानां भेदादेव पृथगात्मत्वोपचारात्। अथ परिमाणप्राधान्येन गृहीतास्ते तद्वस्तुन आकृतिः। एभिरेव भेदकैर्गृहीतैरस्तीदमिदमिति बुद्धौ तदाकरणात्। एवं साधर्म्यप्राधान्येन ग्रहणे ते तद्वस्तुनो जातिः। इतरकालिकेतरघटाकाराकारितान्तःकरणवृत्त्या प्रत्युत्पन्नैतद्घटाकाराकारितान्तःकरणवृत्तेः सामान्येनोदयात्तत्प्रयोजकस्य तद्वस्तुगतसाधर्म्योपलक्षितपरिमाणादेरेकत्वाभिमानात्। तत्र साधर्म्यं समानप्रसवप्रकारनिबन्धनमेवेह विवक्षितमित्यतस्तत्र जातिशब्दो रूढः। अत एव मृद्घटके गोसाजात्यनिरासः। जातिरखण्डोपाधिरिति तु केषांचिदपदार्थकल्पनामात्रम्। एतासां व्यक्त्याकृतिजातीनां समवायस्तु पदार्थः। यत्तु "धर्मविशेषप्रसू-

ाद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञा-नान्निःश्रेयसम् ।” इत्यौलूक्यसूत्रप्रामाण्याद्द्रव्यादीनां षण्णां पदार्थत्वमीक्षमाणा नव्य-नैयायिका गुणादावाकृत्याद्यसमन्वयाद् व्यक्त्याकृतिजातिसमवायस्य पदार्थत्वे विप्र-तिपद्यन्ते तदेतत्सूत्रार्थानभिज्ञानात् । द्रव्यगुणकर्मणां सत्तावतामेव सामान्यविशेषाभ्यां ये समवायास्तेषामेव पदार्थतायास्तेन सूत्रेण विवक्षणात् तदविरोधात् । दृश्यते ह्येतस्मि-न्नेवार्थे तदुत्तरयावद्ग्रन्थस्वारस्यम् । अत एव नहि षट् पदार्थाः सन्तीति शास्त्रार्थः । किंतु द्रव्ये गुणकर्माणि द्रव्यगुणकर्माणि वैकत्र समवयन्ति तस्य सत्तासत्त्वभावादिपदप्रतीन-म्यार्थस्य पदार्थत्वं द्रष्टव्यम् । स खलु भावो यद्यप्येक एव तथापि कर्मगुणादीनां सामान्यविशेषाभ्यां तारतम्यात् तदुपलक्षिताः समवाया भिद्यन्ते । तस्माद्बहवः पदार्था घटपटादयः सिद्धाः । अस्ति हि घटो वा पटो वान्यो वा द्रव्यगुणकर्मणामेव स स समवायः । तथापि केचिद्गुणा जात्याकृतिरूपाः समाना भवन्ति केचित्पुनर्व्यक्तिधर्मा विशिष्यन्ते । अत एवैकजातीया अपि ते तेऽर्थाः परस्परं भिद्यन्ते । तस्माद्द्रव्यगुणक-र्मणां समवाय एव प्रकारान्तरविवक्षायां व्यक्त्याकृतिजातीनां समवाय आख्यायते अत एव “जात्याकृतिव्यक्तयः पदार्थः”—इत्युत्तरेणौलूक्यसूत्रेणैकवाक्यता संपद्यते समवायस्तु भिन्नानामैकात्म्येनावस्थानमित्युक्तम् । तन्निरूपितैव च पदे शक्तिरभ्युप-यते—इत्यतस्तत्र पदार्थशब्दः । पदनिष्ठशक्तिनिरूपकत्वस्यैव पदार्थत्वेन विवक्षितत्वात् । अथवोपयाच्यमानत्वादर्थः । प्रयोजनम् । यमुद्दिश्य यत्प्रवर्तते स तस्यार्थः । तथा च यदर्थं पदप्रयोगः स पदार्थः । व्यक्त्याकृतिजातिसमवायं प्रत्याययितुं हि पदप्रयोग इति स पदार्थः । तासां च व्यक्त्याकृतिजातीनामुद्देशलक्षणपरीक्षाभिः स्वरूपं निरूपयितुं प्रवर्तन्ते पारमर्षसूत्राणि—

‘व्यक्त्याकृतिजातयस्तु पदार्थः । व्यक्तिर्गुणविशेषाश्रयो मूर्तिः । आकृतिर्जाति-लिङ्गाख्या । समानप्रसवात्मिका जातिः । शब्दसमूहत्यागपरिग्रहसंख्यावृद्ध्युप-चयवर्णसमासानुबन्धानां व्यक्तावुपचाराद्व्यक्तिः । आकृतिस्तदपेक्षत्वात् सत्त्व-व्यवस्थानसिद्धेः । व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ।

इति ।

तदित्थं व्यक्त्याकृतिजात्याश्रये पदार्थे बहूनां धर्माणां सद्भावेऽपि यं कंचिदेकमेवार्थ-मुपादाय तत्संबन्धानुबन्धेन गुणिनमर्थं ग्राहयितुं पदानि संकेत्यन्ते । यथा—‘मदीयः श्वेतः कृष्णकर्णो महारवस्तुरगः सुलक्षणः ।’ इत्यत्र मत्संबन्धं श्वेतरूपं कृष्णकर्णत्वं शब्दमहत्त्वं त्वरागतिं शुभलक्षणसंबन्धं च विप्रकीर्णं तं तमर्थं निमित्तीकृत्य प्रवृत्तानां तेषां शब्दानामाकाङ्क्षावशात् सामानाधिकरण्यं भासते । एवमेकमेवार्थमुपादाय द्वयोरपि छन्दश्छादकशब्दयोराकाङ्क्षाविशेषात् स्वरूपसंरक्षकत्वस्य स्वरूपतिरोभाव-कत्वस्य चान्यत्रान्यत्र विषयीकरणात् वैयधिकरण्यं भासते । तदेवमुच्चावचा पदार्थमर्यादा भवतीत्यप्यनुसंधेयम् ॥

तत्रैवं व्यक्तिभावप्रधानं दिग्देशकालसंवित्संख्यारूपमवच्छेदं परिच्छेदसीमामर्यादाभिविधिनियतिनीतिरीतिव्यवस्थामिति मानापरपर्यायं मानाभिधायिना माशब्देन, आकृतिभावप्रधानमणुत्वमहत्त्वह्रस्वत्वदीर्घत्वनियामकसंनिवेशरूपमवच्छेदं प्रतिष्ठायतनाश्रयपरिमाणप्रमाणापरपर्यायं प्रमाणाभिधायिना प्रमाशब्देन, जातिभावप्रधानं च समानद्रव्यगुणकर्मरूपमवच्छेदं साधर्म्यसामान्यसादृश्यसारूप्यतुलितकप्रतिमितिप्रतिमानापरपर्यायं प्रतिमानाभिधायिना प्रतिमाशब्देनोल्लिख्य छन्दस्त्वं विधीयते । मा च्छन्दः प्रमा च्छन्दः, प्रतिमा च्छन्द इति ।

दृश्यते च—

‘अस्तभ्नाद् द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्याः ।
आसीदद् विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ १ ॥’
‘गायत्रेण प्रतिमिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।
वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ २ ॥’

(ऋ. २ अ. ३ अ. १८ व.)

इत्यादिषु दैशिकसांख्यानिकमर्यादाभिप्रायकत्वं माशब्दस्य,

‘यस्य भूमिः प्रमा अन्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥’ (अथर्ववे.)

इत्यादिषु प्रतिष्ठाभिप्रायकत्वं प्रमाशब्दस्य,

‘संवत्सरप्रतिमा वै द्वादश रात्रयः ॥’ (ब्राह्मणम्)
‘द्वादश वै रात्रयः संवत्सरस्य प्रतिमा ॥’ (ब्राह्मणम्)

इत्यादिषु तुलितकाभिप्रायकत्वं प्रतिमाशब्दस्य ॥ तथा च मा-प्रमा-प्रतिमाशब्दैरुल्लिखितस्य त्रिविधस्याप्यवच्छेदस्य वस्तुस्वरूपसंवरकत्वेनाभिप्रेतस्य छन्दस्त्वं वचनतः सिद्धं भवति । ननु प्रमाप्रतिमयोरपि छन्दस्त्वेऽभ्युपगम्यमाने—

‘कासीत् प्रमा प्रतिमा किं निदानमाज्यं किमासीत् परिधिः क आसीत् ।
छन्दः किमासीत् प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥’

(ऋ. ८ अ. ७ अ. १८ व.)

इति मन्त्रे प्रमाप्रतिमयोश्छन्दःपार्थक्येनोपादानं विरुध्यत इति चेत्तन्न ।

“तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥
आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व [illegible] श्च विश्वे ।
इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥’

इत्येवमादिषु विशेषोपादाने सामान्यशब्दस्य विशेषेतर[illegible]ग्रहणं [illegible]स्ताप्यर्थ[illegible]म [illegible]र्थ्यात् ।

नकत्वेन वा छन्दस्त्वमिष्यते; अपि तु स्वरूपसंवरकत्वेनेति पदार्थतावच्छेदकभेदादयमनुपपत्तिः ॥

ननु 'मा च्छन्दः, प्रमा च्छन्दः, प्रतिमा च्छन्दः', 'इयं वै मा, अन्तरिक्षं प्रमा, असौ प्रतिमा, इमानेव लोकानुपधत्ते' इत्यग्निचितिमन्त्रश्रवणाल्लोकत्रयाभिप्रायतया परिभाषितैर्मा-प्रमाप्रतिमाशब्दैर्मानाद्यवच्छेदग्रहणमयुक्तमिति चेन्न । चैत्रमैत्रौ नृपतेर्हस्ताविति वत्तेषां गौणशब्दत्वात । अन्यथा—'अथ जुहूम्, अथोपभृतम्, अथ ध्रुवाम् । असौ वै जुहूः, अन्तरिक्षमुपभृत्, पृथिवी ध्रुवा । इमे वै लोकाः स्रुचः । वृष्टिः संमार्जनानि । वृष्टिर्वा इमाँल्लोकाननुपूर्वं कल्पयति । तं ततः क्लृप्ताः समेधन्ते ।' (तै. ब्रा. ३ का. ३ प्र. १ अ.) इत्यादिभिरुपचारविशेषैः स्रुगादयोऽपि स्वार्थादपभ्रंश्येरन् ॥

एवम्—

"मा छन्दः, तत्पृथिवी, अग्निर्देवता ॥ १ ॥
प्रमा छन्दः, तदन्तरिक्षम्, वातो देवता ॥ २ ॥
प्रतिमा छन्दः, तद् द्यौः, सूर्यो देवता ॥ ३ ॥
अस्रीवि छन्दः, तद्दिशः, सोमो देवता ॥ ४ ॥
विराट् छन्दः, तद्वाक्, वरुणो देवता ॥ ५ ॥
गायत्री छन्दः, तदजा, बृहस्पतिर्देवता ॥ ६ ॥
त्रिष्टुप् छन्दः, तद्धिरण्यम्, इन्द्रो देवता ॥ ७ ॥
जगती छन्दः, तद्गौः, प्रजापतिर्देवता ॥ ८ ॥
अनुष्टुप् छन्दः, तद्वायुः, मित्रो देवता ॥ ९ ॥
उष्णिहा छन्दः, तच्चक्षुः, पूषा देवता ॥ १० ॥
पङ्क्तिश्छन्दः, तत्कृषिः, पर्जन्यो देवता ॥ ११ ॥
बृहती छन्दः, तदश्वः, परमेष्ठी देवता ॥ १२ ॥"

इत्यापस्तम्बश्रौत (१६ । २८ । १) सूत्रोक्ते प्रकरणविशेषे माप्रमादिवद् विराड्गायत्र्यादीनामपि वागजाद्यभिप्रायतया प्रयोगात् समानन्यायात् प्रकृतार्थपरत्वं व्याहन्येत ।

अत एव

"सावित्रैरभ्रिमादत्ते प्रसूत्यै ।' चतुर्भिरादत्ते, चत्वारि वै छन्दांसि, छन्दोभिरेवादत्ते । अथो ब्रह्म वै छन्दांसि । ब्रह्मणैवादत्ते । इयं वै गायत्री । अन्तरिक्षं त्रिष्टुप्, द्यौर्जगती, दिशोऽनुष्टुप् । सवितृप्रसूतो वा एतेभ्यो लोकेभ्यश्छन्दोभिर्दिग्भ्यश्चाग्निं संभरति ॥" इत्यग्निचितिप्रकरणाम्नानाद् गायत्रीत्रिष्टुब्जगत्यनुष्टुभां लोकदिक्परतया प्रतिपादितानामपि नैकान्ततः स्वार्थापलापः प्रसज्यते । अत एव च "इयं वै मा-अन्तरिक्षं प्रमा—असौ प्रतिमा—इमानेव लोकानुपधत्ते ।

इत्युक्त्वा,

"अथो देवच्छन्दसानि वा एतानि, देवच्छन्दसान्येवोपधत्ते । द्वादश द्वादशाभित् उपदधाति । तत् षट्त्रिंशत् । षट्त्रिंशदक्षरा बृहती, बृहती खलु वै छन्दसां स्वाराज्यमानशे ।"

इत्यादिना लोकानां देवच्छन्दस्त्वं बृहतीच्छन्दस्त्वं चोपपादितम् । षट्त्रिंशदक्षरावच्छिन्नत्वस्यैव बृहतीपदार्थत्वाद् वाग्बृहतीवदेषां लोकानामपि तत्तदग्नीन्द्रादिदेवावच्छेदकानां तल्लक्षणलक्षितत्वेन तथा तथा व्यवहर्तुं सुशकत्वात् । तथा चेत्थं लोकानां प्रतिपन्ने छन्दस्त्वे छन्दोऽनुगतशब्दास्तत्रोपचर्यन्ते । तत्राप्यनुप्रजननसंबन्धात्, प्रक्रमसामान्याद्, अर्थयोगाच्च लोकत्रयेऽवच्छेदत्रयशब्दसंबन्धः ।

तथा हि—

"प्रजापतिरकामयत—प्रजायेयेति । स एतं दशहोतारमपश्यत् । तेन दशधात्मानं विधाय दशहोत्रातप्यत । तस्य चित्तिः स्रुगासीत्, चित्तमाज्यम् । तस्यैतावत्येव वागासीत् । एतावान् यज्ञक्रतुः । स चतुर्होतारमसृजत । सोऽनन्दत्—असृक्षि वा इममिति । तस्य सोमो हविरासीत् । स चतुर्होत्रातप्यत । सोऽताम्यत् । स भूरिति व्याहरत् । स भूमिमसृजत—अग्निहोत्रं दर्शपूर्णमासौ यजूंषि ॥ १ ॥

स द्वितीयमतप्यत । सोऽताम्यत् । स भुवरिति व्याहरत् । सोऽन्तरिक्षमसृजत । चातुर्मास्यानि सामानि । (२) स तृतीयमतप्यत । सोऽताम्यत् । स सुवरिति व्याहरत् । स दिवमसृजत । अग्निष्टोममुक्थमतिरात्रमृचः । (३) एता वै व्याहृतय इमे लोकाः । इमान् खलु वै लोकाननु प्रजाः पशवश्छन्दांसि प्राजायन्त ॥

इति तैत्तिरीयारण्यकश्रवणात् प्रथमे तपसि भूलोकमनु छन्दसः प्रथमस्य मानात्मनः, द्वितीये तपसि भुवर्लोकमनु छन्दसो द्वितीयस्य प्रमाणात्मनः, तृतीये तपसि स्वर्लोकमनु छन्दसस्तृतीयस्य प्रतिमानात्मनः प्रतिपत्तिरित्यनुप्रजननसबन्धः ॥ अतश्च यथा लोकेष्वयं प्रथमोऽन्तरिक्षं मध्यमोऽसावुत्तमस्तथावच्छेदेषु मानं प्रथमः, प्रमाणं मध्यमः, प्रतिमानमुत्तमः, इति प्रक्रमसामान्यम् । अथ दिग्देशकालसंख्यावच्छेदानां पृथिव्यायत्ततया प्रथमोपस्थिततया च तत्र माशब्दे प्रवृत्ते—'अयं वै लोको रथन्तरमसौ लोको बृहत् । अस्य वै लोकस्यासौ लोकोऽनुरूपोऽमुष्य लोकोऽनुरूपः ।' इत्यैतरेयोक्तन्यायेनैतल्लोकानुरूपेऽमुष्मिन् लोके प्रतिमाशब्दो लब्धावसर इति तत्पारिशेष्यादन्तरिक्षे प्रमाशब्दोऽवतिष्ठते । उभयोरेवानयोर्द्यावापृथिव्योरन्तरिक्षे प्रतिष्ठितत्वात्तत्र प्रमाशब्दसाद्गुण्याच्च । तदित्थं गौण्या वृत्त्या लोकपराणामप्येषां मा–प्रमा–प्रतिमाशब्दानामवच्छेदविशेषार्थत्वं न विहन्यत इति सिद्धम् ॥

तदित्थं मा–प्रमा–प्रतिमात्मकभेदत्रयभिन्नः प्राणावच्छेदोऽवच्छिन्नप्राण एव वा छन्द इति लभ्यते । तत्रास्य प्राणस्यायमवच्छेदो यैरवयवभूतैरन्यान्यैः प्राणैः प्रसाध्यते

ते प्राणश्छन्दःपरिभाषायामक्षरशब्देनाख्यायन्ते तेषां वाङ्मयप्राणानां प्रातिस्विकोऽव-च्छेदो मात्राशब्देन । कयाचिन्मात्रया नियतैरनियतैर्वा तैस्तैरक्षरैरवच्छेदसिद्धौ तदवच्छेद-काक्षरसंख्याभेदाच्छन्दांसि भिद्यन्ते । यथाष्टाक्षरा गायत्री, एकादशाक्षरा त्रिष्टुप् , द्वादशाक्षरा जगती चेत्यादीनि । तत्रैतान्यक्षराणि वाचिकच्छन्दसि वाचिका एव प्राणा भवन्ति । आर्थिके तु छन्दस्यार्थिकाः प्राणाः । प्रसिद्धानि खलु वाचिकान्यक्षराणि, आर्थिकान्युदाहरामः—तथा हि शतपथश्रुतावग्निरग्निरूपाया अस्याः पृथिव्याः पृथिवीप्राणरूपस्याग्नेश्च पृथग् पृथग् गायत्रीत्वमुपपादयितुमित्थमाम्नायते—(६ प्र. १।२।३६)

"प्रजापतिर्वा इदमग्र आसीदेक एव । सोऽकामयत—बहु स्यां प्रजायेयेति । सोऽश्राम्यत् । स तपोऽतप्यत । तस्माच्छ्रान्तात् तेपानादापोऽसृज्यन्त ॥ १ ॥ तस्मात्पुरुषात्तप्तादापो जायन्ते । आपोऽब्रुवन्—क्व वयं भवामेति । तप्यध्वमित्यब्रवीत् । ता अतप्यन्त । ताः फेनमसृजन्त ॥ २ ॥ तस्मादपां तप्तानां फेनो जायते । फेनोऽब्रवीत्—क्वाहं भवानीति । तप्यस्वेत्यब्रवीत् । सोऽतप्यत । स मृदमसृजत ॥ ३ ॥ एतद्वै फेनस्तप्यते—यदप्स्वावेष्टमानः प्लवते । स यदोपहन्यते मृदेव भवति । मृदब्रवीत् क्वाहं-भवानीति । तप्यस्वेत्यब्रवीत् । सातप्यत । सा सिकता असृजत ॥ ४ ॥ एतद्वै मृत्तप्यते—यदेनां विकृषन्ति तस्माद्यद्यपि सुमार्त्स्नं विकृषन्ति सैकतमिवैव भवति (एतावन्नु तद् यत् क्वाहं भवानि क्वाहं भवानीति ।) सिकताभ्यः शर्करामसृजत ॥ ५ ॥ तस्मात् सिकताः शर्करैवान्ततो भवति । शर्कराया अश्मानम् ॥ ६ ॥ तस्माच्छर्कराश्मैवान्ततो भवति । अश्मनोऽयः ॥ ७ ॥ तस्मादश्मनोऽयो धमन्ति । अयसो हिरण्यम् ॥ ८ ॥ तस्मादयो बहु ध्मातं हिरण्यसंकाशमिवैव भवति ॥ ९ ॥ तद् यदसृज्यत । अक्षरत् तत् । यदक्षरत् तस्मादक्षरम् । यदष्टौकृत्वोऽक्षरत् । सैवाष्टाक्षरा गायत्र्यभवत् । अभूद्वा इयं प्रतिष्ठेति । तद्भूमिरभवत् । तामप्रथयत् । सा पृथिव्यभवत् । तस्यामस्यां प्रतिष्ठायां भूतानि च भूतानां च पतिः संवत्सरायादीक्षन्त । भूतानां पतिर्गृहपतिरासीदुषाः पत्नी । तद्यानि तानि भूतानि, ऋतवस्ते ॥ १० ॥अथ यः स भूतानां पतिः संवत्सरः सः । अथ या सोषाः पत्नी, औषसी सा । तानीमानि भूतानि स भूतानां च पतिः संवत्सरः उषसि रेतोऽसिञ्चन् । स संवत्सरे कुमारोऽजायत ॥ ११ ॥ सोऽरोदीत् । तं प्रजापतिरब्रवीत् । कुमार, किं रोदिषि, यच्छ्रमात्तपसोऽधिजातोऽसीति ॥ १२ ॥ सोऽब्रवीत्—अनपहतपाप्मा वा अस्मि—अविहितनामा, नाम मे धेहीति । तस्मात् पुत्रस्य जातस्य नाम कुर्यात् । पाप्मानमेवास्य तदपहन्ति । अपि द्वितीयम् , अपि तृतीयम् । अभिपूर्वमेवास्य तत् पाप्मानमपहन्ति ॥ १३ ॥ तमब्रवीत्—रुद्रोऽसीति । तद्यदस्य तन्नामाकरोत्—अग्निस्तद्रूपमभवत् । अग्निर्वै रुद्रः । यदरोदीत्—तस्माद्रुद्रः ॥ १४ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—सर्वोऽसीति । तद्यदस्य तन्नामाकरोत् । आपस्तद्रूपमभवत् । आपो वै

सर्वः । अन्नो हीदं सर्वं आयदं ॥ १५ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—पशुपतिरसीति । तद्यदस्य तन्नामाकरोत् । ओषधय-स्तद्रूपमभवन् । ओषधयो वै पशुपतिः । तस्माद्यदा पशव ओषधीर्लभन्तेऽथ पतीयन्ति ॥ १६ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—उग्रोऽसीति । तद्यदस्य तन्नामाकरोत् । वायुस्तद्रूपमभवत् । वायुर्वा उग्रः । तस्माद्यदा बलवद्वात्युग्रो वातीत्याहुः ॥ १७ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—अशनिरसीति । तद्यदस्य तन्नामाकरोत्—विद्युत्तद्रूपमभवत् । विद्युद्वा अशनिस्तस्माद्यं विद्युद्धन्ति, अशनिरवधीदित्याहुः ॥ १८ ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—भवोऽसीति । तद्यदस्य तन्नामाकरोत् पर्जन्यस्तद्रूपमभवत् । पर्जन्यो वै भवः । पर्जन्याद्धीदं सर्वं भवति ॥ १९ ॥ सोऽब्रवीत्—ज्यायान्वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—महान् देवोऽसीति । तद्यदस्य तन्नामाकरोत् चन्द्रमास्तद्रूपमभवत् । प्रजापतिर्वै चन्द्रमाः, प्रजापतिर्वै महान्देवः ॥ २० ॥ सोऽब्रवीत्—ज्यायान् वा अतोऽस्मि धेह्येव मे नामेति । तमब्रवीत्—ईशानोऽसीति । तद्यदस्य तन्नामाकरोत् आदित्यस्तद्रूपमभवत् । आदित्यो वा ईशानः । आदित्यो ह्यस्य सर्वस्येष्टे ॥ २१ ॥ सोऽब्रवीत्—एतावान् वा अस्मि मामेतः परो नाम धा इति । तान्येतान्यष्टावग्निरूपाणि । कुमारो नवमः । सैवाग्नेस्त्रिवृत्ता । यद्वेवाष्टावग्निरूपाणि । अष्टाक्षरा गायत्री तस्मादाहुर्गायत्रोऽग्निरिति । सोऽयं कुमारो रूपाण्यनुप्राविशन्नवा अग्निं कुमारमिव पश्यन्त्येतान्येवास्य रूपाणि पश्यन्त्येतानि हि रूपाण्यनुप्राविशत् ॥ २२ ॥"

इत्येतावता महता प्रबन्धेनामीभिरप्फेनमृत्सिकताशर्कराश्मायोहिरण्यरूपैरष्टाभिरक्षरैः परिच्छेदादमुष्याः पृथिव्या भूतगायत्रीत्वमञ्जसोपपादितम् । एवं पृथ्वीजलतेजोवाय्वाकाशसूर्यचन्द्रयजमानरूपैरष्टाभिरक्षरैः परिच्छेदादमुष्याग्ने रुद्रकुमारस्य भूतगायत्रीत्वमञ्जसैवोपपादितम् । एवमेवैतच्छ्रुतितात्पर्यानुसारिभिरन्यत्राप्यार्थिकप्राणानामक्षरत्वमभ्युपगम्य ततः परिच्छेदादन्यान्या गायत्र्यः प्रतिपाद्यन्ते । यथा हि महाभारते भीष्मपर्वणि—

'सिंहा व्याघ्रा वराहाश्च महिषा वारणास्तथा ।
ऋक्षाश्च वानराश्चैव सप्तारण्याः स्मृता नृप ॥
गौरजाविमनुष्याश्च अश्वाश्वतरगर्दभाः ।
एते ग्राम्याः समाख्याताः पशवः सप्त साधुभिः ॥
एते वै पशवो राजन् ग्राम्यारण्याश्चतुर्दश ।
वेदोक्ताः पृथिवीपाल येषु यज्ञाः प्रतिष्ठिताः ॥
उद्भिज्जाः स्थावराः प्रोक्तास्तेषां पञ्चैव जातयः ।
वृक्षगुल्मलतावल्ल्यस्त्वक्सारास्तृणजातयः ॥

तेषां विंशतिरेकोना महाभूतेषु पञ्चसु ।
चतुर्विंशतिरुद्दिष्टा गायत्री लोकसंमता ॥
य एतां वेद गायत्रीं पुण्यां सर्वगुणान्विताम् ।
तत्त्वेन भरतश्रेष्ठ स लोके न प्रणश्यति ॥'

इत्यादिना प्रबन्धेन पञ्चभिरचेतनजातीयैः, पञ्चभिश्चान्तश्चैतन्यजातीयैः स्थावरसंज्ञैः, तथा चतुर्दशभिश्चेतनजातीयैः प्राणिभिरवच्छेदाच्चतुर्विंशत्यक्षरा लोकगायत्री समाख्याता ॥

एवमेवान्यत्रान्यत्र सर्वत्रापि छन्दोव्यवहारः श्रौतः स्मार्तो वा सर्वोऽपि वाचिकाक्षरानुरूप्येणार्थिकाक्षरावच्छेदान्मा–प्रमा–प्रतिमात्मकभेदत्रयभिन्नः समर्थनीयः । तत्र च वाचिकाक्षरसंख्यानानां लक्षणत्वम्, आर्थिकाक्षरसंख्यानानां च लक्ष्यत्वं सर्वत्र समुन्नेयम् । एतेन सर्व एवात्रत्यप्रश्नग्रन्थोक्ता वैदिकनिदर्शनास्थानाश्छन्दोव्यवहारा व्याख्याताः । विषुवाहोरात्रवृत्तस्य बृहतीच्छन्दस्त्वम्, ततो दक्षिणतः क्रमेण ह्रसितानां त्रयाणामहोरात्रवृत्तानामनुष्टुबुष्णिग्गायत्रीत्वम्, विषुवादुत्तरतश्च क्रमेण दीर्घाणां त्रयाणामहोरात्रवृत्तानां पङ्क्तित्रिष्टुब्जगतीत्वं च पूर्वोक्तप्रकारेणैवाभिप्रेत्य सप्तानामेषां छन्दःसंज्ञानां सूर्याश्वत्वमाख्यायते । 'प्रजापतेरक्ष्यश्वयत् । तदश्वोऽभवत्' इति श्रुत्या सूर्यरथसमाविष्टानां चक्रस्थानां तेषामहोरात्रवृत्तानामेव सूर्याश्वत्वात् । तदेतत्सर्वं वेदसमीक्षायां विस्तरतः समाख्याय स्पष्टीकृतमिति ततोऽवलोक्यम् ॥ इह तु मा–प्रमा–प्रतिमात्मकभेदत्रयभिन्नः प्राणावच्छेदोऽवच्छिन्नप्राणोऽपि वा छन्द इत्येतत् तावत् सर्वच्छन्दोरहस्यं सिद्धान्ततो व्याख्यातमिति दिक् ॥

नन्वेवमप्येतदपर्याप्तं छन्दोलक्षणमाख्यायते—

'वासो अग्ने विश्वरूपं संव्ययस्व विभावसो ॥' इति,

'छन्दांसि वा अग्नेर्वासः । छन्दांस्येषवस्ते । छन्दोभिरेवैनं परिददाति' ।

इति मैत्रायणीयश्रुतावग्न्याच्छादनत्वेनाभिप्रेतस्यार्थस्य, (१)

'छन्दांसि वै संवेश उपवेशः'

इति तैत्तिरीयश्रुतौ संप्राप्यावस्थानस्य, तत्रैवासनस्य चार्थस्य, (२)

'शिल्पानि शंसन्ति देवशिल्पानि । एतेषां वै शिल्पानामनुकृतीह शिल्पमधिगम्यते । हस्ती कंसो वासो हिरण्यमश्वतरी रथः शिल्पम् । यदेव शिल्पानी ३, आत्मसंस्कृतिर्वाव शिल्पानि—छन्दोमयं वा । एतैर्यजमान आत्मानं संस्कुरुते ॥' इत्यैतरेयश्रुतौ शिल्पभूतस्यार्थस्य च (३) मानाद्यवच्छेदविलक्षणस्यापि छन्दस्त्वेन प्रतिज्ञानात् । इति चेत् । अत्रोच्यते—दैवतकाण्डे निरुक्ते भगवता यास्केन भक्तिसाहचर्यनिर्वचनावसरे—'यत्र किंचिद्दार्ष्टिविषयिकं तदग्नेः कर्म' इत्येवं प्रतिजानानेन दार्ष्टिविषयिकाणां स्थानावरोधकानां सर्वेषामेवार्थानामग्निप्रधानत्वप्रतिबोधनात् तत्स्वरूपावच्छेदकानां दिग्देशकालसंख्यानानामेवानात्मधर्माणां छन्दस्त्वेनाभिप्रेतानामाच्छादकत्वसाधने मैत्रायणीयश्रुतेस्ता-

...तात्पर्यमुपलभ्यते ॥ १ ॥ संवेशोपवेशयोरप्यवयवसंनिवेशरूपतया तैत्तिरीयश्रुतेरपि ...रिमाणावच्छेदतात्पर्यकत्वमेवावसीयते ॥ २ ॥

• अथ शिल्पं द्वेधा—अपूर्वकौशलकरणम्, प्रतिरूपकरणं च। यत्र प्रकृतिदृष्टस्यार्थस्य भूयसा वैरूप्यमेव संसाधयितुमिष्यते तदाद्यम्। यत्र तु प्रकृतिदृष्टस्यार्थस्य भूयसानुरू-प्यमेव ससाधयितुमिष्यते तद्द्वितीयम् ॥ तत्र—

'येभिः शिल्पैः पप्रथानामदृंहद् येभिर्द्यामभ्यपिंशत् प्रजापतिः।
येभिर्वाचं विश्वरूपां समव्ययत् तेनेममग्न इह वर्चसा समङ्धि ॥
येभिरादित्यस्तपति प्रकेतुभिः सूर्यो ददृशे चित्रभानुः।
येभिर्वाचं पुष्कलेभिरव्ययत् तेनेममग्न इह वर्चसा समङ्धि ॥
यत्ते शिल्पं कश्यपं रोचनावद् इन्द्रियावत् पुष्कलं चित्रभानुः।
यस्मिन् सूर्या अर्पिताः सप्त साकं तस्मिन् राजानमधिविश्रयेमम् ॥'

इति मन्त्रवर्णकसिद्धमाद्यप्रकारं शिल्पं दैशिकावच्छेदरूपं वा स्यात्परिमाणावच्छेदरूपं वेति माप्रमयोरेवान्तर्भावः। यत्तु 'यद्वै प्रतिरूपं तच्छिल्पम्' (३।२।१।५) इति शतपथश्रुतिबोधितमनुकरणलक्षणं द्वितीयं शिल्पं तत्पुनः प्रतिमानावच्छेदान्नातिरिच्यत इति सिद्धं माप्रमाप्रतिमातिरिक्तस्यार्थस्य छन्दस्त्वं नास्तीति ॥

नन्वेवमपि परिच्छेदप्रतिष्ठातुलितकातिरिक्तस्यार्थस्य सर्वथा छन्दस्त्वं नास्तीत्यनवक्लृप्तम् ॥—छन्दोविशेषाणां गायत्र्यादीनामेवमर्थव्यतिरेकेणैवाद्यापि भूयसोपचारदर्शनात्

(१) तथा हि—

"स वा एति च प्रेति चान्वाह। गायत्रीमेवैतदर्वाचीं च पराचीं च युनक्ति। परा-च्येह देवेभ्यो यज्ञं वहति अर्वाची मनुष्यानवति। तस्माद्वा एति च प्रेति चान्वाह ॥ १ ॥ यद्वेवेति च प्रेति चान्वाह। प्रेति वै प्राणः, एत्युदानः। प्राणोदानावेवैतद्दधाति। तस्माद्वा एति च प्रेति चान्वाह ॥ २ ॥ यद्वेवेति च प्रेति चान्वाह। प्रेति वै रेतः सिच्यते, एति प्रजायते। प्रेति पशवो वितिष्ठन्ते, एति समावर्तन्ते। सर्वं वा इदमेति च प्रेति च। तस्माद्वा एति च प्रेति चान्वाह ॥ सोऽन्वाह—'प्रवो वाजा अभिद्यव' इति तन्नु प्रेति भवति। 'अग्न आयाहि वीतये' इति, तद्वेति भवति ॥"

इति शतपथश्रुत्या एतिप्रेतिक्रियोपलक्षितस्यार्थस्य गायत्रीत्वमाख्यायते ॥ १ ॥

(२) एवमेव—

'गायत्र्या ब्राह्मणं निरवर्तयत्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम्, न केनचिच्छ-न्दसा शूद्रं निरवर्तयत्" इति,

'गायत्रो वै ब्राह्मणः। त्रैष्टुभो वै राजन्यः। जागतो वै वैश्यः ॥' इति,

'इन्द्रो वै देवतया क्षात्रियो भवति, त्रैष्टुभश्छन्दसा, पञ्चदशस्तोमेन, सोमो राज्येन राजन्यो बन्धुना' इति च।

एवमादिभिरैतरेयादिश्रुतिभिश्च संस्कारस्य छन्दस्त्वं सुप्रतिपद्यते ।

"प्रकृतिविशिष्टं चातुर्वर्ण्यं संस्कारविशेषाच्च 'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥' इति निगमो भवति । 'गायत्र्या छन्दसा ब्राह्मणमसृजत्, त्रिष्टुभा राजन्यम्, जगत्या वैश्यम्, न केनचिच्छन्दसा शूद्रम् ॥' इत्यसंस्कार्यो भवति । त्रिवेव निगमः स्यात्सर्वेषाम्" इति वसिष्ठस्मरणे वाक्यशेषाद् ब्राह्मणादिविषयाणां संस्कारविशेषाणामेव गायत्र्यादित्वेनावधारणीयत्वात् ॥

'न शूद्रे पातकं किंचिन्न च संस्कारमर्हति' इति मनुस्मरणे छन्दःप्रातिनिध्येन संस्कारशब्दप्रयोगाच्च ॥ न च

'शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः ।
न केनचित्समसृजच्छन्दसा तं प्रजापतिः ॥'

इति मनुयमादिस्मरणे छन्दःशब्दस्य मन्त्रपरतया व्याख्यानात्—

'अयमेव विधिः प्रोक्तः शूद्राणां मन्त्रवर्जितः ।
अमन्त्रस्य तु शूद्रस्य विप्रो मन्त्रेण गृह्यते ॥'

इति मरीचिवचने छन्दःप्रातिनिध्येन मन्त्रशब्दप्रयोगाच्च संस्कारपरत्वं दुर्वचमिति भ्रमितव्यम् ॥ संस्कारगुणभूतस्य मन्त्रस्य ब्राह्मणत्वादिप्रयोजकत्वप्रतिपत्त्यपेक्षया तत्तन्मन्त्रोपलक्षितसंस्कारस्यैव तदौचित्यात् ॥ मनुवचने हि पूर्वार्धे शूद्रत्वस्योद्देश्यतावच्छेदकतयोत्तरार्धे पुनर्विधेयतावच्छेदकतया समानप्रतिपत्त्यभावेन तत्र छन्दःशब्दस्य मन्त्रपरत्वे मानाभावाच्च । मरीचिवचनेऽप्यमन्त्रस्य तस्य मन्त्रोपलक्षितसंस्कारायोग्यस्येत्येवार्थो युक्तियुक्तः शक्यते प्रतिपत्तुम् । अत एव

'चित्रकर्म यथानेकै रागैरुन्मील्यते शनैः ।
ब्राह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकैः ॥'

इत्येवमङ्गिरसा तत्तन्मन्त्रोपलक्षितसंस्कारस्यैव ब्राह्मण्यप्रयोजकत्वं स्मर्यते । तस्मात्सिद्धं छन्दःशब्दस्य संस्कारपरत्वम् ॥ २ ॥

(३) एवमेव—

"तेजो वै ब्रह्मवर्चसं गायत्री । ब्रह्म गायत्री । ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । क्षत्रं त्रिष्टुप् । जागताः पशवः । इषमूर्जं रयिः पुष्टिश्च ॥" इति भूयसा तेजःप्रभृतिषु तत्तदर्थविशेषेषु गायत्र्याद्युपचारेण द्रविणं छन्द इष्यते ॥ ३ ॥

तदित्थमागत्यप्रतिगच्छदर्थानां संस्काराणां द्रविणानां चानन्तर्भावादपर्याप्तमेतच्छन्दोलक्षणं मन्यामहे । इति चेत् ।

उच्यते—आगत्यप्रतिगच्छदर्थानां गायत्रीत्वं तावद्द्वेधा प्रतिपद्यते—देवतासाहचर्यभक्त्या च देवताहर्भक्त्या च । तदेतद्विज्ञानसौकर्याय यास्कनिरुक्तं देवतानां भक्तिसाहचर्यं तावद्व्याख्यास्यामः—

तिस्र एवैता देवता भवन्ति पृथिवीस्थानोऽयमग्निः, अन्तरिक्षस्थानोऽयमिन्द्रः, द्युस्थानोऽयमादित्यश्च । अग्नीन्द्रादित्या अग्निवायुसूर्या इत्यनर्थान्तरम् ।

नव नव चैतासां प्रत्येकं विभक्तयः—लोकः, सवनम्, ऋतुः, छन्दः, स्तोमः, साम, समनुगता देवाः, संस्तविका देवाः, कर्म चेति भेदात् ।

तत्र तावदग्निभक्तीनि—

१ अयं लोकः, २ प्रातःसवनम्, ३ वसन्तऋतुः, ४ गायत्री छन्दः, ५ त्रिवृत् स्तोमः, ६ रथन्तरं साम, ७ प्रथमे स्थाने समाम्नाता देवगणाः, प्रथमस्थानीयाः स्त्रियश्च, ८ इन्द्रः, सोमः, वरुणः, पर्जन्यः, ऋतव इत्येते संस्तविका देवाः, हविरप्याग्नावैष्णवमाग्नापौष्णं च ॥ ९ अथ यच्च किंचिद्दार्ष्टिविषयिकं तत्सर्वमग्नेः कर्म हविषां वहनं च देवतानामावाहनं च ॥

अथेन्द्रभक्तीनि—

१ अन्तरिक्षलोकः, २ माध्यंदिनसवनम्, ३ ग्रीष्मऋतुः, ४ त्रिष्टुप् छन्दः, ५ पञ्चदशः स्तोमः, ६ बृहत् साम, ७ मध्यमे स्थाने समाम्नाता देवगणाः, मध्यमस्थानीयाः स्त्रियश्च, ८ अग्निः, सोमः, वरुणः, पूषा, बृहस्पतिः, ब्रह्मणस्पतिः, पर्वतः, कुत्सः, विष्णुः, वायुः इत्येते संस्तविका देवाः । मित्रो वरुणेन संस्तूयते, पूष्णा रुद्रेण च सोमः, अग्निना च पूषा, वातेन च पर्जन्यः संस्तूयते ॥ ९ अथ या च का च बलकृतिः सर्वं तदिन्द्रस्य कर्म, रसानुप्रदानं च वृत्रवधश्च ॥

अथादित्यभक्तीनि—

१ असौ लोकः, २ तृतीयसवनम्, ३ वर्षाऋतुः, ४ जगती च्छन्दः, ५ सप्तदश स्तोमः, ६ वैरूपं साम, ७ उत्तमे स्थाने समाम्नाता देवगणाः, उत्तमस्थानीयाः स्त्रियश्च ८ चन्द्रमसा वायुना संवत्सरेणेति संस्तवः ॥ ९ अथ यच्च किंचित् प्रवह्लितं तत्सर्वमादित्यस्य कर्म, रसादानं रश्मिभिश्च रसाधारणम् ॥

भक्तिशेषः—

एतेष्वेव स्थानव्यूहेषु ऋतुच्छन्दः स्तोमपृष्ठस्य भक्तिशेषमनुकल्पयीत । शरदृतुः, अनुष्टुप्छन्दः, एकविंशः स्तोमः, वैराजं साम इति पृथिव्यायतनानि । हेमन्तऋतुः, पङ्क्तिश्छन्दः, त्रिणवः स्तोमः, शाक्वरं साम इत्यन्तरिक्षायतनानि । शिशिरऋतुः, अतिच्छन्दाश्छन्दः, त्रयस्त्रिंशः स्तोमः, रैवतं साम इति द्युभक्तीनि ॥

इतीत्थंभूतया देवतासाहचर्यभक्त्या यावतामेव दार्ष्टिविषयिकाणामर्थानां देवागमनप्रतिगमनादीनां च कर्मणां गायत्रीच्छन्दोवदग्निभक्तित्वेनाभ्युपपत्तौ सिद्धमेवागत्यप्रतिगच्छदर्थानां गायत्रीत्वेन गायत्रीत्वम्, ब्रह्मणो वाचो गायत्रत्वेन गायत्रीत्ववत् । अथैवं देवतानां भक्त्या दशाहप्रतिपत्तिमैतरेयसमाम्नातां व्याख्यास्यामः—

अग्निः १

प्रथममहर्वहति । त्रिवृत्स्तोमः, रथन्तरं साम, गायत्रीच्छन्दः । एति च प्रेति च

युक्तवत्, रथवत्, आशुमत्, पिबवत्, प्रथमपदनिरुक्ता देवता, अयं लोकोऽभ्युदितः, राथन्तरम्, गायत्रम्, करिष्यत्। एतानि प्रथमस्याह्नो रूपाणि ॥

इन्द्रः २

द्वितीयमहर्वहति। पञ्चदशः स्तोमः, बृहत्साम, त्रिष्टुप्छन्दः। नेति न प्रेति, यत् स्थितम्, ऊर्ध्ववत्, प्रतिवत्, अन्तर्वत्, वृषण्वत्, वृधन्वत्, मध्यमपदनिरुक्ता देवता, अन्तरिक्षमभ्युदितम्, बार्हतम्, त्रैष्टुभम्, कुर्वत्। एतानि द्वितीयस्याह्नो रूपाणि ॥

विश्वेदेवाः ३

तृतीयमहर्वहन्ति। सप्तदशः स्तोमः, वैरूपं साम, जगतीच्छन्दः। समानोदर्कम्, अश्ववत्, अन्तर्वत्, पुनरावृत्तम्, पुनर्निवृत्तम्, रथवत्, पर्यस्तवत्, त्रिवत्, अन्तरूपम्, उत्तमपदनिरुक्ता देवता, असौ लोकोऽभ्युदितः, वैरूपम्, जागतम्, कृतम्। एतानि तृतीयस्याह्नो रूपाणि ॥

वाक् ४

चतुर्थमहर्वहति। एकविंशः स्तोमः, वैराजं साम, अनुष्टुप्छन्दः। एति च प्रेति च। युक्तवत्, रथवत्, आशुमत्, पिबवत्, प्रथमपदनिरुक्ता देवता, अयं लोकोऽभ्युदितः, जातवत्, धनवत्, शुक्रवत्, वाचोरूपम्, वैमदम्, विरिफितम्, विच्छन्दाः, ऊनातिरिक्तम्, वैराजम्, आनुष्टुभम्, करिष्यत्। एतानि चतुर्थस्याह्नो रूपाणि ॥

गौः ५

पञ्चममहर्वहति। त्रिणवः स्तोमः, शाक्वरं साम, पङ्क्तिश्छन्दः। नेति न प्रेति, यत् स्थितम्, ऊर्ध्ववत्, प्रतिवत्, अन्तर्वत्, वृषण्वत्, वृधन्वत्, मध्यमपदनिरुक्ता देवता, अन्तरिक्षमभ्युदितम्, दुग्धवत्, ऊधवत्, धेनुमत्, पृश्निमत्, मद्वत्, पशुरूपाम् ॥

अध्यासवत्,	(विक्षुद्रा इव हि पशवः)
जागतम्,	(जागता हि पशवः)
बार्हतम्,	(बार्हता हि पशवः)
पाङ्क्तम्	(पाङ्क्ता हि पशवः)
वामम्	(वामं हि पशवः)
हविष्मत्	(हविर्हि पशवः)
वपुष्मत्	(वपुर्हि पशवः)

शाक्वरम्, पाङ्क्तम्, कुर्वत्। एतानि पञ्चमस्याह्नो रूपाणि ॥

द्यौः ६

षष्ठमहर्वहति। त्रयस्त्रिंशः स्तोमः, रैवतं साम, अतिच्छन्दाश्छन्दः। समानोदर्कम्, अश्ववत्, अन्तर्वत्, पुनरावृत्तम्, पुनर्निवृत्तम्, रथवत्, पर्यस्तवत्,

त्रिवृत्, अन्तरूपम्, उत्तमपदनिरुक्ता देवता, असौ लोकोऽभ्युदितः, [illegible], सप्तपदम्, नाराशंसः, नाभानेदिष्ठम्, रैवतम्, अतिच्छन्दाः, कृतम्। एतानि षष्ठस्याह्नो रूपाणि ॥

७ एति च प्रेति च, युक्तवत्, रथवत्, आशुमत्, पिबवत्, प्रथमपदनिरुक्ता देवता, अयं लोकोऽभ्युदितः, जातवत्, अनिरुक्तं करिष्यत्। एतानि सप्तमस्याह्नो रूपाणि ॥

८ नेति न प्रेति, यत् स्थितम्, ऊर्ध्ववत्, प्रतिवत्, अन्तर्वत्, वृषण्वत्, वृधन्वत्, मध्यमपदनिरुक्ता देवता, अन्तरिक्षमभ्युदितम्, द्व्यभि, महद्वत्, द्विहूतवत्, पुनर्वत्। एतान्यष्टमस्याह्नो रूपाणि ॥

९ समानोदर्कम्, अश्ववत्, अन्तर्वत्, पुनरावृत्तम्, पुनर्निवृत्तम्, रथवत्, पर्यस्तवत्, त्रिवृत्, अन्तरूपम्, [illegible]पदनिरुक्ता देवता, असौ लोकोऽभ्युदितः, शुचिवत्, सत्यवत्, क्षेतिवत्, गतवत् [illegible], कृतम्। एतानि नवमस्याह्नो रूपाणि ॥

इदं नवरात्रम्।

१० पृष्ठ्यं षडहमुपर्यन्ति। मुखमिव पृष्ठ्यः षडहः। यथान्तरं मुखस्य जिह्वा, तालु, दन्ताः, एवं छन्दोमाः। अथ येनैव वाचं व्याकरोति येन स्वादु चास्वादु च विजानाति तद्दशममहः। नासिके इव पृष्ठ्यः षडहः—यथान्तरं नासिकयोरेवं छन्दोमा। अथ येनैव गन्धान् विजानाति तद्दशममहः। अक्षीव पृष्ठ्यः षडहः। यथान्तरमक्ष्णः कृष्णमेवं छन्दोमा। अथ यैव कनीनिका येन पश्यति तद्दशममहः। कर्ण इव सः—यथान्तरं कर्णस्य एवं छन्दोमा। अथ येनैव शृणोति तद्दशममहः। श्रीर्दशममहः ॥

इतीत्थं दशाहप्रतिपत्तिः श्रूयते। एतत्पदार्थनिरूपणं च **वेदसमीक्षायां** साधु कृतमिति ततः स्पष्टमवगंस्यते। इह तु सर्वेषामेवार्थानां त्रैविध्येनाभ्युपगमादभ्यहोरूपतया सिद्धमेवागत्यप्रतिगच्छदर्थानां समानभक्त्या गायत्रीत्वमित्यवगम्यते ॥

अथ संस्कारो द्रष्टव्यः। कस्यचित् कस्मिंश्चित् कर्मणि योग्यतासंपादनं हि संस्कारः। तत्रेधा—दोषापनोदनेन, अतिशयाधानेन, हीनाङ्गपूरणेन च। एभिः संस्कारैस्तत्तदर्थस्यादुष्टत्वं विशिष्टत्वं स्वरूपसत्त्वं च संसिद्धं भवति। अस्ति स संस्कारो यदभावे स्वरूपसन्नप्यसौ ब्राह्मणोऽधमतामेति न तु ब्राह्मण्यादपैति। तस्याप्ययोग्यत्वं कर्मविशेषे। प्रतिबन्धकसंनिधानेन कारणतानिरासादिति तदर्थः स संस्कारः शोधकः ॥ १ ॥ अस्ति च स संस्कारो यदभावे स्वरूपसन्नप्यसौ ब्राह्मणो नोत्तमतामेति न तु ब्राह्मण्यादपैति। तस्याप्ययोग्यत्वं कर्मविशेषे। सहकारिसंनिधानाभावेन कारणतानिरासादिति तदर्थः स संस्कारो विशेषकः ॥ २ ॥ एवमस्ति स संस्कारो यदभावे ब्राह्मण्यं नोपतिष्ठते, ब्राह्मण्यादपेतश्च कर्मविशेषायोग्यो भवति। कारणासंनिधानादिति तदर्थः स संस्कारो भावकः ॥ ३ ॥ एषु च संस्कारशब्दस्य करणव्युत्पत्त्या संस्कारजनकक्रियापरत्वं द्रष्टव्यम् ॥

तत्र गर्भाधानं तावत्स्वरूपसंपादनोद्देशेन सहधर्मचारिणीक्षेत्रे गर्भाशयरूपे शारीराग्निसमीपे वा संस्कार्यस्य संस्थापनं, सोऽयं गर्भभावकः संस्कारो द्रष्टव्यः। तथा च गर्भाधानपुंसवनसीमन्तोन्नयनकर्माणि तत्र गर्भे ब्रह्मभावयोग्यतारूपातिशयाधायकत्वाद् विशेषकसंस्कारा भवन्ति। 'गर्भाधानवदुपेतो ब्रह्मगर्भं संदधाति। पुंसवनात् पुंसीकरोति, फलस्नपनान्मातापितृजं पाप्मानमपोहति।' इति हारीतस्मरणात्। त एतेऽन्तर्गर्भसंस्कारा उच्यन्ते। ततो बहिःशालायामिव गृहोदरबहिर्भूते गर्भे शुक्रशोणितोपगतदोषमार्जकत्वादुत्तरे जातकर्म—नामकर्म—निष्क्रमा—न्नप्राशन—कर्णवेध—मुण्डन—स्नानादीनि कतिपयकर्माणि शोधकसंस्कारा भवन्ति। 'रेतोरक्तगर्भोपघातः पञ्चगुणः, जातकर्मणा प्रथममपोहति, नामकरणेन द्वितीयम्, प्राशनेन तृतीयम्, चूडाकरणेन चतुर्थम्, स्नानेन पञ्चमम्, एतैरष्टभिः संस्कारैर्गर्भोपघातात् पूतो भवति।' इति हारीतस्मरणात्।,'एवमेनः शमं याति बीजगर्भसमुद्भवम्'(मनुः) इत्यादिस्मृत्यन्तरेभ्यश्च त एते गर्भशुद्धिसंस्कारा उच्यन्ते। सोऽयमेतावान् गर्भसंस्कारोऽनुव्रताद्युत्तरसंस्कारयोग्यतासम्पत्त्यर्थः पितृकर्तृकश्च। तत्र संस्कर्तृनिष्ठमधिकारितावच्छेदकं ब्राह्मणत्वादिघटितवर्णत्वघटितम्। संस्कार्यनिष्ठं तु ब्राह्मणादिवर्णजन्यत्वमेव, न तु ब्राह्मणत्वादिकमपि तत्र फलोपधायकतारूपमपेक्षते।

अतः परमुपनयनं तावत् स्वरूपसंपादनोद्देशेन सावित्रीक्षेत्रे ब्रह्मचर्यव्रतरूपे कर्माग्निसमीपे वा संस्कार्यस्य संस्थापनम्। सोऽयं वर्णभावकः संस्कारो द्रष्टव्यः। तथा चोपनयन-व्रतादेश-वेदारम्भ-वेदाध्ययनादि, सावित्राग्नेयशुक्रियौपनिषदशौलभगोदानभौतिकमहानाम्नीव्रतोत्सर्गाः, केशान्तः, समावर्तनस्नानं चेत्येते तत्र ब्राह्मणादिवर्णे यज्ञक्रियायोग्यतारूपातिशयाधायकत्वाद् विशेषकसंस्कारा भवन्ति।

'उपनयनाद्याभिरष्टाभिर्व्रतचर्याभिरन्तर्व्रतैश्चाष्टभिः स्वच्छन्दःसम्मितो ब्राह्मणः परं पात्रं देवपितॄणां भवति छन्दसां पारं गच्छति छन्दसामायतनम्' इति हारीतस्मरणात्;

> 'स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया शुभैः।
> महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥' (मनुः २।२८)

इत्यादिस्मृत्यन्तरेभ्यश्च। त एते आचार्यकर्तृका अनुव्रतसंस्कारा उच्यन्ते। यद्यपि

> 'गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः।
> बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते॥' (मनुः २।२७)

इति मनुस्मरणात्। 'सांवत्सरिकस्य चूडाकरणम्, तृतीये वा प्रतिहते, षोडशवर्षस्य केशान्तः।' इति पारस्करसूत्रे मुण्डनगोदानयोर्गर्भसंस्कारप्रकरणोपात्तत्वादुपनयनकेशान्तयोरपि गर्भसंस्कारत्वमाक्षिपन्ति। अथापि दधिदर्शनन्यायेन संभवत्येव कतिपयानामुभयविधसंस्कारत्वमित्यतः प्रकरणातिरेको न दोषायेत्यनुसंधेयम्।

ततो बहिःशालायामिव पितृगृहं प्रत्यावृत्ते वर्णे ऋणपञ्चकसूनापञ्चकोपगतदोषमार्जकत्वादुत्तरे नैमित्तिकवार्षिकमासिकाह्निकात्मकभेदचतुष्टयभिन्नाः शोधकसंस्कारा भवन्ति॥

'अतः परं द्विजातीनां संस्कृतिर्नियतोच्यते ।
संस्काररहिता ये तु तेषां जन्म निरर्थकम् ॥
गर्भाधानं पुंसवनं सीमन्तो बलिकर्म च ।
जातकृत्यं नामकर्म विश्रुतोऽन्नाशनं परम् ॥
चौलकर्मोपनयनं तद्व्रतानां चतुष्टयम् ।
स्नानोद्वाहौ चाग्रयणमष्टकासु यथायथम् ॥
श्रावण्यामाश्वयुज्यां च मार्गशीर्ष्यां च पार्वणम् ।
उत्सर्गश्चाप्युपाकर्म महायज्ञाश्च नित्यशः ॥
संस्कारा नियता ह्येते ब्राह्मणस्य विशेषतः ॥
नैमित्तिकाः षोडशोक्ताः समुद्वाहावसानकाः ।
सप्तैवाग्रयणाद्याश्च संस्कारा वार्षिका मताः ॥
मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम् ।
महायज्ञास्तु नित्याः स्युः संध्यावद्वाग्निहोत्रवत् ॥' इत्याश्वलायनोक्तेः;
'अशुचिः स्त्रीविहीनश्च दैवे पित्र्ये च कर्मणि ।
यदह्ना कुरुते कर्म न तस्य फलभाग्भवेत् ॥' इति ब्राह्मोक्तेः,

१ नित्याः संस्काराः—	पञ्च महायज्ञाः ।	५
२ मासिकाः संस्काराः—	पार्वणादयः ।	५
३ वार्षिकाः संस्काराः—	आग्रयणादयः ।	७
४ नैमित्तिकाः संस्काराः—	उद्वाहान्ताः ।	१६
५ काम्याः संस्काराः—	अग्निष्टोमादयः, (गुणाधानाः)	
	प्रायश्चित्तानि (दोषनिरासाः)	

'ऋणैश्चतुर्भिः संयुक्ता जायन्ते मानवा भुवि ।
पितृदेवर्षिमनुजैर्देयं तेभ्यश्च धर्मतः ॥
यज्ञैस्तु देवान् प्रीणाति स्वाध्यायतपसा मुनीन् ।
पुत्रैः श्राद्धैः पितॄंश्चापि आनृशंस्येन मानवान् ॥
ऋणमुन्मुच्य देवानामृषीणां च तथैव च ।
पितॄणामथ विप्राणामतिथीनां च पञ्चमम् ॥
देवानां च पितॄणां च ऋषीणां च तथा नरः ।
ऋणवान् जायते यस्मात्तन्मोक्षे प्रयतेत्सदा ॥
देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः ।
अल्पवित्तश्च पूजाभिरुपवासव्रतैस्तथा ॥
श्राद्धेन प्रजया चैव पितॄणामनृणो भवेत् ।
ऋषीणां ब्रह्मचर्येण श्रुतेन तपसा तथा ॥

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानः पतत्यधः ॥'

इत्यादिपुराणस्मृतिवचनेभ्यः,

'पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन् ॥
तासां क्रमेण सर्वासां निष्कृत्यर्थं महात्मभिः ।
पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥'

इत्येवं मन्वादिस्मृतिवचनेभ्यश्च तथावगमात् । त एते स्वकर्तृका धर्मशुद्धिसंस्कारा उच्यन्ते । सोऽयमेतावान् व्रतसंस्कारो यज्ञादिदैवसंस्कारयोग्यतासंपत्त्यर्थः । तत्र संस्कर्तृनिष्ठमधिकारितावच्छेदकं ब्राह्मणत्वादिघटितवर्णत्वघटितम्, संस्कार्यनिष्ठं तु पूर्वसंस्कारसंस्कृतत्वं वा;

'धृतिः क्षमा दया शौचमनायासोऽनसूयितम् ।
अस्पृहत्वमकामत्वं ब्राह्मणानाममी गुणाः ॥'

इत्युक्तात्मगुणाष्टकवैशिष्ट्यं वा । तेषां पूर्वेषां संस्कारकर्मणामप्येतद्गुणाष्टकरूपातिशयभावकत्वात् । विज्ञायते चैतदेषामष्टानां गुणानामपि संस्कारत्वम् । अष्टचत्वारिंशत्—संस्कारानाचक्षाणेन भगवता गौतमेन चत्वारिंशत्संस्कारानाख्याय परिशेषे

'अष्टावात्मगुणाश्च' इति स्मरणात्,

'संस्कारैः संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः ।
नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्म लौकिकम् ॥
ब्राह्मं पदमवाप्नोति यस्मान्न च्यवते पुनः ।'

इति शङ्खादिस्मरणाच्च धृत्याद्यात्मगुणानां ब्राह्मणत्वप्रयोजकत्वेनाभिधानात् ।

'अर्धं वै प्रजापतेरात्मनो धैर्यमासीदर्धं माल्व्यम् । यद्धैर्यं तत् पुरस्तात् कुरुत । यन्माल्व्यं तत् पश्चात् पर्यौहत । यद्धैर्यं सोमो वै सः । ततो ब्राह्मणमसृजत । तस्माद् ब्राह्मणः सर्व एव ब्रह्माभिधीरः । यन्माल्व्यं सुरा वै सा । ततो राजन्यमसृजत । तस्माज्ज्यायांश्च कनीयांश्च स्नुषा च श्वशुरश्च सुरां पीत्वा विलालपंत आसते । माल्व्यं हि तत् । पाप्मा वै माल्व्यम् । तस्माद् ब्राह्मणः सुरां न पिबेत् । पाप्मनात्मानं नेत् संसृजा इति' ।

इत्येवं मैत्रायणीयश्रुत्यादिषु तत्र तत्र ब्राह्मणत्वप्रयोजकानां धृत्यादीनामाम्नानाच्च । तदित्थमेतावानयमुक्तो ब्राह्मसंस्कारः स स्मार्तो द्रष्टव्यः ।

अथातः परम् 'अग्ने व्रतपते व्रतं चरिष्यामि, वायो व्रतपते व्रतं चरिष्यामि, आदित्य व्रतपते व्रतं चरिष्यामि' इति; 'इदमहमनृतात् सत्यमुपैमि ।' इति वा व्रतोपायनं तावद्

स्वरूपसंपादनोद्देशेन सत्यक्षेत्रे देवयतरूपे गार्हपत्याहवनीयाग्निसमीपे वा संस्कार्यस्य संस्थापनम्। सोऽयं देवभावकः संस्कारो द्रष्टव्यः। तथा च व्रतोपायनमभ्याधेयं च पुरस्कृत्य कृतमग्निहोत्रम्, दर्शपूर्णमासौ, पिण्डपितृयज्ञः, आग्रयणेष्टिः, चातुर्मास्यम्, निरूढपशुबन्धः, सौत्रामणी चेत्येते सप्तहविर्यज्ञसंस्थाख्या यजमाने देवत्वयोग्यतारूपातिशयाधायकत्वाद् विशेषकसंस्कारा भवन्ति।

'आरब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजते' इत्यैतरेयादिश्रवणात्।

अथ गृह्याग्निपरिग्रहः, पञ्चयज्ञानुष्ठानम्, अष्टका पार्वणम्, श्रावणी, आग्रहायणी, चैत्री, आश्वयुजीत्येताः सप्त पाकयज्ञसंस्थाः। औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, प्रहमासिकश्राद्धम्, बलिः, श्रावणी चेति वा सप्त पाकयज्ञाः। औपासनम्, वैश्वदेवः, स्थालीपाकः, आग्रयणम्, सर्पबलिः, ईशानबलिः, अष्टकान्वष्टका चेत्येवं विभक्ता वा स्मार्ताग्निकृत्याः सप्त पाकयज्ञाः, यजमाने ऋणसंबन्धोपगतदोषमार्जकत्वाच्छोधकसंस्कारा भवन्ति।

'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते। ब्रह्मचर्येणर्षिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः। एष वा अनृणी, यः पुत्री यज्वा ब्रह्मचारी' इति श्रवणात्। 'ऋणं ह वै जायते योऽस्ति, स जायमान एव देवेभ्यः, ऋषिभ्यः, पितृभ्यो, मनुष्येभ्यः। स यदेव यजेत, तेन देवेभ्य ऋणं जायते, तद्ध्येभ्य एतत्करोति। यदेनान् यजते यदेभ्यो जुहोति ॥ १ ॥ अथ यदेवानुब्रुवीत तेन ऋषिभ्य ऋणं जायते। तद्ध्येभ्य एतत्करोति। ऋषीणां निधिगोप इति ह्यनूचानमाहुः ॥ २ ॥ अथ यदेव प्रजामिच्छेत, तेन पितृभ्य ऋणं जायते। तद्ध्येत एतत्करोति। यदेषां संततताव्यवच्छिन्ना प्रजा भवति ॥ ३ ॥ अथ यदेव वासयेत, तेन मनुष्येभ्य ऋणं जायते। तद्ध्येभ्य एतत्करोति। यदेनान् वासयते, यदेभ्योऽशनं ददाति ॥ ४ ॥ स य एतानि सर्वाणि करोति स कृतकर्मा। तस्य सर्वमाप्तं सर्वं जितम् ॥'

इति शतपथादिश्रवणेभ्यश्च पञ्चयज्ञादीनामृणशोधकत्वेन प्रतिपत्तेः। सोऽयमेतावान् यजमानसंस्कारः सौम्यादिकाम्यसंस्कारयोग्यतासंपत्त्यर्थः। अत्र संस्कर्तृसंस्कार्ययोरेकत्वान्नाधिकारितावच्छेदकं भिद्यते ॥

अतः परमग्निष्टोमो,ऽत्यग्निष्टोमः, उक्थः, षोडशी, वाजपेयः, अतिरात्रः, आप्तोर्यामश्चेति सप्त सोमसंस्थाः। महाव्रतम्, राजसूयः, कुरुवाजपेयः, सर्वतोमुखम्, पौण्डरीकम्, अभिजित्, विश्वजित्, अश्वमेधनरमेधगोमेधाः, गवामयनाङ्गिरसामयनादित्यानामयनविश्वसृजामयनानि सत्राणि, बृहस्पतिसवः, आङ्गिरसः, अष्टादशविधानि चयनानीत्येवमनेकविधा उत्तरक्रतवस्ततोऽन्ये काम्यविषयश्चोपतिष्ठन्ते। तेऽप्येते संस्कारा भवन्ति। अदृष्टोत्पादनद्वारा फलसिद्धावङ्गभावात्। तदित्थमेतावानयमुक्तो दैवसंस्कारः स श्रौतो द्रष्टव्यः ॥

इदं चात्रावधार्यते—सोमयागा द्विविधाः—आवृत्ता अनावृत्ताश्च। तत्रानावृत्ता

एकाहाः । आवृत्ता अपि द्वेधा—अहीनरूपाः सत्ररूपाश्च । द्विरात्रमारभ्यैकादशरात्रपर्यन्ता अहीना एव । एकादशरात्रद्वादशरात्रौ तु द्वेधा—अहीनरूपौ सत्ररूपौ च । त्रयोदशरात्र-मारभ्योपरितनानि सर्वाणि सत्राण्येव । तान्यपि द्विविधानि—रात्रिसत्राणि, अयनसत्राणि चेति । तत्र शतरात्रपर्यन्तानि रात्रिसत्राणि । संवत्सरसत्रमारभ्योपरितनान्ययनरूपाणि । तेषां च सर्वेषां प्रकृतिभूतं गवामयनमिति ॥

इत्थं च निरूपितो द्विविधः संस्कारो ब्राह्मो दैवश्चेति । तत्र ब्राह्मेणार्षी तनुः क्रियते । दैवेन दैवी । तदुक्तं भगवता हारीतेन—

'द्विविध एव संस्कारो भवति—ब्राह्मो दैवश्च । गर्भाधानादिस्नानान्तो ब्राह्मः । पाकयज्ञहविर्यज्ञसौम्याश्चेति दैवः । ब्राह्मसंस्कारसंस्कृत ऋषीणां समानतां सायुज्यतां गच्छति । दैवेनोत्तरेण संस्कारेणानुसंस्कृतो देवानां समानतां सालोक्यतां सायुज्यतां गच्छतीति' ।

तदित्थं प्रतिपन्नेष्वात्मसंस्कारेषु कतिपयस्यैव छन्दस्त्वमिष्यते ? आहोस्विदविशेषेण सर्वस्येति विचार्यते । किं चातः? । यदि कतिपयस्यैवोच्यते तत् तर्हि अर्धजरतीयत्वापत्तिः। संस्कारत्वाविशेषेऽपि कस्यचिच्छन्दस्त्वमन्यस्य नेत्यत्र विनिगमकाभावात् ॥ अथ यदि सर्वस्योच्येत तत् तर्हि शूद्रस्यापि सच्छन्दस्त्वमापद्यते ॥

'द्विजानां षोडशैव स्युः शूद्राणां द्वादशैव तु ।
पञ्च मिश्रकजातीनां संस्काराः कुलधर्मतः ॥
वेदव्रतोपनयनमहानाम्नीमहाव्रतम् ।
विना द्वादश शूद्राणां संस्कारा नाममन्त्रतः ॥'

इति शार्ङ्गधरोक्तेः ।

'स्त्रिया जातकर्म–नामकरण–निष्क्रमा–न्नप्राशन–चूडा–विवाहाः षट् । शूद्राणां तु षडेते, पञ्च महायज्ञाश्चेत्येकादशे'ति मदनरत्नोक्तेः—

'गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया ॥
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ।
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ॥
त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः ।
नवैताः कर्णवेधान्ता मन्त्रवर्जं क्रियाः स्त्रियाः ॥
विवाहो मन्त्रतस्तस्याः शूद्रस्यामन्त्रतो दश ।'

इति व्यासोक्तेः—

'विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ।'

इति ब्राह्मोक्तेश्च

कतिपयसंस्काराणां विवाहमात्रस्य वा तत्राप्यनुवर्तमानत्वात् ।

'आर्षक्रमेण सर्वत्र शूद्रा वाजसनेयिनः ।
तस्माच्छूद्रः स्वयं कर्म यजुर्वेदीव कारयेत् ॥'

इति शूद्राह्निकाचारतत्त्वधृतस्मृतिवचनेन शूद्राणामपि वेदसंबन्धात्—इति चेत् । अत्रोच्यते—यथेच्छसि तथास्तु । उभयथाप्येतच्छक्यते प्रतिपत्तुं कतिपयस्य वा सर्वस्य वा छन्दस्त्वमस्तीति । ननु चोक्तमुभयत्रापि दूषणमिति चेत्—नैतदस्ति । अस्ति ह्येतत्—यदारम्भे यदारम्भः, यदवसाये यदवसायः, यदभ्युच्चये यदभ्युच्चयः, यदवचये यदवचयः, तत्तदायतनमित्युच्यते । यदाश्रयेण वा यस्य प्रतिपत्तिः सा तस्य प्रतिष्ठाऽभिज्ञायते । तथा चायं तावद् ब्राह्मसंस्कारः साक्षात्परम्परया च ब्राह्मणत्वक्षत्रियत्ववैश्यत्वानां प्रतिष्ठा भवति । तदधीनोपपत्तिकत्वात् । प्रतिष्ठायां च श्रूयते प्रमाशब्दः, तस्मात् संसिद्धं प्रमालक्षणं छन्दस्त्वमेतस्य ।

तत्र योग्यात्मनि संस्कारविशेषेण ब्रह्माधीयते, योग्यात्मनि च संस्कारविशेषेण क्षत्रं, विड् वा । श्वोवस्यसं चेदं ब्रह्म, रौद्रं क्षत्रम्, मारुत्यो विशः । आतश्चाग्नेयं ब्रह्म, ऐन्द्रं क्षत्रम्, वैश्वदेव्यो विशः । अग्नेस्तु छन्दो गायत्री सा चाष्टवर्णा, इन्द्रस्य त्रिष्टुबेकादशवर्णा, विश्वेषां देवानां जगती द्वादशवर्णा । आतश्च गायत्रं ब्रह्म, त्रैष्टुभं क्षत्रम्, जागती विट् । तदित्थमष्टवर्णनिबन्धनं ब्रह्माधेयम्, एकादशवर्णनिबन्धनं चेदं क्षत्रम्, द्वादशवर्णनिबन्धना त्वेषां विडिति वर्णछन्दोबद्धतया त्रयो वर्णा उच्यन्ते—ब्राह्मणः क्षत्रियो वैश्य इति । शूद्रस्यैवमवर्णत्वेऽपि वर्णत्वमौपचारिकं द्रष्टव्यम् । अच्छन्दस्त्वस्यैव छन्दस्त्वेन विवक्षितत्वात् । तथा च यथा हि वाग्वर्णो गायत्रीछन्दाः, त्रिष्टुप्छन्दाः, जगतीच्छन्दाः, विच्छन्दा वा भवति, एवमयं मनुष्यवर्णोऽपि चतुर्विधो भवति । सर्वोऽप्ययं प्राणिवर्गोऽप्राणिवर्गो वा तैरेतैर्वर्णच्छन्दोभिरेव सच्छन्दस्कतया वर्णो भवति । ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्र इति । यथा च ग्राम्येषु पशुषु तावदजो ब्राह्मणः, अविः क्षत्रियः, गौर्वैश्यः, अश्वः शूद्र इति । यथा वान्यत्र स्थावरादिषु । एवमयं मनुष्येषु संस्कारसिद्धो भूत्वा गायत्रीच्छन्दा ब्राह्मणः, त्रिष्टुप्छन्दाः क्षत्रियः, जगतीच्छन्दा वैश्यः, प्राजापत्यच्छन्दा विच्छन्दा वा शूद्र इति ॥

'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥' इति ।

'प्रजापतिरकामयत—प्रजायेयेति, स मुखतस्त्रिवृतं निरमिमीत । तमग्निर्देवता अन्वसृजत, गायत्री छन्दो, रथन्तरं साम, ब्राह्मणो मनुष्याणाम्, अजः पशूनाम् । तस्मात्ते मुख्याः—मुखतो ह्यसृज्यन्त ॥ उरसो बाहुभ्यां पञ्चदशं निरमिमीत । तमिन्द्रो देवतान्यसृजत, त्रिष्टुप्छन्दः, बृहत्साम, राजन्यो मनुष्याणाम्, अविः पशूनाम् । तस्मात्ते वीर्यवन्तो–वीर्याद्ध्यसृज्यन्त ॥ मध्यतः सप्तदशं निरमिमीत । तं विश्वेदेवा देवता अन्वसृजन्त । जगतीछन्दो, वैरूपं साम, वैश्यो मनुष्याणाम्, गावः पशूनाम्, ।

तस्मात्ते आद्याः—अन्नधानाह्यसृज्यन्त । तस्माद्भूयांसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त ॥ पत्त एकविंशं निरनिमीत । तमनुष्टुप् छन्दोऽन्वसृज्यत । वैराजं साम, शूद्रो मनुष्याणाम्, अश्वः पशूनाम्, तस्मात्तौ भूतसंक्रामिणावश्वश्च शूद्रश्च । तस्माच्छूद्रो यज्ञेऽनवक्लृप्तो—न हि देवता अन्वसृज्यत । तस्मात्पादावुपजीवतः, पत्तो ह्यसृज्येताम् । प्राणा वै त्रिवृत्, अर्धमासाः पञ्चदश, प्रजापतिः सप्तदशः, त्रय इमे लोकाः; असावादित्य एकविंशः । तस्मिन् वै एते श्रिताः, एतस्मिन् प्रतिष्ठिताः, य एवं वेदैतस्मिन्नेव श्रयते एतस्मिन् प्रतितिष्ठति ॥' इति (शतपथ० ७ । १ । १) ·

इति मन्त्रब्राह्मणाभ्यां तथाम्नानात् ।

यत्तु—एवंविधादेव मन्त्रब्राह्मणाद्याम्नानात् सृष्ट्यादौ मनुष्याकारपरमेश्वरस्य मुखाद्येभ्यश्चत्वारः सृष्ट्यादिभूता ब्राह्मणक्षत्रियवैश्यशूद्रा उत्पन्ना इति लभ्यते, ततश्चोत्पत्तिलभ्यमेव ब्राह्मणत्वादिकं न संस्कारलभ्यमित्याक्षिपन्ति, तदज्ञानात् ।

'अर्धं वै प्रजापतेरात्मनो धैर्यमासीदर्धं माल्व्यम् । यद्धैर्य—सोमो वै सः । ततो ब्राह्मणमसृजत । यन्माल्व्यं—सुरा वै सा । ततो राजन्यमसृजत ॥' इत्यादिश्रुतिष्विवेहापि मुखाद्ब्राह्मणमसृजत, उरसः क्षत्रियमित्यादीनामपेक्षितार्थविशेषपरत्वात् । तदित्थं सिद्धमप्यादिभक्तिसिद्धद्रविणसंयोगाद्ब्राह्मणादिसंस्कारविशेषाणामपि गायत्र्यादित्वमिति दिक् ॥

निरूपयिष्यते चायमर्थो वैशयेन धर्मसमीक्षायामित्यतोऽत्र विरम्यते ॥

अथ द्रविणम्—

'तत्र समिधमातिष्ठ । गायत्री त्वा छन्दसामवतु, त्रिवृत् स्तोमः, रथन्तरं साम, अग्निर्देवता, ब्रह्म द्रविणम् ॥ उग्रामातिष्ठ । त्रिष्टुप् त्वा छन्दसामवतु, पञ्चदशः स्तोमः, बृहत्साम, इन्द्रो देवता, क्षत्रं द्रविणम् ॥ विराजमातिष्ठ । जगती त्वा छन्दसामवतु । सप्तदशः स्तोमः, वैरूपं साम, मरुतो देवताः, विड् द्रविणम् ॥ उदीचीमातिष्ठ । अनुष्टुप् त्वा छन्दसामवतु, एकविंशस्तोमः, वैराजं साम, मित्रावरुणौ देवता, बलं द्रविणम् ॥ ऊर्ध्वामातिष्ठ, पङ्क्तिस्त्वा छन्दसामवतु, त्रिणवत्रयस्त्रिंशौ स्तोमौ । शाक्वररैवते सामनी । बृहस्पतिर्देवता । वर्चो द्रविणम् ॥' इति तैत्तिरीयश्रवणात्—

'प्राचीमारोह । गायत्री त्वावतु, रथन्तरं साम, त्रिवृत् स्तोमो, वसन्त ऋतुः, ब्रह्म द्रविणम् ॥ दक्षिणामारोह । त्रिष्टुप् त्वावतु, बृहत्साम, पञ्चदशः स्तोमो, ग्रीष्म ऋतुः, क्षत्रं द्रविणम् ॥ उदीचीमारोह । जगती त्वावतु, वैरूपं साम, सप्तदशः स्तोमो, वर्षा ऋतुः, विड् द्रविणम् ॥ प्रतीचीमारोह । अनुष्टुप् त्वावतु, वैराजं साम, एकविंशः स्तोमः, शरदृतुः, फलं द्रविणम् ॥ ऊर्ध्वामारोह । पङ्क्तिस्त्वावतु, शाक्वररैवते सामनी, त्रिणवत्रयस्त्रिंशौ स्तोमौ । हेमन्तशिशिरावृतू । वर्चो द्रविणम् ॥'

इति माध्यन्दिनीयश्रवणाच्चाग्निभक्तं द्रविणं ब्रह्म, इन्द्रभक्तं द्रविणं क्षत्रम्,

तथा मरुद्भक्तं द्रविणं विट् प्रतिपद्यते। ब्रह्मशब्देन चात्र यज्ञः, क्षत्रशब्देन च राष्ट्रं विवक्ष्यते।

'ब्रह्म वा एष प्रपद्यते यो यज्ञं प्रपद्यते।
ब्रह्म वै यज्ञः। क्षत्रं वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते।
क्षत्रं हि राष्ट्रम्।' इत्यैतरेयादिश्रवणात्।
यज्ञशब्दः पुनरत्र सोमसूर्याधिष्ठितत्रयीविद्यापरः।

'अयं वै यज्ञो योऽयं पवते। तदिमं यज्ञं संभृत्य एतस्मिन् यज्ञे प्रतिष्ठापयति। यज्ञेन यज्ञं संदधातीति। यज्ञं वा एष जनयति यो यजते। सैषा त्रयी विद्या यज्ञः। तस्या एतच्छिल्पमेष वर्णः॥' इति।

'प्रजापतिर्यज्ञमसृजत। यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येताम्। ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यन्त। हुतादश्चाहुतादश्च। ब्रह्मैवानु हुतादः। क्षत्रमन्वहुतादः। एता वै प्रजा हुतादो यद् ब्राह्मणाः। अथैता अहुतादो यद् राजन्यो वैश्यः शूद्र इति। यज्ञाद्वै प्रजाः प्रजायन्ते। यज्ञात् प्रजायमाना मिथुनात् प्रजायन्ते। मिथुनात् प्रजायमाना अन्ततो यज्ञस्य प्रजायन्ते॥'

इत्यैतरेयादिश्रुतिभ्यः सर्वजगदुत्पत्तिस्थितिक्रियापरिकरविद्याया एव यज्ञशब्दत्वव्यवस्थापनात्। ईदृशयज्ञार्थप्रतिपादनपरतयैव च सर्व एवैते वेदाः प्रवर्तन्ते इत्यप्यवधेयम्। तथा च—विद्यादयो ब्रह्मप्रकाराः ब्राह्मणस्य स्वम्। तच्चाग्निभक्तम्, गायत्रीच्छन्दः साध्यमतोऽग्निभक्त्या ब्रह्मणो गायत्रीत्वम्। राष्ट्रादयो हि क्षत्रप्रकारा राजन्यस्य स्वम्। तच्चेन्द्रभक्तम्, त्रिष्टुप्छन्दः साध्यमत इन्द्रभक्त्या क्षत्रस्य त्रिष्टुप्त्वम्। विडेव तु इषोर्जरयिपशुपुष्ट्यादिभेदभिन्ना वैश्यस्य स्वम्। तच्च वैश्वदेवभक्तम्, जगतीछन्दः साध्यमतो विश्वदेवभक्त्या विशो जगतीत्वमितीत्थं द्रविणानामपि संसिद्धं भक्त्या छन्दस्त्वमतो नातिरिक्तार्थत्वं प्रसज्यते—इत्यवधेयम्॥ तथा चागत्यप्रतिगच्छदर्थेषु संस्कारेषु द्रविणेषु च छन्दःशब्दप्रयोगेऽपि नार्थान्तरतेति संसिद्धम्॥

स्यादेतत्। (१)—अथापि यदेतदाध्वर्यवे छन्दोभाषाम्नायते—

'मा च्छन्दः, प्रमा च्छन्दः, प्रतिमा च्छन्दः, अस्रीवयश्छन्दः, पङ्क्तिश्छन्दः, उष्णिक् छन्दः, बृहती च्छन्दः, अनुष्टुप् छन्दो, विराट् छन्दो, गायत्री च्छन्दः, त्रिष्टुप् छन्दो, जगती च्छन्दः॥ १॥'

'पृथिवीच्छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि च्छन्दो मनश्छन्दो वाक्छन्दः, कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजाश्छन्दोऽश्वश्छन्दः॥ २॥

'एवश्छन्दो वरिवच्छन्दः शम्भूश्छन्दः परिभूश्छन्दः आच्छच्छन्दो मनश्छन्दो वाचश्छन्दः सिन्धुश्छन्दः समुद्रं छन्दः सलिलं छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरं छन्दो निकायच्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सन्तुप्छन्दोऽ-

ष्टुप् छन्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यं छन्दोऽङ्कुपं छन्दः ५८।५।क्षुरश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरोभृज्वा छन्दः प्रच्छच्छन्दः पक्षश्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छन्दश्छदिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽङ्काङ्कं छन्द इति ॥ ३ ॥

(२)—यच्च वाथर्वणे त्रयश्छन्दोविशेषा आख्यायन्ते—

'त्रीणि छन्दांसि कवयो वियेतिरे पुरुरूपं दर्शतं विश्वचक्षणम् । आपो वाता ओषधयस्तान्येकस्मिन् भुवन आर्पितानि' ॥ १ ॥

इति । तेनातिरिच्यते छन्दःपदार्थ इति गम्यते—इति चेत् । न, यथा हि गायत्र्युष्णिगनुष्टुबादयो विष्टारपङ्क्तिसतोबृहतीककुबादयश्च वाचिकच्छन्दोविशेषा उपरिष्यन्ते । एवमेव सन्ति खलु माप्रमाप्रतिमादयः, एवोवरिवःशम्भ्वादयश्चार्थिकच्छन्दोविशेषास्तत्तदर्थव्यवस्थापका इत्यत्रैव छन्दोभाषातात्पर्यावगमात् । तत्र च सिद्धं परिच्छेदलक्षणं छन्दस्त्वमिति नार्थान्तरत्वप्रसक्तिः ॥

यत्पुनराथर्वणेऽवादीनां त्रयाणां छन्दस्त्वमुपदिश्यते, तस्यायमाशयः—यदिदमनेकरूपं विश्वशब्देनाख्यातं किंचिद्दृश्यते तदेतत्सर्वं त्रेधा व्यवच्छिद्य गृह्यते । आपश्च वाताश्चौषधयश्चेति । एतदेवान्यत्र तिस्र एव देवास्तेजोऽबन्नानीत्येवं देवताप्रकरणेनाम्नातम् । भवन्ति हि निबिडावयवास्तरलावयवा विरलावयवाश्च पदार्थभेदा लोके । न चैतन्नैविध्यापचारेण किंचिदिहोपलभ्यते । तत्र निबिडावयवा अन्नौषधिमृदादिशब्दैः, तरलावयवा अप्छब्देन, विरलावयवास्तु तेजोवाय्वादिशब्दैर्व्यपदिश्यन्ते । औषध्यादिवातादीनां स्वानुगतभावोपलक्षकत्वात् त्रयोऽप्येते भावा एकैकस्मिन्नर्थे प्रत्यर्पिता द्रष्टव्याः । सर्वस्याप्यर्थजातस्य मृदवस्थया, अबवस्थया, तेजोऽवस्थया च निमित्तानुरोधेन विपरिणमनात् । एतेष्वेव त्रिषु भावेषु विश्वमेतत्प्रतिष्ठितमित्यतः सिद्धमेषां प्रतिष्ठालक्षणं छन्दस्त्वमिति नार्थान्तरत्वप्रसक्तिः ॥

यत्तु (१)—शब्दचन्द्रिकादौ छन्दःशब्दस्य विषपरत्वम्,—(२)—यच्च 'छन्दानुवृत्तिदुःसाधाः सुहृदो विमनीकृताः' इत्यादौ वा तस्य रहःपरत्वम्, (३)—यदपि वा—

'मयोच्यमानं यदि ते श्रोतुं छन्दो विलासिनि ।
श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम् ॥'
(रामा. २ । ९ । ७)

इत्यादिषु रुचिपरत्वम्,

(४)—'वरदानात् पितुः कामं छन्दमृत्युरसि प्रभो ।' इत्यादिष्वभिलाषपरत्वम्,

(५)—'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषु ।' इत्यादिषु वशतापरत्वम्,

(६)—'सच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः ।' इत्यादिषु स्वैराचारपरत्वम्,

(७)—'स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा' इत्यादिषु निष्प्रतिबन्ध-परत्वम्,

(८)— 'त्वग्दोषी राजपुत्रस्तु ऋष्टिषेणसुतोऽभवत् ।
राज्येन छन्दयामासुः प्रजाः स्वर्गं गते गुरौ ॥'

इत्यादिषु विरेचनपरत्वं वा प्रतिपद्यते; तावतापि नार्थान्तरत्वमापादयितुं युक्तम् । (१)—विषस्य नाडीमार्गावरोधकतया दैशिकावच्छेदलक्षणत्वात् ॥ (२)—छन्दानुवृत्तीतिपदं तु द्वेधा व्याख्येयम्—छन्दःशब्दस्येच्छापरत्वे–यथा सुहृदामिच्छा स्यात्तथानुवर्तनीयमिति कृत्वा त एते दुःखेन साधयितुं शक्या भवन्ति, सर्वथा परेच्छानुवर्तनस्य दुःखरूपत्वादित्येकोऽर्थः । छन्दःशब्दस्य परिच्छेदपरत्वे तु–वाच्यमवाच्यं देयमदेयमित्येवं मर्यादया व्यवहारनियमेनानुवृत्तौ क्रियमाणायां सुहृदो दुःसाधा भवन्ति, मित्रतायाः परिच्छेदासहत्वादित्यन्योऽर्थः । तथा चेच्छापरत्वे वक्ष्यमाणलक्षणम्, परिच्छेदपरत्वे तूक्तलक्षणं छन्दस्त्वं सिद्धमिति नार्थान्तरम् ॥

(३ । ४ । ५ । ६ ।)—अथ 'श्रोतुं छन्दः', 'छन्दमृत्युः' इत्यादिषु तु सर्वत्रैवेच्छार्थकत्वं छन्दःशब्दस्येति न तावदनैकार्थ्यम् । रुच्यादीनामिच्छाविशेषरूपत्वात् । इच्छा चाभिप्रायो मनसश्छन्दः । तथा चाहुः कोशकाराः—'अभिप्रायश्छन्द आशयः' इति । यद्यपि च विषयविशेषाभिमुख्येन मनसः प्रवृत्तिरेवाभिप्रायस्तथाप्युपचारभेदादसौ द्वेधा—मनोगृहीतविषयो वा विषयारूढमनो वा । अस्मिन् विषये कीदृशस्तवाभिप्रायः ? केनाभिप्रायेणागतोऽसि ? धनं नोऽभिप्रेतमित्येतत्सर्वं विषयाभिप्रायम्, । धनाभिप्रायेणागतः, द्रष्टुं विज्ञातुं वा ममाभिप्रायः, किमत्राभिप्रैषीति, मनोऽभिप्रायम् इतीत्थमुभयथा व्यवहारदर्शनात् ॥ तत्र मनोगृहीतविषयस्य मनोऽवच्छेदकत्वान्मनश्छन्दस्त्वं भवति । अभिप्रायानुसारेणैव मनसः स्वरूपलाभात् तत्रैव तत्प्रतिष्ठानात् । अथ विषयसंक्रान्तमनसः खलु मनुष्यावच्छेदकत्वान्मनुष्यच्छन्दस्त्वं भवति । स्वसंयुक्तमनोऽनुरोधेन प्रवर्तमानस्यात्मन एव मनुष्यत्वात् तत्रैव तत्प्रतिष्ठानात् । अत एव यावानस्य देहः सांयौगिका वार्थास्ते सर्वे दीनमनसो दीनाः, उदारमनसस्तूदारा भवन्ति; नीचमनसो नीचत्वम्, महाशयमनसस्तु महाशयत्वं प्रतिपद्यन्ते । अङ्गुल्य उत्तिष्ठन्तामित्याभिप्रयत एवास्याङ्गुलय उत्तिष्ठन्ते, हस्त उत्तिष्ठतामित्यभिप्रयतश्च हस्तः । गच्छति तिष्ठेयमिति तिष्ठत्यव्यतिरेकेण ॥ यत्र तु गच्छेयमिति न गच्छति, तन्नियता कालेन गच्छेयमिति कालविशेषस्य विशेषणविधया विषयीभावो वा, न गच्छेयमित्येवमभिप्रायविशेषस्य नान्तरीयकसंश्लिष्टस्य प्रतिबन्धकाविषयीभावो वा, सामर्थ्यापचयादिप्रतिबन्धकसद्भावो वा, हेतुः समीक्षणीयः । अत एव, 'आकूत्यै प्रयुजेऽग्नये स्वाहा' इति । 'आत्मना वा अग्रे आकुवते यजेयेति । तमात्मन एव प्रयुङ्क्ते यत्तनुते । ते अस्यैते आत्मन् देवते आधीते भवतः—आकूतिश्च प्रयुक् च । मेधायै

मनसेऽग्नये स्वाहेति । मेधायां वा मनसाभिगच्छति—यजेयेति । ते अस्यैते आत्मन् देवते आधीते भवतः—मेधा च मनश्च—इत्यादिना, तथा 'इमे वै प्राणा मनोजाता मनोयुजो दक्षक्रतवः, वागेवाग्निः, प्राणोदानौ मित्रावरुणौ, चक्षुरादित्यः, श्रोत्रं विश्वेदेवाः' इत्येवमादिना च सर्वव्यवहारप्रयोजकत्वं मनसः समाम्नायते ।

'तस्येह त्रिविधस्यापि त्र्यधिष्ठानस्य देहिनः ।
दशलक्षणयुक्तस्य मनो विद्यात् प्रवर्तकम् ॥'

इति मनुना स्मर्यते च । एतदभिप्रायेणैव पुरुषेषु मनुष्यमानुषमानवमनुजाः शब्दाः प्रवर्तन्ते । मनुमनुर्मनसामैकार्थ्यात् ।

अत एव—

'पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वाभूतानि जातवेदः पुनीहि मा ॥'

इति मन्त्रस्याथर्वणे 'पुनन्तु मनवो धियः' इति पाठः संगच्छते । मनस्वीत्यादिशब्दानां व्यक्तिविशेषनिरूढानां मनःसंयुक्तयावदर्थपरत्वाभाववन्मनुष्यादिशब्दानामपि पशुपक्ष्यादिष्वनुपचारः प्राशस्त्याभिप्रायः । प्राशस्त्यं च वृत्त्यष्टकबीजाङ्कुरयोग्यक्षेत्ररूपस्यास्य मनुषः संपूर्णात्मत्वेन द्रष्टव्यम् । अत एव मनुष्यवन्नैतेषु तिर्यग्योनिजेषु वृत्तयोऽष्टविधा उत्पद्यन्ते । तदुत्पत्तिक्षेत्रस्य मनुषस्तेषु खिलरूपेणैवानुवर्तमानत्वात्तदनुसारेण यत्किंचिद्वृत्तेरेव ततः समुदयात् । वृत्त्यष्टकं चेदमाथर्वणे समामनन्ति—

'मनसे चेतसे धिय आकूतय उत चित्तये ।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम् ॥' इति ।

एतस्मिन्नेव मनुषि प्रयोजकादितादात्म्याभिप्रायेण कतिपये शब्दाः प्रवर्तन्ते । तथा च मनुः—

'प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परम् ॥
एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥' इति ।

अथैतस्मिन् मनुष्यसामान्ये स्वस्वद्रविणाप्यायनसमर्थकसंस्कारविशेषोत्पत्तावन्यथान्यथाचारग्राही भवतीति कस्यचिद्ब्राह्मणत्वमन्यस्य क्षत्रियत्वं वैश्यत्वं शूद्रत्वं वा प्रवर्तते । तदेतदेवं तत्तद्विभिन्नप्रवृत्तिप्रयोजकानां तत्तदाशयगतसंस्कारविशेषाणां ब्राह्मणादिच्छन्दस्त्वमाख्यायते । दुराचारानुमितेन तादृशसंस्कारभ्रंशेनोन्मर्यादो ब्राह्मणः स्वरूपात् पततीति तादृशपातित्यप्रतिबन्धद्वारा यथास्थितस्वरूपसंरक्षकस्य तादृशसंस्कारस्य ब्रह्मादिद्रविणस्य वा ब्राह्मणादिच्छन्दस्त्वोपपत्तेः । ब्राह्मणादीनां तत्रैव प्रतिष्ठितत्वाच्चेति । तथा च न तत्राप्यर्थान्तरतेति सूक्ष्मेक्षिकया समीक्ष्यम् ।

जडेष्वप्येवं स्वस्वप्रवृत्तिप्रयोजकस्य स्वस्वासाधारणधर्मस्य स्वस्वच्छन्दस्त्वमिति सर्व एव स्वकर्मणि स्वच्छन्दसो भवन्ति । बलवत्परधर्मसंक्रमे तु परच्छन्दसो जायन्ते । अन्याधीनप्रवृत्तिकत्वात् । यथा हि कपाटादिषु समवायिनोः काष्ठखण्डयोर्जटितयोरालम्बनस्य कीलितलौहादिशकलस्य कपाटच्छन्दस्त्वम्, अन्यथा काष्ठखण्डद्वयविभागात्कपाटस्वरूपहानिः प्रसज्यते; एवं पादद्वयावसक्तरश्मिना आच्छन्दितः पशुस्तदधीनवृत्तिको भवतीत्यस्यां रश्मिश्छन्दः स्यात् । एवमेवान्यत्रान्यत्र सर्व एव जडश्चेतनो वा धर्मी स्वगतेन धर्मविशेषेण छन्दितस्तदधीनवृत्तिको भवतीत्यतस्तस्मिन् स्वधर्मे प्रतिष्ठानादस्य स्वच्छन्दस्त्वम्, स्वरूपाननुगतेन च केनचिद्धर्मेणाच्छन्दने तस्य परच्छन्दस्त्वं भवतीति पर्यालोच्यम् । (७) एतेन 'स्वच्छन्दोच्छलदच्छे'त्यादयः प्रयोगा अपि सुव्याख्याताः ॥ (८) 'राज्येन च्छन्दयामासुः' इत्यादावपि विरेचनस्य व्यावर्तनापरपर्यायस्य संवित्परिच्छेदानतिरेकान्नार्थान्तरत्वमापद्यते । तदित्थमनेकधा निर्दिष्टं संस्कृतं छन्दःप्रतिष्ठानत्त्वम् ॥

अथातः प्राकृतां छन्दःप्रतिष्ठामनुवर्तयामः । अस्ति हि—सर्वेषामेवार्थजातानां काचिदाकारनिबन्धना मात्राभूमिः, ज्ञानदर्शनचारित्र्यशक्तिनिबन्धना च वृत्तभूमिः प्रातिस्विकभावेन प्रकृतिसिद्धा; या भूयोदर्शनेन परीक्षकबुद्धिनिरूढा भवति । तां तामेव भूमिं बुद्धिनिष्ठां छन्दःप्रतिष्ठामालोचमानः शिल्पी तत्साम्येन बहिरर्थमुत्पादयति । इमां च दार्शनिका यद्यप्यनुभवाहितसंस्काररूपां विषयाकाराकारितान्तःकरणवृत्त्यनुशयरूपां वाचक्षाणा विषयोत्पत्त्यनन्तरभाविनीमेवाभिप्रयन्ति । अथापि तद्वस्तूपपत्तेस्तच्छन्दःप्रतिष्ठानिघ्नतया वस्तुतस्तस्या औत्पत्तिकत्वसंसिद्धिः । नहि खलु ह्रस्वचिकीर्षया कार्श्यं गमितस्यापि हस्तिनः प्रोत्तुङ्गचिकीर्षया वा पोषं गमितस्यापि कीटस्य कपिशरीरमर्यादानुगमः शक्यते कर्तुम् । न वा तरुणकपिसमशरीरस्य मनुष्यशिशोर्महतापि प्रयत्नेन मुग्धत्वमपनोद्य तरुणकपिवद्गमनागमनप्रौढिं कर्तुं पारयामः । पञ्चविंशतिवर्षाणि यावददृष्टवर्धनभावस्यापि नरशरीरस्य तदुत्तरमुपायपरम्परयापि वृद्धियोग्यत्वं न दृश्यते । एते चान्ये चैवंविधास्तस्या एव सृष्ट्यादौ परमेश्वरेच्छानियमितायाः प्रतिष्ठाया महिमानो भवन्ति ।

सा चेयं छन्दःप्रतिष्ठा द्वेधा—मात्राप्रतिष्ठा वृत्तप्रतिष्ठा च । अवयवपिण्डपरिवृत्तिसहत्वे आद्यायाः, तदसहत्वे चान्याया व्यवस्थितिः । एतदव्यक्तप्रतिष्ठाव्यञ्जका एवावयवकूटाः प्रतिष्ठातुलितकेन संनिविष्टाश्छान्दसिकनयेऽक्षरशब्देन संज्ञायन्ते वर्णशब्देन च । तथा च श्रूयते—

'स बृहतीमेवास्पृशद् द्वाभ्यामक्षराभ्यामहोरात्राभ्यामेव । तदाहुः—कतमा सा देवाक्षरा बृहती यस्यां तत्प्रत्यतिष्ठत् । द्वादश पौर्णमास्यः, द्वादशाष्टकाः, द्वादशामावास्याः. एषा वाव सा देवाक्षरा बृहती. यस्यां तत्प्रत्यतिष्ठदिति ।'

अत्र हि पौर्णमास्यष्टकामावास्यानामहोरात्रयोश्चाक्षरत्वमाख्यायते छन्दःपरिभाषायाम् ।

तथा शतपथश्रुतौ—

'पञ्चदश वा अर्धमासस्य रात्रयः । अर्धमासशो वै संवत्सरो भवन्नेति तद्रात्रीरवाप्नोति । पञ्चदशानामु वै गायत्रीणां त्रीणि च शतानि षष्टिश्चाक्षराणि, त्रीणि च वै शतानि षष्टिश्च संवत्सरस्याहानि तदहान्याप्नोति । तद्वेव संवत्सरमाप्नोति ।'

इत्येवमहोरात्राभ्यां संवत्सराप्तिं प्रदर्शयता भगवता महर्षिणा पञ्चदशभिः पञ्चदशभिरंशैः प्रकल्पितशरीराणां वैदिकपर्याये संवत्सराख्याप्रतिपन्नक्रान्तिवृत्तप्रदेशानामर्धमासाख्यानां छन्दःपरिभाषायामक्षराख्यया प्रतिपत्तव्यानां चतुर्विंशत्या संवत्सरस्य गायत्रीत्वं सुप्रतिपादितं भवतीति द्रष्टव्यम् ।

एतदभिप्रायेणैव च—

'अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ।'

इत्येतन्मन्त्रविवरणप्रक्रमे शतपथे—

"देवाश्च वा असुराश्चोभये प्राजापत्याः पस्पृधिरे । तान् स्पर्धमानान् गायत्र्यन्तरा तस्थौ । या वै सा गायत्र्यासीद्, इयं वै सा पृथिवी । इयं हैव तदन्तरा तस्थौ । त उभय एव विदांचक्रुः यतरान् वै न इयमुपावर्त्स्यति, ते भविष्यन्ति, परेतरे भविष्यन्तीति । तामुभय एवोपमन्त्रयांचक्रिरे—अग्निरेव देवानां दूत आस, सहरक्षा इत्यसुररक्षसमसुराणाम् । साग्निमेवानुप्रेयाय । तस्मादन्वाह 'अग्निं दूतं वृणीमह' इति ॥"

इत्यनेन ग्रन्थेन संवत्सरवत् पृथिव्या अपि गायत्रीत्वमाख्यायते । तत्राप्यंशानां षष्ट्युत्तरत्रिशतीमितानां व्यवस्थिततया 'अर्धमासशो वै संवत्सरो भवन्नेति' इति न्यायेन पञ्चदशशः परिच्छेदे चतुर्विंशत्यक्षरत्वोपलब्धेः ॥

अपर आह—

"यत्पर्यपश्यत् सरिरस्य मध्ये उर्वीमपश्यज्जगतः प्रतिष्ठाम् ।
तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनं हरामि ॥
याभिरदृंहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भर्त्रीम् ।
ता नः शिवाः शर्कराः सन्तु सर्वाः ॥" (तै. ब्रा.)

"आपो वा इदमग्रे सलिलमासीत् । तेन प्रजापतिरश्राम्यत्—कथमिदं स्यादिति । सोऽपश्यत् पुष्करपर्णं तिष्ठत् । सोऽमन्यत... अस्ति वै तत्—यस्मिन्निदमधितिष्ठतीति स वराहो रूपं कृत्वोपन्यमज्जत् । स पृथिवीमध आर्च्छत् । तस्या उपहत्योदमज्जत् तत्पुष्करपर्णेऽप्रथयत् । यदप्रथयत् तत्पृथिव्यै पृथिवीत्वम् ॥ अभूद्वा इदमिति तद्भूम्यै भूमित्वम् ॥ तां दिशोऽनु वातः समवहत् । तां शर्कराभिरदृंहत् शं वै नोऽभूदिति तच्छर्कराणां शर्करत्वम् ।"

इत्येवं मंत्रब्राह्मणाभ्यां तैत्तिरीयके जगतः प्रतिष्ठायाः शर्कराभिरक्षरस्थानीयाभिः संभृतत्वादस्याश्छन्दःसामान्यलक्षणे प्राप्ते छन्दोविशेषप्रतिपित्सायाम्—

"स वै खलु प्रथमं यजति । तद्वै कनिष्ठं छन्दः सद् गायत्री प्रथमा छन्दसां युज्यते । अयं वै लोको बर्हिः । ओषधयो बर्हिः । अस्मिन्नेवैतल्लोके ओषधीर्दधाति । ता इमा अस्मिँल्लोके ओषधयः प्रतिष्ठिताः । तदिदं सर्वं जगदस्याम् । तेनेयं जगती, तज्जगतीं प्रथमामकुर्वन् । अथ नराशंसं द्वितीयं यजते । अन्तरिक्षं वै नरांशसः । अन्तरिक्षमु वै त्रिष्टुप् । तत्त्रिष्टुभं वै द्वितीयामकुर्वन् ।"

इति शतपथोक्तप्रकारेण द्युलोकान्तरिक्षापेक्षया कनिष्ठायाः पृथिव्याः कानिष्ठत्वसाधर्म्याद्गायत्रीत्वं सर्वजगदाश्रयत्वाद्वा जगतीत्वमित्यादि तत्तत्प्रकरणप्राप्तं द्रष्टव्यमिति । क्वचित्तु—'अवस्य श्लोकस्य स्रग्धराछन्दः,' 'त्रैष्टुभमिदं पद्यमि'त्यादिवदिहापि भेदेन व्यपदिशन्ति—'गायत्री वै पृथिवी, त्रैष्टुभमन्तरिक्षम्, जागती द्यौः, आनुष्टुभीर्दिशः ।' इत्यादि ।

एवं यत्र गार्हपत्यात्प्राञ्चं सन्तमाहवनीयमुद्धर्तुं विक्रमाधानं विधीयते तत्र—

"तं वा अष्टासु विक्रमेष्वादधीत, अष्टाक्षरा वै गायत्री । गायत्र्यैवैतद्दिवमुपोत्क्रामति । एकादशस्वादधीत, एकादशाक्षरा वै त्रिष्टुप् । त्रिष्टुभैवैतद्दिवमुपोत्क्रामति । द्वादशस्वादधीत, द्वादशाक्षरा वै जगती । जगत्यैवैतद्दिवमुपोत्क्रामति ॥ नात्र मात्रास्ति यत्रैव स्वयं मनसा मन्येत तदादधीत । स यद्वा अप्यल्पकमिव प्राञ्चमुद्धरति । तेनैव दिवमुपोत्क्रामति ।"

इत्येवं विक्रमाणां छन्दोनिदानसंख्यया संख्यातानां छन्दःपरिभाषायामक्षरत्वं छन्दसां मात्रानिबन्धनत्वं च सुव्यक्तमाख्यातमिति द्रष्टव्यम् ॥ एवमग्निष्टोमप्रशंसायामैतरेयके—

"स वा एषा गायत्र्येव यदग्निष्टोमः । चतुर्विंशत्यक्षरा वै गायत्री, चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि । स वा एष संवत्सर एव यदग्निष्टोमः । चतुर्विंशत्यर्धमासो वै संवत्सरः, चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि ।"

इत्येवमग्निष्टोमस्य गायत्रीत्वसंवत्सरत्वोपचारप्रसङ्गेन स्तुतशस्त्राणामक्षरत्वमवगतं भवति । यत्तु स्तोत्रशस्त्राणामर्धमासत्वानवगमवदक्षरत्वमपि नावगतं स्यादिति ब्रूयात्, तदपवाद्यम् । स्तोत्रशस्त्रयोरर्धमासत्वासिद्धौ चतुर्विंशत्यर्धमासत्वरूपसंवत्सरत्वस्याप्यग्निष्टोमनिष्ठत्वेनाप्रतिष्ठानापत्तेः ।

यत्तु—"सोऽब्रवीत् प्रजापतिश्छन्दांसि—रथो मे भवत, युष्माभिरहमेतमध्वानमनुसंचराणीति । तस्य गायत्री च जगती च पक्षावभवताम् । उष्णिक् च त्रिष्टुप् च प्रष्ट्यौ । अनुष्टुप् च पङ्क्तिश्च धुर्यौ । बृहत्योवोद्धिरभवत् । स एतं छन्दोरथमास्थाय एतमध्वानमनुसमचरत् ॥"

इति तैत्तिरीयके छन्दसां रथत्वम्; (१)

यच्च—"पशवो वै देवानां छन्दांसि, तद् यथेदं पशवो युक्ता मनुष्येभ्यो वहन्ति । एवं छन्दांसि युक्तानि देवेभ्यो यज्ञं वहन्ति ॥" इति शतपथे छन्दसां पशुत्वम्; (२)

यदपि—'अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।
ताभिर्याति स्वयुक्तिभिः ॥ १ ॥' (ऋ. सं. १।४)

'सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षण ॥ २ ॥' (ऋ. सं. १।४)

'भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परिद्यावापृथिवी यन्ति सद्यः ॥ ३ ॥' (ऋ.सं.१।८)

'सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥ ४ ॥ (ऋ. सं.)

'सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाऽधि तस्थुः ॥' (ऋ.सं. २।३)

'इमं रथमधि ये सप्त तस्थुः सप्त चक्रं सप्त वहन्त्यश्वाः ।
सप्त स्वसारो अभिसंनवन्ते यत्र गवां निहिता सप्तनाम ॥' (ऋ. सं. २।३)

इत्येतेषु मन्त्रेषु छन्दसामश्वत्वम्; (३)

यच्च—"तेऽब्रुवन्नङ्गिरस आदित्यान् । क्व स्थ क्व वः सद्भ्यो हव्यं वक्ष्याम इति । छन्दःसु इत्यब्रुवन् । गायत्रियां त्रिष्टुभि जगत्यामिति तस्माच्छन्दःसु सद्भ्य आदित्येभ्य आङ्गिरसीः प्रजा हव्यं वहन्ति ।'

इति ब्राह्मणे छन्दसां सदनत्वं व्याख्यायते; (४)—तेषामयमाशयः—

सूर्यो हि दिवि गच्छन् त्रिशत्युत्तरषट्षष्टितमे दिवसे पुनः प्राक्तनं स्थानमागच्छन् यं पन्थानमाश्रयति तदयनवृत्तं त्रिशत्युत्तरषष्ट्यंशैरङ्कितं याम्योत्तरतश्चैकांशेन विपुलं द्रष्टव्यम् । तदीययाम्यरेखातो दक्षिणतो द्व्यंशान्तरेऽपरा रेखा तावदंशाङ्किता, ततोऽपि दक्षिणेन त्र्यंशान्तरेऽन्या, ततः पञ्चांशान्तरेऽप्यन्या कार्या । एवमुत्तररेखाया उत्तरतोऽपि तिस्रो रेखाः कार्याः । तदित्थमष्टरेखाभिः सप्तपर्वा सूर्यमार्गः । तत्र सर्वदक्षिणे पर्वणि पञ्चदशभिः पञ्चदशभिरंशैर्विभागे कृते चतुर्विंशतिर्विभागा लभ्यन्ते, तदतश्चतुर्विंशत्यक्षरेयं गायत्री द्रष्टव्या (१) तदुत्तरपर्वणि च पादाधिकैस्त्रयोदशभिस्त्रयोदशभिरंशैरष्टाविंशतिविभागाः स्युः, ततस्तावदक्षरा सेयमुष्णिक् संसिद्धा (२) ततोऽप्युत्तरपर्वणि सपादैकादशांशैः कृत्वा द्वात्रिंशद्विभागलाभात्तावदक्षरा सेयमनुष्टुप् सिध्यति (३) अथ मध्यमपर्वणि सूर्यबिम्बाधिष्ठिते दशभिर्दशभिरंशैर्मर्यादायां षट्त्रिंशद्विभागसिद्धौ तावदक्षराया बृहत्याः सिद्धिः (४) एवं तदुत्तरपर्वणि नवांशैः कृत्वा चत्वारिंशदक्षरायाः पङ्क्तेः (५) तदुत्तरतश्च पादोनपादेन सपादैकादशकलात्मकेन सहितैरष्टांशैः कृत्वा चतुश्चत्वारिंशदक्षरायास्त्रिष्टुभः (६) तथा सर्वोत्तरपर्वणि सार्धसप्तांशैः कृत्वा अष्टाचत्वारिंशदक्षराया जगत्याश्च संसिद्धिर्द्रष्टव्या (७) तथा हि न्यासः—

१	२४	१५°		गायत्री
२	२८	१२° ५२' ३०"	प्रतिभागे सार्धसप्तविंशत्युत्तरशतकलापचये	उष्णिक्
३	३२	११° १५'	प्रतिभागे सार्धसप्तनवतिकलापचये	अनुष्टुप
४	३६	१०°	प्रतिभागे पञ्चसप्ततिकलापचये	बृहती
५	४०	९°	प्रतिभागे षष्टिकलापचये	पङ्क्तिः
६	४४	८° ११' १५"	प्रतिभागे पादोनोनपञ्चाशत्कलापचये	त्रिष्टुप्
७	४८	७° ३०'	प्रतिभागे सपादैकचत्वारिंशत्कलापचये	जगती

अस्मिंश्च निर्दिष्टे संवत्सरचक्रे यद्यपि निर्देशलाघवाय एकस्मादेव स्थानादारब्धानि तानि सर्वाणि छन्दांसि, अथापि तेषामारम्भणीयस्थानानि देवताविशेषैः प्रतिपत्तव्यानि। अग्नितारातो गायत्र्याः (१), सवितृत उष्णिहः (२), सोमादनुष्टुभः (३), बृहस्पतेश्च बृहत्याः (४), वरुणात् पङ्क्तेः (५), इन्द्रादेव त्रिष्टुभः (६), अथ विश्वेभ्यो देवेभ्यो जगत्या (७) उपक्रमणात्। एतदभिप्रायेणैवैतेषां देवानाम्—

'अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता संबभूव।
अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥
विराण् मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः।
विश्वान् देवान् जगत्याविवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥' (ऋ.सं. ८)

इत्यस्मिन् मन्त्रे तत्तच्छन्दोभिः सयुक्त्वं तत्तच्छन्दोऽधिष्ठातृत्वं च महर्षय आमनन्ति ॥ तथैव जगदुपभोगाच्च।

एतेषामेव तत्तच्छन्दःसयुजां देवानामंशुभिराप्यायितस्य सूर्यांशोस्तत्तदधिष्ठाने शुक्रसारङ्गादिरूपवत्त्वमुपादिश्यते छन्दःस्थितिनिदर्शनायामवगमसौकर्याय वा। तदिदं यथायथमुपेक्ष्यम् ॥

तथा च प्रकृते सूर्यप्रकाशात्मकस्य प्रजापतेर्बृहतीपदव्योपक्रममाणस्य बृहतीमुभयतोभागा रथोपकरणवत् संचारसाधनान्येव भवन्तीति यथेच्छं रथवद्यानत्वमश्ववद्वा वाहनत्वमत्रैव सर्वदावस्थानात्सदनत्वं चोपचर्यते। सूर्यप्रकाशस्य प्रजापतित्वं चैतरेयशतपथयोराम्नायते—

'तदु तदिमांल्लोकान् समारुह्य अथैषा गतिरेषा प्रतिष्ठा य एष तपति। तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भाः प्रजापतिर्वा स स्वर्गो वा लोकः तदेवमिमांल्लोकान् समारुह्य अथैतां गतिमेतां प्रतिष्ठां गच्छति। तदेतां गतिमेतां प्रतिष्ठां गत्वा एतस्यैवावृतमन्वावर्तते।'

'असावादित्य एकविंश उत्तमा प्रतिष्ठा, तद्दैवं क्षत्रम्, सा श्रीः, तदाधिपत्यम्, तद् ब्रध्नस्य विष्टपम्, तत्प्रजापतेरायतनम्, तत्स्वाराज्यमश्नोति ॥' इति च ॥

तत्रैतस्य विशिष्टस्य रथत्वाभ्युपपत्तौ तदपेक्षिते रथचक्रे यथेच्छं छन्दोमर्यादावृत्ताभिप्रायेण कदाचित्सप्तचक्रत्वम्, कदाचिच्च रथपार्श्वत्वसाधर्म्याद्गायत्रीजगत्यभिप्रायेण

द्विचक्रत्वम्, अथ कदाचित्पुनः कालचक्रपरिवृत्त्यभिप्रायेणैकचक्रत्वं च तत्र तत्र व्यपेक्षन्ते ।

'एष स्य भानुरुदियर्ति युज्यते रथः परि ज्मा दिवो अस्य सानवि । (ऋ. सं.)
इमं रथमधि ये सप्त तस्थुः सप्त चक्रं सप्त वहन्त्यश्वाः । ,, ,,
सप्त स्वसारो अभिसंनवन्ते यत्र गवां निहिता सप्तनाम ।' ,, ,,

इत्यादिषु सप्तचक्रत्वस्य,

'तस्य गायत्री च जगती च पक्षावभवताम्'

इत्यादिषु द्विचक्रत्वस्य,

'उद्वेति प्रसवीता जनानां महान् केतुरर्णवः सूर्यस्य । (ऋ. सं.)
समानं चक्रं पर्याविवृत्सन् यदेतशो वहति धूर्षु युक्तः ॥ ,, ,,
सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधितस्थुः ॥ ,, ,,
द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परिद्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्तशतानि विंशतिश्च तस्थुः ॥ (ऋ. सं.)
पञ्चारे चक्रे परिवर्तमाने तस्मिन्नातस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥ ,, ,,

इत्येवमादिष्वेकचक्रत्वस्य च प्रतिपादनात् । एवमेवाश्वत्वाभ्युपपत्तावपि सप्ताश्वैकाश्वत्वाभ्यां कल्पनाभेदोऽपि सर्वथा संभवावुपपद्यते, सिंहो माणवक इत्यादिवद्गुणशब्दतया तत्तात्पर्यविषयभूते वस्तुनि बाधादर्शनात् । विधीयते हि प्रकृते रथाश्वादिशब्दैः रथाश्वादिगुणश्छन्दसि वस्तुभूतः; । स च स्वाधिष्ठितत्वस्वव्यापारप्रयोजकव्यापारवत्त्वैतदुभयसंबन्धेन स्वविशिष्टं यत्, तन्निष्ठप्रवृत्तिजनकप्रवृत्तिमत्त्वरूपः । एतदेव हि देवताच्छन्दसोः सयुक्त्वमित्यवधेयम् ॥

एतदभिप्रायेणैव—

'एते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ—त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति ।'

इत्येवमादयः श्रौतव्यवहाराः संगच्छन्ते । तदित्थंभूतस्य खल्वप्यस्य सप्त च्छन्दोमण्डलरूपस्य सूर्यमार्गस्य

'साशीतिमण्डलशतं काष्ठयोरन्तरं द्वयोः ।
आरोहणावरोहाभ्यां भानोरब्देन या गतिः ॥
स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥'

इत्येवं विष्णुपुराणादिषु गतिप्राधान्येन रथत्वव्यवहारवदेव ऋतसत्यमयत्वादग्निप्राधान्ये यज्ञशब्देन, आदित्यप्राधान्ये प्रजापतिशब्देन, अथ कालप्राधान्ये संवत्सरशब्देन च भूयसा वैदिकव्यवहारा दृश्यन्ते ।

अत एव—

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।

ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥'(ऋ.सं.८।४)

इत्येतन्मन्त्रविवरणप्रक्रमे—

'यज्ञेन वै तद्देवा यज्ञमयजन्त, यदग्निना अग्निमयजन्त, ते स्वर्गं लोकमायन्। छन्दांसि वै साध्या देवाः तेऽग्रेऽग्निना अग्निमयजन्त ते स्वर्गं लोकमायन् ॥ आदित्याश्चै-वेहासन्नङ्गिरसश्च । ते अग्रे अग्निमयजन्त, ते स्वर्गं लोकमायन् ॥'

इत्येवमुक्तमैतरेयके ।

अत एव च—

'त्रीणि च शतानि षष्टिश्चानूच्यानि यज्ञकामस्य, त्रीणि च वै शतानि षष्टिश्च संवत्सर-स्याहानि तावान् संवत्सरः, संवत्सरः प्रजापतिः प्रजापतिर्यज्ञः ॥' इत्यादि श्रूयते ।

एतदभिप्रायेणैव चैतेषां छन्दसामग्नेः प्रजापतेश्च तनुत्वमपि तत्र तत्रोपचार्यते ।

तथा हि—

'विष्णुमुखा वै देवाश्छन्दोभिरिमांल्लोकाननपजय्यमभ्यजयन् । यद्विष्णुक्रमान् क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमांल्लोकाननपजय्यमभिजयति ।'

इत्येवं विष्णुक्रमपरिक्रमणविधौ—

"अथावर्तते—सूर्यस्यावृतमन्वावर्त इति । एवमिमाँल्लोकान् समारुह्य, अथैषा गति-रेषा प्रतिष्ठा—य एष तपति, तस्य ये रश्मयस्ते सुकृतोऽथ यत्परं भाः प्रजापतिर्वा स स्वर्गो वा लोकः; तदेवमिमाँल्लोकान् समारुह्य, अथैतां गतिमेतां प्रतिष्ठां गच्छति, तदेतां गतिमेतां प्रतिष्ठां गत्वा एतस्यैवावृतमन्वावर्तते ।"

इति माध्यन्दिना आहुः ॥

तैत्तिरीया अप्येवं—

"ऐन्द्रीमावृतमन्वावर्तते—इत्याह । असौ वा आदित्य इन्द्रः । तस्यैवावृतमनु पर्यावर्तते । तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवावृतमनु पर्या-वर्तते ।"

इत्युक्त्वा,

"चतसृभिरावर्तते—चत्वारि च्छन्दांसि । छन्दांसि खलु वा अग्नेः प्रिया तनूः प्रिया-मेवास्य तनुवमभिपर्यावर्तते ।"

इत्याद्यामनन्ति ।

"सप्त छन्दांसि क्रतुमेकं तन्वन्ती"(म. भा.)त्याद्याः स्मृतयश्चैतदर्थपरा द्रष्टव्याः । एवं हि भूयांसो याज्ञिकानां यज्ञानुबन्धिनो व्यवहारा एतदेव छन्दोमयमण्डलमनुसृत्य प्रवर्तमानाः सन्तीति तत्र तत्रान्वीक्षितव्यम् ॥

एवमेवादित्यप्राधान्यात् प्रजापतिशब्देन व्यवहारे प्रवर्तमाने मुख्यमादित्यबिम्बं तदु-पलक्षितरेखां वोभयतो दश दश रेखा आक्रम्य कृतशरीरस्यैकविंशस्य प्रजापतिपुरुषस्य शाखासामान्यभेदेन द्वैधे प्रतिपन्ने—

"ता उत्तरेणाहवनीयं प्रणयति। योषा वा आपो वृषाग्निः। मिथुनमेवैतत्प्रजननं क्रियते। एवमिव हि मिथुनं क्लृप्तम्। उत्तरतो हि स्त्री पुमांसमतिशेते।".

इति शतपथोक्तयोषावृषन्यायेन सौम्याया अपां दिशो योषात्वं याम्याया अग्निदिशश्च वृषत्वं प्रतिपद्य तत्रांशानुरोधिदशरेखाभिप्रायेण विराट्त्वमाख्यातं दृश्यते श्रुतिस्मृत्यादिषु। तथा च विषुवदहः—संस्थानाभिप्रायेण तावत्—

"यथा वै पुरुषः एवं विषुवान्। तस्य यथा दक्षिणोऽर्धः, एवं पूर्वोऽर्धो विषुवतः। यथोत्तरोऽर्धः, एवमुत्तरोऽर्धो विषुवतः। तस्मादुत्तर इत्याचक्षते। प्रवाहुक् सतः शिर एव विषुवान्। विदलसंहित इव वै पुरुषः। तद्धापि स्यूमेव मध्ये शीर्ष्णो विज्ञायते।"

इत्युक्तमैतरेयके।

तैत्तिरीयकेऽपि—

"एकविंश एष भवति। एतेन वै देवा एकविंशेनादित्यमित उत्तमं सुवर्गं लोकमारोहयन्। स वा एष इत एकविंशः। तस्य दशावरस्तादहानि दश परस्तात्। स वा एष विराज्युभयतः प्रतिष्ठितः। विराजि हि वा एष उभयतः प्रतिष्ठितः। तस्मादन्तरेमौ लोकौ यन् सर्वेषु सुवर्गेषु लोकेष्वभितपन्नेति"

इत्युक्त्वा,

"देवा वा आदित्यस्य सुवर्गस्य लोकस्य पराचोऽतिपातादबिभयुः। तं छन्दोभिरदृंहन् धृत्यै। देवा वा आदित्यस्य सुवर्गस्य लोकस्यावाचोऽवपातादबिभयुः। तं पञ्चभी रश्मिभिरुदवयन्॥" इत्याद्याम्नायते॥

'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं सर्वतः स्पृत्वा अत्यतिष्ठद्दशाङ्गुलम्॥'
'ततो विराडजायत विराजोऽधिपूरुषः।
स जातोऽत्यरिच्यत पश्चाद्भूमिमथो पुरः॥'

इत्येवमादयो मन्त्रवर्णा अप्यमुमर्थं द्रढयन्ति। स्मर्यते चायमर्थो मन्वादिभिरपि—

'द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत् प्रभुः॥'

इत्यादिना।

तदित्थं तावदंशानां दशकस्य दशकस्यैकैकमक्षरत्वमभिप्रेत्य बृहतीत्वमाख्यातम्। अन्यत्र पुनः 'इयं वै मा, अन्तरिक्षं प्रमा, असौ प्रतिमा, द्वादश द्वादशाभिता उपदधाति। तत् षट्त्रिंशत्। षट्त्रिंशदक्षरा बृहती' इत्येवमाचक्षाणेन पौर्णमास्यष्टकामावास्यानां देवानामेवाक्षरत्वमभिप्रेत्य बृहतीत्वं संसाध्यते। एवं द्वादशाहस्तुतौ—

"तदाहुः—यदन्यानि च्छन्दांसि वर्षीयांसि भूयोऽक्षरतराणि अथ कस्मादेतां बृहतीत्याचक्षते इति। एतया हि देवा इमाँल्लोकानाश्नुवत। ते वै दशभिरेवाक्षरैरिमं लोक-

मा'भुवत, दशभिरन्तरिक्षम्, दशभिर्दिवम्, चतुर्भिश्चतस्रो दिशः, द्वाभ्यामेवास्मिँल्लोके प्रत्यतिष्ठन्। तस्मादेतां बृहतीत्याचक्षते।"

इत्यैतरेयश्रुत्या संवत्सरवलयात्मकबृहतीव्याप्यैकपदा—विराजोऽक्षरत्वमाख्यायते। विराजोऽपि भूयस्यः क्लृप्तयो भवन्ति। तैत्तिरीयके तावत्—

"नव प्रयाजा इज्यन्ते नवानुयाजाः, अष्टौ हवींषि, द्वावाघारौ, द्वावाज्यभागौ। त्रिंशत्संपद्यन्ते। त्रिंशदक्षरा विराट्।"

इत्येवं प्रयाजादीनामक्षरत्वमाह।

मैत्रायणीयकेऽप्येवम्—

'प्राणेभ्यो वै ताः प्रजाः प्राजायन्त। प्राणा वा एतानि नव हवींषि। नव हि प्राणाः। आत्मा देवता। ततः प्रजायते। नव प्रयाजाः, नवानुयाजाः, द्वावाज्यभागौ, अष्टौ हवींषि, अग्नये समवद्यति। वाजिनो यजति। तत्त्रिंशत्। त्रिंशदक्षरा विराट्। विराज्येव प्रतितिष्ठति। विराजो वै योनेः प्रजापतिः प्रजा असृजत। विराजो वा एतद्योनेर्यजमानः प्रजायते। त्रिंशत्। त्रिंशद्वै रात्रयो मासः। यो मासः स संवत्सरः। संवत्सरः प्रजापतिः। तत्प्रजापतेश्च वा एतद्विराजश्च योनेर्मिथुनाद् यजमानः प्रजायते'—

इति प्रयाजादीनामिव त्रिंशद्रात्रीणां विराडक्षरत्वमुच्यते।

अथ माध्यन्दिनीयके—

'शूर्पं चाग्निहोत्रहवणीं च, स्फ्यं च कपालानि च, शम्यां च कृष्णाजिनं च, उलूखलमुसले, दृषदुपले। तद्दश, दशाक्षरा विराट्। विराड् वै यज्ञः।'—

इति शूर्पादीनामक्षरत्वमुक्तम्।

ऐतरेयके च—

'यदु गायत्री च, पङ्क्तिश्च—ते द्वे अनुष्टुभौ। यदुष्णिक् च, बृहती च—ते द्वे अनुष्टुभौ। यदु द्विपदा च विंशत्यक्षरा, त्रिष्टुप् च, ते द्वे अनुष्टुभौ। यदु द्विपदा च षोडशाक्षरा, जगती च—ते द्वे अनुष्टुभौ॥'

इत्येवं कृत्वा द्वयोर्द्वयोरनुष्टुप्त्वम्', तथा अनुष्टुप्पङ्क्त्योरुष्णिक्त्रिष्टुभोर्गायत्रीजगत्योश्च बृहतीत्वमिति विजातीयच्छन्दोद्वयाक्षराणां सजातीयछन्दोद्वयाक्षरत्वमाख्यायते। तदेतदेवमन्यत्रान्यत्र भूयसा तत्तच्छन्दःस्वरूपनिर्वचनपरतत्तच्छ्रौतवचनपरिशीलनया चत्वारोऽर्था निष्कृष्य सिध्यन्ति—

(१) छन्दःस्वरूपनिरूपकतयाभिप्रेतस्य यथेष्टसमुदायावयवतां गतस्य यस्य कस्यापि द्रव्यजातस्य गुणजातस्य वा छन्दःपरिभाषायामक्षरसंज्ञा—इत्येकः॥

(२) क—तादृशैश्चाक्षराख्यैर्द्रव्यगुणैश्चतुर्विंशतिसंख्यापूरणे च सा मर्यादा गायत्री, अष्टाविंशतिसंख्यापूरणे च सा मर्यादा उष्णिगित्येवं चतुरुत्तराणि तानि तानि छन्दांसि वेदितव्यानि। उत्तरोत्तरमेकैकाक्षरवर्धितपादत्वात्॥

(२) ख—पादप्राधान्येन चाष्टभिरक्षरैः कृता मर्यादा गायत्री, दशभिर्विराट्, एकादशभिस्त्रिष्टुप्, द्वादशभिर्जगतीत्यपीच्छन्तीति—द्वितीयः ॥

(३) एवं पर्यायतुलितकाख्या शिल्पाद्युपयोगिनी मितिश्छन्द इति—तृतीयः ।

(४) मितेरपि न मितित्वेन रूपेण छन्दस्त्वमपि तु करणतापेक्षितस्वरूपविशेषजनकतावच्छेदकत्वेनेति—चतुर्थः ।

एतमेव निष्कर्षमनुसृत्य लौकिकाः, वैदिकाः, वाचिकाः, आर्थिकाश्च सर्वे छन्दोव्यवहारा यथायथं प्रवर्तमानाः सन्तीति तत्र तत्रोपेक्ष्यम् ॥ तदित्थमार्थिकेषु छन्दोव्यवहारेषु छन्दःप्रतिष्ठातत्त्वं वैशद्येन प्रदर्शितं भवति ॥

वाचिकेष्वपि छन्दःस्वर्णसामिवाशयसाम्येनार्णानामपि नियतसंख्यावच्छिन्नानां, संवेशोपवेशाभ्यां गायत्र्यादिछन्दोविशेषस्वरूपोपलब्धेस्तत्संवेशोपवेशाधिष्ठानस्य प्रस्तारादिक्रियाभिनेयस्यामूर्तस्य छन्दःप्रतिष्ठात्वमवतिष्ठते । सा च मात्रासंख्याप्रधाना, अक्षरसंख्याप्रधाना, नियतमात्राक्षरस्थानप्रधाना चेति त्रिविधाप्यनिरुक्तपृथग्रूपा गायत्र्यादिशब्दैर्लक्ष्यते । तस्याश्चाक्षराणि धर्माः । अक्षरेषु चेयमनुगतेति कृत्वा तस्याश्छन्दःप्रतिष्ठाया ब्रह्मत्वम् । तस्माच्छन्दस्तत्त्वविज्ञानेन सर्वमिदं विज्ञातं भवतीति विज्ञेयम् ।

अथान्यः प्रत्यवतिष्ठते—

'श्रोत्रियश्छन्दोऽधीते ॥' पाणिनि सू. ५ । २ । ८४ ॥

'बहुलं छन्दसि ॥' २ । ४ । ३९ ॥ इत्येवमादिभिः **सूत्र**जातेषु;

'युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ।'

'कामात्मकाश्छन्दसि कर्मयोगा एभिर्विमुक्तः परमश्नवीत ।'

इत्येवमादिभिः **स्मृति**जातेषु;

'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।'

इत्येवमादिभिः **काव्य**जातेषु; एवमन्यत्रान्यत्र च वेदविषयतया छन्दःशब्दः प्रयुज्यते । 'अनन्ताश्च वेदाः श्रूयन्ते'—इत्यनवच्छिन्नत्वेऽवच्छेदत्वानुपपत्त्या सिद्धमतिरिक्तवृत्तिकत्वं छन्दःशब्दस्य—इति चेत् । अत्रोच्यते—पद्यगद्यगेयात्मकैस्त्रिविधैर्वाचिकच्छन्दोभिरेव सर्वस्य वेदस्य छन्दनात्तद्भेदादेव च भेदेन तत्प्रतिपत्तेस्तात्स्थ्यात्ताच्छब्द्यन्यायेन तत्र तदुपचार इष्यते । किं च पृथिव्यादिलोकानामग्न्यादिदेवानां च तत्तच्छन्दश्छन्दितानामेव स्वरूपलाभात् कार्यकारित्वव्यवस्थापनाच्चेह द्यावापृथिवीधर्मनिरूपणे यज्ञवेदे भूयसा छन्दसामाम्रेडनाच्छन्दःप्राधान्याच्छन्दःशब्दोपचार इष्यते ।

उक्तं च सर्वेषां कार्यजातानामाधारभूतं प्राकृतं छन्दो ब्रह्माख्यम् । तदनुगतधर्मप्रतिपादनपरो ग्रन्थश्छन्द उच्यते इति युक्तम् । सांख्यन्यायवेदान्तादिधर्मप्रतिपादनप-

रेषु ग्रन्थेषु साख्यादिशब्दवत् । तथा च गौणवृत्त्यां क्वचिदन्यत्र प्रयोगेऽपि मुख्यवृत्त्या-वच्छेद एव छन्द इति संसिद्धम् ॥

अथ छन्दोवादः ।

ननु किमिदं तावच्छन्द इति जिज्ञासायां गतियत्यध्वपरिच्छित्त्यतिरेकेण छन्दःस्वरूपं निरूप्यते तन्नावकल्पते । गतियत्यध्वपरिच्छित्तिच्छन्दसामनर्थान्तरत्वात् । न च वृत्ति-र्लयो ध्वनिरिति गतेस्त्रयो भेदाः, अवसायो विच्छेदो विरतिर्यतिरणुयतिरिति यतेः पञ्च भेदाः, लिप्यध्वपरिच्छित्तिर्गत्यध्वपरिच्छित्तिरित्यध्वयोगस्य द्वौ भेदौ, वर्णच्छन्दो गण-च्छन्दो मात्राच्छन्दश्चेति छन्दसस्त्रयो भेदाः,—इतीत्थमेषां चतुर्णां नितान्तवैषम्यं प्रतिपद्यत इति वाच्यम् । आपाततस्तेषां भेदकल्पनायामपि वस्तुतः स्वरूपानतिरेकात् । तथा हि—गतित्रैविध्ये वृत्तिध्वन्योर्वर्णवेदीयपदार्थत्वाच्छन्दसश्च वर्णोपलक्षितत्वेऽपि वर्णानात्मकत्वात्तत्र यद्यपि वृत्तिध्वन्योरप्रवेशः प्रतिपद्यते । अथाप्येष लयः खलु यति-तारतम्यनिबन्धनो न यतेरतिरिच्यते । अयमेव तु लयो गत्यध्वपरिच्छित्तिशब्दान्त-रेणाप्याख्यायते । तयोर्विवेकानुपलम्भात् । मसजसततगेषु हि वर्णैरभिनीयमानेषू-च्चारयितुरुच्चारणसामञ्जस्यमनुभूयते । जसयोः स्थाने तभयोः संनिवेशे त्ववश्यमुच्चा-रणक्लिष्टता भवति । तत्र चायं द्वितीयः सगणोऽवष्टम्भी विष्टम्भमजानताप्यभिनीय-मानः स्वयमवष्टम्भमुपस्थापयति स्वान्ते । तदिदमवष्टम्भित्वं तत्र केन रूपेण—? द्वादशाक्षरत्वेन वा, शार्दूलविक्रीडितसंबन्धित्वेन वा, तथाविधसत्त्वेन वा गणतुरी-यत्वविशिष्टसत्त्वेन वा, मगणोत्तरत्वविशिष्टसगणोत्तरत्वविशिष्टजगणोत्तरत्वविशिष्टसत्त्वेन वा ? । नाद्यः—मरभनयययेषु नगणघटकस्य द्वादशाक्षरत्वेऽप्यवष्टम्भानपेक्षणात् । न द्वितीयः—तत्र मगणजगणादीनां विष्टम्भनिरपेक्षत्वात् । न तृतीयः—तत्रैव द्वितीय-सगणस्यानवष्टम्भित्वात् । न तुरीयः—सजससगेषु तुरीयस्यापि तस्य तदनपेक्षणात् । तस्मान्मसजोत्तरसगणघटकत्वेनैव रूपेण तस्य द्वादशाक्षरस्यावष्टम्भित्वं वाच्यम् । तथा च मस्य सगणाव्यवहितपूर्ववृत्तित्वेनावस्थानं, सस्य मगणोत्तरवृत्तित्वजगणपूर्ववर्तित्वाभ्यां, जस्य च सगणद्वयमध्यवर्तित्वेन । सस्य पुनर्जगणोत्तरवर्तित्वतगणप्राग्वर्तित्वाभ्यां चेत्ये-वमवस्थानक्रम एवाध्वपरिच्छित्तिः स्यात् । ततः क्रमात्प्रच्यवमानानां तेषामुच्चारणे क्लिष्टतानुभवात् । अथेत्थं पौर्वापर्येणोच्चारणमेवैषां लयगतिविशेषः स्यात् । निर्दिष्ट-रीत्या तेनैव रूपेणावष्टम्भसापेक्षत्वात् । अवष्टम्भापेक्षाप्रयोजकत्वाप्रयोजकत्वाभ्यामेव च लयगतिप्रत्यवमर्शात् । तदिदं पौर्वापर्यं च मसजसानां प्रत्येकस्य क्रमिकावस्थान-लक्षणान्नातिरिच्यते—इति लयगतेरनतिरिक्ताध्वपरिच्छित्तिः । यतश्च मसजोत्तरस-घटकत्वेन यतिमत्त्वं दृश्यते, ततो यतिमत्त्वव्याप्यतया मसजोत्तरसघटकत्वरूपाया लय-गतेरध्वपरिच्छित्तेर्वा यद्यप्यर्थान्तरत्वमापाततः प्रतिभाति, अथाप्यवष्टम्भप्रयोजक-त्वाप्रयोजकत्वोपलक्षितपौर्वापर्यस्यैव गतिरूपत्वप्रतिपत्त्या अन्वयव्यतिरेकाभ्यामस्या-

दष्टम्भस्य गतिस्वरूपसंपादकतया च गतिग्रहणे तद्ग्रहणसंभवः । 'तस्मादासां गति-यतिपरिच्छित्तीनां नैकान्ततोऽर्थान्तरत्वमुपलभामहे—इति सिद्धमासामैकार्थ्यम् ॥ एव-मेवावष्टम्भप्रयोजकत्वाप्रयोजकत्वोपलक्षितपौर्वापर्येणावस्थितानां मसजादिगणानामेव छन्दस्त्वादस्य छन्दसो यद्यप्यर्थान्तरत्वमापाततः प्रतिभाति अथापि 'स राजा संवृत्तः' 'स पाचको जातः' 'स नेदानीं कुण्डली न दण्डी' इत्यादिषु विधिनिषेधयोर्विशेष्यव्यप-दिष्टयोरपि विशेषणमात्रविश्रान्तिवदिहापि लाघवान्मसजादिगणसमवेतस्य तत्पौ-र्वापर्यस्यैव छन्दस्त्वसिद्ध्या छन्दसो गतियतिपरिच्छित्त्यनतिरिक्तत्वं फलतीत्यलं छन्द-सोऽर्थान्तरत्वपरिष्कारेण; इति—चेद्—अत्रोच्यते—मसजोत्तरसगणचरमावयवोत्तर-त्वावच्छेदेन ततगाव्यवहितपूर्वत्वावच्छेदेन च वर्तमानोऽयमवष्टम्भस्तावन्न गतिर्न चा-ध्वपरिच्छित्तिर्न वा छन्दः; गत्यादीनामवष्टम्भवद्देशविशेषे नियतत्वाभावात् ॥ १ ॥ अथ गतिस्तावन्नावष्टम्भः । अवष्टम्भप्रयोजकत्वोपलक्षितपौर्वापर्यस्य गतिरूपतया तस्य गतिरूपसंपादकत्वेऽपि तत्त्वासंभवात् ॥ न चाध्वपरिच्छित्तिः, गतेर्हि स्वमार्गात् प्रच्यवमानायाः क्लिष्टत्वं कुरूपत्वमनुभूयते । यतश्च तस्याः सौकर्यं सौन्दर्यं वा सिध्यति, साध्वपरिच्छित्तिरिति गत्यवयवसंनिवेशविशेषरूपायास्तस्या गति...संभवात् । यथा स्थूलत्वकृशत्वसाम्येनानुच्चावचशीर्षपादादिसाम्येन दिक्साम्येन च वर्णादिलिपीनां सौन्दर्यं वाचनसौकर्यं चानुभूयते, तदभावेन च बालकादिलिपीनां कुरूपत्वं वाचन-क्लिष्टत्वं च । तथा च तत्र लिप्यध्वपरिच्छित्तेर्लिप्यतिरिक्तत्ववदिहापि गत्यध्वपरि-च्छित्तेर्गत्यतिरिक्तत्वं सुवचमिति द्रष्टव्यम् ॥ न वा छन्दः—विलक्षणगणपौर्वापर्यनि-बन्धनायां गतौ मात्राव्यवस्थानिबन्धनच्छन्दस्त्वासंभवात् ॥ २ ॥ अथेयमध्वपरि-च्छित्तिर्नावष्टम्भो न वा गतिः । विशेषस्य संसाधितत्वात् । न वा छन्दः—गत्यवय-वसंनिवेशविशेषरूपायामध्वपरिच्छित्तौ मात्राव्यवस्थानिबन्धनच्छन्दस्त्वस्याप्यसंप्राप्तेः ॥ ३ ॥ अत एव चेदं छन्दो गतियतिपरिच्छित्तिभ्योऽतिरिच्य प्रतिपद्यते—इतीत्थमेषा-मर्थान्तरत्वं संसिद्धम् ॥ अत एव 'न वृत्तदोषात् पृथग् यतिदोषो वृत्तस्य यत्यात्मकत्वा'-दिति पूर्वपक्षीकृत्य—'न, लक्षणस्य पृथक्त्वादिति' समाहितं वामनेन काव्यालङ्कारसूत्रेषु । यत्तु केचित् अन्येषामर्थान्तरत्वेऽपि छन्दोगत्योरैकार्थ्यमेवाभ्युपगच्छन्ति, तदसत् । गते-श्छन्दोधर्मिकत्वसंभवेऽपि छन्दस्त्वासंभवादित्यलम् ॥

इति छन्दसोऽर्थान्तरतावादः ।

अथ छन्दोविभक्तिवादः—

अथेदं छन्दः पञ्चधा—अनादिष्टच्छन्दः, बृहच्छन्दः, अतिच्छन्दः, कृतिच्छन्दः, प्रचितिच्छन्दश्चेति भेदात् । तत्र पञ्चानादिष्टच्छन्दांसि—उक्तमत्युक्तं मध्यं प्रतिष्ठा सुप्र-तिष्ठा चेति । अथ सप्त बृहच्छन्दांसि—गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती चेति । तथा सप्तातिच्छन्दांसि—अतिजगती, शक्वरी, अतिशक्वरी,

अष्टिः, अत्यष्टिः, धृतिः, अतिधृतिरिति। एवं सप्तैव कृतिच्छन्दांसि—कृतिः, प्रकृतिः, आकृतिः, विकृतिः, संकृतिः, अभिकृतिः, उत्कृतिश्चेति भेदात्। अथात ऊर्ध्वं प्रचितिच्छन्दस्त्वच्च संख्यायते। नन्वेतद्वृहच्छन्दोऽभिप्रायेण सप्तैव छन्दांसि भवन्तीति भूयसा श्रूयते, तत्कथमेतावान् प्रपञ्चश्छन्दसामाख्यायते? उच्यते—षोडशीप्रक्रमे—'छन्दसां यो रसोऽत्यक्षरत्, सोऽतिच्छन्दसमभ्यक्षरत्। तदतिच्छन्दसोऽतिच्छन्दस्त्वम्। सर्वेभ्यो वा एष छन्दोभ्यः संनिर्मितो यत् षोडशी' इत्याम्नायते। तत्र छन्दसां रसश्चतुरक्षररूपः। 'चतुरक्षराण्येव छन्दांस्यासन्।' इति छन्दोव्यूहनश्रुत्युक्तेः। तथा हि—छन्दोव्यूहने तावत् चतुरक्षरा गायत्री त्रिष्टुब् जगती च। तत्र जगत्यास्त्रीण्यक्षराणि, त्रिष्टुभ एकमक्षरं च समादाय गायत्री तावदष्टाक्षरा क्रियते। इत्थं कृते अष्टाक्षरा गायत्री, त्र्यक्षरा त्रिष्टुप्, एकाक्षरा जगती सिद्धा। अथैवंरूपा गायत्री स्वयं संयुज्य त्रिष्टुभं संपादयति सा त्रिष्टुबेकादशाक्षरा संपद्यते। एवं संपन्ना च त्रिष्टुप स्वयं संयुज्य जगतीं संपादयति सा जगती द्वादशाक्षरा संपद्यते। गायत्री, त्रिष्टुप्, जगती चेति त्रीण्येव छन्दांसि सर्वाणि छन्दांसि भवन्ति गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्याख्यानि। तत्रानुष्टुप्पङ्क्ती, उष्णिक्त्रिष्टुभौ, गायत्रीजगत्यौ, चेत्येवं द्वे द्वे संयुज्य द्वे द्वे बृहत्यौ संपादयत—इत्येतेषां बृहतीरूपतया बृहच्छन्दःशब्देनाख्यानम्। तथा च श्रूयते—'बृहती वै छन्दसां स्वाराज्यमानशे' इति। तदित्थं छन्दःसिद्धौ तस्यैव चतुरक्षररूपस्य रसस्य जगत्यामत्याधाने षोडशाक्षरं भवति। तदत्याधानादतिच्छन्द इत्युच्यते। अथ पञ्चदशीसप्तदश्यौ, चतुर्दश्यष्टादश्यौ, त्रयोदश्यूनविंश्यौ, चेत्येवं द्वे द्वे संयुज्य द्वे द्वे षोडश्यौ संपादयत—इत्येतेषामतिच्छन्दोरूपतया अतिच्छन्दःशब्देनाख्यानम्। एवमूनविंशत्युत्तरं पुनश्चतुरक्षराधाने त्रयोविंशत्यक्षरं भवति। तत्र कृतिशब्दः। तत्क्रियोत्तरं तज्जातीयक्रियान्तरसंनियोगे कृतिशब्दो दृष्टो वर्गवत्। तथा चेहापि द्वाविंशीचतुर्विंश्यौ, एकविंशीपञ्चविंश्यौ, विंशीषड्विंश्यौ चेत्येवं द्वे द्वे संयुज्य द्वे द्वे त्रयोविंश्यौ संपादयत इति कृतिच्छन्दोरूपतया कृतिच्छन्दःशब्देनाख्यायन्ते। तदित्थं सति कृतिच्छन्दसामतिधृतावतिच्छन्दसां च जगत्यामन्तर्भावः सुवचः। प्रचितिच्छन्दांसि तु छन्दःसमुच्चयरूपाणीति नातिरिच्यन्ते। अथानादिष्टच्छन्दसां गायत्र्यामन्तर्भावः। भुरिग्दैव्यां चतुरक्षरवृद्ध्या याजुष्याः, तत्र स्वराजि चतुरक्षरवृद्ध्या साम्न्याः, तत्र स्वराजि चतुरक्षरवृद्ध्या आर्च्याः, तत्र स्वराजि चतुरक्षरवृद्ध्या आर्ष्याः स्वरूपाधानात्। तदुक्तम्—

> 'उक्तादिपञ्चकं कैश्चिद्गायत्रीत्येव कथ्यते।
> यथा ह्यतिजगत्यादि त्वतिच्छन्दः प्रवर्ण्यते॥' इति।

तथा चातिजगत्यादीनां जगत्याम्, उक्तादीनां तु गायत्र्यामन्तर्भावसंभवात् सप्तैव छन्दांसीति याज्ञिकानामभिमानः॥ तदिदं छन्दः पुनर्द्वेधा—मात्राछन्दो वृत्तच्छन्दश्च। तत्र मात्राछन्दांस्युक्तानि गायत्र्यादीनि सप्तैव। तानि जातिभेदेन पृथग्

व्यपदिश्यन्ते । अथ मात्राछन्दसां गायत्र्यादीनामेकैकेऽवान्तरविशेषा. वृत्तच्छन्दांसि । तानि वृत्तिभेदेन पृथग् व्यपदिश्यन्ते । यथा मनुष्यविभाजिकाश्चतस्रो ब्राह्मणादिजातयः, ब्राह्मणादिविभाजिकास्तु तत्तद्ब्राह्मणादिगता अवान्तरविशेषरूपा वृत्तय इत्येवमायूह्यमिति याज्ञिकानां प्राचामनुसारेण व्याख्यातम् । नव्यास्तु छान्दसिकाः पुनरन्यथान्यथा विभज्य व्याचक्षते ।

(१) तत्र पद्यजातं द्वेधा—वृत्तं जातिश्च । यत्र नियतवर्णव्यवस्थया छन्दःसिद्धिस्त-द्वृत्तम् । यत्र तु नियतमात्राव्यवस्थया छन्दःसिद्धिः सा जातिः । तथा चाह नारायणः—

'पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥'

हलायुधोऽप्याह—

'पद्यं चतुष्पदं तच्च वृत्तं जातिरिति द्विधा ।
एकदेशस्थिता जातिर्वृत्तं लघुगुरुस्थितम् ॥'

(२) परे तु वृत्तिर्जातिरिति द्वेधा विभज्य तयोरुभयोरेव वृत्तशब्देन छन्दःशब्देन च सामान्यतो व्यपदेशमिच्छन्ति । वर्णवृत्तं वर्णच्छन्दः, मात्रावृत्तं मात्राच्छन्द इति । तथा चैषां मते छन्दोवृत्तशब्दयोः पर्यायवाचित्वम् ।

(३) छन्दःपरिमलकारस्तु तयोः पर्यायार्थत्वं प्रत्याख्याय—'मात्राक्षरसंख्या नियता वाक् छन्दः, गलसमवेतस्वरूपेण नियता वाग् वृत्तम् ।' इत्येवं व्यवस्थापयति । तथा च तन्मते—

'उक्तात्युक्ता तथा मध्या प्रतिष्ठा सुप्रतिष्ठिका ।
गायत्र्युष्णिगनुष्टुप् च बृहतीपङ्क्तित्रिष्टुभः ॥
जगती चातिजगती शक्वरी चातिशक्वरी ।
अष्ट्यत्यष्टी धृतिः सातिः कृतिः प्रकृतिराकृतिः ॥
विकृतिः संकृतिश्चातिकृतिरुत्कृतिदण्डकाः ।
एतानि वर्णच्छन्दांसि तद्भेदानां तु वृत्तता ॥
एवमेव णढादीनां मात्राच्छंन्दस्त्वमिष्यते ।
तदवान्तरभेदानां जातित्वमिति सिध्यति ॥'

(४) अपरे तु पुनरन्यथा विभज्य व्याचक्षते । तथा हि—पद्यच्छन्दस्तावत्त्रेधा—वैदिकं च, लौकिकं च, उभयसाधारणं च । तत्र लौकिकं पुनस्त्रेधा—गणच्छन्दः, मात्राच्छन्दः, अक्षरछन्दश्चेति । तथा चोक्तम्—

'आदौ तावद्गणच्छन्दो मात्राच्छन्दस्ततः परम् ।
तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम् ॥
आर्योद्युद्गीतिपर्यन्तं गणच्छन्दः समीरितम् ।
मात्राच्छन्दश्चूलिकान्तमौपच्छन्दसिकादिकम् ॥
समान्याद्युत्कृतिं यावदक्षरच्छन्द एव च ॥' इति ।

(५) परे तु पद्यच्छन्दश्चतुर्धा—अक्षरछन्दः, मात्राच्छन्दः, अक्षरगणच्छन्दः, मात्रागणच्छन्दश्चेति भेदात् । यत्र मात्राणां न्यूनातिरेकेऽप्यक्षरसंख्यानं तन्त्रं तदक्षरच्छन्दः । यथा वेदे बहुलं प्रयुक्तं गायत्रीत्रिष्टुब्जगत्यादि । यत्राक्षराणां न्यूनातिरेकेऽपि मात्रासंख्यानं तन्त्रं तन्मात्राछन्दः—यथौपच्छन्दसिकवैतालीयादिकम् । यत्र पुनरक्षरगणानां क्रमसंनिविष्टानां व्यवस्थया स्वरूपसिद्धिस्तत्राक्षराणां गुरुलघुस्थानानां च नियतत्वादक्षरगणच्छन्दस्त्वेन व्यवहारः । यथेन्द्रवज्रास्रग्धरावसन्ततिलकामन्दाक्रान्तादि । अथ यत्र मात्रागणानां क्रमसंनिविष्टानां व्यवस्थया छन्दःसिद्धिस्तत्राक्षरनियमाभावान्मात्रागणच्छन्दस्त्वेन व्यवहारः । यथा आर्यादोहाकुण्डलिकादि—इत्येवं पश्यन्ति । अर्थजातेष्वप्याकाशवाग्वादिष्वेषामेव चतुर्णां छन्दसां भेदान्नानाविध्यम् । अत एवैक एव भावो द्रव्यगुणकर्मरूपैस्तेजोऽबन्नरूपैस्तदवान्तरानेकरूपैर्वा भेदेन समुत्पद्य नानात्वं प्रतिपद्यते । तदेतदेषां विभिन्नछन्दस्कानामर्थजातानां छन्दोनिबन्धन एवातिरेक इति यज्ञस्वरूपनिरूपणप्रकरणे **वेदसमीक्षायां** वैशद्येन प्रदर्शितम् ॥

तदित्थं कंचिद्विशेषमाश्रित्य त्रेधा चतुर्धा वा विभक्तानामप्येषां मात्रागणव्यवस्थानिबन्धनेषु गणवृत्तेषु वर्णव्यवस्थासामान्याद्वर्णवृत्तानतिरेकं पश्यन्ति दीर्घदर्शिनः ॥ तथा च सिद्धम्—वृत्तशब्देन व्यपदेश्यं वर्णवृत्तमेकम्, जातिशब्देन व्यपदेश्यं तु मात्रावृत्तमपरमितीत्थं द्वेधा पद्यच्छन्दो भवतीति ॥

तत्र यद्यपि मात्रानियताक्षरव्यूह एव छन्द इत्युच्यते—यद्यपि च मात्राप्रस्तारस्वरूपाणां वर्णप्रस्तारेषु वर्णप्रस्तारस्वरूपाणां च मात्राप्रस्तारेषु यथायथमन्तर्भावो दृश्यते—अत एव तु द्वासप्ततिमात्राप्रस्तारस्वरूपविशेषात्मिकाया अष्टादशमात्राप्रस्तारस्वरूपविशेषात्मिकाया वेन्द्रवज्राया मात्रावृत्तत्वमनभ्युपगम्य यथा वर्णवृत्ततयाभ्युपपत्तिर्दृश्यते, न तथा 'खिं खिं खिं खागः प्रमोदा' इति लक्षितायाः प्रमोदायाः, 'डुजं डुजं डुजं डुकः प्रमदा' इति लक्षितप्रमदाजातिबहिर्भावेनाभ्युपगमः क्रियते । ततो वर्णवृत्तमात्रावृत्तेतिभेदकरणमापाततो निर्मूलं प्रतिभाति;—अथापि पिण्डापेक्षोपेक्षानियमद्वैविध्याद् वर्णवृत्तत्वमात्रावृत्तत्वाभ्यां विभज्य तद्याख्यायते । तस्य चैतस्याक्षरव्यूहस्य यथेच्छं विवक्षितत्वेनानेकधात्वाद्बहवश्छन्दःप्रकाराः प्रचरन्ति । तथाहि—प्रस्तारप्रतिपन्नानां स्वरूपाणां मध्ये यानि यानि गतिसंपन्नानि स्युस्तानि क्वचिदेकैकान्येव प्रयुक्तानि छन्दांसि भवन्ति । क्वचित्तु सजातीयानां विजातीयानां वा तेषां द्वयेन त्रयेण चतुष्टयेन पञ्चकेन षट्कादिना वा यथेच्छं कृतेन गतिसंपन्नेन तत्र तत्र छन्दोव्यवहारः । तदुक्तं भगवता पिङ्गलेनापि—'एकद्वित्रिचतुष्पादुक्तपादम्' इति । शाङ्खायनोऽप्याह—'पञ्च पङ्क्तेः, षट् सप्तेत्यतिच्छन्दसाम्' इति । अत एवं—'आयाहि मनसा सह' इति (ऋक् १०।१७२।१),—'द्विपदाः शंसती'त्यैतरेयब्राह्मणे (५।१७।१०); । 'आयाहि मनसा सह' (१०।१७२।१) 'इमानुकं' (१०।१५७।१) 'बभ्रुरेकः' (८।२९।१)—इति द्विपदासूक्तानीत्याश्वलायनसूत्रे (८।७।२४); 'आयाहि संवर्त उषसं द्वैपद'मिति—सर्वानुक्रमण्यां च द्विपदात्वेन व्यवस्थि-

ताश्च अपि 'पितुर्भृतो ने'त्यस्याः (१०।१७२।३) ऋचश्चतुष्पात्संस्तारपङ्क्त्युदाहरणत्व-माख्यातं वेदार्थदीपिकायाम् ।

'द्वादशाक्षरयोर्मध्ये पादावष्टाक्षरौ यदि ।
यस्याः संस्तारपङ्क्तिः स्यात् पितुर्भृतो न तन्तुमित् ॥' इति ।

'द्विर्द्विपदास्त्वृचः समामनन्तीति' (सर्वानु) सूत्रयता भगवता कात्यायनेनापि द्विपदात्वेनाभिप्रेतानां सर्वासामेव ऋचां शंसनकाले ताभ्यां द्वाभ्यामेव पादाभ्यां छन्दःपूर्तिः, अथाध्ययनकाले तु द्वयोर्द्विपदयोश्चतुर्भिः पादैश्छन्दःपूर्तिरभिप्रेयते । तेन यासां शंसने दशर्चत्वं, तासामेवाध्ययने पुनः पञ्चर्चत्वमिति सुप्रसिद्धं याज्ञिकानाम् । एवं षड्भिर्गायत्रैर्जगतीकारतया एकमेव महापङ्क्तिच्छन्द इष्यते, न तु गायत्रीद्वयसमुच्चयः । आनुष्टुभे प्रगाथे तु दशभिर्गायत्रैरनुष्टुभो गायत्रीद्वयस्य च समुच्चयेन तृचः प्रगाथ इष्यते न त्वेवैकं छन्दो नवानुष्टुब्महापङ्क्तिसमुच्चय इत्यप्यवधेयम् ॥ अथापि च यत्रैवं द्वयोस्त्रयाणां चतुर्णां वाधिकानां वा समुच्चयस्तत्र द्विपात्, त्रिपात्, चतुष्पादित्येवं पादव्यवस्थामिच्छन्ति । सेयं पादव्यवस्थापि नूनं विवक्षाधीनैव । उत्तरोत्तरप्रस्तारस्वरूपे पूर्वपूर्वप्रस्तारस्वरूपाणामन्तर्भावाच्चतुष्पद्यामेकपात्त्वस्य, एकपद्यां चतुष्पात्त्वस्य च वक्तुं शक्यत्वात् । यथा द्वाभ्यां पङ्क्तिभ्यामेका चम्पकमाला भवति, यथा वा प्रमाणिकार्ध्यर्धेन पञ्चचामरम्, प्रमाणिकाद्वैगुण्येन गीतिका च जायते । इत्थमन्यदपि द्रष्टव्यम् ।

अत एव—

'सुरशुभवाके नहि गुणदोषौ
जगुरिति केचिन्न च पुनरन्ये ।
शुभमशुभं यत्फलमिदमुक्तं
नृपवर युक्तं प्रथमगणे तत् ॥'

इत्यत्र यदि विवक्ष्यते—द्वौ श्लोकौ संभवतः । यद्वा विवक्ष्यते—एक एव श्लोकः स्यात् । अथ विवक्ष्यते—श्लोकार्धमेवेदं संभवतीति पश्यन्ति ॥

अथ यतश्चैकपादपि छन्दो भवति, तस्मान्न पादसिद्धिश्छन्दःसिद्धौ विशिष्योपयुज्यते; किंत्ववच्छेदसिद्ध्यैव छन्दःस्वरूपसिद्धिर्भवतीति विज्ञेयम् । यस्य कस्याप्यर्थस्य शब्दस्य वा यथाकथंचित्क्रियमाणोऽवच्छेद एव तदर्थस्य शब्दस्य वा छन्दः । सर्वोऽप्यर्थः स्वच्छन्दसावच्छिन्नो भवति । यत्तु—विच्छित्तिविशेषोऽप्यत्रान्यदान्तरं छन्दः शिल्पापरपर्यायमाख्यायते, 'शिल्पं छन्द' इति श्रुतेः । तदप्यवच्छेदरूपत्वादेव । यदि ह्ययमवच्छेदो नाम धर्मो जगति न स्यात्तर्हि जगदेवेदं न स्याम्, जगदन्तर्गतं वा यत्किंचित् । एकमेव हीदं सत्यं ब्रह्म तदवच्छेदमाहात्म्यादनेकधात्वेन प्रतिपद्यमानं जगद्भवति, तदन्तर्गतं वा यत्किंचित् । ऊरूदरोरोग्रीवाशिरोहस्तपादाद्यवच्छेदान्मनुष्यवत् । यथा ह्येकस्मिन् श्वेतपत्रे शिल्पिकृतानेकभङ्गिरेखावच्छेदमाहात्म्याद् गौरश्वः पुरुषो हस्तीत्येवमादयोऽनेकभावाः प्रादुर्भूय पृथक्त्वेन प्रतिपद्यन्ते, न तं श्वेतपत्रा-

दतिरिच्यन्ते । एवमेवैकस्मिन् सत्ये ब्रह्मणि विश्वकर्मकृतानेकभङ्गिरेखावच्छेदमाहात्म्या-देव गौरश्वः पुरुषो हस्तीत्येवमादयोऽनेकभावाः प्रादुर्भूय पृथक्त्वेन प्रतिपद्यन्ते, न ते सत्स्वरूपब्रह्मणोऽतिरिच्यन्ते । तथा च भगवान् कणादः—(वै. द. १।२।७, १७)

'सदिति यतो द्रव्यगुणकर्मसु सा सत्ता । सदिति लिङ्गविशेषाद् 'विशेषलिङ्गाभावाच्चैको भावः' इत्येवमाद्याख्यायैकस्मादेव भावात् सत्तापदप्रतिपन्नाद्ब्रह्मणश्छन्दोभेदेन सर्वेषां द्रव्यादीनामुत्पत्तिमभिप्रैति । तथाहि—एकः कश्चित्सत्तापरपर्यायो भावः प्रतीतिसिद्धः । स धर्माणां तारतम्येनावापोद्वापाभ्यामन्यथान्यथा स्वरूपं गमितोऽन्यथान्यथा पदार्थो भवति । धर्मस्त्वस्य द्रव्यगुणकर्मभेदात्त्रेधा—द्रव्याणि पुनर्नवधा, गुणास्तु सप्तदशधा, कर्म पञ्चधा । तेषामेषां द्रव्यगुणकर्मणां सामान्यविशेषाभ्यां जात्याकृति-व्यक्तिपदप्रतिपन्नाभ्यां ये समवायास्त एव पदार्थाः । यथा घट इति केषांचिद्द्रव्यगुण-कर्मणां सामान्यविशेषाभ्यामेकः समवाय इत्येकः पदार्थो भवति । एकस्मिन्नेव घटभावे कतिचिद्द्रव्यगुणकर्माणि समवयन्ति । न च तेषां त्रयाणां सत्तात्रयी । अत एव न द्रव्यगुणकर्माणीति त्रयः पदार्थाः, अपि तु द्रव्यगुणकर्माण्येकः पदार्थः । अनन्ताश्चैवं पदार्थाः । तेषां च सत्तैकत्वनिबन्धनं पदार्थैकत्वम् । द्रव्यगुणकर्मणां तु समवेतानामे-कैव सत्ता । यथा हि यावत्पृथिव्यामेकस्या एव सत्तायाः प्रतीतावप्यवान्तरा घटपटादिषु मिथः सत्ता विभिद्यन्ते, नैवं द्रव्यगुणकर्मणामेकस्यां सत्तायां पुनरवान्तरा द्रव्यादि-सत्ताः पार्थक्येन प्रतिपद्यन्ते । यथा तु घटपटादिषु पृथिवीत्वं न भिद्यते, पृथि-व्यादिषु वा द्रव्यत्वं न भिद्यते; तथैव पुनर्द्रव्यादिषु सत्त्वं न भिद्यते । पृथिवीत्वं पृथिवीति प्रत्ययः । द्रव्यत्वं द्रव्यमिति प्रत्ययः । सत्त्वं सदिति प्रत्ययः । सत्त्वं सत्ता भाव इत्येकार्थाः । तदित्थं सद्भाव–द्रव्यभाव–पृथिवीभाव–घटादिभावानां विभिद्य प्रती-तानामानन्त्येऽपि संक्षिप्य स भावस्त्रेधा प्रतिपद्यते—कश्चित्सामान्यमेव, कश्चिद्विशेष एव, कश्चित्तु सामान्यविशेषात्मकः । यो नित्यं सामान्यमेव, स सत्तानामैको नित्यो भावः । तस्यैकत्वादेवायमेकः पदार्थः संसारो नाम । यो नित्यं विशेष एव तस्यानेक-त्वादेवैतेऽनन्ता नित्यपरमाणुपदार्था इतश्चेतश्च दृश्यन्ते न संख्यातुं शक्यन्ते । यस्तु सामान्यविशेषात्मको भावस्तदनुरोधेनैवैते घटत्वपृथिवीत्वद्रव्यत्वादिभिः सामान्यतो विशेषतश्च गृहीताः सर्वे एतेऽनित्याः पदार्था व्यपदिश्यन्ते । एवं खेताभ्यां भातिसि-द्धाभ्यां सामान्यविशेषाभ्यां यथेच्छं विनियुक्ताभ्यां सर्वेषामेषां सत्तासिद्धानां द्रव्यगुण-कर्मणां समवायोऽनेकत्वेनैकत्वेन च यथेच्छं नियम्यते । यथा गृहमित्येको भावः, अङ्गणकुड्यस्तम्भपटलद्वारकपाटादयो वानेके भावाः । एवमेकत्वानेकत्वयोरेकत्र द्रव्य-गुणकर्मणां समवाये समन्वयादनन्ता एते भावाः पुरुषाख्याः, एक एव वायं भावः पुरुषाख्य इति शक्यते द्वैविध्येनापि व्यवहर्तुम् । स हि खल्वेकः पुरुधा भवति । अत एवामनन्ति—'इन्द्रो मायाभिः पुरुरूप ईयते । तमेकं सन्तं बहुधा वदन्ति । पुरुष एवेदं सर्वम् । सर्वं खल्विदं ब्रह्म । एकमेवाद्वितीयम्' इत्यादि । तत्र यथायं पुरुषापरपर्याय

एक केवलसामान्यभावो भातिसिद्धस्तथा सामान्यविशेषभावा नित्यविशेषभावाश्च सर्वेऽपि भातिसिद्धा एव। जात्याकृतिव्यक्तिसमवायात्मकानां घटपटादिपदार्थानां सत्तासिद्धत्वेऽपि सत्तायाः सत्तासिद्धत्वासंभवात् । एकस्मिन् सामान्ये सामान्यविशेषभेदा नित्यविशेष-भेदाश्च भातिसिद्धा एव संभवन्ति । एतदभिप्रेत्यैव सूत्रयति—'सामान्यं विशेष इति बुद्ध्यपेक्षम्' (वै. द. १।२।३) इति । तथा च यदि सत्ता भातिसिद्धा तर्हि सत्तासिद्धा अपि सर्वेऽन्ततो भातिसिद्धा एवेति सिद्धं सर्वस्यास्य जगतो विज्ञानरूपत्वम्। विज्ञानं हि ब्रह्मशब्देनाख्यायते । तदुपासको हि ब्राह्मणो भवति । स विजानीयात्—विज्ञानमेव सामान्यविशेषाभ्यामवच्छेदाभ्यां विवर्त्य तदवच्छेदमाहात्म्यादेव सर्वं जगदुद्भावयति ॥

तथा चैत एवावच्छेदास्तत्तदवच्छेदावच्छिन्नानां खण्डानां स्वस्वच्छन्दांसि भवन्ति। स्वस्वच्छन्दःसंपत्त्यैव च तदर्थस्वरूपसंपत्तिर्दृश्यते । यदि हि गोस्वरूपावच्छेदरूपाया रेखायाः किंचिद्विहन्यते, तावतैवावश्यं गौः स्वरूपाद् विहन्यते। तदवच्छेदाच्छादितस्य तु गोः स्वरूपादप्रच्यवो भवति ।

तदिदमेवास्य छन्दसः स्वरूपाच्छादकत्वं स्वरूपरक्षकत्वं च वेदे महर्षयः समामनन्ति। अथैतदवच्छेदोपाधिभूतास्तु तत्तत्खण्डस्यावान्तरखण्डा अक्षरशब्देनाख्यायन्ते ; अत एवाक्षरव्यूहश्छन्द इति पर्यायेण वदन्ति । यथा संवत्सरच्छन्दस्त्वनिर्वाहकाणि द्वादशाक्षराणि मासाः, मासच्छन्दस्त्वनिर्वाहकाणि त्रिंशदक्षराणि दिनानि, संवत्सरस्य गायत्रीत्वे पक्षाश्चतुर्विंशतिरक्षराणीत्येवमनेकत्र शतपथादिब्राह्मणेषु प्रपञ्चितम्। तदित्थं यथैवार्थतः खल्वाकाशश्छन्दः, वायुश्छन्दः, तेजश्छन्दः, आपश्छन्दः, पृथ्वी च्छन्दः; एवमेव शब्दतोऽपि वर्णश्छन्दः, अक्षरं छन्दः, पदं छन्दः, वाक्यं छन्दः, प्रकरणं छन्दः, इत्येवमेषां सर्वेषामेव छन्दस्त्वं संप्रतिपन्नम्। एवं हि खल्ववच्छेदावच्छिन्नत्वसामान्यात् सर्वेषामविशेषेण छन्दस्त्वेऽभ्युपगम्यमानेऽपि तदवच्छेदज्ञानौपयिकतया नूनमक्षरव्यवस्थानिबन्धनमेव छन्दोव्यवहारमिच्छन्ति छान्दसिकाः । अक्षरं चेह मात्रानियतं भवति । परमाणुत्रसरेणुवदेकमात्रिकत्वद्विमात्रिकत्वाभ्यामक्षरमपि द्वेधैव भवति । तथा च मात्रानियताक्षरव्यूह एव, च्छन्दोऽवच्छेद एव वा छन्द इति संसिद्धम् ॥

इति च्छन्दोविभक्तिवादः।

अथ वैदिकान्यत्ववादः—

ननु—वैदिकलौकिकभेदाच्छन्दसां द्वैविध्यमुपदिशयन्ति। तन्न ज्ञायते किंनिमित्तोऽयमतिरेकः ? इति । वेदे तावत् सप्त छन्दांसि सप्तातिच्छन्दांसि सप्त कृतिच्छन्दांसि चोपदिश्यन्ते; तान्येव पुनर्लौकिका अप्युपजीवन्ति । यद्यपि प्राकृतपिङ्गलोक्तविषया मात्राच्छन्दांसि वेदे नोपदिश्यन्त इति सिद्धमेषां लौकिकत्वम्; तथापि वेदोपदिष्टानां लोकेऽप्यनुवर्तनाल्लोकातिरेकेण वैदिकं न पश्यामः ।

उच्यते—त्रिविधः खल्वपि छन्दोविभागः प्रयोगभेदात् प्रतिपाद्यते—मात्राच्छन्दः, अक्षरच्छन्दः क्रमच्छन्दश्चेति । यत्र मात्रासमष्टिसंख्या न च्यवते, अथाक्षरसंख्या गुरुलघुसंनिवेशक्रमश्च पर्यायेषु विलक्षणतामेति; तत्र मात्राणां प्रगृह्यतया मात्राच्छन्दोव्यवहारः । यथौपच्छन्दसिकादिषु, यथा वा शिखामालादिषु । अथ यत्राक्षरसमष्टिसंख्या न च्यवते, मात्रासंख्या गुरुलघुसंनिवेशक्रमश्च पर्यायेषु विलक्षणतामेति; तत्राक्षराणां प्रगृह्यतयाऽक्षरच्छन्दोव्यवहारः यथा न्यङ्कुसारिणीविष्टारबृहतीविष्टारपङ्क्त्यादिषु । एवं यत्र क्रमस्यैव प्रगृह्यतया गुरुलघुसंनिवेशो नियतपौर्वापर्यकस्तत्र सर्वेष्वेव पर्यायेषु नाक्षरसंख्या च्यवते, नापि वा मात्रासंख्या । तस्यैतस्य क्रमच्छन्दस्त्वं भवति, यथा सिंहोद्धतामन्दाक्रान्ताशार्दूलविक्रीडितादिषु । तदित्थं भूयसातिरेकेण सिद्धेऽपि त्रैविध्ये मात्राच्छन्दोभिर्वैदिकव्यवहारादर्शनाल्लोके च भूयसा व्यवहारात्तेषां लौकिकत्वोपचारः । अक्षरच्छन्दोभिश्च लौकिकानामनुपचाराद्यज्ञे वेदे चानुपदं प्रातिस्विकभावेन तदुपयोगात्तेषां वैदिकत्वोपचारः । अथ क्रमच्छन्दसां नियतस्थानावस्थितगुरुलघ्वक्षरनिबन्धनतया अक्षरच्छन्दस्त्वानतिरेकाल्लोके तथैव चिरादुपचाराच्च वैदिकसाधर्म्याद्वैदिकत्वम्, अथ मात्राच्छन्दोवल्लोकमात्रे तत्प्रदार्शनाल्लौकिकसाधर्म्याल्लौकिकत्वम्,—इत्येवमेषामुभयसाधारणत्वं पश्यन्ति समीक्षादक्षाः । अत एव पिङ्गलादिप्रोक्तेषु छन्दोविचित्यादिग्रन्थेषु वैदिकच्छन्दोऽनुदर्शनतया प्रतिपन्नेषु शुद्धवैदिकच्छन्दोऽनुशासनानन्तरम्; अथार्वाचीनप्रोक्तेषु छन्दोभाषाप्राकृतपैङ्गलादिग्रन्थेषु लौकिकच्छन्दोऽनुदर्शनतया प्रतिपन्नेषु शुद्धलौकिकच्छन्दोऽनुशासनानन्तरमुभयत्रापि क्रमच्छन्दसामनुविधानमुपलभ्यत इति द्रष्टव्यम् ।

यद्यप्यत्र मात्राच्छन्दांस्यौपच्छन्दसिकादीनि, मात्रागणच्छन्दांस्यार्यादीनि, अक्षरच्छन्दांसि न्यङ्कुसारिण्यादीनि, तथाक्षरगणच्छन्दांसि सिंहोद्धतादीनि–इत्येवं चतुर्धा विभाजयितुमुचितं तथैव तत्प्रतिपत्तेः; तथापि प्रकृते वैदिकत्व–लौकिकत्व–साधारणत्वविवेकप्रसङ्गे तदवच्छेदकतया अक्षरच्छन्दस्त्व–मात्राच्छन्दस्त्व–क्रमच्छन्दस्त्वधर्माणां विवक्षणादित्थं विभाग इत्यवधेयम् ।

नन्वेतावता प्रयोगसंप्रदायस्थितिरेवानुरुध्यते ? । आहोस्विद् वैदिकसमाख्याबलाद्विध्यन्तरमुपस्थाप्यते 'एषां वेद एव प्रयोगः कर्तव्यो न तु लोकेऽपीति ? । यद्युच्यते वेदमात्रे प्रयोगोपलब्ध्या वैदिकत्वमेषामनूद्यते' यदि वा वैदिकसमाख्यया लोके प्रयोगप्राप्तिः प्रतिविधीयते । उभयथापि नोपपद्यते । वैदिकाक्षरच्छन्दःप्रतिपन्नानामनुष्टुप्विशेषाणां पथ्यावक्त्रविपुलादीनां वेदापेक्षयापि लोके बहुलोपचारस्य दृश्यमानत्वात्, इतरेषां च त्रिष्टुप्जगतीभेदानां रामायणमहाभारतभागवतादिषु प्रायेण प्रयुज्यमानत्वात् । तस्मान्मात्राच्छन्दःक्रमच्छन्दसोरेकान्तलौकिकत्वेऽक्षरछन्दसस्तु लोकवेदोभयगाधारणत्वे संसिद्धेऽपि शुद्धवैदिकविषयता सर्वथा दूरापरास्तैव । अत्रोच्यते—पुराणेतिहासादिषु तावत् प्रबन्धवाचकानां पवित्रतासम्पत्त्युद्देशेन वैदिकच्छायावर्तिष्णुभिर्मुनिभिः शाखान्तरप्रसिद्धा मन्त्रविशेषा एवानूद्यानूद्य पठिता इति नानुवादे लौकिकत्वं

प्रसज्यते । अनुष्टुब्विशेषाणां तु पथ्यावक्त्रविपुलादीनां वैदिकत्वेऽपि विषमत्वसमत्वार्धसमत्वात्मकभेदत्रयविभक्तेषूभयसाधारणत्वेन प्रतिपन्नेषु छन्दोजातेष्वन्तर्भावाल्लौकिकोपचारो न विरुध्यते । तस्मादुभयथापीदमुपपद्यते–वेदमात्रे प्रयोगोपलब्ध्या वैदिकानां वैदिकत्वमिहानूद्यते, वैदिकसमाख्यया लोके प्रयोगप्राप्तिश्च तेषां प्रतिविधीयत इति । नन्वेवमुभयसाधारणानां त्रेधाप्रतिपत्तौ पथ्यावक्त्रवदितरेषामपि शुद्धवैदिकत्वेनाभिप्रेतानां गायत्र्यादीनां विषमत्वेनोपसंग्रहाल्लौकिकत्वप्रसक्तिरिति चेत्—मैवम् । छन्दोव्याकृतिग्रन्थे "तत्रादौ विषमं व्याख्यास्यामः । स चतुर्धा–वक्त्रं पदचतुरूर्ध्वमुद्गतिकोपस्थितप्रचुपितं च" इति सूत्राभ्यां परिगणनस्य वक्ष्यमाणतया तदितरेषां विषमाणामुभयसाधारणत्वनिराकरणात् । तस्मात् परिगणितातिरिक्तानां विषमाणां वेदमात्रे प्रयोगोपलब्ध्या सिद्धमेकान्तवैदिकत्वमिति निष्कर्षः ॥

इति वैदिकान्यत्ववादः ।

छन्दोलक्षणवादः ।

ननु गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यादयश्छन्दोविशेषा आम्नायन्ते । तत्र किं तावदेषां गायत्र्यादीनां गायत्रीत्वादिकम्? इत्युपतिष्ठते जिज्ञासा । न तावत् षडक्षरपादैश्चतुष्पदीत्वमष्टाक्षरपादैस्त्रिपदीत्वं वा गायत्रीत्वं संभवति । त्रिपात्त्वेन चतुष्पात्त्वेन वान्योन्यव्यभिचारात् । अथ षडक्षरपादत्वं चतुष्पाद्गायत्रीत्वम्, अष्टाक्षरपादत्वं त्रिपाद्गायत्रीत्वमित्येवं भेदेन लक्षणं करिष्यते । दृश्यते हि त्रिपाद्गायत्र्या वेदमात्रगोचरत्वमथान्यस्याश्चतुष्पद्या लोकवेदोभयसाधारणत्वमित्यनयोर्भेदप्रतिपत्तिरिति चेत्—न । गायत्रीसामान्यलक्षणस्य जिज्ञास्यत्वात् । नाप्येतदन्यतरत्वं गायत्रीत्वमित्यनेनापि निर्वाहः । पादनिचृतः सप्ताक्षरपादैस्त्रिपाद्गायत्रीत्वेन, पदपङ्क्तेः पञ्चाक्षरपादैः पञ्चपाद्गायत्रीत्वेनापि सुप्रसिद्धेः । किञ्च–षडक्षरकेतरपादाभावसमानाधिकरणं षडक्षरपादत्वं लक्षणमपेक्ष्यते? आहोस्वित् षडक्षरपादसम्बन्धमात्रम् । नाद्यः; अतिनिचृत्–प्रतिष्ठा–ह्रसीयसी–वर्धमानोष्णिग्गर्भादीनां गायत्रीत्वानापत्तेः । नान्त्यः; 'एकादशिनोः परः षट्कस्तनुशिराः,' 'मध्ये चेत् पिपीलिकमध्येति' कात्यायनसूत्राभ्यामुष्णिक्त्वेन प्रतिपन्नयोरपि तनुशिरः–पिपीलिकमध्ययोर्गायत्रीत्वापत्तेः । तस्मात् पादव्यवस्थायामव्यवस्थितत्वान्न पादव्यवस्थाघटितं लक्षणं व्यवतिष्ठत इति स्थितम् । अस्तु तर्हि चतुर्विंशत्यक्षरावच्छिन्नत्वं गायत्रीछन्दस्त्वमिति चेत्तदपि न; "नाक्षराच्छन्दो व्येत्येकस्मान्न द्वाभ्याम्" इति शतपथश्रुतौ (७।१।२।२२) "नह्येकेनाक्षरेणान्यच्छन्दो भवति नो द्वाभ्याम्"—इति कौषीतकिश्रुतौ (२७ अध्या० १) 'न वा एकेनाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामि'ति ऐतरेयश्रुतौ (१।१।६) तथान्यत्रापि चैकद्विवर्णोनातिरेकेऽपि गायत्र्यादिच्छन्दोव्याघातप्रत्याख्यानस्य भूयसाम्रेडनात् तथाविधानां श्रुतिप्रामाण्यसिद्धानां निचृद्भुरिगादीनां गायत्रीविशेषाणां

चतुर्विंशत्यक्षरानवच्छिन्नतया गायत्रीत्वानापत्तेः । ननु—'न्यूनाधिकेनैकेन निचृद्भुरिजौ' 'द्वाभ्यां विराट्स्वराजौ,' 'पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेदि'ति (सर्वा. परि.) सूत्रोपदिष्टया व्यूहमर्यादया चतुर्विंशत्यक्षरकत्वं सेत्स्यतीति चेत्—सत्यम्; एवमपि प्राजापत्यासुरीदैव्यादीनां गायत्रीविशेषाणां गायत्रीत्वासिद्धिस्तदवस्था स्यात्। तत्र व्यूह-मर्यादयापि चतुर्विंशत्यक्षरावच्छिन्नत्वासिद्धेः । न च—चतुर्विंशत्यक्षरावच्छिन्नत्वमार्षी-गायत्रीछन्दस्त्वमष्टाक्षरावच्छिन्नत्वं प्राजापत्यागायत्रीत्वं पञ्चदशाक्षरावच्छिन्नत्वमासुरी-गायत्रीत्वमित्येवमष्टानामपि गायत्रीविधानां प्रातिस्विकलक्षणानि भविष्यन्तीति वाच्यम्; चतुर्विंशत्यक्षरावच्छिन्नत्वादीनां विभाजकतावच्छेदकत्वसिद्धावपि विभाज्यतावच्छेदकस्य गायत्रीत्वस्याद्य यावदसिद्ध्या तासामष्टानामपि विधानां गायत्रीविभाजकत्वासिद्धेः । छन्दस्त्वात्मकविभाज्यतावच्छेदकप्रसिद्धावपि विभाजकतावच्छेदकधर्माप्रसिद्ध्या सप्त-च्छन्दांसि—इति सर्ववेदे प्रसिद्धविभागानुपपत्तेश्च । तस्मादवश्यं गायत्रीसामान्यलक्षणं किञ्चिदपेक्षणीयमिति चेत्—अस्त्वेवम् । सर्वच्छन्दः कनिष्ठच्छन्दस्त्वं गायत्रीत्वमित्येवं तावदभिसंधास्यामः । गायत्रीपुरोगमानि हि चतुरुत्तराणि सर्वाणि च्छन्दांसि भवन्ति । तत्र गायत्र्याः सर्वच्छन्दोऽपेक्षया सप्ताक्षरघटितत्वात्कनिष्ठत्वं शक्यं वक्तुम् । नन्वेवं सत्यनादिष्टछन्दसामुक्तात्युक्तामध्याप्रतिष्ठासुप्रतिष्ठानां सर्वच्छन्दोऽपेक्षया स्वल्पाक्षरत्वाद् गायत्रीत्वमतिप्रसज्येत! । वेदे गायत्र्यादीनामेव छन्दसां सुप्रसिद्धेस्तेषां छन्दस्त्वमेव नास्तीति तु नापाद्यम् । ताण्ड्यश्रुतौ—"चतुरुत्तरैरेव छन्दोभिरेतव्य"मित्युक्त्वा—"एकां गायत्रीमेकाहमुपेयुरेकामुष्णिहमेकाहमेकामनुष्टुभमेकाहं-वृहत्या पञ्चमास ईयुः पङ्क्ति-मेकाहमुपेयुः त्रिष्टुभा षष्ठं मासमीयुः—श्वो विषुवान् भवितेति जगतीमुपेयुः" इति सूत्रेण गायत्र्यादिभिरहःसाधनोक्त्या गायत्र्या अपि चतुरुत्तरच्छन्दस्त्वप्रति-पादनाद्विंशत्यक्षरायाः सुप्रतिष्ठायाश्छन्दस्त्वानभ्युपगमे गायत्र्याश्चतुरुत्तरत्वानुपपत्तेः । तथा च तेष्वतिप्रसक्तेर्नेदं गायत्रीलक्षणं साधीय इति चेत्—न। तत्र गायत्रीत्वस्येष्टापत्तेः । तदुक्तं वेदार्थदीपिकायाम्—

"उक्तादिपञ्चकं कैश्चिद् गायत्रीत्येव कथ्यते"

इति । तथा चेदं लक्षणं निर्दोषमिति चेत् न । सर्वच्छन्दःकनिष्ठच्छन्दस्त्वमित्यत्र हि कान्येतानि सर्वाणि छन्दांसि? किं तावद् गायत्र्युष्णिगनुष्टुबादीनि सप्तच्छन्दांसि, सप्तातिच्छन्दांसि, सप्तकृतिच्छन्दांसीत्येतावन्ति सर्वाणि च्छन्दांसि विवक्षितानि? आहो-स्विद् गायत्रीत्वजगतीत्वादिकमनपेक्ष्यैव मात्राक्षरसंख्यया नियता वाचो विवक्ष्यन्ते? तत्र न तावदाद्यः, आर्षीगायत्र्यपेक्षया प्राजापत्योष्णिहः स्वल्पाक्षरतया गायत्री-त्वापत्तेः । तदपेक्षयाधिकाक्षराया आर्षीगायत्र्या गायत्रीत्वानापत्तेश्च । न चार्षीभ्य उष्णिगादिभ्यः स्वल्पाक्षराया आर्षीगायत्रीत्वं प्राजापत्योष्णिगाद्यपेक्षया स्वल्पाक्षरायाः प्राजापत्यागायत्रीत्वमित्येवं वक्ष्याम इति वाच्यम् । आसुरीभ्य उष्णिगादिभ्योऽनल्पा-क्षराया एवासुरीगायत्रीत्वप्रसिद्ध्या तावताऽप्यनिर्वाहात् । गायत्रीत्वोष्णिक्त्वजगती-

त्वादीनामिदानीं यावदसिद्ध्या तत्त्वेन विभागासंभवादुष्णिगाद्यपेक्षया अल्पाक्षरत्वस्य गायत्रीपदार्थतावच्छेदकत्वानुपपत्तेश्च । नाप्यन्त्यः, उक्ताया दैवीगायत्र्या वा गायत्रीत्वसिद्धावप्यन्यासां गायत्रीत्वानापत्तेः । तस्मान्नेदं गायत्रीसामान्यलक्षणमिति चेत्; अस्तु तर्हि गायत्रीपदेन याज्ञिकानां प्रसिद्धिरेव गायत्रीत्वम्, नैवम्! ज्ञानस्यैव प्रसिद्धिपदार्थत्वाद् । गायत्रीपदप्रकारकज्ञानविशेष्यत्वमेव गायत्रीत्वमेतेनोक्तं भवति, तच्चायुक्तम्—गायत्रीपदनिष्ठसंकेतसम्बन्धावच्छिन्नप्रकारतानिरूपितायाज्ञिकज्ञानीयविशेष्यतावच्छेदकत्वाप्रसिद्धौ तादृशविशेष्यताया उष्णिगादिष्वव्यावर्तमानतया तेषामपि सर्वेषां गायत्रीत्वातिप्रसक्तेः । तस्माद् यदवच्छेदेन गायत्रीपदप्रसिद्धिः, सोऽतिरिक्तः कश्चन धर्मो वक्तव्य इति चेत् अस्तु तर्हि गायत्रीत्वमखण्डोपाधिः; तदवच्छेदेनैव गायत्रीपदप्रसिद्धिरप्यास्तामिति चेत् तुच्छमेतत् । लोकप्रतीतपदार्थके हि विषये पदार्थतावच्छेदकस्याखण्डोपाधित्वेन कथंचिदभ्युपगमेऽपि साम्यधर्माणामखण्डोपाधित्वस्वीकारस्याप्रामाणिकत्वात् । तस्मादसिद्धं खलु गायत्रीत्वमिति चेदुच्यते—चतुर्विंशत्यक्षरावच्छिन्नत्वं गायत्रीत्वमित्येव सिद्धान्तः पक्षः ॥

यस्तु निचृद्भुरिगादिषु दर्शितो व्यभिचारः स तावदयुक्तः । एकेनाक्षरेण द्वाभ्यां वा न्यूनाधिकताया गायत्रीविकृतिप्रयोजकतया सत्यामपि तस्यां विकृतौ प्रकृतिलक्षणव्याघातासंभवात् । नहि कस्यचिदन्धत्वदोषेण सता प्राणिनश्चक्षुष्मत्त्वलक्षणं व्याहन्यते; न वा लाङ्गूलच्छेदाद्विषाणभ्रंशाद्वा सास्नालाङ्गूलककुदखुरविषाणित्वरूपं गोलक्षणमलक्षणं भवति । तस्मात्सिद्धं चतुर्विंशत्यक्षरावच्छिन्नत्वमेव गायत्रीत्वम् । अथ यदपि प्राजापत्यासुरीदैव्यादिषु व्यभिचारदर्शनान्नेदं लक्षणमित्याख्यातं, तदप्यत एव प्रत्याख्यातं भवति । तासामप्यार्षीविकृतिरूपत्वानतिरेकात् । तथा हि—

> यद् गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत
> यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥ १ ॥ (ऋ.सं. २।३।)

इति मन्त्राम्नानादेकस्मिन् छन्दोन्तराधानप्रतिपत्त्या तस्यामेवार्षीगायत्र्यां चतुर्विंशत्यक्षरावच्छिन्नायामेकाक्षरावच्छेदेन दैवीत्वं, पञ्चदशाक्षरावच्छेदेनासुरीत्वम्, अथाष्टाक्षरावच्छेदेन प्राजापत्यात्वमित्येवं विभागभेदात्त्रैविध्योपचारः । गायत्रीविभागजत्वाच्चैतासु गायत्रीशब्दो भाक्तः । यद्यपि कौषीतकश्रुतौ मन्त्रोऽयमन्यथा व्याख्यायते यथा—

> "यद् गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
> यद्वा जगज्जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः ॥" इति

अथो यदिमा देवता एषु लोकेष्वध्यूढाः,—गायत्रेऽस्मिंल्लोके गायत्रोऽयमग्निरध्यूढः । त्रैष्टुभेऽन्तरिक्षलोके त्रैष्टुभो वायुरध्यूढः । जागतेऽमुष्मिंल्लोके जागतोऽसावादित्योऽध्यूढः"—इति । न चैतावता छन्दसि छन्दोऽन्तरसत्ता मन्त्रार्थ उपलभ्यः, तथापि स्वल्पेन यत्नेनाधिकमर्थमुपदेष्टुमिवाभिवर्तमानानां महर्षीणां बहुविषया हि मन्त्रार्थवादा भवन्ति । तदतो नाभिगम्यमानं प्रमाणान्तरसिद्धमर्थं सर्वथा प्रत्याख्यातुमवकल्पते ।

अथ पादश्छन्दसां द्विविधो भवति । विरतिसिद्धो विभागसिद्धश्च । आद्यो न्यूनाधिकाक्षरत्वेऽपि दृश्यते । परस्तु चतुर्थांशात्मकः । तत्र चतुर्विंशत्यक्षरनियताया गायत्र्या विभागजैकपादह्रानावार्च्याः, तादृशपादद्वयह्रानौ साम्न्याः, पादत्रयह्रानौ याजुष्याः, पादद्वयाधिक्ये तु ब्राह्म्याः, व्यवस्थापनात्तासामप्यार्षीविकृतिरूपत्वावसायात् । तस्मान्न्यूनाधिकाक्षरत्वसंभवेऽपि सिद्धं चतुर्विंशत्यवयवघटितत्वं गायत्रीसामान्यलक्षणम् । एतेनोष्णिगादयोऽपि व्याख्याता इति दिक् ॥

इति छन्दोलक्षणवादः ।

अथ समासवादः ।

अथ विप्रतिपत्तिः—एके तावत्–प्रस्तारसिद्धे स्वरूपे चत्वारो भागा भवन्ति, प्रतिभागं वा यत्र तत्र यतिव्यवस्थाप्यनुवर्तते गतिसापेक्षेतीच्छन्ति । १ । अन्ये तु—प्रस्तारशुद्धेषु स्वरूपेषु गतिसम्पन्नानां केषांचित्सजातीयचतुर्व्यूहः समवृत्तं भवति । सजातीयद्विसमुच्चयोऽर्धसमं भवति । अथैकमेव प्रस्तारसिद्धं स्वरूपं चतुर्भागावकल्पनया चतुष्पाद् भवतीति तद्विषमं वृत्तमितीत्थं समासासमासाभ्यां छन्दोभेदाः प्रकल्पन्त इतीच्छन्ति । २ ।

परे पुनः–सजातीयचतुर्व्यूहः समवृत्तं विजातीयचतुर्व्यूहो विषमवृत्तमथ विजातीयद्विसमुच्चयो द्विः प्रयुक्तोऽर्धसमवृत्तं स्यादिति सर्वत्र समासेनैव छन्दःसिद्धिमिच्छन्ति । ३ । अपरे तु—न खलु पादव्यवस्था छन्दःसिद्धौ तन्त्रं, किं तर्हि सिद्धे छन्दसि यथेच्छं पादाः प्रकल्प्यन्ते । तत्र चतुर्थांशस्य पादत्वमिति लोकप्रसिद्धिमनुरुन्धानाः केवलं सर्वेष्वेव श्लोकेषु चतुरश्चतुर एव पादान् प्रकल्प्य तत्तल्लक्षणानुरोधेन समार्धसमविषमवृत्तत्वं व्यवस्थापयन्ति । ४ । अत एव श्लोकनिष्ठांश्चतुरोऽवष्टम्भानेवोपसमाधाय तदितरांस्तथैवानुभूयमानानपि पादव्यवस्थाप्रयोजकत्वेन नापेक्षन्ते । सोऽयमेषां केषांचिच्छान्दसिकानां सामयिकोऽर्थः स्यात् ।

वस्तुतस्तु संस्कृते पैङ्गले द्विदलतया सिद्धेष्वप्यार्यादिमात्रावृत्तेषु यथैव द्वादशमात्रासु ततोऽष्टादशमात्रासु ततः पुनरेव द्वादशमात्रासु ततः खलु पञ्चदशमात्रासु यथेच्छं चतुरः पदान् प्रकल्प्य चतुःपदीत्वमार्याया व्यवस्थापितं प्राकृते पैङ्गले । यथा वा द्विदलायामपि दोधायामवष्टम्भानुरोधेन त्रयोदशैकादशमात्रयोः पादत्वं प्रकल्प्य चतुष्पदीत्वमिच्छन्ति, तथैव शार्दूलविक्रीडितादीनामष्टपदीत्वं स्रग्धरादीनां द्वादशपदीत्वं त्रिभङ्ग्यादीनां षोडशपदीत्वमित्येवमवष्टम्भानुरोधेन यथायथं पादव्यवस्था द्रष्टव्या । न खलु चतुर्थांशः पाद इति युज्यते वक्तुं छन्दोवेदे । वर्णमात्रयोर्न्यूनातिरेकेऽपि तद्व्यवहारदर्शनात् । किं तर्हि पदमिति? विश्रामः पदं भवति, पदात्तु प्रतिपन्नः श्लोकखण्डः पाद इति वक्तव्यम् । अत एवैतेषु विश्रामपदेषु कस्यचिदेकस्य गतिस्थानाव्यादितरविश्रामपदापेक्षयाऽधिकमात्रत्वेनानुभवात्, तत्र सन्ध्यादिविध्यवरोधाच्च

सर्वेषामेव श्लोकानां द्विदलत्वं प्रतिपत्तुं युज्यत इत्यन्यदेतत् ॥ एवं स्थिते यान्येतानि श्लोकखण्डान्याख्यातानि तेषामेकैकप्रस्तारस्वरूपत्वं पार्थक्येन प्रतिपत्तव्यम् । तथा च सप्ताक्षरकप्रस्तारसंबन्धिनां सप्तदशचतुःषष्टितमोनविंशानां समासेन स्रग्धराच्छन्दः । द्वादशाक्षरप्रस्तारसंबन्धिनोऽष्टादशशतोत्तरैकाशीतितमस्वरूपस्य तथा सप्ताक्षरप्रस्तार-संबन्धिनः सप्तत्रिंशस्वरूपस्य च समासेन शार्दूलविक्रीडितसिद्धिः । इत्येवमेकैकप्रस्तार-स्वरूपाणां पदत्वात्तत्समासेन तानि तानि च्छन्दांसि संपद्यन्त इति द्रष्टव्यम् ।

अथ ब्रूयात्–मसयोर्जसयोरपि षडक्षरप्रस्तारस्वरूपविशेषतया पदत्वसंभवात्तयो-रपि समासेन शार्दूलविक्रीडितभागसिद्धिः कस्मान्नाख्यायत ? इति । तत्रेदं वक्तव्यम्— यथा हि सङ्कटकशब्दे–संघ-टकशब्दयोर्यथाकथंचित्पदत्वसंभवेऽपि कुतश्चित् कारणान्न तयोः समासेन सङ्कटकशब्दसिद्धिं मन्यन्ते वैयाकरणाः–एवमिहापि स नेष्यताम् । यथा वा शकारद्विवचनेन—"उदकंपश्श्यति"–इति यत्र प्रयुज्यते, तत्रोदकमिति पश्यतीत्येव-मेकः पदच्छेदः । जलं निरीक्षते इत्यर्थात् १, अथ–उदकम्प इति श्यतीत्येवमन्यः पदच्छेदः । जलकम्पनं तनूकरोतीत्यर्थात् २, एवमुदिति अकमिति पश्यतीति चान्यः पदच्छेदः । उपरिष्टाद्दुःखमालोचयतीत्यर्थात् ३, तथा–उ–इति, दकमिति, पशीति, अतीति चापरः पदच्छेदः । पशब्दप्रतिपाद्येन्द्रदाद्यर्थेऽतिशयेन जलं वितर्कयति इत्यर्थात् ४, इत्थमनेकधा संभवेऽपि स्वरविशेषात् पदविभागमध्यवस्यन्ति प्रेक्षा-वन्तः, तथेहापि गतिविशेषात्पदविभागाध्यवसायः क्रियते । यत्रैव काचिद्गतिः समाप्नोति तत्रावश्यमवष्टम्भो भवति । अनवष्टम्मे गतिरनुवर्तेत इति तन्मध्ये प्रस्तारविशेषानुगत-स्वरूपसंभवमात्रेण नानेकपदत्वगतिप्रतिपत्तिर्युज्यते । यथाहि–उद इति उदकमिति कमिति–एतेषां समानार्थकपदत्वसम्भवेऽपि नोदकशब्दे उदशब्दस्य दकशब्दस्य कशब्दस्य वा पदत्वं प्रतिपद्यन्त इत्यवधारणीयम् ।

स चायं समासः पञ्चधा—नित्यसमासः १, विकल्पसमासः २, संकीर्णसमासः ३, प्रकीर्णसमासः ४, उपपदसमासश्च ५ । तत्र समानप्रस्तारानुगतनियतस्वरूपाणा-माम्रेडिते नित्यः । यथा–वसन्ततिलकाचरणयोर्नित्यसमस्वरूपयोर्द्विरुक्तिः १ । यत्र तु समानप्रस्तारानुगतानियतस्वरूपाणां समुच्चयः, तत्र विकल्पः । यथा–पथ्यावक्त्रचरण-योरपि भिन्नसंस्थानयोरभिनिवेशः २ । यदि तु विभिन्नप्रस्तारानुगतनियतस्वरूपाणां समुच्चयस्तदा सङ्कीर्णः । यथा–पुष्पिताग्राचरणयोर्द्वादशाक्षरत्रयोदशाक्षरप्रस्तारानुगतस्व-रूपविशेषयोः समुच्चयः ३ । यदि पुनर्विभिन्नप्रस्तारानुगतानियतस्वरूपाणां समुच्चयस्तदा प्रकीर्णः । यथा दोधाचरणोत्रयोदशैकादशमात्राप्रस्तारानुगतानियतस्वरूपाणां मध्ये यथेच्छमेकैकस्य संनिवेशेन संसिद्धिः ४ । अथ सोऽयमुपपदसंमासो यत्र पदभेदेऽप्यख-ण्डपदवत्प्रतिपत्तिः । यथा उदकशब्दे उदिति निपातस्यानतिवृत्तेन समुच्चयेऽप्यखण्डवदु-पचारः । यथा वा–समुद्रशब्दे न निर्णीयते सशब्दमुद्राशब्दसमुच्चयो वा (१) संमुनिपा-तयोर्द्रवतिवृत्तेन समुच्चयो वा (२) समिति निपातस्य जलार्थकोदशब्दस्य रतिवृत्तेन

समुच्चयो वा (३) समितिनिपातस्य उनत्तिवृत्तेन समुच्चयो वेति (४)। संज्ञाशब्दोऽयमख-ण्डवत् प्रतिपन्नः। अभिप्रायविशेषात्तु तं तं पदविभागमन्वाचक्षते नैरुक्ताः। एवमिहापि यथार्ग्याजातौ षष्ठ्यकारादिभूतलकारादुत्तरस्य कलात्रयस्य नखान्यतररूपतयाभिनेत-व्यस्य निपातरूपत्वाद्विभिन्नपदत्वमेवाधिगम्यतेऽथाप्यखण्डवदुपचारः (५)। एवमेवान्य-त्रान्यत्रापि द्रष्टव्यम्।

अथ प्रकारान्तरेणायं समासो द्वेधा–पादखण्डः, पदखण्डश्च। यत्र समासारम्भ-कपदयोः पूर्वोत्तरपादत्वं तत्र पादखण्डः, अन्यत्र पदखण्डः। स चायं विवक्षाधीनः। तेन भक्षभक्षसमासस्य पादखण्डत्वेऽक्षरपङ्क्तिः सम्पद्यते, पदखण्डत्वे तु चम्पकमाला स्यात्। तत्र पादखण्डः समासान्तरेण गर्भितश्चागर्भितश्च भवति, पदखण्डस्त्वगर्भित एव। अथ नित्यविकल्पायन्यतमसमासे समस्तयोर्द्वयोः प्रयोगादेकः श्लोको भवति। तदिदं 'मन्दं मन्द'मित्यादिवत् द्विरुक्तिर्न समासः। अथ वैदिकानां तु समस्तैकदेश-द्विरुक्त्यापि छन्दःसिद्धिर्द्विर्वचनाभावेन समासाभावेन च। यथा त्रिपदा द्विपदा एकपदा ऋक्॥

इति समासवादः।

अथ छन्दःपदवादः।

अथातः पदप्रतिपत्तौ जिज्ञासा समुपतिष्ठते—किं तावत् प्रस्तारसिद्धस्वरूपेषु पदत्वेनाभ्युपगतेषु द्वयोश्चतुर्णां वा सजातीयानां विजातीयानां वा समवायेन छन्दः-सिद्धिरस्ति? किंवा प्रस्तारसिद्धस्वरूपे छन्दस्त्वेनाभ्युपगते विच्छेदविरतियत्यपेक्षं पदविशेषव्यवस्थानमस्तीति। कुत एतत्? उभयथा ह्यत्र प्राचां व्यवहारा उपलभ्यन्ते। लौकिकास्तावत्—विषमार्धसमसमत्वेनाभ्युपगतेषु वृत्तेषु विजातीयानां सजातीयानां वा विरतिमत्पदानां द्विवाकेन चतुर्वाकेन वा छन्दः साध्यते, तर्हि यतिमत्पदस्य षड्वा-केनाष्टवाकेन वा कस्माच्छन्दःसिद्धिरपोह्यते? यदि तूपदेशलाघवायाधिगमसौकर्याय वा विरतिमत्पदे यतिव्यवस्थापेक्ष्यते, तर्हि वरमस्मिन् छन्दस्येव विच्छेदविरतियति-भेदानपेक्षं यतयः प्रकल्प्यन्तामलमर्धजरतीयाभ्युपगमेन।

अथ वैदिकाः पुनश्चतुरुत्तराणि छन्दांस्यभ्युपगच्छन्तश्चतुर्विंशत्यक्षरादिकाया वाचो गायत्रीत्वादिकमभिख्यापयन्तश्छन्दस्येव विच्छेदविरतियतिभेदानपेक्षं यतिव्यवस्थया पदसिद्धिं मन्यन्ते। अन्तरेणापि तु यतिं पदव्यवस्थामास्थाय छन्दःस्वरूपसिद्धिं प्रति जानते। तत्रेयं विप्रतिपत्तिः—

'सवितुस्त्वा प्रसवं उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः॥'
'तेजोऽसि शुक्रमस्यमृतमसि धामनामासि
प्रियं देवानामनाधृष्टं देवयजनमसि॥'

इत्यनयोर्माध्यंदिनाभ्युपगतयोर्जगत्यनुष्टुभोर्विच्छेदो दृश्यते, विरतिर्नास्ति।

'सुमित्रियान आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यश्च वयं द्विष्मः।' इत्यस्यां माध्यन्दिनीयानामार्ष्यां निचृदनुष्टुभि न विच्छेदो न विरतिः।

'अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः' ॥ १ ॥ (वाज. खं. ४०।९)

'या व्याघ्रं विषूचिकोभौ वृकं च रक्षतः।
श्येनं पतत्रिणं सिंहं सेमं पात्वंहसः ॥'

इत्यनयोरार्ष्योर्निचृदनुष्टुबुष्णिहोरव्यवस्थिते विच्छेदविरती दृश्येते। ततो नु खलु विज्ञायते सर्वत्रैव छन्दःसिद्धौ विच्छेदविरत्यपेक्षा नास्तीति।

अथ पुनः—

"क्षत्रस्य योनिरसि, क्षत्रस्य नाभिरसि, मा त्वा हिंसीन्मा मा हिंसीः" इत्यत्र विराड् गायत्रीत्वमस्वीकृत्य द्विपदां विराजमभ्युपगच्छन्ति, ततः खलु सर्वत्रैव छन्दःसिद्धौ विच्छेदापेक्षा लभ्यते।

अथानुष्टुभः सर्वछन्दस्त्वं प्रतिपादयितुं मैत्रायणीयानामाम्नायते—

"अनुष्टुभो वा एतस्याः सत्यास्त्रीण्यष्टाक्षराणि पदानि—एकं सप्ताक्षरम्। यत्सप्ताक्षरम् तस्य चत्वार्यक्षराणि एकस्मिन् पदे उपयन्ति त्रीण्येकस्मिन्। यत्र चत्वार्य्युपयन्ति सा जगती। यत्र त्रीणि स त्रिष्टुप्। यदष्टाक्षरं तेन गायत्री। यदनुष्टुप् —तेनानुष्टुप्। सर्वैरेवास्य छन्दोभिर्हुतं भवति। छन्दःप्रतिष्ठानो वै यज्ञः छन्दःसु वा वास्मै तद्यज्ञं प्रतिष्ठापयामः"

८ ।	८ ।	८ । ७
८ ।	८ ।	८ ।
० ।	३ ।	४
८ ।	११ ।	१२

इत्येवमाचक्षाणेन गायत्र्यादीनां पादव्यवस्थानिर्भरत्वसमाख्यानात् सर्वत्र छन्दःसिद्धौ विरतेरप्यपेक्षास्तीत्युपगम्यते। तदित्थमसमञ्जसमेतत्। यत्तु ब्रूयात्—नास्त्यसामञ्जस्यम्; उभयथाप्युपपत्तेः। इदं तावद् ब्रूमः—अस्त्येव सर्वत्र नियमेन छान्दसिकविच्छेदविरतिप्रक्लृप्तिरिति। 'सवितुस्त्वे'त्यादौ 'सुमित्रिये'त्यादौ चार्षिकपदानुपलम्भेऽपि छान्दसिकपदस्याक्षरगणनासिद्धस्यापलापायोग्यत्वात्। यत्र त्वक्षरगणना न समाप्नोति तत्रापि "क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेद्"(ऋ.सर्वा.३)इति कात्यायनोक्तदिशा उच्चारणसौकर्यानुकूल्येन व्यूहनाद् गणना द्रष्टव्या। यथा—

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु धारय।
रुचं वैश्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥

इत्यादौ हिकारेकारस्य ह्मकाराकारस्य वा अविद्यमानवद्भावादष्टाक्षरत्वम्। तथा—

'पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ १ ॥ (य. सं. ३१।२)
समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ २ ॥' (ऋ. सं. ८।८।४९)

इत्यादौ भावियमित्येवं (वह) इत्येवं च वर्णाभ्युच्चयेनोच्चारणादष्टाक्षरत्वम् । तदित्थं वैदिकानां व्यवहारे पादपूरणानुरोधेन व्यूहः यत्रह्स्वराणामितरवर्णगमभिव्याहारानुकूल्यप्रातिकूल्यतारतम्यसापेक्ष्यमभ्युच्चयेनाविद्यमानवद्भावेन चेति छान्दसी परिभाषा द्रष्टव्या । इत्थं व्यूहोऽपि सिद्धो वेदपुरुषाणामुच्चारणं, सिद्धान्ताख्यानं च शास्त्रं न शक्नोति चिरन्तनव्यवहारसिद्धमर्थमपलपितुम् । अत एव पृथ्वीशब्दस्य पृथिवीपृथवीरूपाभ्यामुच्चारितस्यापि दृश्यते विधायकं वैयाकरणवचनम् । यत्र तु न दृश्यते विधिवचनं, सोऽयमन्वाख्यापकदोषो भवति; न तु व्यवहर्तॄणामाम्नातानां स्वतन्त्राचार्याणां, नापि वा विराड् व्यवह्रियमाणस्यार्थस्येति दिक् ॥

अथान्यथा ब्रूमः—

नास्त्येव सर्वत्र नियमेनार्थिकविच्छेदविरतिप्रक्लृप्तिरिति । अनुष्टुभः सर्वच्छन्दस्त्वोपपादकमैत्रायणीयश्रुतौ यजुर्मन्त्राणामनुक्रमणिकोक्तच्छन्दोव्यवहारे चानपेक्ष्यैवार्थिकं पदं छन्दःस्वरूपोपपादनात् ॥

तस्मादुपपन्नो वैदिकव्यवहार इति चेत्—तन्न; छन्दःस्वरूपसिद्धौ सर्वथैवार्थानपेक्षायां छन्दःसाङ्कर्यप्रसक्तेः ।—

'एदमगन्म देवयजनं पृथिव्या
यत्र देवासो अजुषन्त विश्वे ।
ऋक्सामाभ्यां सन्तरन्तो यजुर्भी
रायस्पोषेण समिषा मदेम ।
इमा आपः शमु मे सन्तु देवीः
ओषधे त्रायस्व स्वधिते मैनं हिंसीः ॥'

इत्यस्यां सप्तत्यक्षरायां विराड्रूपायां ब्राह्मीजगत्यामेकादशाक्षरैश्चतुर्भिरार्ष्यास्त्रिष्टुभस्त्रयोदशाक्षराभ्यां चासुर्योरनुष्टुभोरपि संभवात् । उपलक्षणमेतत् । द्वादशाक्षराभ्यामेकादशाक्षराभ्यां च षट्चत्वारिंशदक्षराया विराडार्षीजगतीत्वेऽभ्युपगते चतुर्विंशत्यक्षरावशेषादार्षीगायत्रीत्वसंसिद्धेः । न च 'देवतादितश्च'(छ.शा. ३।६२)इत्याद्यनुशासनादिष्टसिद्धिः । ब्राह्मीजगत्यामार्षीजगतीत्वादिना साङ्कर्यस्येदानीमप्यनिरोधात् । तस्माद् गतिसिद्धमार्थिकं विरतिमत्पदमनुरुध्यैव तत्तच्छन्दोऽवयवभूतानां पदानां पदाख्यानां व्यवस्था शक्या प्रतिपत्तुम्,—अतस्तदवस्थमसामञ्जस्यम् ॥

अत्रोच्यते—लौकिकच्छन्दसि तावद् गतिस्तन्त्रम् । गतिबलापतिता हि यतिर्गत्यनुगमानुरोधादेव पञ्चधा स्वरूपं धत्ते । आयतिः, यतिः, विरतिः, विच्छेदः, अवसायश्चेति ।

तत्र यावता पुनरावृत्तिः प्रायेण तत्रैव विरतेर्दृश्यमानतया तदनुरोधाद् द्विदलत्वं चतुष्पदत्वं षट्पदत्वं वा व्यवस्थाप्यते । अत एव तत्र नियता पादानुरोधिनी छन्दः-सिद्धिः । पादत्वं च पुनरावर्तमानत्वे सति विरतिमत्पदत्वम् । यतिमत्पदस्यावृत्तेर्विरत्यन्तरितया विरतिमत्पदेतरतया च नैतस्य पादत्वमभ्युपगच्छन्ति । अर्धसमविषमादौ तु पादव्यवहारो 'रजकाय वस्त्रं ददाति'त्यादौ दानव्यवहारवद् भाक्तः । पुनरावर्तमानत्वाभावेऽपि विरतिमत्पदत्वानुवर्तनात्तत्वोपपत्तेः । अतो नास्ति लौकिकानामनुपपत्तिः ।

अथ वैदिकच्छन्दसि—

'अश्विभ्यां प्रातःसवनमिन्द्रेणैन्द्रं माध्यन्दिनम् ।
वैश्वदेव्यं सरस्वत्या तृतीयमाप्तं सवनम् ॥ १ ॥'

इत्येवमनुष्टुबादौ गत्यभावेऽपि छन्दःसिद्धिदर्शनादक्षरगणनैव तन्त्रं, न गतिः । अत एव गतिबलापतितायाः पञ्चविधाया यतेरपि नैवापेक्षा । दैविकार्यविज्ञानसापेक्षं हि वैदिकानां प्रवृत्तेस्तत्र देवस्वरूपसिद्ध्युपयुक्ताक्षरगणनापेक्षौचित्येऽपि श्रुतिरञ्जनोपयुक्ताया गतेरनुपयोगात् । तस्मादप्रसक्ते गतियती नार्य्ये प्रसक्ते तु तेन निवार्येते । पादव्यवस्था तु यत्यनपेक्षायामपि नूनमपेक्ष्यते ।

"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।" (ऋ.सं. ८।४।१७)

इत्यादिभिर्वेदेष्वपि पादव्यवस्थाया दृश्यमानत्वात् । तत्र च पादश्छन्दसो भक्तिविशेषः, स च स्थूलभेदेन संपूर्णं छन्द एव वा द्वितीयस्तृतीयश्चतुर्थः पञ्चमादिको वा यथाविवक्षमपेक्ष्यते । तदनुरोधेनैव गायत्र्यादींना एकपदी द्विपदी त्रिपदीत्यादिभिः शङ्कुमतीककुब्मतीयवमध्याभुरिगादिभेदैश्चानेकधात्वसंसाधनात् । तथा च नास्त्येव वैदिकानामप्यनुपपत्तिरिति भाव्यम् ॥

इति छन्दःपदवादः ।

अथ छन्दःपदसंहितावादः—

ननु चतुष्पद्या विषमपादान्ते सन्धिकार्याणि दृश्यन्ते, न तथा समपादान्ते, तत्र को हेतुः ? । अत्र वदन्ति—पद्यं हि चतुष्पात्त्वसाधर्म्यात् पशुवद् द्रष्टव्यम् । पशूनां हि पादेषु द्वन्द्वं द्वन्द्वं, संनिकृष्यते चाग्रिमाद् द्वन्द्वात्पश्चिमं द्वन्द्वम् । एवमेव पद्यानां पादेषु प्रथमं द्वयमुत्तमं च द्वयं पृथक् पृथक् संनिधत्ते; तस्मात्तत्र तत्र संहिताकार्याणि भवन्ति । समपादान्ते तु संनिकर्षाभावात् संहिताकार्याणि निवर्तन्ते, 'परः सन्निकर्षः संहिता' (पा.व्या.सु. १।४।१०९) इति सिद्धान्तात् ।

अथ पुनः कश्चित् प्रत्यवतिष्ठते । कश्चायं परः संनिकर्षः ? । यदि हि स्वारसिकार्धमात्राकालाधिककालव्यवायाभावः संहितेतीष्यते, तर्हि नूनमिहापि विषमपादान्ते संहिताकार्याणि निवर्तेरन्; यजुःप्रातिशाख्यपञ्चमाध्यायस्य प्रथमसूत्रे—"समासोऽव-

ग्रहो ह्रस्वसमकालः"—इत्यनुशासनात् । तदनुरोधेनैवासमस्तपदयोरध्यर्धमात्राकालस्य, यतौ द्विमात्राकालस्य, विरतौ तु सार्धद्विमात्राकालस्य, व्यवच्छेदकत्वस्वीकारापत्त्या संहितायां दूरापास्तत्वात् । अत्रोच्यते—नेदमवग्रहे तावदेकमात्राकालव्यवधानं नियम्यते । "अवग्रहे तु यः कालस्त्वर्धमात्रा विधीयते"—इति याज्ञवल्क्येन तत्रै-वार्धमात्राकालव्यवस्थापनात् । तस्मादवग्रहे क्वचिदेकमात्रयापि व्यवच्छेद इत्यत्रैव कात्यायनतात्पर्यं लभ्यते । युक्तश्चायमर्थः, विच्छेदकालस्य न्यूनाधिकताया विवक्षाधी-नतया नियमाऽनुपपत्तेः । अत एव ऋक्प्रातिशाख्येसंहिता "पदप्रकृतिः"(२।१)—इत्या-ख्यायते । संहितायाः पदं प्रकृतिः, पदस्य वा संहिता प्रकृतिरित्युभयथा सूत्रं व्याचक्षते । अर्थे क्वचित्कृतसमयाः संहितावर्णाः पदमिति पदे वर्णस्थित्या संहितास्वरूपं प्रतिपत्तुं युक्तम् । तत्र हि व्यञ्जनयोः स्वरान्तरितयोः स्वरानन्तरितयोर्वा विच्छेदकालो नैकधा भवति । अत एव चावग्रहे समस्तपदे यत्यादौ च नैकरूपो विच्छेदकालः क्रमागतः शक्यो नियन्तुम् । विवक्षावशाद्वर्णमैत्रीवशाच्च तारतम्यसंभवात् । यत्तु—

'स्वरान्तरितयोर्मध्यवर्ती व्यञ्जनयोः स्वरः ।
विच्छेदकालो मात्रा वा द्वे मात्रे तिस्र एव वा ॥ १ ॥
विच्छिद्येते व्यञ्जनेन व्यञ्जनान्तरितौ स्वरौ ।
व्यञ्जनस्वरयोः कालो विच्छेदस्य न विद्यते ॥ २ ॥
संयुक्तयोर्व्यञ्जनयोर्मात्रापादोऽन्तरं भवेत् ।
मात्रापादार्धविच्छेदे गुणसाङ्कर्यसंभवः ॥ ३ ॥
समस्तपदयोर्मध्ये विच्छेदस्त्वर्धमात्रकः ।
पादोनमात्राविच्छेदः पदयोरसमस्तयोः ॥ ४ ॥
एकक्रियान्वये वाक्यखण्डानां मात्रयान्तरम् ।
सैकद्वित्रिचतुःपादा मात्रा सापेक्षवाक्ययोः ॥ ५ ॥
त्रिमात्रा वा चतुर्मात्रा सूक्तपूर्तौ विधीयते ।
अधिकारे प्रकरणे ततोऽप्यधिकमिष्यते ॥ ६ ॥
श्लोकेऽर्धमात्रा तु यतौ विरतौ मात्रयान्तरम् ।
विच्छेदे त्वत्र मात्रे द्वे अवसाये ततोऽधिकम् ॥ ७ ॥'

इत्येवं केचन व्यवच्छेदनियमाः प्रदर्श्यन्ते; तदपि औचित्यमात्रसापेक्षं व्यवस्थान-मात्रम् । वर्णमैत्रीवशाद्विवक्षावशाच्च क्वचित्तदतिरेकदर्शनात् । यथा—

'जायन्ते नव सौ तथापि च नव भ्यांभिस्भ्यसां सङ्गमे
षट् संख्यानि नवैव सुप्यथ जसि त्रीण्येव तद्वच्छसि ।
चत्वार्यन्यवचःसु कस्य विबुधाः शब्दस्य रूपाणि त-
ज्जानन्तु प्रतिभास्ति चेन्निगदितु षाण्मासिकोऽत्रावधिः ॥ १ ॥

इत्यत्राद्यपादयतौ अर्धमात्रया द्वितीयपादयतौ पादोनमात्रया तृतीयपादयतावेक-मात्रया वा व्यवच्छेदोऽवभासते । तृतीयपादान्ते त्वर्द्धमात्रयैव, नैकमात्रयेति नाविदितं

१ गवाक् शब्दस्येत्यर्थः ।

भावुकानाम् । नन्वेवं तर्हि विषमपादान्ते समपादान्तेऽपि वा यथाविवक्षं क्वचित् सन्धिकार्याणि, प्रवर्तेरन्, क्वचिद्वा निवर्तेरन्नित्यव्यवस्थया वैषम्यं स्यादिति चेत्;—न । द्विविधा संहिता भवति—प्राकृता संस्कृता च । या स्वाच्छन्द्येन प्रकृतिमनुवर्तमाना स्वारसिकी, सा प्राकृता स्वतन्त्रा चाख्यायते । यथा दध्यानयेत्यत्रेकाराकारयोः । या तु स्थलविशेषे वाचनिकी, सा संस्कृता प्रगृह्या चाख्यायते । सा हि नियमेन प्रगृहीतत्वादेव न कस्यचिद्विवक्षयाऽन्यथा भवति । यथा विषमपादान्ते संहिता । सा हि यद्यपि कश्चिद्विलम्बेन वर्णानुच्चारयेत्, अथापि न निवर्तते प्रगृह्यत्वात् । यथा रामेष्वित्यत्र षुभागं तदितरभागात् पृथक्कृत्य यदि विलम्बेनापि कश्चिदुच्चारयेद्, अथापि सा पदप्रकृतिः संहिता न निवर्तते प्रगृह्यत्वात् । इयं समपादान्ते नाभ्युपगम्यते, तस्माददोषः ।

अन्येऽपि वदन्ति—भिद्यते हीयं संहिता वर्णाक्षरपदपादपद्यादिषु प्रत्यर्थं प्रत्यर्थं रूपभेदेन । वर्णसंहिता हि बलतारतम्येन वर्णगुणादिकं परवर्णे संचारयति । अक्षर-संहिता तु किञ्चिद्वर्णं किञ्चिदक्षराङ्गत्वेनावकल्पयति । तथा पदसंहिता वर्णानन्योन्यं संनिधापयति । अखण्डपदसंहितानिवृत्तिस्त्ववग्रहशब्देनोच्यते । उक्ताश्चैते संहिता-विशेषधर्मा **वर्णसमीक्षायां** संहितोपनिषत्प्रकरणे । तत्रेयं पदसंहिता वर्णानां विलम्बे-नोच्चारणं तु सहते, सन्धिकार्यप्रतिपत्तौ तु वर्णसंहिता तन्त्रम् । नैषात्यन्तं वर्णसान्निध्यम-पेक्षते; राघवेणेत्यादौ षण्मात्राविलम्बेऽपि रेफसंहितानिबन्धनणत्वकार्यदर्शनात् । तथा चेयं सन्धिकार्यप्रयोजिका संहिता यावन्तं कालं सहते, तावत्कालानतिपातेनैव विषमपादान्ते विश्रामः कर्तव्य इत्यादिश्यते । अधिकं तु ततः समपादान्ते इत्यतो न तत्र सन्धिकार्याणि प्रवर्तन्ते । परे त्वाहुः—अतिविलम्बेनोच्चारणेऽपि विषमपादान्ते सन्धिकार्याणि भवन्ति । अनतिविलम्बेनोच्चारणेऽपि समपादान्ते न भवन्ति । राघवेणेत्यादौ षण्मात्राविलम्बेऽपि सन्धिरनुवर्तते पुनर्नतु रघुनाथादावतिसांनिध्येऽपि निवर्तते । तस्मान्नैतदुक्तं युक्तम् । वस्तुतस्तु—

'संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ १ ॥'

इति यथा वैयाकरणा धातूपसर्गादौ नित्यत्वं वाचनिकं फलबलादनुजानन्ति; तथैव खलु विषमपादान्ते संहिताया नित्यत्वं, समपादान्ते तु संहिताया अविवक्षितत्वं फलानुरोधादेव छान्दसिका अनुजानन्ति । तस्माच्छान्दसिकसमयसिद्ध एवायमर्थं इत्यलमतिचिन्तया ॥

इति छन्दःपदसंहितावादः

यतिदोषवादः ।

ननु विभक्तिकृतानां पदानां विभक्तेः प्राक् क्रियमाणाया यतेर्दुष्टत्वमन्वाख्यायते तन्नावकल्पते, दुष्टत्वहेत्वलाभात् । तत्तच्छन्दोवृत्ते नियतस्थानेष्वेव हि यतिमन्वाचक्षते

छान्दसिकाः। स्थाननियमश्च वर्णमात्रान्यतरनिबन्धनो न तु विभक्तिपौर्वापर्यनिबन्धनः संभवति। विभक्त्यादीनां वैयाकरणपदार्थत्वेन छन्दःशरीरे तदप्रवेशेन च छन्दःस्वरूपसिद्धौ तदनपेक्षणात्। ऊनविंशत्यक्षरपादे शार्दूलविक्रीडितद्वादशाक्षरस्य यतिमत्त्वमन्वाख्यायते। तदिदं यदि त्रयोदशाक्षरे कृतं स्यात्तर्हि युक्तो वक्तुं दोषः। द्वादशाक्षरे तु कृतया यत्या छन्दःस्वरूपसंपादने विभक्तिपूर्वत्वमप्रयोजकमप्रतिबन्धकं चेति। न च व्याकरणानुसारेणाप्ययं दोषः संभवति। तत्र विभक्तेः प्राग् यतिकरणप्रतिषेधाननुशासनात्। नापि व्युत्पत्तिशास्त्रानुमतोऽयं दोषः। तत्र पदयोः स्वप्रयोज्यपदार्थोपस्थित्यव्यवहितोत्तरजायमानशाब्दबोधे यद्यप्याकाङ्क्षायोग्यतेत्यादिवदासत्तेः कारणत्वमन्वाख्यायते, यतिश्चासत्तिप्रतिबन्धिनी, तथापि तावता शाब्दबोधप्रतिबन्धः स्यात्, न छन्दसः स्वरूपहानिः। तत्र यतेरिष्टत्वात्। अथवा नेयं यतिरासत्तिविरोधिनी, एतावद्विलम्बेऽप्यर्थावबोधप्रतिबाधादर्शनात्। इतरथा कुत्रापि यतिमता वृत्तेनार्थावगतिर्न स्यादासत्तिप्रतिबन्धात्। अत एव परमसन्निकर्षात्मकसंहितानिबन्धनं सन्धिकार्यमपि न विरुध्यते। तस्मादस्त्वेव नामविभक्त्यात्मकयोः पदयोर्यत्यवरुद्धयोरप्यासत्तिरर्थबोधोपयोगिनीति न व्युत्पत्तिशास्त्रविरोधः। अथाप्रयुक्तदोषदुष्टत्वं स्यादिति चेत्तदपि न।

> 'यस्मात् क्षुब्धप्रकृतिपुरुषाभ्यां महानस्य गर्भे-
> ऽहङ्कारोऽभूत् खकशिखिजलोर्व्यस्ततः संहतेश्च।
> ब्रह्माण्डं यज्जठरगमहीपृष्ठनिष्ठाद् विरञ्चे-
> र्विश्वं शश्वज्जयति परमं ब्रह्म तत्तत्त्वमाद्यम्॥ १॥'

इत्यादिष्वभियुक्तकर्तृकप्रयुक्तिविषयतादर्शनात्। तस्माद्विभक्तिकृतपदे यतिप्रतिषेधो निर्मूल इति चेत्, अत्रोच्यते—

इह हि छन्दोवृत्तजाते मात्रावर्णान्यतरनियतस्थाने यतिः कर्तव्या इत्येको विधिः। सा च यतिर्नामविभक्तिमध्यवर्तिनी यथा स्यात्तथा विभक्तिकृतपदं न प्रयोज्यमित्यपरो विधिः। तत्र छन्दःस्वरूपं स्वाभिव्यञ्जकवर्णपरम्परामात्रसापेक्षं यद्यपि तत्तद्वर्गसमष्टेरर्थं नापेक्षत इति पूर्वेणैव विधिना छन्दःसिद्धिः कृतार्था भवति, तथापि सार्थकपदविन्यासेन छन्दःस्वरूपं सम्पिपादयिषून् प्रत्ययमपरो विधिरुपतिष्ठेत यत्यवरुद्धं विभक्तिकृतपदं न प्रयोज्यमिति। अयं भावः—पदं द्विविधं यतिकृतमर्थकृतं च। तदुभयविधमेवानवच्छिन्नवर्णपरम्परासापेक्षमित्यवश्यं यतियोग्यस्थाने विभक्तिकृतपदप्रयोगे विप्रतिषेधः प्राप्नोति।

अर्थानुरोधिनी हि पदयतिर्विभक्त्यन्ते स्थानं लभत इत्यवश्यं विभक्तेः प्रागनवच्छेदमपेक्षते। अथ छन्दोऽनुरोधिनी पदयतिस्तत्र विभक्तेः प्रागेव स्थानं लभत इत्यवश्यं विभक्तिविभक्तिमतोरनवच्छेदं प्रतिषेधति। तत्रेदं द्वैधमिव स्यात्—अर्थगतिमनपेक्षमाणो [illegible] प्रयोजयिता छन्दःस्वरूपमा[illegible]शयिषया प्रवर्तमानोऽवश्यं छन्दःयति

प्राधान्याद् विरक्तेः प्रागेव छन्दोनियताक्षरे यतिमासादयेदित्यर्थमपेक्षमाणस्य श्रोतुरमनोरञ्जनं स्यात् ॥ १ ॥

अथार्थबुबोधयिषयैव प्रवर्तमानस्तु नूनमर्थानुरोधेनैव छन्दोवृत्तं प्रयोजयन्नार्थिक-यतिप्राधान्याद् विभक्त्यन्ते यतिमासादयेदिति छन्दोयाथात्म्यमपेक्षमाणस्य श्रोतुरमनो-रञ्जनं स्यात् ॥ २ ॥ सेयमनवक्लृप्तिः । अतः स्थाने कृतं विभक्तिकृतपदे यतिप्रतिषेध-शास्त्रमिति दिक् ॥

इति यतिदोषवादः ।

अथ पञ्चाङ्गतावादः—

ननु यदि सर्वस्यैवार्थजातस्यैकान्ततश्छन्दोबद्धत्वं स्वीक्रियते, तत्तर्हि नूनमिदं छन्दो-ऽपि छन्दोबद्धं स्यात्; स तर्हि पद्यच्छन्दोवेदः किमिति पञ्चाङ्ग एवोच्यते? न च्छन्दसा षडङ्गः प्रतिविधीयते?। अथ—यदि नेदं छन्दश्छन्दोबद्धमिति मन्यसे, तत्तर्हि छन्दसः सर्वानुगतत्वप्रतिज्ञाहानिरिति चेत्,-सत्यम् । यथेदं ब्रह्मणो व्यापकत्वं मन्यन्ते तथेदं द्रष्ट-व्यम् । यदि नामास्य ब्रह्मणो ब्रह्मवृत्तित्वमाख्यायते तत्तर्हि द्वैतं भवति । अद्वितीयं तु ब्रह्मेत्याचक्षते ब्रह्मविदः । यदि तु ब्रह्मवृत्तित्वं नास्तीत्यभिमन्यते, तत्तर्हि तस्य व्यापकत्वप्रतिज्ञाहानिः प्रसज्यते । अथ यद्यनवस्थादोषात् तेजःशब्दप्रमाणादि-वदस्य ब्रह्मणः स्वरूपेणावभासमानस्य नेतरापेक्षेत्युच्यते, तत्तर्हि तुल्यं छन्दोवेदे-ऽपि । स्वरूपेणैव छन्दसां छन्दोबद्धत्वादितरच्छन्दोऽनपेक्षणात् । परे त्वाहुः—भवति नूनं गत्यध्वपरिच्छित्तिर्नाम छन्दसां छन्दो लिप्यध्वपरिच्छित्तेश्छन्दोलिपिच्छन्दस्त्व-वत् । सा चाध्वपरिच्छित्तिः प्रलयो भवति । यया परिच्छिन्नानामनेकेषामायतन-साम्येन प्रवर्तनं दृश्यते । आयतनमेव तज्जातीयेतरायतनसाम्यापेक्षया अध्वपरिच्छि-त्तिरित्युच्यते । अवश्यं हि सर्वस्याप्येतस्य वस्तुजातस्य स्वरूपसंपादनाद्यन्योद्देशेन प्रवर्तमानस्य कश्चिदध्वा भवति । तेनाध्वना प्रक्रममाणस्य सौकर्यं सौन्दर्यं चानुभूयते । समार्गात् प्रच्यवमानस्य च तस्य क्लिष्टत्वं कुरूपत्वं च जायते । तस्मादयमध्वयो-गश्छन्दसां छन्दः । नन्वेवं तर्हि पद्यच्छन्दोवेदस्य षड्भिरङ्गैर्भवितव्यमिति चेत्,-सत्यम् । अस्ति षडङ्गो वेदत्वात् । वेदस्य षडङ्गत्वनियमात् । स्वल्पविषयत्वात्तु नायमध्वयोग-पार्थक्येनेह निरूपित इति द्रष्टव्यम् ॥

इति छन्दोवेदपञ्चाङ्गतावादः ।

अथ छन्दोविज्ञानसार्थकतावादः ।

इदं तावच्छन्दोविज्ञानशास्त्रमनारम्भणीयमनर्थकत्वात् । चतुरर्थं हि शास्त्रमा-रभ्यते—अविज्ञातार्थज्ञापनार्थं, हेयार्थनिरसनार्थं सामर्थ्यम्-अशेषोद्रेकार्थम्, इतरवेदोप-कारार्थं चेति । तत्रेदं छन्दोविज्ञानशास्त्रं नैषामन्यतमं क्रमप्यर्थं संसाधयितुमीष्टे—

(१) कस्तावच्छन्दसामविज्ञातोऽर्थः शास्त्रेण विज्ञाप्यः ?। स्वरूपं वा ? नामधेयं वा ? प्रयोगनियमो वा ? छन्दोविज्ञानमात्रेणाभ्युदययोगो वा ? । नाद्यः ऋङ्मन्त्रादिपाठाद् वैदिकानां, काव्यादिपाठाद् लौकिकानां यावत्प्रयुक्तच्छन्दसां स्वरूपस्य प्रतिपत्तिसंभवात्। प्रयुक्तातिरिक्तच्छन्दसां तु वैदिकानामनभिधानमेव । लौकिकानां पुनः साकल्येन विज्ञानस्याप्यसंभवः, अनन्तत्वात् "शेषः प्रचितः ।" (८।३५।८।१) "अत्रानुक्तं गाथा" इति सूत्राभ्यां पिङ्गलेन विशेषतः सर्वच्छन्दःस्वरूपनिर्वचनाशक्यत्वप्रतिबोधनात्,

"कश्छन्दसां योगमावेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य निचिकाय कः स्वित् ॥" (ऋ.सं.८।६।१७।४)

इति मन्त्रद्रष्टा भगवता वेदपुरुषेणापि सर्वात्मना छन्दोयोगविज्ञानस्याशक्यत्वप्रतिबोधनात् ॥ १ ॥ न द्वितीयः—नामविशेषेण छन्दःस्वरूपे विशेषानाधानादिच्छानुरोधितया तादृशतुच्छफलार्थमेतावतो महतः शास्त्रौघस्यारम्भानावश्यकत्वात् ॥ २ ॥ न तृतीयः—अमुष्मिन्नवकाशे स्रग्धरैव प्रयोक्तव्या, न शार्दूलविक्रीडितं मन्दाक्रान्ता वेत्येवं विध्यभावात्, तत्तच्छन्दःप्रयुक्तावप्यापि लोके कामचाराच्च ॥ ३ ॥ न तुरीयः—छन्दोविज्ञानमात्रेणादृष्टाभ्युदयकल्पनाया निर्बीजत्वात् । तस्मान्नाविज्ञातार्थज्ञापनार्थं छन्दोविज्ञानशास्त्रमारम्भणीयं भवति ।—

(२) अथ न हेयार्थनिरसनायापीदं शास्त्रमुपयुज्यते । गौः शब्दः प्रयोक्तव्यः साधुत्वात् न गावी गोणी गोता गोपोतलिकेत्येवमादयः, असाधुत्वादिति हि यथा व्याकरणशास्त्रेण साधुशब्दान्वाख्यानेनासाधुशब्दानां हेयत्वं विधीयते; न तथानेन छन्दःशास्त्रेण छन्दसां साधुत्वासाधुत्वाभ्यामुपादेयहेयव्यवस्था क्रियते, प्रस्तारसिद्धस्वरूपातिरिक्तस्य हेयस्याप्रसिद्धेः । ट ण ठं ड ढे न यत्र च्छन्दःसिद्धिस्तत्र प्रमादतोऽप्येकडकाराधिक्ये टणठंड डढेनापि छन्दोऽन्तरसिद्धिः संभवत्येव, न च तत्र शास्त्रविरोधं पश्यामः । तस्माच्छन्दःसिद्धौ हेयोपादेयव्यवस्थाराहित्यादनर्थकमिदं छन्दःशास्त्रम् ॥

(३) अथ न छन्दःशास्त्रमध्येतुस्तदध्ययनेन कश्चन सामर्थ्यसमुद्रेको दृष्टः । हेयनिरसनपुरःसरमुपादेयमुपाददानो हि व्यवहारकुशलः साधीयसाभ्युदयेन युज्येत, वियुज्येत चानिष्टकरेणेति तत्रास्य सामर्थ्यमुद्भूतमिव विज्ञातं स्यात् । न चेह तथा छन्दःशास्त्रे हेयोपादेयव्यवस्थां पश्यामः, ततो नैतदध्ययनेन कथंचित्कुत्रचिदर्थे सामर्थ्यातिरेकमनुभावयामः ॥—

(४) अथ नेतरवेदोपकारकत्वमप्यस्य शास्त्रस्य संभवति । यथा हि—नाट्यवेदोपकारको नृत्यवेदः, नृत्यवेदोपकारको वाद्यवेदः, वाद्यवेदोपकारकश्च गेयवेदः; यथा वा वास्तुवेदाङ्गवेदक्रियावेदाः सर्ववेदोपकारका इष्यन्ते ।—न च तथेह कंचिद्वेदं पश्यामो योऽन्तरेण छन्दोविज्ञानमपर्याप्तः स्यात् ॥

ननु चास्ति यज्ञवेदो योऽन्तरेण छन्दोविज्ञानमपर्याप्तः स्यात्, तथाहि—यज्ञभवे पूर्वस्मिन् पक्षसि एकचत्वारिंशदधिकशतसंख्याकेषु चतुर्विंशामिष्टकाविकारसमाभिधा

नेष्वहःसु ब्रह्मसाम्नोभिवर्तस्यैकत्वेऽपि प्रगाथाः प्रत्यहं भेदेन प्रयुज्यन्ते। तत्र के ते स्तोत्रीयाः प्रगाथाः? इत्याकाङ्क्षायाम् "पञ्चसु माःसु बार्हताः प्रगाथा आप्यन्ते। तेष्वाप्तेषु छन्दसी संयुज्यैतव्यम्। चतुरुत्तरैरेव छन्दोभिरेतव्यम्। तदाहुरनवक्लृप्तानि वा एतानि छन्दांसि माध्यन्दिने, बृहत्या चैव त्रिष्टुभा चैतव्यम्"—इत्येवं ताण्डिश्रुतौ दाशतयीसमाम्नातेनाष्टाविंशतिशतप्रमितप्रगाथतृचसमुदायेन तावदहःसु प्रगाथलाभे तदतिरिक्तेषु त्रयोदशस्वहःसु प्रगाथलाभार्थं त्रयः पक्षा विधीयन्ते। ते चैते प्रगाथा न चान्तरेण शास्त्रमध्यवसितुं शक्याः, नापि वा तमन्तरेण प्रगाथप्रयोगं ज्योतिष्टोमः पर्याप्नोति; एवमितरत्राऽप्येकान्ततश्छन्दोविज्ञानमपेक्ष्यते प्रतियज्ञम्। अत एव च "यो ह वा अविदितार्षेयछन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते वा म्रियते पापीयान् भवति। तस्मादेतानि मन्त्रे मन्त्रे विद्यात्" (छं.ब्रा. ३।७।५) इति श्रूयते।

'मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणान् ऋषीन्।
कृत्तद्धितादींश्चाज्ञात्वा यजन्तो यागकण्टकाः॥ १॥
अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः॥ २॥
ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते॥ ३॥'

इति स्मर्यते च। भगवान् कात्यायनोऽप्याह—"छन्दांसि गायत्र्यादीनि एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजति याजयते तस्य ब्रह्म निर्वीर्यं यातयामं भवति। अथान्तरा श्वगर्तं वापद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान् भवति। अथ विज्ञायैतानि योऽधीते तस्य वीर्यवत्—अथ योऽर्थवित्तस्य वीर्यवत्तरं भवति जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते" इति॥ तस्मात् सन्त्येव भूयांसि छन्दःशास्त्रस्य प्रयोजनानि तद्विज्ञानमन्तरेण चायं यज्ञवेदो निर्वीर्यो यातयामो भवति, तस्मादस्ति यज्ञवेदोपकारकत्वं छन्दःशास्त्रस्य—

यद्यपि दृष्टान्तमुद्रया नाट्यनृत्तवाद्यगेयवेदानामुत्तरोत्तरस्य पूर्वपूर्ववेदोपकारकत्वमाख्यायते, तावतापि छन्दोवेदस्यैव सर्वोपकारकत्वमाख्यातं भवति; गेयवेदस्य छन्दोवेदानतिरिक्तत्वात्। तस्मादस्ति वाद्यादिवेदोपकारकत्वं छन्दःशास्त्रस्य॥—

अथ किं बहुना? येयं शिल्पविद्या लोके नितान्तफलोपधायकतया प्रतिपद्यते, सापि नूनमर्थच्छन्दोविद्योपजीव्या भवति—अर्थच्छन्दोविद्यानतिरिक्तैव वा। 'शिल्पं छन्द' इति श्रुतेः। सर्वं चेदं सचराचरं जगन्मण्डलं दृश्यते विश्वकर्मणः शिल्पम्। तथा प्राणिजातैरपि क्रियमाणं तत्तत्कर्म दृश्यते शिल्पमेवानुलम्बितम्। सर्वे च विद्यानिबन्धा रचनाविशेषात्मकेन केनापि शिल्पेनैवानुगृह्णा भवन्ति। तस्माच्छिल्पविद्यात्मनाप्यस्तीह सर्ववेदोपकारकत्वं छन्दःशास्त्रस्य॥ १॥

यदप्युक्तं—नास्य छन्दःशास्त्रस्य विज्ञातृषु सामर्थ्यविशेषोद्रेकादिफलोपधायकत्वम-स्तीति, तदप्यत एव प्रत्याख्यातं भवति "अविदित्वा योऽधीते तस्य ब्रह्म निर्वीर्यं, स पापीयान् भवति, अथ विज्ञायैतानि योऽधीते तस्य ब्रह्म वीर्यवत्, स जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते"—इत्येवमाचक्षाणेन भगवता कात्यायनेनान्वयव्यतिरेकाभ्यां छन्दो-विज्ञाने एव यज्ञवेदसाध्ययावत्फलोपधायकत्वप्रतिपादनात् । श्रूयते चाभ्युदयसमर्प-कत्वं छन्दोविज्ञानस्य । तथाहि—"तस्योष्णिग् लोमानि, त्वग् गायत्री, त्रिष्टुब्मांसम्, अनुष्टुप् स्नावानि, अस्थि जगती, पङ्क्तिर्मज्जा, प्राणो बृहती, स छन्दोभिश्छन्नः । यच्छ-न्दोभिश्छन्नस्तस्माच्छन्दांसीत्याचक्षते ।" इत्याख्याय "छादयन्ति ह वा एनं छन्दांसि पापात्कर्मणो यस्यां कस्यांचिद्दिशि कामयते" ((ऐ.आ. २।१।६) इत्यारण्यके समाम्नायते, तस्मात् पुरुषस्य पापसंबन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यत इत्यस्ति प्रयोजनं छन्दःशास्त्रस्य ॥

तथा तैत्तिरीया अप्यामनन्ति—"प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वा तिष्ठन् तं देवा बिभ्यतो नोपायन् ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसां छन्दस्त्वम्" (तै.सं. ५।६।६) इति । तस्माच्चीयमानाग्निसन्तानस्य छादकत्वाच्छन्दस्त्वमित्यस्ति प्रयोजनं छन्दःशास्त्रस्य ॥ तथा छान्दोग्योपनिषदि श्रूयते—"देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन् ते छन्दोभिरच्छादयन् यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वम्" (१।४।२) इति तस्मादपमृत्युं वारयतीति छन्द इत्युच्यते । ततोऽस्ति प्रयोजनं छन्दःशास्त्रस्य ॥ अथान्यो मन्त्रवर्णः श्रूयते "गायत्रेण च्छन्दसा त्वा छादयामि त्रैष्टुभेन च्छन्दसा त्वा छादयामि जागतेन च्छन्दसा त्वा छादयामि" इति ततश्छन्दसामेषां रक्षानुकूलसंव-रणसाधनत्वादस्ति प्रयोजनं छन्दःशास्त्रस्य ॥ २ ॥

अथ 'पुरा असुरैः पराभूताः सुरा यदेभिर्गायत्र्यादिभिः स्वमात्मानं प्रच्छाद्य पुन-स्तान् जिग्युस्तच्छन्दसां छन्दस्त्वमि'ति वृद्धपराशराद्युक्तेश्छन्दःसंवृतशरीरस्य शत्रुपरि-भावकत्वं विजयशालित्वं च संसिद्धं भवतीत्यस्ति प्रयोजनं छन्दःशास्त्रस्य । स्मर्यते चायमर्थो भगवता कात्यायनेनापि सर्वानुक्रमणीसूत्रे—"अर्थेप्सव ऋषयो देवताश्छ-न्दोभिरभ्यधावन्"(स.खं. २) इति । "अन्नपुत्रादिमोक्षान्तं फलमात्माधीनं कर्तुमिच्छन्तो मधुच्छन्दःप्रभृतयः संवननान्ता ऋषयः देवताः सूक्तहविर्भागिनीः, छन्दोभिर्गायत्र्यादि-भिरुपायभूतैस्तद्युक्तमन्त्रैर्वा 'अर्थस्य प्रापावयमेवोपाय इति' दृढसंकल्पाः श्रद्धयागच्छ-न्नि'ति हि तदर्थमाह—षड्गुरुशिष्योऽपि । अन्यच्चायमाह—(स. भा. उपसं.)

'ऋषिनामार्षगोत्रज्ञ ऋषेः संस्थानतामियात् ।
एकैकस्य ऋषेर्ज्ञानात् सहस्राब्दा स्थितिर्भवेत् ॥ १ ॥
छन्दसां चैव सालोक्यं छन्दोज्ञानादवाप्नुयात् ॥ २ ॥
तस्यास्तस्या देवतायास्तद्भावं प्रतिपद्यते ।
यां यां विजानाति नरो देवतामिति निर्णयः ॥ ३ ॥
ऋष्यादिविज्ञानफलमनुभूय सुपूजितः ।
स्वाध्यायस्यं फलं पश्चाद्भुक्त्वा दत्तं प्रपद्यते ॥ ४ ॥' इति ।

तस्मादन्नपुत्रादिमोक्षान्तफलसाधनत्वादस्ति प्रयोजनं छन्दःशास्त्रस्य ।

अथ यदुक्तं **छन्दःसिद्धौ**, हेयोपादेयव्यवस्थाराहित्यादनर्थकमिदं छन्दःशास्त्रमिति; तदप्यत एव नावकल्पते । सर्वं हि विधिवाक्यं सावधारणं भवति, न ह्यवधारणमितर-निवृत्तिमन्तरा दृष्टम् । यतश्चेदं छन्दोविधायकं शास्त्रमतो नूनमितरवारकेणानेन भवि-तव्यमिति सिद्धं हेयोपादेयव्यवस्थाप्रयोजकत्वं छन्दःशास्त्रस्य । सा च हेयोपादेयव्य-वस्था त्रेधा ।—विज्ञातव्यान्येव छन्दांसि न तु न विज्ञातव्यान्यपीति, विज्ञायैव च जपहोमयज्ञादिषु प्रवर्तेत न त्वविज्ञायापीति, भावाभावातिरेकप्रधाना सैका ॥ १ ॥ अथ "अनुष्टुभा यजति, बृहत्या गायति, गायत्र्या स्तौतीति" श्रूयते । तत्रानुष्टुभैव यजेत न बृहत्या न गायत्र्या, तथा बृहत्यैव गायेत नान्यथा, एवं गायत्र्यैव स्तुवीत नान्यथेत्येवं विजातीयभावद्वयातिरेकप्रधाना द्वितीया ॥ २ ॥ अथ—"पादस्यानुष्टुब् वक्त्रम्" "न प्रथमात् स्नौ०" "द्वितीयचतुर्थयोरश्चेति" सूत्रेभ्यो वक्त्रेषु, तथा "स्वरा अर्द्धं चार्य्या-र्द्धम्" "अत्रायुङ् न ज्" "षष्ठो जिति" सूत्रेभ्य आर्यासु विधिनिषेधप्रधाना तृतीया ॥ ३ ॥ यदि चेदं शास्त्रं न स्यादवश्यं तत्तर्हि तेष्वेतेषु कामचारः स्यादनर्थश्च प्रपद्येत । ततो नु खलु हेयान् हापयितुमुपादेयान् संचारयितुमुपदिशन्ति स्म ते कारुणिका भगवन्त आचार्याः ॥—॥ ३ ॥

(१) अथ यदप्युक्तं—नाविज्ञातार्थज्ञापनार्थमिदं शास्त्रमारब्धव्यमिति, एतदप्यत एव प्रत्याख्यातं वेदितव्यम् ; अन्तरेण शास्त्रारम्भमसम्भवाच्छन्दःस्वरूपावगमस्यैका-न्तमुपयुक्तस्य ॥ "अनुष्टुभा यजति, बृहत्या गायति, गायत्र्या स्तौतीति" श्रूयते । तत्र न ज्ञायते कानुष्टुप् ? का बृहती ? का गायत्रीति । अज्ञात्वा प्रवर्तमानश्च पापीयान् स्यात् । यत्रापि सतोबृहती महाबृहती महासतोबृहतीत्याख्यायन्ते, तत्रैतांस्तावदच्छान्दसिको बृहतीविकारान् प्रतिपद्येत । छान्दसिकस्तु पादविशेषव्यवस्थया पङ्क्तिविकारः सतो बृहती, त्रिष्टुब्विकारो महाबृहती, जगतीविकारो महासतोबृहती, इत्येवमध्यवस्यति । तथा च साधु यज्ञे प्रवर्तते । अन्यथा प्रवर्तमानस्यैतानि छन्दांसि यातयामानि स्युरित्य-वश्यमेषां स्वरूपज्ञानायोपयुज्यते छन्दःशास्त्रारम्भः ॥ १ ॥

यदपि तैत्तिरीयका आमनन्ति—"तद्यथा ह वै सूतग्रामण्यः–एवं छन्दांसि । तेष्वसा-वादित्यो बृहतीरभ्यूढः । सतोबृहतीषु स्तुवते सतोबृहत् प्रजया पशुभिरसानीत्येव"–इति तत्र प्रजया पशुभिश्चाहं सन्मार्गवर्तिनः पुरुषादधिको भवानीत्याशयेन सतोबृहत्या स्तौतीत्यर्थप्रतिपत्तेरवश्यमर्थापेक्षित्वमुपदिश्यते नामधेयस्येति नामधेयावगमार्थमुपयुज्यते छन्दःशास्त्रारम्भः ॥ २ ॥

अथामनन्ति–"व्यतिषक्ताभिः स्तुवते"–इति । न चान्तरेण छन्दोवेदमृचः शक्या व्यतिषक्ताः कर्तुमित्युपयुज्यते छन्दःशास्त्रारम्भः ॥ ३ ॥

भूयांसश्चार्थवादा श्रूयन्ते छन्दोवेदस्येति तत्तदभ्युदयसिद्धावुपयुज्यते शास्त्रारम्भः ॥४॥

छ० ७

इमानि च भूयश्छन्दोऽनुशासनस्य प्रयोजनानि यान्यत ऊर्ध्वमनुक्रमिष्यामः। बह्वृचानां श्रुतौ तावदाम्नायते—"प्रजापतिर्वै यज्ञं छन्दांसि देवेभ्यो भागधेयानि व्यभजत्। स गायत्रीमेवाग्नये वसुभ्यः प्रातःसवनेऽभजत्, त्रिष्टुभमिन्द्राय रुद्रेभ्यो मध्यन्दिने, जगतीं विश्वेभ्यो देवेभ्य आदित्येभ्यस्तृतीयसवने । अथास्य यत् स्वं छन्द आसीद-नुष्टुप्—त्वं न्वेव देवानां पापिष्ठोऽसि, यस्य तेऽहं स्वं छन्दोऽस्मि यां मोदन्तमभ्युदौ-हीरच्छावाकीयामभीति । तदजानात् स स्वं सोममाहरत् स स्वे सोमेऽग्रं मुखमभि पर्याहरदनुष्टुभम् । तस्मादनुष्टुबग्रिया मुख्या युज्यते" (ऐ. ब्रा. १२।२) इति। तदे-तच्छन्दोवेदं विद्वांसमन्तरेण कोऽन्यः शक्नोत्येतदर्थं विज्ञातुम् ? अतो दिव्यवेदार्थप्रतिप-त्त्यर्थमारम्भणीयश्छन्दोवेदः ॥ १ ॥

अथो पञ्चवीर्यं वा एतच्छन्दो यद्विराड् यत्त्रिपदा तेनोष्णिहागायत्र्यौ यदस्या एका-दशाक्षराणि पदानि तेन त्रिष्टुभ्। यत् त्रयस्त्रिंशदक्षरा तेनानुष्टुप्। न वा एकेनाक्षरेण च्छदांसि वियन्ति न द्वाभ्यां यद्विराड् तत्पञ्चमम्। सर्वेषां छन्दसां वीर्यमवरुन्धे सर्वेषां छन्दसां वीर्यमश्नुते सर्वेषां छन्दसां सायुज्यं सरूपतां सलोकतामश्नुते। अन्नादो-न्नपतिर्भवति अश्नुते प्रजयान्नाद्यं य एवं विद्वान् विराजौ कुरुते (ऐ. ब्रा. ११६) इत्येवं विराजोऽर्थवादः श्रूयते; स न पञ्चवीर्यत्वमवगन्तुं शक्नोत्यन्तरेण च्छन्दोवेदमित्या-रम्भणीयश्छन्दोवेदः ॥ २ ॥

"सर्वैश्छन्दोभिर्यजेदित्याहुः सर्वैर्वै छन्दोभिरिष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्य-जमानः सर्वैश्छन्दोभिरिष्ट्वा स्वर्गं लोकं जयति।...एतानि वाव सर्वाणि छन्दांसि गायत्रं त्रैष्टुभं जागतमन्वन्यानि । एतानि हि यज्ञप्रतमामिव क्रियन्ते । एतर्हि वा अस्य छन्दो-भिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद" (ऐ. ब्रा. २।३) इति हि श्रूयते। तत्र किं तावत्सर्वेषां छन्दसां स्वरूपं ? कानि वान्यानीति न तत्त्वतः शक्नोत्यवधारयितुमच्छा-न्दसिको न वा यष्टुमित्यारम्भणीयश्छन्दोवेदः ॥ ३ ॥

"स एवं विद्वांश्छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति य एवं वेद। यो वै तद्वेद यथा छन्दोमयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति तत् सुविदितमि"ति (ऐ. ब्रा. १०।८) श्रूयते। तदेतस्य छन्दोमयस्य देवताप्ययो यथा भवति तथा ज्ञानं हि सुज्ञानमित्यस्माकं सुज्ञानं यथा स्यादित्यारम्भणीयश्छन्दोवेदः ॥ ४॥

"तद्यदाग्नेय्या यजति विजित्या एव सा विराट् त्रयस्त्रिंशदक्षरा भवति" "त्रयस्त्रिंशद्वै देवाः—अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः प्रजापतिश्च वषट्कारश्च। तत् प्रथम उक्थमुखे देवता अक्षरभाजः करोति अक्षरमक्षरमेव तद्देवता अनुप्रपिबंति देवपात्रेणैव तद्देवतास्तृप्यन्ति इति श्रूयते" (ऐ. ब्रा. १२।११)। तदेवं देवता यद्यक्षरभाजः कल्प्यन्ते, तत्तर्हि नान्तरेणाक्षरच्छन्दोविज्ञानमेता विज्ञातुं शक्यन्ते। तदेताश्छन्दोभिर्यथा विजानी-यामित्यारम्भणीयश्छन्दोवेदः ॥ ५ ॥

"घ्नन्तो वा एताभिर्देवाः पुरो भिन्दन्त आयन्, यदुपसदः सछन्दसः कर्तव्या न विछन्दसः । यद्विछन्दसः कुर्याद् ग्रीवासु तद्गण्डं दध्यादीश्वरो ग्लावो जनितोः।

तस्मात् सछन्दस एव कर्तव्या न विछन्दसः' (ऐ.ब्रा.४।८) इत्युपसदां सछन्दस्त्वकरण-मनुज्ञायते। तदन्तरेण छन्दोवेदमशक्यं सछन्दस्त्वकरणमित्यारम्भणीयश्छन्दोवेदः ॥६॥

"गायत्रीं ब्राह्मणस्यानुब्रूयात्। गायत्रो वै ब्राह्मणः । तेजो वै ब्रह्मवर्चसं गायत्री। तेजसैवैनं तद्ब्रह्मवर्चसेन समर्द्धयति।...त्रिष्टुभं राजन्यस्यानुब्रूयात् त्रैष्टुभो वै राजन्यः। ओजो वा इन्द्रियं वीर्यं त्रिष्टुप्। ओजसैवैनं तदिन्द्रियेण वीर्येण समर्द्धयति।...जगतीं वैश्यस्यानुब्रूयात्। जागतो वै वैश्यः। जागताः पशवः पशुभिरेवैनं तत्समर्द्धयति" (ऐ. ब्रा.५।२) इति श्रूयते। तत्र गायत्र्या ब्रह्मवर्चसं तेजः, त्रिष्टुभा त्विन्द्रियं वीर्यमोजः, जगत्या च पश्वादयः पदार्था लक्ष्यन्ते। तदन्तरेण गायत्र्यादिविज्ञानमशक्यमेषां विज्ञा-नमित्यारम्भणीयश्छन्दोवेदः ॥ ७ ॥

"चतुरुत्तरैर्वै देवाश्छन्दोभिः सयुग्भूत्वा एतां श्रियमारोहन् यस्यामेत एतर्हि प्रतिष्ठिताः। अग्निर्गायत्र्या सवितोष्णिहा सोमोऽनुष्टुभा बृहस्पतिर्बृहत्या मित्रा-वरुणौ पङ्क्त्येन्द्रस्त्रिष्टुभा विश्वेदेवा जगत्या। ते एते अभ्यनूच्येते—अग्नेर्गायत्र्यभवत् सयुग्वेति। कल्पते ह वा अस्मै योगक्षेमः। उत्तरोत्तरिणीं ह श्रियमश्नुते अश्नुते प्रजाना-मैश्वर्यमाधिपत्यं य एवमेता अनुदेवता एतामासन्दीमारोहति क्षत्रियः सन्नि"ति (ऐ.ब्रा. ३७।२) हि श्रूयते। तत्र देवताछन्दसोः सयुक्त्वाख्यानादुत्तरोत्तरिणीं श्रियं प्रजामैश्वर्य-माधिपत्यं चापेक्षमाणानामवश्यमेषां छन्दसां चतुरुत्तरत्वविज्ञानमपेक्षितं भवतीत्यारम्भणी-यश्छन्दोवेदः ॥ ८ ॥

"यद् गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत। यद्वा जगज्जगत्याहितं पदं य इत्तद्विदुस्ते अमृतत्वमानशुः ॥ इत्येतद्वै तच्छन्दश्छन्दसि प्रतिष्ठापयति कल्पयति देवविशो य एवं वेदे"ति (ऐ.ब्रा.१२।१) श्रूयते। तदतश्छन्दःप्रतिष्ठापदं विदित्वामृत त्वमश्नुवीयेत्यारम्भणीयश्छन्दोवेदः ॥ ९ ॥

"तं सप्तभिश्छन्दोभिः प्रातरह्वयन्। तस्मात् सप्तचतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽ-नूच्यन्ते।" इति हि तैत्तिरीयका आमनन्ति। मैत्रायणीनामध्वरादिविधावप्याम्नायते। "देवेभ्यः प्रातर्यावभ्योऽनुब्रूहीति छन्दांसि वै देवाः प्रातर्यावाणः। छन्दोभ्यो वा एतद-नुवाच आह"-इति। तथाचैतरेयकेऽपि—

"देवेभ्यः प्रातर्यावभ्योहोतरनुब्रूहीत्याहाध्वर्युः। एते वाव देवाः प्रातर्यावाणो यदग्नि-रुषा अश्विनौ। त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति। आस्य देवाः प्रातर्यावाणो हवं गच्छन्ति य एवं वेद" (ऐ. ब्रा. ७।५) सप्ताग्नेयानि छन्दांस्यन्वाह,...सप्तोषस्यानि छन्दांस्यन्वाह...सप्ताश्विनानि छन्दांस्यन्वाह—सप्तधा वै वागवदत्। तावद्वै वाग[illegible] सर्वस्यै वाचः सर्वस्य ब्रह्मणः परिगृहीत्यै। तिस्रो देवता अन्वाह। त्रयो वा इमे त्रिवृतो लोकाः। एषामेव लोकानामभिजित्यै (ऐ.ब्रा.८।७)। तदाहुः—कथमनूच्यः प्रातरनुवाक इति। यथाच्छन्दसमनूच्यःप्रातरनुवाकः। प्रजापतेर्वा एतान्यङ्गानि यच्छन्दांसि। एष उ एव प्रजापतिर्यो यजते।" (ऐ. ब्रा. ७।८) इति श्रूयते। न चैतच्छन्दोविज्ञानमन्तरेणा-नुवचनं साधीयः संभवतीत्यारम्भणीयश्छन्दोवेदः ॥ १० ॥

"तदाहुः स वै होता स्याद्य एतस्यामृचि सर्वाणि छन्दांसि प्रजनयेदिति । एषा वाव त्रिरनूक्ता सर्वाणि च्छन्दांसि भवति । एषा छन्दसां प्रजातिः ।" (ऐ. ब्रा. ७।६) इति श्रूयते । तदतश्छन्दःप्रजननविद्याया होतृत्वमासादयेयमित्यारम्भणीयश्छन्दोवेदः ॥११॥

"अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः । आग्नावैष्णवं पुरोळाशं निर्वपन्ति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्ति । अग्निर्वै सर्वा देवता विष्णुः सर्वा देवता एते वै यज्ञस्यान्त्ये तन्वौ यदग्निश्च विष्णुश्च । तद्यदाग्नावैष्णवं पुरोडाशं निर्वपन्ति । अन्तत एव तद्देवानृध्नुवन्ति । तदाहुर्यदेकादशकपालः पुरोळाशो द्वावग्नाविष्णू । कैनयोस्तत्र क्लृप्तिः, का विभक्तिरिति । अष्टाकपाल आग्नेयोऽष्टाक्षरा वै गायत्री गायत्रमग्नेश्छन्दः त्रिकपालो वैष्णवस्त्रिर्हीदं विष्णुर्व्यक्रमत । सैनयोस्तत्र क्लृप्तिः सा विभक्तिरि" (ऐ. ब्रा. १।१) त्याम्नायते । तत्रैवमेकादशकपाले देवतयोः क्लृप्तिविभक्ती कर्तुं पारयेमेत्यारम्भणीयश्छन्दोवेदः ॥ १२ ॥

"तेजो वै ब्रह्मवर्चसं गायत्री । आयुर्वा उष्णिग् । वाग्वा अनुष्टुप् । श्रीर्वै यशश्छन्दसां बृहती । पाङ्क्तो वै यज्ञः । ओजो वा इन्द्रियं वीर्यं त्रिष्टुप् । जागता वै पशवः ।" (ऐ. ब्रा. १।६) इति श्रूयते । तदतस्तत्तच्छन्दोयाज्यामनुरुन्धाना यथा तत्तत्कामेषु कृतकृत्याः स्युरित्यारम्भणीयश्छन्दोवेदः ॥ १३ ॥

"ते देवा अब्रुवन्—विराड्याज्यास्तु निष्केवल्यस्य या त्रयस्त्रिंशदक्षरा । त्रयस्त्रिंशद्वै देवाः । अष्टौ वसव एकादश रुद्राः द्वादशादित्याः प्रजापतिश्च वषट्कारश्च । देवता अक्षरभाजः करोति । अक्षरमक्षरमेव तद्देवता अनुप्रपिबन्ति देवपात्रेणैव तद्देवतास्तृप्यन्ति यं कामयेत—अनायतनवान् स्यादिति अविराजास्य यजेद् गायत्र्या वा त्रिष्टुभा वान्येन वा छन्दसा वषट् कुर्यादनायतनवन्तमेवैनं तत्करोति । यं कामयेत—आयतनवान् स्यादिति । विराजास्य यजेदायतनवन्तमेवैनं तत्करोति ।" (ऐ. ब्रा. १२।११) इति श्रूयते । तदन्तरेण छन्दोवेदमवाक्यं तु यथाकामं याज्या विशेषोपधानमित्यारम्भणीयश्छन्दोवेदः ॥ १४ ॥

"यो धाता स वषट्कारः···यानुमतिः सा गायत्री···या राका सा त्रिष्टुप्···या सिनीवाली सा जगती···या कुहूः सानुष्टुप् । एतानि वा व सर्वाणि च्छन्दांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यानि । एतानि हि यज्ञे प्रतमामिव क्रियन्ते । एतैर्ह वा अस्य छन्दोभिर्यजतः सर्वैश्छन्दोभिरिष्टं भवति य एवं वेद । (ऐ. ब्रा. १३।३) यः सूर्यः स धाता स उ एव वषट्कारः···या द्यौः सानुमतिः सो एव गायत्री···योषाः सा राका सो एव त्रिष्टुप् ···या गौः सा सिनीवाली सो एव जगती···या पृथिवी सा कुहूः सो एवानुष्टुप् । एतानि वाव सर्वाणि च्छन्दांसि । गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यानि एतानि हि यज्ञे प्रतमामिव क्रियन्ते" (ऐ. ब्रा. १५।४) इत्याद्यैतरेयके श्रूयते ॥ मैत्रायणीयानां राजसूयब्राह्मणेऽप्याम्नायते—"गायत्र्यनुमतिः । त्रिष्टुब् राका । जगती सिनीवाली । कुहूरनुष्टुप् । धाता वषट्कारः ॥ या पूर्वा पौर्णमासी सानुमतिः योत्तरा सा राका । या पूर्वामावस्या सा सिनीवाली योत्तरा सा कुहूः । चन्द्रमा एव धाता ।" इत्यादि । तदन्तरेण च्छन्दोवेदमशक्यमासामनुमतिराकासिनीवालीकुहूनां सर्वच्छन्दोभिःसारूप्यमवगन्तुमित्यारम्भणीयश्छन्दोवेदः ॥१५॥

"अतिच्छन्दसः शंसति। छन्दसां वै यो रसोऽत्यक्षरत् सोऽतिच्छन्दसमभ्यत्यक्षद्। तदतिच्छन्दसोऽतिच्छन्दस्त्वम्। सर्वेभ्यो वा एष च्छन्दोभ्यः संनिर्मितो यत् षोळशी। तद्यदतिच्छन्दसः शंसति सर्वेभ्य एवैनं तच्छन्दोभ्यः संनिर्मिमीते सर्वेभ्यश्छन्दोभ्यः संनिर्मितेन षोळशिना राध्नोति य एवं वेद।" (ऐ. ब्रा. १६।३) इत्यैतरेयकाणां षोडशिब्राह्मणे श्रूयते। तदिदमतिच्छन्दसः शंसेयं षोडशिना च राध्नुयामित्यारम्भणीयश्छन्दोवेदः॥१६॥

"सोमो वै राजाऽमुष्मिंल्लोके आसीत्। तं देवाश्च ऋषयश्चाभ्यध्यायन् कथमयमस्मान्त्सोमो राजागच्छेदिति। तेऽब्रुवंश्छन्दांसि। यूयं न इमं सोमं राजानमाहरतेति। तथेति ते सुपर्णा भूत्वोदपतन्।...छन्दांसि वै तत्सोमं राजानमच्छा चरन्। तानि ह तर्हि चतुरक्षराणि चतुरक्षराण्येव छन्दांस्यासन् सा जगती चतुरक्षरा प्रथमोदपतत्। सा पतित्वार्धमध्वनो गत्वाश्राम्यत्। सा परास्य त्रीण्यक्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च हरन्ती पुनरभ्यवापतत्। तस्मात्तस्य वित्ता दीक्षा वित्तं तपो यस्य पशवः सन्ति। जागता हि पशवः। जगती हि तानाहरत्॥ अथ त्रिष्टुबुदपतत्। सा पतित्वा भूयोऽर्द्धादध्वनो गत्वाश्राम्यत्। सा परास्यैकमक्षरं त्र्यक्षरा भूत्वा दक्षिणा हरन्ती पुनरभ्यवापतत्। तस्मान्मध्यन्दिने दक्षिणा नीयन्ते त्रिष्टुभो लोके। त्रिष्टुब्भिता अहरत्॥ १॥ ते देवा अब्रुवन् गायत्रीम्। त्वं न इमं सोमं राजानमाहरेति सा तथेत्यब्रवीत्।...सा पतित्वा सोमपालान् भीषयित्वा पद्भ्यां च मुखेन च सोमं राजानं समगृभ्णात्। यानि चेतरे छन्दसी अक्षराण्यजिहतां तानि चोपसमगृभ्णात्॥ २॥ सा यद्दक्षिणेन पदा समगृभ्णात्। तत् प्रातःसवनमभवत्। तद्गायत्री स्वमायतनमकुरुत। तस्मात् तत् समृद्धतमं मन्यन्ते सर्वेषां सवनानाम्।...अथ यत्सव्येन पदा समगृभ्णात् तन्माध्यन्दिनं सवनमभवत्। तद्विस्रंसत तद्विस्रस्तं नान्वाप्नोत् पूर्वं सवनम्। ते देवाः प्राजिज्ञासन्त। तस्मिंस्त्रिष्टुभं छन्दसामदधुरिन्द्रं देवतानाम्। तेन तत् समावद्वीर्यमभवत् पूर्वेण सवनेन।...अथ यन्मुखेन समगृभ्णात् तत् तृतीयसवनमभवत्। तस्य पतन्ती रसमधयत्। तद्धीतरसं नान्वाप्नोत् पूर्वे सवने। ते देवाः प्राजिज्ञासन्त। तत्पशुष्वपश्यन्। तद्यदाशिरमवनयन्ति आज्येन पशुना चरन्ति तेन तत् समावद्वीर्यमभवत् पूर्वाभ्यां सवनाभ्याम्॥ ३॥ ते वा इमे इतरे छन्दसी गायत्रीमभ्यवदेताम्। वित्तं नावक्षराण्यनुपर्यागुरिति। नेत्यब्रवीद्गायत्री। यथावित्तमेव न इति। ते देवेषु प्रश्नमैताम्। ते देवा अब्रुवन्—यथा वित्तमेव व इति। तस्माद्वाप्येतर्हि वित्त्यां व्याहुः—यथावित्तमेव न इति। ततो वा अष्टाक्षरा गायत्र्यभवत्। त्र्यक्षरा त्रिष्टुप्। एकाक्षरा जगती। साष्टाक्षरा गायत्री प्रातःसवनमुदयच्छत् नाशक्नोत्त्रिष्टुप् त्र्यक्षरा माध्यन्दिनं सवनमुद्यन्तुम्। तां गायत्र्यब्रवीद्—अन्यापि मेऽत्रास्त्विति। सा तथेत्यब्रवीत् त्रिष्टुप्। तां वै मैतैरष्टाभिरक्षरैरुपसन्धेहीति। तथेति तामुपसमदधात्...सैकादशाक्षरा भूत्वा माध्यन्दिनं सवनमुदयच्छत्। नाशक्नोज्जगत्येकाक्षरा तृतीयसवनमुद्यन्तुम्। तां गायत्र्यब्रवीद्—आयान्यपि मेऽत्रास्त्विति। सा

तथेत्यब्रवीज्जगती । तां वै मैतैरेकादशभिरक्षरैरुपसन्धेहीति । तथेति तामुपसमदधात्··· सा द्वादशाक्षरा भूत्वा तृतीयसवनमुदयच्छत् । ततो वा अष्टाक्षरा गायत्र्यभवत् । एकादशाक्षुरा त्रिष्टुप् । द्वादशाक्षरा जगती ।···एकं वै सत्तत्रेधाभवत् । तस्मादाहु र्दातव्यमेवं विदुषे इति । एकं हि सत्तत्रेधाभवत् ।" (ऐ. ब्रा. १३।४) इति हि सौपर्णकमाख्यानमाख्यानविदामामनन्त्यैतरेयकाः । को ह्येतदर्थं विज्ञापयितुं शक्नोति यावता याथात्म्येन च्छन्दोवेदं न जानीयादित्यारम्भणीयश्छन्दोवेदः ॥ १७ ॥

गायत्री	||||	||||∠-7,	|||'|||'|'	|||'||||"	८
त्रिष्टुप्	||||	|||-∠|7,	|||······,	|||-||||'||||"	११
जगती	||||	|-∠|||7,	|······,	|-|||-||||'||||"	१२

"आदित्याश्चाङ्गिरसश्च सुवर्गे लोकेऽस्पर्धन्त । वयं पूर्वे सुवर्गं लोकमियाम । वयं पूर्व इति । त आदित्या एतं पञ्चहोतारमपश्यन् तं पुरा प्रातरनुवाकादाग्नीध्रेऽजुहवुः । ततो वै ते पूर्वे सुवर्गं लोकमायन् । संवत्सरो वै पञ्चहोता । संवत्सरः सुवर्गो लोकः तेऽब्रुवन्नाङ्गिरस आदित्यान्—क स्थ ? क्व वः सद्भ्यो हव्यं वक्ष्याम ? इति । छन्दःसु इत्यब्रुवन् । गायत्र्यां त्रिष्टुभि जगत्यामिति । तस्माच्छन्दःसु सद्भ्य आदित्येभ्य आङ्गिरसीः प्रजा हव्यं वहन्ति ।" इति हि तैत्तिरीयका आमनन्ति । छन्दःसु सद्भ्य आदित्येभ्यो हव्यं वहन्तीति जानीयामेत्यारम्भणीयश्छन्दोवेदः ॥ १८ ॥

मैत्रायणीयानामाम्नायते "गायत्रीं च सम्पादयति जगतीं च । तद्वे छन्दसी एकं छन्दोऽभिसम्पादयति बृहतीम् । त्रिष्टुभं च ककुभं च । तद्वे च्छन्दसी एकं छन्दोऽभि सम्पादयति बृहतीम् । अनुष्टुभं च पङ्क्तिं च । तद्वे च्छन्दसी एकं छन्दोऽभिसम्पादयति बृहतीम् । तत् षट् च्छन्दांस्येकं च्छन्दोभिसम्पादयति बृहतीम् ।" इत्यादि ।

गा० |||||००० ज० |||||||–|||	क० ||||||०० त्रि० ||||||||-||	अ०|||||||० प०|||||||||–|
६ १२	७ ११	८ १०
बृ ९ + बृ ९	बृ ९ + बृ ९	बृ ९ + बृ ९

ऐतरेयकेऽपि "तस्या वाचोऽवपादादबिभयुः—तमेतेषु सप्तसु छन्दःस्वश्रयन् । यदश्रयन् । तच्छ्रायन्तीयस्य श्रायन्तीयत्वम्—यदवारयन्—तद्वारयन्तीयस्य वारयन्तीयत्वम् । तस्या वाच एतावपादादबिभयुः । तस्मा एतानि सप्त चतुरुत्तराणि छन्दांस्यपादधुः । तेषामतित्रीण्यतिरिच्यन्ते । न त्रीण्युदत्तवत् स बृहतीमेवास्पृशत्—द्वाभ्यामक्षराभ्यामहोरात्राभ्यामेव । तदाहुः—कतमा सा देवाक्षरा बृहती—यस्यां तत् प्रत्यतिष्ठत् । द्वादश पौर्णमास्यः—द्वादशाष्टकाः—द्वादशामावास्याः । एषा वाव सा देवाक्षरा बृहती यस्यां तत् प्रत्यतिष्ठदिति । यानि च च्छन्दांस्यत्यरिच्यन्त यानि च नोदभवन्—तानि निर्वीर्याणि हीनान्यमन्यन्त । साऽब्रवीद् बृहती । मामेव भूत्वा मामुपसंश्रयतेति । चतुर्भिरक्षरैरनुष्टुब् बृहतीं नोदभवत् । चतुर्भिरक्षरैः पङ्क्तिर्बृहतीमत्यरिच्यत । तस्यामेतानि चत्वार्यक्षराण्यपच्छिद्यादधात् । ते बृहती एव भूत्वा बृहतीमुपसमश्रयताम् । अष्टाभिरक्षरैरुष्णिग् । बृहतीं नोदभवत् । अष्टभिरक्षरैस्त्रिष्टुप् बृहतीमत्यरिच्यत । तस्यामेतान्यष्टावक्षराण्यपच्छिद्यादधात् । ते बृहती एव भूत्वा बृहतीमुपसममश्रयताम् ॥ द्वादशभिरक्षरैर्गायत्री बृहतीं नोदभवत्, द्वादशभिरक्षरैर्जगती बृहतीमत्यरिच्यत । तस्यामेतानि द्वादशाक्षराण्यपच्छिद्यादधात् । ते बृहती एव भूत्वा बृहतीमुपसमश्रयताम् ॥" इत्याम्नायते । तत्रान्तरेण च्छन्दोवेदमशक्यमासां गायत्र्युष्णिगनुष्टुभामनुद्भवनमन्यासां च पङ्क्तित्रिष्टुब्जगतीनामतिरेचनं यथायथावद्विज्ञातुमित्यारम्भणीयश्छन्दोवेदः ॥ १९ ॥ इतीमान्यन्यानि चैवंविधानि भूयांसि प्रयोजनानि पश्याम इत्यारम्भणीयश्छन्दोवेदः ॥२०॥

अथ कश्चिद् ब्रूयात्—यान्येतानि प्रयोजनान्युक्तानि ततो नु खलु वैदिकानामेव च्छन्दसां विधानशास्त्रस्यावश्यकत्वं प्राप्नोति; न पुनर्लौकिकानामपीति । तत्रोच्यते—त्रिविधानि हि वाचां छन्दांसि; कानिचिद्वैदिकान्येव, कानिचिद्वैदिकानि च लौकिकानि च, कानिचित् पुनर्लौकिकान्येव । तत्रावश्यमुभयेषां निदर्शनाय शास्त्रारम्भः प्रवर्तनीयस्तेन यदि—"घटायोन्मीलितं चक्षुः किमन्यन्न प्रकाशयेत् ?"—इति न्यायेन लौकिकान्यपि दर्श्येरन्; तत्तर्हि तावता छन्दोयाथात्म्यविजिज्ञासूनां छन्दोविज्ञानसौकर्यानुग्रहो भवति ! अत एव तु वैदिकानि च्छन्दांसि साकल्येन प्रदर्श्य लौकिकानां दिग्दर्शनेनानुगृह्णाति भगवान् पिङ्गलाचार्यः । अनेन चाविशिष्टबुद्धिरपि तानि तानि छन्दोवृत्तानि यथावदवगम्य तद्वचनाभिनयादिना कृतकृत्यः कवितानन्दमासादयेत् ॥—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥" (का. प्र. १।२)

इति हि भूयांसि प्रयोजनानि काव्यस्य पठन्ति । छन्दोभिनेयं तु वाक्यं रसोद्बोधे काव्यमित्युच्यते । तदतश्छन्दोभङ्गो रसापकर्षितया काव्यत्वव्याघातको भवति ।

तस्माच्च छन्दोभङ्गदोषेण काव्यप्रयोजनेभ्यो माव्यतिरेचिष्महीत्यपेक्षमाणानामारम्भणीयं लौकिकानामपि च्छन्दसां विज्ञानशास्त्रम् । उक्तं च प्राकृते पैङ्गले—

जेम ण सहई कणअतुला तिलतुलिअं अद्ध अद्धेण ।
तेम ण सहई सवणतुला अवच्छन्दं छन्दभङ्गेण ॥ १ ॥
अबुह बुहाणं मज्झे कव्वं जो पढइ लक्खणविहूणम् ।
भूअगालगाखगाहिँ सीसं खुडिअं ण जाणेइ ॥ २ ॥ इति ।

यथा न सहते कनकतुला तिलतुलितमर्द्धार्द्धेन । तथा न सहते श्रवणतुला अपच्छन्दस्कं छन्दोभङ्गेन ॥ १ ॥ अबुधो बुधानां मध्ये काव्यं यः पठति लक्षणविहीनम् । भुजाग्रलग्नखङ्गेन शीर्षं खण्डितं न जानाति ॥ २ ॥

इति हि तदर्थः । तदिदमपच्छन्दस्कं लक्षणविहीनं मा प्रयुङ्क्ष्महीत्यारम्भणीयं छन्दोविज्ञानशास्त्रम् ॥ २१ ॥

इति छन्दोवेदसार्थकतावादः ।

श्रीः

प्रस्तावना।

किं तावच्छन्दसां तत्त्वम्? का विभक्तिः? किं लक्षणम्? किं प्रयोजनम्? इत्यादयश्छन्दःशास्त्रसम्बद्धा विषयास्तावत् श्रीमधुसूदनशर्ममहानुभावैश्छन्दःसमीक्षायां सम्यङ्न्यरूरुपिषतेति तेषामेवात्र सङ्ग्रहोऽकारि।

अथ तदेतच्छन्दःशास्त्रं कदा प्रादुरासेति विमृश्यते।

तत्र तावन्महनीयमहिम्नोऽपौरुषेयाद्वेदराशेर्गायत्र्यादिच्छन्दसां यज्ञकर्मणि विनियुक्तत्वात्तज्ज्ञानार्थमादौ ब्राह्मणग्रन्थेषु तेषां पादसङ्ख्या तत्र प्रविभक्ताक्षरसङ्ख्या च निर्दिश्यते। पादसङ्ख्यामात्रेणाक्षरसङ्ख्यामात्रेण च वैदिकच्छन्दसां गायत्र्यादिव्यवहारः। तत्र किञ्चिन्न्यूनाधिकतायामपि न च्छन्दोहानिर्भवति। तदुक्तम्—'न वा एकेनाक्षरेण च्छन्दांसि वियन्ति, न द्वाभ्याम्' (ऐ. ब्रा. १. ६) 'न ह्येकेनाक्षरेणान्यच्छन्दो भवति, न द्वाभ्याम्' (सां. ब्रा. २७. १) इति। ततो ब्राह्मणग्रन्थेष्वितस्ततः पर्यस्तान् विध्यर्थवादादीन् समाहृत्य सारल्येन यज्ञकर्माणि सूत्रयितुं प्रवृत्तेषु भगवदाश्वलायनसाङ्ख्यायनापस्तम्बादिषु तदुपयोगिनां छन्दसां लक्षणान्यपि ब्राह्मणारण्यकादिभ्यो निष्कृष्य पृथक्कथनीयान्यभवन्। तानि चैवं सूत्रयांचकार तत्र भवान् साङ्ख्यायनः—

छन्दःशास्त्रस्य मूलम्

'त्रिपदा गायत्री (१) उष्णिक् (२) पुर उष्णिक् (३) ककुप् (४) विराट् च पूर्वा (५) चतुष्पदोत्तरपदा विराट् (६) बृहती (७) सतो बृहती (८) जगती (९) अनुष्टुप् (१०) त्रिष्टुप् च (११) पञ्च पङ्क्तिः (१२) षट्सप्तेत्यतिच्छन्दसाम् (१३) 'स हि शर्धो न मारुतं'मित्यष्टौ (१४) द्वौ द्विपदायाः (१५) तेऽष्टाक्षराः प्रायेण (१६) द्वादशाक्षरा जगत्याः (१७) तृतीयौ चोष्णिग्बृहत्योः (१८) सतोबृहत्याश्च प्रथमतृतीयौ (१९) मध्यमः ककुभः (२०) प्रथमः पुर उष्णिहः (२१) एकादशाक्षरा त्रिष्टुब्विराजोः (२२) उत्तरस्या दशाक्षरः (२३) तामक्षरपङ्क्तिरित्यप्याचक्षते (२४) पञ्चभिः पञ्चाक्षरैः पदपङ्क्तिः (२५) पळ्प्यष्टाक्षरा जगत्याः (२६) एकेन द्वाभ्यामित्यूनके निचृत् (२७) अतिरिक्ते भुरिक् (२८) सम्पाद्य पादभागेनाहार्यस्यर्चः सम्मितास्तस्य पादभागेन सम्पद्याः (२९) गायत्र्युष्णिगनुष्टुब्बृहत्यो पङ्क्तिश्च त्रिष्टुब्जगत्यावित्यानुपूर्व्यं छन्दसां चतुर्विंशत्यक्षरादीनां चतुरुत्तराणाम् (३०) (सां. श्रौ. सू. ७. २७)

इति । इदमेव मूलं छन्दःशास्त्रमहातरोरिति मन्यामहे । अत्रैकेन द्वाभ्यां वाऽक्षराभ्यां न्यूनाधिक्ये निचृद्भुरिगिति संज्ञाविशेष उच्यते; पिङ्गलाचार्येण पुनः 'ऊनाधिकेनैकेन निचृद्भुरिजौ । द्वाभ्यां विराट्स्वराजौ ।' (३. ५९-६०) इत्युक्तमिति शास्त्रस्योत्तरोत्तरं परिणततावसीयते ।

निदानसूत्राणामिदमेव स्थानम् । प्रातिशाख्यसर्वानुक्रमण्यौ वैदिकच्छन्दसां लक्षणानि दर्शयन्त्यावपि पिङ्गलादूर्ध्वमेवाविर्भूते इत्यनुपदमेव दर्शयिष्यते ।

अथाधीयमानेष्वेवाम्नायेषु केषाञ्चनर्चामर्धर्चानां पादानां च श्रुतिमनोहरतामनुसन्दधानाः परमर्षयस्तत्राक्षरपरिच्छेदं लघुगुरुनियमं च निदानमवदीधरन् । तानेव चाम्रेड्याम्रेड्य स्वयं वृत्तानि विरचयामासुः । क्वचिच्चाक्षरसङ्ख्यानिरपेक्षमेवोच्चारणकालसाम्यमात्रं विशिष्टवृत्तसाधकं पश्यन्तो मात्रावृत्तानि कल्पयाम्बभूवुः । दृश्यन्ते हि नानाविधवृत्तानां मातृकायमाणा भग्नभागा वेदे । यथा—

लौकिकच्छन्दसामुत्पत्तिः

'हृदिस्पृगस्तु शन्तमः' (ऋ. सं. १. १. ३१) इति प्रमाण्याः ।
'पूषण्वते ते चकृमा करम्भं' (ऋ. सं. ३. ३. १८) इतीन्द्रवज्रायाः ।
'स्तुहि श्रुतं गर्तसदं युवानं' (ऋ. सं. २. ७. १८) इत्युपेन्द्रवज्रायाः ।
'अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः ।' (ऋ. सं. १. २. १४) इत्युपजातेः ।
'इन्द्रासोमा दुष्कृते मा सुगं भूत्' (ऋ. सं. ५. ७. ६) इति शालिन्याः ।
'आ देवानामभवः केतुरग्ने' (ऋ.सं २. ८. १६) इति वातोर्म्याः ।
'रथं न दुर्गाद्वसवः सुदानवः' (ऋ. सं. १. ७. २४) इति वंशस्थस्य ।
'यूना ह सन्ता प्रथमं वि जज्ञतुः' (ऋ. सं. ७. २. १९) इतीन्द्रवंशायाः ।
'अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ।' (ऋ. सं. १. १. १९) इति नराचस्य ।

एवमेवान्येषामपि वृत्तानां मूलभूताः पादाश्चार्धर्चाश्च तत्र तत्र शतश उपलभ्यन्ते । ततश्च वेद एव मूलं लौकिकानामपि छन्दसामिति युक्तमुत्पश्यामः ।

तत्रैवं द्विविधानामपि च्छन्दसां लक्षणविधायकं शास्त्रमिदमाविरकार्षीत्तत्रभवान् पिङ्गलनागः । सर्वेष्वप्युपलभ्यमानेषु छन्दोग्रन्थेष्विदमेव पुराणतरमार्षं च । अत एवैतद्वेदाङ्गतयोपादीयते वैदिकैः । लौकिकानामपि च्छन्दसां लक्षणसङ्ग्रहपरस्यास्य वैदिकलौकिकशब्दलक्षणविधायकपाणिनीयव्याकरणस्येव वेदाङ्गता न विरुद्धा । दृश्यन्ते चोपनिषदादिषु वेदभागेषु क्वचिल्लौकिकान्यपि च्छन्दांसि । तेषां लौकिकसंज्ञा तु 'प्राधान्येन व्यपदेशा भवन्ति' इति न्यायेनैवेति न किञ्चिदत्याहितम् ।

छन्दःशास्त्रस्य वेदाङ्गता ।

पिङ्गलाचार्यकृतच्छन्दःशास्त्रात्पूर्वमपि शास्त्रेऽस्मिन् क्रौष्टुकि-यास्क-ताण्डि-सैतव-काश्यप-रातमाण्डव्यप्रभृतीनां शास्त्राण्यासन्निति पिङ्गलकृतात्तन्मतनिर्देशादवगम्यते। तत्र क्रौष्टुकिः—बौधायनीये भारद्वाजगोत्रकाण्डे 'भृष्टयो भृष्टुभिन्दयः क्रोष्टुकयः' इति श्रुतानां क्रौष्टुकीनां कश्चित् स्यात्। अयमतीव प्राचीनः, यतो यास्केनापि स्मर्यते-'द्रविणोदा इन्द्र इति क्रौष्टुकिः' (निरु. ८. २) इति।

प्राचीनाश्छन्दः-शास्त्रकाराः।

यास्कः-आपस्तम्बेन भृगुषु पठितः-'यास्कबाधूकमौनमौकाः' इति। अयं निरुक्ताख्यनिघण्टुभाष्यप्रणेता 'यास्को मामृषिरव्यग्रो नैकयज्ञेषु गीतवान्।' (शां. प. ३४३. ७२) इत्यादिना महाभारतेऽपि स्मर्यमाणः।

ताण्डी-'ऋषिरासीत्कृते तात ! तण्डिरित्येव विश्रुतः।' (अनु. १६. १) इत्यादिना महाभारते गीयमानमाहात्म्यस्य ऋषेः पुत्रः। 'ऋषीणामभिगम्यश्च सूत्रकर्ता सुतस्तव। मत्प्रसादाद्द्विजश्रेष्ठ ! भविष्यति न संशयः॥' (अनु. १६. ७०) इति तत्रैव भगवतो महेश्वरस्य वरदानोपवर्णनात्।

सैतवविषयेऽधिकं किमपि न ज्ञायते। केवलं लौकिकच्छन्दोलक्षणविधायकशास्त्रकर्तायमासीदित्यनुमीयते।

काश्यपस्तु—मन्दारमरन्दटीकायां कृष्णशर्मकृतायां माधुर्यरञ्जन्यां प्रमाणीक्रियते 'तत्र भगवता सूत्रकारेण काश्यपेन...' (पृ. ४) इति। कृष्णशर्मणो मध्वमतानुयायित्वात्, मध्वाचार्यस्य च १२३९ शकाब्दे पिङ्गलसंवत्सरे लोकान्तरप्रयाणस्यैतिह्यविद्भिरवधारितत्वात्, तदूर्ध्वभाविना कृष्णशर्मणा प्रमाणत्वेनोपात्तस्य काश्यपसूत्रस्यासादनमिदानीमपि नासम्भवनीयम्। धर्मसूत्रमपि काश्यपप्रणीतमुपलभ्यते। तत्कर्ता छन्दःसूत्रप्रणेता च काश्यप एक एवोत भिन्न इत्यवधारयितुं न पारयामः।

रातमाण्डव्यौ तु सम्भूय ग्रन्थकर्तारावित्यनुमीयते। तत्र प्रवरदर्पणे भरद्वाजाङ्गिरोमध्ये कश्चित् रातो दृश्यते। माडव्यश्च बौधायनसूत्रे भृगुगणे आश्वलायनसूत्रे तर्पणप्रकरणेऽन्यत्र च बहुषु ग्रन्थेषु श्रुतः। महाभारते च (आदि. १०७) कश्चिन्माण्डव्य उपवर्णितः। तत्र को वा रातसहचर इत्यनिर्णीतमेव। धर्मशास्त्रमपि रातमाण्डव्यप्रणीतमस्तीति स्मृतिसारसमुच्चयादिपर्यालोचनात् प्रतीयते। तत्र रातमाण्डव्य इत्येकत्वेन व्यपदेशो दृश्यते, स च शङ्खलिखितवत्सम्भूयग्रन्थकर्तृत्वनिमित्तक एव स्यात्।

एतदतिरिक्ता अन्येऽपि छन्दःशास्त्रकाराः पिङ्गलाचार्यात्पूर्वकालिका भवितुमर्हन्ति, यन्मतमसौ 'एकीयम्' (५. १५) इति निर्दिशति। परं तद्विषयेऽविदितविशेषा जोषमेवावतिष्ठामः।

अथ पिङ्गलाचार्यादूर्ध्वकालिकत्वेनाध्यवसितान् कांश्चिदार्षान् ग्रन्थानालोचयामः ।

पिङ्गलाचार्यादुत्तर-कालिकाश्छन्दो-ग्रन्थकाराः ।

तत्र शौनकीये प्रातिशाख्येऽन्त्यैः षोडशादिभिस्त्रिभिः पटलैर्वैदिकच्छन्दसां लक्षणानि निरूपितानि । शौनकश्च नितान्तं प्राचीन इति विमर्शकाः । परं वयमिमं पिङ्गलादूर्ध्ववर्तिनं मन्यामहे । यतः प्रातिशाख्ये छन्दःशास्त्रापेक्षया बहवश्छन्दसां सूक्ष्मभेदा लक्षिता दृश्यन्ते । न च तद्विषय एव शास्त्रे तदनिरूपणं सङ्गच्छते, विना तत्पूर्वभावित्वात् । अस्ति चान्यदपि गमकं यच्छन्दःशास्त्रे न्यङ्कुसारिण्याः 'स्कन्धोग्रीवी क्रौष्टुकेः । उरोबृहती यास्कस्य' (३. २९-३०) इत्याचार्यनामग्रहणपूर्वकं संज्ञाद्वयं प्रादर्शि, प्रातिशाख्ये तु '–न्यङ्कुसारिणी । स्कन्धोग्रीव्युरोबृहती त्रेधैनां प्रतिजानते ॥' (१६. ४३) इति नामग्रहणनैरपेक्ष्येणैव । तेन छन्दःशास्त्रस्य प्राचीनतावचनेनैव सिद्ध्यति । किञ्च दृश्यते प्रातिशाख्ये 'यजुषां षट् । साम्नां द्विः । ऋचां त्रिः' (२. ६-८) इति छन्दःसूत्राणामनुवाद इव, 'यजुषां षडृचां त्रिःषट् साम्नां द्वादश सम्पदि ।' (१६. १२) इति । तस्मात्प्रातिशाख्यादपि छन्दःशास्त्रमेव प्राचीनम् । प्रातिशाख्ये दृष्टाश्छन्दोविशेषास्तु विशल्यकरण्यां सङ्गृहीता एवास्माभिरिति नात्र पुनरुच्यन्ते ।

कात्यायनप्रणीतं ऋक्सर्वानुक्रमसूत्रं तु प्रायः प्रातिशाख्यानुसारीति तस्य ततोऽर्वाचीनत्वं निर्विवादम् । छन्दःशास्त्रादर्वाक्तनत्वे त्वस्यास्ति स्फुटतरं प्रमाणं यत् छन्दःशास्त्रीययोः 'न्यूनाधिकेनैकेन निचृद्भुरिजौ । द्वाभ्यां विराट्स्वराजौ' (छं. ३. ५९-६० सर्वा० ३. ४-५) इति सूत्रयोरविकलयोरनुवादः । सर्वानुक्रमे च 'अथ छन्दांसि' इत्युपक्रम्य तृतीयाद्येकादशान्तैः खण्डैर्ऋग्वेदेऽपेक्षितानां छन्दसां लक्षणान्युक्तानि । अस्माभिस्तु तानि सर्वाणि टिप्पण्यां सोदाहरणानि प्रदर्शितान्येव । शुक्लयजुःसर्वानुक्रमसूत्रं तु छन्दोविषये न ऋक्सर्वानुक्रमसूत्रान्मात्रयापि भिद्यते, अतस्तद्विषये न किञ्चिद्वक्तव्यमस्ति ।

अग्निपुराणे ३२८ तममध्यायमारभ्य ३३५ तमपर्यन्तमष्टभिरध्यायैः क्रमेण परिभाषा, दैव्यादिसंज्ञाः, पादाधिकारः, उत्कृत्यादीनि च्छन्दांसि–आर्यादिमात्रावृत्तानि च, विषमवृत्तानि, अर्धसमवृत्तानि, समवृत्तानि, प्रस्तारादि, इति निरूपितमुपलभ्यते । एतच्च सर्वमपि पिङ्गलोक्तस्य छन्दःशास्त्रस्यानुवादरूपमेव । तथा च प्रतिज्ञातं तत्र–'छन्दो वक्ष्ये मूलशब्दैः पिङ्गलोक्तं यथाक्रमम् । (३२८–१) इति । छन्दःशास्त्रे शुद्धाशुद्धपाठपर्यालोचने प्रक्षिप्ताद्यवधारणे च सुतरामुपयुज्यत एतत् ।

गरुडपुराणे पूर्वखण्डे २०७ तममारभ्य २१२ पर्यन्तं षड्भिरध्यायैः क्रमेण परिभाषा, मात्रावृत्तानि, समवृत्तानि, अर्धसमवृत्तानि, विषमवृत्तानि, प्रस्तारादि

च वर्णितं दृश्यते । अत्र कतिचिच्छन्दःशास्त्रेऽनुक्तानामपि वृत्तानां लक्षणानि समुपलभ्यन्ते । तानि चास्मदीयटिप्पण्युक्तलक्षणैर्गतान्येव । वैदिकछन्दसां लक्षणानि तु नात्र वर्णितानि । इदं पैङ्गलीयाच्छास्त्रादुत्तरकालिकमेव, 'तावदर्धे तद्गुणितं द्विद्व्यूनं तु तदन्ततः । परे पूर्णं परे पूर्णं–' इति तदनुवाददर्शनात् ।

नारदीयपुराणे पूर्वखण्डे ५७ तमेऽध्याये–'लौकिकं वैदिकं चापि छन्दो द्विविधमुच्यते ।' इत्युपक्रम्य गणसंज्ञाः, समार्धसमादिलक्षणानि, उक्तादि संज्ञाः, प्रस्तारं च निरूप्य 'इत्येतत्किञ्चिदाख्यातं छन्दसां लक्षणं मुने ! । प्रस्तारोक्तप्रभेदानां नामानन्त्यं प्रजायते ॥ २१ ॥' इत्युपसंहृतम् । अत्र वृत्तानां प्रातिस्विकलक्षणानि न सन्त्येव ।

विष्णुधर्मोत्तरे तृतीयखण्डे ३ अध्याये गायत्र्यादिकृत्यन्तं छन्दःसामान्यलक्षणमभिधाय, लघुगुरुविशेषं प्रस्तारं चोक्त्वा 'दिङ्मात्रमेतत्कथितं नरेन्द्र ! विस्तारजिज्ञासुरतो मनुष्यः । संसाधयेत्तत्स्वधिया यथावत्सुदुस्तरं विस्तरशो हि वक्तुम् ॥२०॥' इत्युपसंहारः कृतः ॥

एतावन्त एवास्मत्सन्दृष्टा आर्षाश्छन्दोग्रन्थाः । एषु पिङ्गलाचार्यकृतं छन्दःशास्त्रमेव प्रतनतरं प्रमाणभूतं सर्वाङ्गपूर्णं च ।

पिङ्गलनागः तस्य कालश्च ।

अथ कोऽयं पिङ्गलनागः ? इति पर्यनुयोगे **महाभारते** जैमिनीये सर्पसत्रे दग्धेषु नागेषु कश्चित्पिङ्गलो दृश्यते–'निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा ।' (आदि. ३५. ९) इति । नासौ छन्दःशास्त्रप्रणेता भवितुमर्हति, मुनित्वाभावात्, अस्यान्यथैव मरणश्रवणाच्च । किन्तु **मात्स्येऽङ्गिरस्सु** 'बोधिर्नगः सौगमाक्षिंक्षीरयोरिकिरेव च ।' (१९६. ६) इति श्रुतस्य **नगस्य** पुत्रः; तत्रैव 'ज्ञात्वायनो हरिर्वाश्यः पैङ्गलश्च तथैव च ।' (१९६. ३२) इति श्रुतस्य पैङ्गलस्य पिता चायं **पिङ्गलनागो** भविष्यतीत्यस्माकं सम्भावना । एनं फणित्वेन वर्णयन्तस्तु नागशब्देन प्रतारिता एवेति मन्यामहे ।

एतेन महाभाष्यकारं **पतञ्जलिमेव** पिङ्गलापरनामधेयमाचक्षाणा अपि व्याख्याताः । किञ्च महाभाष्ये नवाह्निके 'पैङ्गलकाण्व' (आह्नि. ९ सू. ७३) शब्ददर्शनात्, भाष्यात्प्राचीनायामृग्वेदसर्वानुक्रमण्यां छन्दःशास्त्रीयसूत्रानुवादस्योपदर्शितत्वाच्च पिङ्गलस्य महाभाष्यकारात्पतञ्जलेः प्राचीनत्वं व्यक्ततरम् ।

वामनपुराणे प्रातःस्मरणीयेषु–'सनत्कुमारः सनकः सनन्दनः सनातनोऽप्यासुरिपिङ्गलौ च । (१४. २५) इति नामसङ्कीर्तनं प्रायोऽस्यैव भविष्यति, आसुरिसाहचर्यात् । **स्कान्दे काशीखण्डे** च–'गणेन पिङ्गलाख्येन पिङ्गलेशाख्यसंज्ञितम् । लिङ्गं प्रतिष्ठितं शम्भोः कपर्दीशादुदग्दिशि ॥' (५५. २) इति शिवलिङ्गप्रतिष्ठापकत्वेनोपवर्णितः पिङ्गलोऽयमेव भवितुमर्हति, अस्य 'शिवप्रसादाद्विशुद्धमति'त्वस्योक्तत्वात् । सर्वानुक्रमटीकायां षड्गुरुशिष्यस्तु–सूत्यते हि भगवता पिङ्गलेन पाणिन्यनुजेन'

(७) इति लिखांति, तत्र न प्रमाणान्तरमुपलभामहे। वयं त्वेनं पूर्वमुपदर्शितैः प्रमाणैः पाणिनेः पूर्वतनं जानीमहे। परं सम्प्रति 'यथा मकारेणापिङ्गलस्य सर्वगुरुत्रिकः प्रतीयेत' (मी. भा. १. १. ५) इति वचनदर्शनाच्छबरस्वामिनः पूर्वकालिकत्वमात्रमविप्रतिपन्नमस्य। निश्चयेन काकनिर्णयस्तु सर्वेषामेवर्षीणां दुर्निरूप्य एवेति वयमप्यन्ततस्तद्विषये वाचंयमतामेवोररीकुर्मः।

निवासस्तु पिङ्गलाचार्यस्य प्रायः पश्चिमोदधेस्तीरप्रदेश एवेति निश्चीयते। तथा हि

पिङ्गलस्य देशः

तद्देशोद्भवस्त्रीपु रूढौ 'अपरान्तिका' (४. ४१) 'वानवासिका' (४. ४३) इति शब्दौ छन्दःशास्त्रे वृत्तनामत्वेनायं प्रायुङ्क्त। अपरान्तिका 'पश्चिमसमुद्रसमीपेऽपरान्तदेशः, तत्र भवाः'। वानवासिका 'कोङ्कणविषयात् पूर्वेण वनवासविषयः, तत्र भवाः' (२. ५. २६, ३२) इति वात्स्यायनसूत्रव्याख्याजयमङ्गला। 'प्राच्यवृत्तिः' 'उदीच्यवृत्तिः' (४.३७-३८) इति संज्ञे अप्युक्तार्थेऽनुकूले। महोदधितीरवासित्वादेव 'छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलं' (२.२६) इति पञ्चतन्त्रे दृश्यमानं तद्विषयकं वर्णनमपि स्वरसतः सङ्गच्छते। अतो दक्षिणकोङ्कणमेवास्य निवासस्थानमिति सम्भावयामः।

छन्दःशास्त्रे समुपलभ्यमानासु वृत्तसंज्ञासु तु काश्चन विलासिनीललितसुभगान्

छन्दःशास्त्रे वृत्तसंज्ञाः।

भावानाविष्कुर्वन्ति, काश्चन मात्रासमकं पदचतुरूर्ध्वं गच्छन्त्यो माणवकाक्रीडितकमाम्रेडयन्ति, काश्चिन्मत्तमयूरसेवितं कुसुमितलतावेल्लितमनोहरं पुष्पिताग्राभिः शाखाभिरुपशोभितमुद्यानं विचरन्ति, काश्चित् हलमुखीं पृथ्वीं यत्नमतीं शालिनीं च वितन्वन्ति, काश्चन हरिणीयूथसनाथं शार्दूलविक्रीडितभीषणं भुजङ्गविजृम्भितं काननं सेवन्ते, काश्चिद्द्रुतविलम्बितवृषभगजविलसितं जुषन्ते, काश्चन विद्युन्मालाप्रभाभासुरं वातोर्मिप्रेरितजलधरमालोद्धतं वर्धमानं चण्डवृष्टिप्रपातं भजन्ते, काश्चन हंसरुतनादितां क्रौञ्चपदोपशोभितां जलोद्धतगतिं वेगवतीं वाहिनीमवगाहन्ते, काश्चिच्चाश्वललितरथोद्धतां केतुमतीमपराजितां प्रहरणकलितां सेनां स्मारयन्तीत्यहो सर्वतोमुखी सूक्ष्मनिरीक्षणशक्तिराचार्यस्य। एतासां सम्यग्विमर्शे ग्रन्थकर्तृ रसिकता च जीविकारहस्यं च तत्कालीना देशस्थितिश्च सुपरिज्ञाता स्यादिति मन्यामहे।

यद्यप्येता आचार्यवर्येण यथारुचि कल्पिताः-प्राचीनैः कश्यपादिभिश्च विहिताः

वृत्तनाम्नामुपपत्तिः।

समाहृता इति न तत्र कश्चन पर्यनुयोगः, तथापि कासांचित् संज्ञानामुपपत्तिरप्यनुमातुं शक्येति पश्यामः। यथा-षडक्षरपादायाः मध्याक्षरद्वयस्य लघुत्वात् तनुमध्या। पठ्यमाना द्रुतं वक्रं सर्पतः सर्पशिशोरनुकरोतीति भुजगशिशुसृता। द्रुतं विलम्बितं च पठ्यत इति द्रुतविलम्बितम्। मत्तमयूरस्य नृत्तमिव भातीति मत्तम-

यूरम् । यतित्रये विश्रम्य विश्रम्य मन्दं क्रामन्ती **मन्दाक्रान्ता** । व्याघ्रस्य मुखितिद्वीदशाहस्तेति प्रसिद्धेर्द्वादशाक्षरेषु यतिमच्छार्दूलविक्रीडितम्,-इत्येवमादि द्रष्टव्यम् ।

सङ्ख्येयपरैः पदैः सङ्ख्याया उपलक्षणं चास्मिन्नेव शास्त्रे प्रथमतो दृश्यते । अत्रत्या प्रस्तारादिगणितरीतिराचार्यस्य गणितविद्यायामपि पाटवं प्रकाशयति । एतत्कर्तृकोऽन्यः कोऽपि ग्रन्थोऽस्ति न वेति न ज्ञायते ।

प्राकृतपिङ्गलस्य कर्ता त्वन्य एवेत्याहुः । तत्र बहु वक्तव्येऽपि विस्तरभयाद्विरम्यते ।

छन्दःशास्त्रस्य व्याख्यानम् ।

अदश्छन्दःशास्त्रं दुरूहसूत्रमयत्वाद्व्याख्यानसापेक्षमित्यत्र न कोऽपि संशयः । बहूनि हि सूत्राणि व्याख्यागम्यान्येवात्रत्यानि । अस्य चेदत्प्रथमं व्याख्यानमेषा हलायुधप्रणीता वृत्तिरेवेति **केचित्** । तस्याः प्रथमत्वे मानं तु 'मृतसञ्जीवनी'ति समाख्यैव । यद्यपि **हलायुधवृत्तौ** 'केचिदिदं सूत्रं व्यवस्थितविभाषया व्याचक्षते' (१. १०) इत्यादि दृश्यते; तथापि तत्सम्प्रदायमनुलक्ष्यैवोक्तं, न लिखितटीकापुस्तकम् । यतो व्याख्या नाम ग्रन्थस्यार्थबोधिकेव रक्षिकापि भवति । न च हलायुधेन छन्दःशास्त्रस्य मूलं सम्यगुपलब्धम् । दृश्यन्ते हि बहून्यावापोद्वापस्थलान्येतदीयवृत्तौ । यथा-"उक्तम्, अत्युक्तम्, मध्यम्, प्रतिष्ठा, सुप्रतिष्ठेति चतुरुत्तरवृद्ध्या चतुरक्षरादिविंशत्यक्षरान्तं पुरस्ताच्छन्दः पञ्चकं ... एतान्यपि भगवता पिङ्गलनागेन सूत्र्यन्ते-उक्तम् । साति । मध्यम् । प्रतिष्ठा । सुच ।" इति षड्गुरुशिष्य उदाजहार । न चैतत्सूत्रपञ्चकं हलायुधवृत्तौ दृश्यते ॥ 'एकोनेऽध्वा' (८. ३३) इति सूत्रं वैदिकैरधीयमानमपि न व्याख्यातम्, अध्वपरिच्छित्तिश्च षट्प्रत्ययपूरिण्यपि न स्वीकृता ॥ अत्रानुक्तं गाथा' (८. १) इति सूत्रात्परमष्टादशसूत्राणि 'हंसरुतं म्नौ गौ' (६. ७) 'ततं नौ मरौ (६. ६४) इत्यादीनि च सूत्राणि वैदिकपाठविरुद्धानि मात्स्ये चाननूदितान्यपि व्याख्यातानि । न ह्येवं सति प्राचीने व्याख्याने सम्भवति । क्वचित् यथावत्सूत्रार्थानवबोधोऽप्युपरितनमनुमानं द्रढयतीति ।

वयं तु हलायुधेनादृष्टमपि प्राचीनं व्याख्यानं भवितुमर्हति छन्दःशास्त्रस्येति ब्रूमः । न ह्येतावन्तं कालमव्याख्यातं स्थास्यति वेदाङ्गं दुर्बोधतरं चेदं शास्त्रम् । किञ्च 'मयरसतजभनलगसम्मितं' इत्यादिकं यच्छ्लोकपञ्चकं छन्दःशास्त्रादौ दृश्यते, तत्प्राचीनस्यैव व्याख्यानस्य प्रस्तावनारूपं स्यादित्यनुमिमीमहे । न हीदं हलायुधप्रणीतं, न च तेन व्याख्यातम् । ब्रह्मयज्ञे त्वेतत्प्रतीकमेवाधीयते वैदिकैः । विधीयते च **देवीभागवते**-'अथ शिक्षां प्रवक्ष्यामि पञ्चसंवत्सरेति च । मयरसतजभनेत्येव गौग्मौ स्वेव कीर्तयेत् ॥' (११. १०. ९) इति । अतश्छन्दोभाष्यस्य परमप्राचीनस्येदं मङ्गलमिति प्रतीमः ।

सम्प्रति तु अनतिहृदयङ्गमापीयं हलायुधवृत्तिरेवाद्रियते सर्वत्र । हलायुधश्च
शालिवाहनस्य पञ्चदश्यां शताब्द्यामुत्पन्न इति केचिद्वर्णयन्ति ।
हलायुधस्य कालः तथा ह्यस्ति हलायुधेनैव प्रणीतं कविरहस्याभिधं किमपि
काव्यम् । तत्र च स्वोपजीव्यः कृष्णराज उपवर्णितोऽनेन । स
च विजयनगराधीश्वर एव । यतः १४३० शकाब्दे तद्दत्तग्रामप्रशस्तौ 'नमस्तुङ्गशिरः–' इति श्लोक उपलभ्यते । स च छन्दःशास्त्रवृत्तिगत इति ।

तदेतन्न युक्तम्, 'नमस्तुङ्गशिर' इतिश्लोकस्य प्राचीनत्वेन तदुल्लेखस्याकिञ्चित्करत्वात् । तथा च १३१३ शकाब्दे प्रजापतिवत्सरे हरिहररायेण गोवापुरे मन्त्रिपदे नियुक्तनृहरिप्रदत्तदानपत्रेऽपि दृश्यतेऽसौ श्लोकः । उपलभ्यते च ततः प्राचीनतरेण बाणभट्टेन प्रणीते हर्षचरितेऽपि ।

किञ्च कविरहस्ये समुपवर्णितः कृष्णराजो राष्ट्रकूटकुलोद्भवः । 'तोलयत्यतुलं शक्त्या यो भारं भुवनेश्वरः । कस्तं तुलयति स्थाम्ना राष्ट्रकूटकुलोद्भवम् ॥' इति हि तत्रोपवर्ण्यते । न च विजयनगराधीश्वरः कृष्णराजो राष्ट्रकूटकुलोद्भवः इति प्रसिद्धमेवैतिह्यविदाम् ।

राष्ट्रकूटेषु तु त्रयः कृष्णाः प्रसिद्धाः–प्रथमः शुभतुङ्गापरनामकः, द्वितीयः अकालवर्षाख्यः, तृतीयोऽप्यकालवर्षसंज्ञकश्चेति । तत्र तृतीय एव हलायुधस्योपजीव्य इति निश्चिनुमः । यतस्तदनन्तरमधिष्ठितराज्यः खुडिगदेवोऽपि क्वचित् स्मरणविषयतां नीतोऽनेन–'त्वया कृतपरिग्रहे खुडिगवीर ! सिंहासने' (लि. पा. ७. १७) इति, 'यशःशेषीभूते खुडिगनरनाथे गुणनिधौ' (लि. पा. ७. २०) इति च । खुडिगदेवश्च तृतीयस्य कृष्णदेवस्य वैमात्रेयो भ्रातेति दानपत्रलेखादवगम्यते । तथाहि–'ऐन्द्रपदजिगीषयेव स्वर्गमधिरूढे च ज्येष्ठे भ्रातरि श्रीमत्कृष्णराजदेवे युवराजदेवदुहितरि कन्दकदेव्याममोघवर्षनृपाज्जातः खोट्टिगदेवो नृपतिरभूद्भुवनविख्यातः' इति । अयं हि कृष्णराजानन्तरं ८९३ शकाब्दं यावत् महीपतिपदमलंचकार । कृष्णराजश्च शालिवाहनस्य ८६७–८८८ वत्सरपर्यन्तं भुवं शशासेत्युत्कीर्णलेखादिभिर्ज्ञायते । असावेव कृष्णराजः कविरहस्ये नायकतां नीतो हलायुधेन ।

(मार्जिने: कृष्णराजः खुडिगदेवश्च)

तत्पश्चाच्च मालवेशो वाक्पतिराजापराख्यो मुञ्जराज आश्रितोऽनेन । प्रकृता छन्दःशास्त्रटीका च तदाश्रयेणैव प्रणीता । अत एवास्यां (४. १९ । ५. २४ । ५. ३९ । ७. ५ । ८. १२) इत्यत्र मुञ्जः सबहुमानमुपश्लोक्यते । तस्य वाक्पतिराज इत्यपरं नामधेयमपि दृश्यते (४. २०) । उपलभ्यते च नूनं राष्ट्रकूटेभ्य आच्छिन्नं 'वल्लभेश्वर' बिरुद-

(मार्जिने: मुञ्जः)

मपि । मुञ्जश्च ८९३–९१९ शकाब्दं यावन्मालवानलमकार्षीदिति स एव समयो मृतसञ्जीवन्याः प्रणयनस्येति निर्धारयामः ।

न च यदाधारेणैवं निर्णीयते, तान्युदाहरणपद्यान्यन्यदीयानीति शङ्क्यम्, 'सर्वलघुच्छन्दसि गीत्यार्याशब्दस्य प्रवेशयितुमशक्यत्वात्तन्नाम नोक्तम्' (४. ४८) 'उपस्थितप्रचुपितादीनामस्मिन्नावेशयितुं न शक्यन्ते संज्ञा इति नोक्तिः' (५. ३०) इति वृत्तिदर्शनेन वृत्तनामगर्भितानां श्लोकानां हलायुधेनैव निर्मितत्वस्य स्फुटमवगम्यमानत्वात् । न हि परकीयश्लोकानामेवमुपपादनं सम्भवतीति ।

हलायुधस्य देशविषये तु न विशेषतः किमपि गमकमुपलभामहे । केवलं 'इह हि भवति दण्डकारण्यदेशे स्थितिः' 'पद्माम्बिकातीर्थयात्रागतानेकसिद्धाकुले' (७. ३३) इति श्लोकं पश्यन्तो दाक्षिणात्यमेवैनं सम्भावयामः ।

हलायुधस्य देशादिकम् ।

अत्रोपश्लोकितां पद्माम्बिकां चास्य कुलदेवतामुत्प्रेक्षामहे । पिता चास्य मीमांसापारावारपारदृश्वा नाम्ना च नूनं विश्वरूपः ।

तथा ह्येनमुपवर्णयति स्वायम्–'श्रुतिपरिपूतवक्त्रमतिसुन्दरवाग्विभवं तमखिलजैमिनीयमतसागरपारगतम् । अवितथवृत्तविप्रजनपूजितपादयुगं पितरमहं नमामि वहुरूपमुदारमतिम् ॥' (८. १४) इति । अत एव हलायुधस्यापि मीमांसायां बहुमानः । तथा चोक्तम्–'मीसांसारसममृतं पीत्वा शास्त्रोक्तिः कटुरिवरा भाति । एवं संसदि विदुषां मध्ये जल्पामो जयपणवं हत्वा ॥' (६. १०) इति ।

अस्य तु मुख्यं शास्त्रं व्याकरणमिति कविरहस्याज्ज्ञायते । अत्रापि (१. १० । ४. १४) इत्यादिवृत्तिविलोकनेनास्य वैयाकरणत्वं स्फुटीभवति ।

अत्र वृत्तौ माण्डव्यः (पृ. ५०) श्वेतपटः (पृ. ७३) कालिदासः (पृ. ७८) भारविः (पृ. ८०) धरणीधरः (पृ. ८५) कात्यायनः (पृ. १०४) इति ग्रन्थकृतां नामान्युपलभ्यन्ते । तत्र **धरणीधरो**ऽस्य समकालिकः कश्चिदनुबन्धी सुहृद्वा स्यादित्यनुमीयते ।

अभिधानरत्नमालाख्यः कोशोऽप्यनेनैव निर्मित इत्याहुः ।

लक्ष्मणसेनस्य मन्त्री ब्राह्मणसर्वस्व–शिवसर्वस्वादिग्रन्थकर्ता, वृत्तरत्नाकरटीकाकर्तु **रामचन्द्रकवे**र्भ्राता चेत्यादयो हलायुधा अस्माद्भिन्ना एव ।

अस्य शास्त्रस्य महामहिमशालिभिः शालिवाहनस्य सप्तदश्याः शताब्द्याः पूर्वार्धे समुद्भूतैर्भास्कर**राजैः** प्रणीतं **भाष्यम्**, **वार्तिकराज**श्चेति प्रकामं गुणगरिमाभिरामं विद्योतते व्याख्यानद्वयम् । तद्वत्र **सखारामभट्टे**न विरचिता **छोटीवृत्ति**रपि वरीवर्ति । परं कृतप्रयत्ना अपि तन्नालभिष्महि । अन्यच्च व्याख्यानं न नः कर्णपदवीमवतीर्णम् । अतः स्वीयया 'विशल्यकरणी' नाम्न्या टिप्पण्या योजितमेतद् ।

अन्यानि व्याख्यानानि

वैदिकच्छन्दसामुदाहरणानि तु वृत्तिकृता न प्रदर्शितानि । तान्यस्माभिरन्विष्यान्विष्य यथास्थानं निवेशितानि । अत्र वैदिकोदाहरणविषये पूर्वपूर्वेषां संशोधनम् । तत्रसंशोधकैः प्रायो गजनिमीलिकैव स्वीकृता । तथा च षट्पदाजगत्युदाहरणम्–(३. ४९)

'आपो न देवीरुप यन्ति (१) होत्रियमवः पश्यन्ति (२) विततं यथारजः (३) प्राचैर्देवासः प्र णयन्ति (४) देवयुं ब्रह्मप्रियं (५) जोषयन्ते वरा इव (६) ॥'
(ऋ. १. ६.४)

इति दत्तं दृश्यते । वस्तुत इयं चतुष्पदाजगत्येवास्थाने पादकल्पनां विधाय षट्पदत्वं प्रापिता । तत्रापि द्वितीयं षष्ठं चापहाय नाष्टाक्षरत्वं कस्यापि पादस्य सम्भवतीति भक्षितेऽपि लशुने न शान्तो व्याधिः । पुरस्ताज्ज्योतिरुदाहरणम्–(३. ५२)

'अबोध्यग्निर्ज्म उदेति सूर्यो व्युषा (१) श्चन्द्रा मह्यावो अर्चिषा (२)
आयुक्षातामश्विना या (३) तवे रथं प्रासावीद्देवः (४) सविता जगत्पृथक् ॥'
(ऋ. २. २. २७)

इयमपि चतुष्पदैव सती पञ्चपदतां नीता । इदं चात्रात्यन्तमाश्चर्यकरं यत् 'यातवे' इति पदमध्येऽपि पादः कल्पितः । ककुम्नत्युदाहरणम्–(३. ५६)

'उतासो दैववदिति (१) रुरुष्यतां नाम उग्रः (२) । उरुस्यन्तभवतो (३) वृद्धश्रवसः (४) ॥' अत्र प्रदर्शितः पादः पञ्चाक्षरो भवति, न पुनः षडक्षर इति शङ्कुमत्या इदमुदाहरणं भवितुमर्हति, न ककुम्नत्याः । अशुद्धविषये चात्र शुद्धपाठप्रदर्शनमेव पर्याप्तं मन्यामहे तत्त्वविदां चेतश्चमत्काराय—

'उत नो देव्यदितिरुरुष्यतां नासत्या । उरुष्यन्तु मरुतो वृद्धशवसः ॥' (ऋ.६.२.२२)

इदमपरमालोक्यतां भूरिग्जगत्या उदाहरणम्—(३. ५२)

'इयो न विद्वां अयुजिरियं धुरि (१) तं वहानि प्रतरणिमवश्चुवम् (२) । नास्य वेश्मि विसुचनावृतं पुनः (३) विद्वान्पयः पूर एत अजुनेषति (४) ॥'

कियतीं वाशुद्धीनां काष्ठामारोपितेयमृगिति शुद्धपाठावलोकनेन स्वयमेव विभावयन्तु दोषज्ञाः । शुद्धपाठश्चेत्थम्—

'ह्वयो न विद्वाँ अयुजि स्वयं धुरि तां वहामि प्रतरणीमवस्युवम् ।
नास्या वश्मि विमुचं नावृतं पुनर्विद्वान् पथः पुर एत ऋजु नेषति ॥(ऋ.४.२.२८)

स्थालीपुलाकन्यायेनाशुद्धीनां स्वरूपं जानीयुस्तज्ज्ञा इति दिङ्मात्रमेवेदं प्रादर्शि । प्रायः सर्वाण्यप्युदाहरणान्येवमेवाशुद्धतराणि लक्षणविसंवादीनि चासन् । अस्माभिस्तु तान्यपसार्य लक्षणानुगतानि निवेशितानि । मूलं च सूक्ष्मेक्षिकया अस्मदीयः प्रयत्नः निरीक्ष्य संशोधितम् । क्वचिद्व्याख्यया दुर्बोधतापि दूरीकृता । मतान्तराणि च युक्तायुक्तविवेचनपूर्वकं निरूपितानि । शौनककात्यायनाभ्यामुक्तानि सूक्ष्मभेदानां लक्षणानि सङ्गृहीतानि, तेषामुदाहरणानि च

महता यत्नेन दर्शितानि । वृत्तरत्नाकर-छन्दोमञ्जरी-छन्दःकौस्तुभ-मन्दारमरन्द-वृत्तचन्द्रिका-वृत्तमणिकोशादिछन्दोग्रन्थेषु दृष्टानां लक्षणानामपि सङ्ग्रहः कृतः । अयमपरश्च महान् विशेषो यत्सर्वेषामपि वृत्तानां प्रस्तारे सङ्ख्याबोधकं क्रमाङ्कमादौ दत्त्वा वृत्तानि क्रमेणैव संस्थापितानि । तथा सूत्रे स्मृतानामाचार्याणाम्, छन्दःशास्त्रे टिप्पण्यां च लक्षितानां वैदिकच्छन्दसाम्, वृत्तानाम्, छन्दःसूत्राणाम्, उदाहरणश्रुतीनाम्, श्लोकानां च पृथक् सूचयः समायोजिताः । यावद्बुद्धिबलं सर्वात्मना तथा यतितं यथास्मिन्नेकस्मिन्नपि ग्रन्थेऽवलोकिते प्रायः सर्वे छन्दोग्रन्था विलोकिता भवेयुः । एवं महान्तं यत्नमास्थाय कृतेऽपि संशोधनेऽस्माकमल्पमतित्वात्सञ्जातानि स्खलितानि क्षन्तुमर्हन्ति विचक्षणा इति तान् साञ्जलिबन्धमभ्यर्थयामहे ।

अत्र संशोधनकर्मण्यपेक्षितलिखितपुस्तकप्रदानेन साहाय्यं कृतवतां वे. शा. 'घनश्यामविठ्ठलशास्त्री जावडेकर' महोदयानां वे. 'कृष्ण लक्ष्मणभट्ट धूपकर' इत्येतेषां च सदैवोपकारभारं बिभृमः ।

तथास्मानस्मिन् कर्मण्युद्योजितवतां, मुद्रणकालेऽनवधानादिना सञ्जाताशुद्धिबोधनेन मुहुरनुगृह्णतानां सुहृन्मणीनां मुद्रणालयस्थपण्डितानां श्री. नारायण-आचार्यमहोदयानां, श्री. सोमण इत्युपाभिध-कृष्णशर्मणां, श्री. साधले इत्युपाह्वबालकृष्णशास्त्रिणां च नितान्तमधमर्णाः स्मः ।

अन्ततश्च सुदुःसहतममपि कालातिपातं क्षान्तवतामेवंविधानेकग्रन्थरत्नप्रकाशनचणानां गुणगृह्याणां 'निर्णयसागर'मुद्रणालयाध्यक्षाणां श्रेयसे सर्वेश्वरं सम्प्रार्थ्य, इमामत्यल्पां कृतिं भगवतो वेदपुरुषस्य पादयोः पुष्पाञ्जलित्वे कल्पयामः ।

'दोषाः स्युरेव मम, तत्र कृताधिकारं दोषज्ञवृन्दमपनेष्यति तान् समूलम् ।
स्युश्चेद्गुणा अभिमता भवतां न ते तत् व्यर्था खला इह खलूभयथा स्थितिर्वः ॥'

सुधीजनविधेयः—

धूपकरोपाह्वोऽनन्तयज्ञेश्वरशर्मा ।
माशैलम्—गोवा.

छन्दःशास्त्रस्य विषयानुक्रमणी ।

पिङ्गलसूत्रे स्मृता आचार्याः—

आ. ना.	अ. सू.	आ. ना.	अ. सू.
एके	५ । १५	यास्कः	३ । ३०
काश्यपः	७ । ९	रातमाण्डव्यौ	७ । ३५
क्रौष्टुकिः	३ । २९	सैतवः	५ । १८
ताण्डी	३ । ३६	,,	७ । १०

छन्दःशास्त्रे टिप्पण्यां च लक्षितानां वैदिकच्छन्दसां सूची—

छन्दःशास्त्रे टिप्पण्यां च वर्णितवृत्तनामसूची--

छन्दःसूत्राणां वर्णक्रमेणानुक्रमणी ।

छन्दःशास्त्रवृत्तौ टिप्पण्यां चोदाहृतश्रुतिसूची ।

हलायुधवृत्तावुदाहृतवचसामकारादिक्रमेणानुक्रमणी ।

शोधसूचिका ।

अथैतद्ग्रन्थमुद्रणोर्ध्वमुपलब्धजरत्तरमातृकान्तरदृष्टाः केचिदुपादेयाः पाठविशेषाः, शुद्धपाठाश्च सङ्गृह्यन्ते ।

पृ०	पं०	
१	११	…दुद्धृतं देवदानवैः ।
१	१२	…छन्दोरत्नं…
२	६	तस्य यदध्ययनं, तद्वेदाङ्गत्वादनुष्ठेयम् ।
२	७	अर्थायातं त्रिष्टुभादि…
२	८	…ज्ञानाच्छ्रुत्योक्तः प्रत्यवायः । तथा हि श्रूयते–
२	१०	तस्माच्छन्दसः परिज्ञानं
२	११	तत्र लघुनो
२	१२	…कारः–**एतदग्रे** 'मयरस०' **इत्यादि दृश्यते लि०**
५	२	दृश्यते । सत्यम्,
५	५	…दचोद्य
५	८	लघुत्वं चेति । तदनु…
५	११	यैस्तु… । उत्सर्गस्यापवादेन
५	१२	लघुत्वं च… । कस्येच्छा ?
५	१५	त्वाहुः–पदान्ते
५	१६	येनोक्तम्
५	२२	वर्णस्य 'वचन' 'घण्टा' 'झम्पा'
६	२२	विवादः
६	२३	सा धीस्ते त्वयोपदिष्टा
७	१	तत्रोत्तरं गुरुराह
७	१४	प्रथमपङ्क्तौ प्रथमकोष्ठे
७	१९	लघूनि च
८	२	द्वादशा…क्रियते ।–**इति नेष्टम् ।**
८	७	क्रियाभ्यावृत्तिः ।
९	५	विशेषणम् । एवं
९	२२	विन्यसेत् । अङ्कानामुपरि
१०	११	आर्ची–'गोष्ठं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहꣳसं मार्ज्मि' (तै. सं. १।१।१०।३)
११	६	आदिशब्देन
१२	१	यथा–
१२	४	…द्यक्षरो भवति ।
१८	८	गायत्रेणैकेन पादेन
२४	६	द्वितीयचतुर्थौ च
२४	१५	इत्यनेनैव गतार्थमिदं
२५	१०	ग्रहणमनुकृष्यते
२६	१०	**एतदग्रे** 'इति पङ्क्त्यधिकारः' **इति, तदनुरोधेनोत्तरसूत्रवृत्तौ च** 'जगतीनामच्छन्द' **इति**
२७	४	संबन्धः । प्राग् 'जगती षड्भिः' (३।४९) इति निर्देशात् । तेनाधिकृते त्रिष्टुब्जगत्यौ सह भवतः, सह प्रवृत्त्यर्थम् । अत्र शौनककात्यायनादिभ्यः प्रकारान्तरेण व्याख्यातत्वात् पञ्चसूत्र्या उदाहरणान्यन्वेषणीयानि ।
२८	१८	**इदं व्याख्यानमेवेतः प्रभृति मूले । अग्रे च–"एकेन त्रिष्टुप् ज्योतिष्मती" (३।५०) इत्यत आरभ्य 'ऊनाधिकेन–' (३।५९) इत्यन्तं पुनः प्रकारान्तरादिसंवादार्थमत्रेत्थं लिख्यते–" इत्य-**

पृ० पं०

वतार्यात्रोपरि मुद्रितं व्याख्यान्तरं लिखितं दृश्यते ।

३४ २ ह्यनन्तरमेव सम्प्र…

४० २ निर्णयनिमित्तभूता

४५ २४ कीर्तिहेतु…

४६ २१ प्रत्येकमभि…

४७ १२ द्रमार्धेन

४९ १९ विधीयते । षष्ठा गण एकमात्रो भवति । एवं च तादृशेऽन्त्येऽर्धे सप्तविंशतिमात्रा भवन्तीत्यर्थः ।

५१ ७ स्युः ॥' तद्यथा—१ पथ्या. २ पथ्या मुखचपला. ३ पथ्या जघनचपला. ४ पथ्या महाचपला. ५ पथ्या गीतिः ६ पथ्योपगीतिः ७ पथ्योद्गीतिः ८ पथ्यार्यागीतिः ९ पथ्या मुखचपला गीतिः १० पथ्या मुखचपलोपगीतिः ११ पथ्या मुखचपलोद्गीतिः १२ पथ्या मुखचपलार्यागीतिः १३ पथ्या जघनचपलागीतिः १४ पथ्या जघनचपलोपगीतिः १५ पथ्या जघनचपलोद्गीतिः १६ पथ्या जघनचपलार्यागीतिः १७ पथ्या महाचपलागीतिः १८ पथ्या महाचपलोपगीतिः १९ पथ्या महाचपलोद्गीतिः २० पथ्या महाचपलार्यागीतिः २१ आदिविपुला २२ आदिविपुला मुखचपला २३ आदिविपुला जघनचपला २४ आदिविपुला महाचपला २५ आदिविपुलागीतिः २६ आदिविपुलोपगीतिः २७ आदिविपुलोद्गीतिः २८ आदिविपुलार्यागीतिः

पृ० पं०

२९ आदिविपुला मुखचपला गीतिः ३० आदिविपुला मुखचपलोपगीतिः ३१ आदिविपुला मुखचपलोद्गीतिः ३२ आदिविपुला मुखचपलार्यागीतिः ३३ आदिविपुला जघनचपला गीतिः ३४ आदिविपुला जघनचपलोपगीतिः ३५ आदिविपुला जघनचपलोद्गीतिः ३६ आदिविपुला जघनचपलार्यागीतिः ३७ आदिविपुला महाचपलागीतिः ३८ आदिविपुला महाचपलोपगीतिः ३९ आदिविपुला महाचपलोद्गीतिः ४० आदिविपुला महाचपलार्यागीतिः ४१ अन्त्यविपुला ४२ अन्त्यविपुला मुखचपला ४३ अन्त्यविपुला जघनचपला ४४ अन्त्यविपुला महाचपला ४५ अन्त्यविपुला गीतिः ४६ अन्त्यविपुलोपगीतिः ४७ अन्त्यविपुलोद्गीतिः ४८ अन्त्यविपुलार्यागीतिः ४९ अन्त्यविपुला मुखचपलागीतिः ५० अन्त्यविपुला मुखचपलोपगीतिः ५१ अन्त्यविपुला मुखचपलोद्गीतिः ५२ अन्त्यविपुला मुखचपलार्यागीतिः ५३ अन्त्यविपुला जघनचपला गीतिः ५४ अन्त्यविपुला जघनचपलोपगीतिः ५५ अन्त्यविपुला जघनचपलोद्गीतिः ५६ अन्त्यविपुला जघनचपलार्यागीतिः ५७ अन्त्यविपुला महाचपला गीतिः ५८ अन्त्यविपुला महाचपलोप-

पृ० पं०

गीतिः ५९ अन्त्यविपुला महाचपलोद्गीतिः ६० अन्त्यविपुला महाचपलार्यागीतिः ६१ उभयविपुला ६२ उभयविपुला मुखचपला ६३ उभयविपुला जघनचपला ६४ उभयविपुला महाचपला ६५ उभयविपुला गीतिः ६६ उभयविपुलोपगीतिः ६७ उभयविपुलोद्गीतिः ६८ उभयविपुलार्यागीतिः ६९ उभयविपुला मुखचपला गीतिः ७० उभयविपुला मुखचपलोपगीतिः ७१ उभयविपुला मुखचपलोद्गीतिः ७२ उभयविपुला मुखचपलार्यागीतिः ७३ उभयविपुला जघनचपलार्यागीतिः ७४ उभयविपुला जघनचपलोपगीतिः ७५ उभयविपुला जघनचपलोद्गीतिः ७६ उभयविपुला जघनचपलार्या गीतिः ७७ उभयविपुला महाचपलागीतिः ७८ उभयविपुला महाचपलोपगीतिः ७९ उभयविपुला महाचपलोद्गीतिः ८० उभयविपुला महाचपलार्यागीतिः ।

५२ ३ ···श्रान्तगुरुर्द्विगुरुर्वा ।
५२ ४ पञ्चमश्चादिगुरुर्द्विगुरुर्वा ।
५३ १३ उभयविपुलापूर्वकं
५४ १० मध्यमपदलोपी
५४ १४ वधूनामधुना कुसु···
५५ ३ निरर्गलालाप
५५ १६ ···भिलाषं करोति
५६ ४ बध्यते
५६ ११ तवायशोद्गीति···
५७ ६ षष्ठगणाद्विकल्प
६१ ७ नवकिसलय···
६२ ५ श्रुतिकष्टं यतिदुष्टम···

पृ० पं०

६३ २ कटाक्षललितेन कामिनां
६३ ४ तद् युग्लक्षणम् ?
६३ ७ मिश्राणां प्रयोगप्रति···
६४ ४ निर्मूलहनुः
६४ ७ इति विशेषः
६५ १ एवावतिष्ठते
६५ १७ कृतपञ्चमगीते
६६ ५ कायः क्षायति
६७ ६ ···परिसरशिवसरसि महति रति···
६८ ११ ···ळकार एव, तदा
६९ २ अन्ते च गुरु···
६९ ४ रुचिरशशमृति हत···
६९ ६ पथिक! हतकरुण! कथमिह
६९ ११ कुवलयवने
७० २ ···राणि यया सङ्ख्यया न पू···
७१ १३ 'अर्धसमम्' । सर्वावयवेभ्योऽर्धाऽभ्यां
७९ ९ ···वल्लभा। स्त्रियश्चतुःषष्टिगुणा भवन्ति, तेषु निपुणा
८० ११ चकाराकृष्टमकार···
८० १४ चन्द्ररेखाशिखामणिम् ।
८२ १४ तनुः कुटिलै···
८८ १४ रामा कामखल्लरिका
८८ २५ २ खल्लरिका=अभ्यासभूमिः । 'खुरली तु श्रमो योग्याभ्यासस्तद्भूः खल्लरिका ।' इत्यभिधानचिन्तामणिः (३।४५२)
८९ ६ च भवतः, अन्ये त्रय उपस्थितवत्, तदा
९३ २ भद्रं भद्रविराट्
९३ ६ भकाररेफ···
९७ १५ अत्र गकारलकारयोगेन नियमाभावात् सम्प्र···
९९ १ मनसिजशरततौ
९९ १० प्रावेकसदसनकुसुम

पृ०	पं०	
१००	८	त्यनादिराचार्य···
१०१	२३	···चिरगिरामाननानां
१०१	२४	पृषत्कः ।
१०१	२६	तु पदमध्ये यतिर्दुष्यति ।
१०२	८	स्याहि तत्सूनुरासीत् (?)
१०२	१४	···शुभ्रासु दूर्वा–
१०२	२७	न खल्विति ।
१०३	२	रूढारूढ··· परिष्टब्धमाशासखीभिः ।
१०३	४	···दिहोच्यते ॥ **एतस्या अग्रिमायाश्च पङ्क्तेर्मध्ये विभागरेखावधेया ।**
१०९	४	श्रीमदनन्तपदाब्जे दत्तमनाः सततं यः ।
११०	६	अभ्यागामि शिलक्ष्मी मञ्जीरक्वणित तुल्यम् । तीरे राजति नदीनां रम्यं हंसरुतमेतत् ॥
११२	३	अभ्यस्यता तु तरुणी···
११२	४	फणिशिशो ! भवता···
११४	८	जयपणवं हत्वा ॥
११५	१२	कृतसुकृतानां
११८	४	या जीवेव सद्यः (?)
१३१	१	**इयं पङ्क्तिर्मार्जनीया**
१३४	१२	वायुरुपेतः

पृ०	पं०	
१३४	१३	घ्राणवृत्ति···
१४६	४	···कलशद्वयानताङ्गी
१४७	४	कृतरुचिराम्बरक्रियः
१५८	२१	खुडिगवीर···
१६०	१४	खुडिगनरनाथे
१६१	२५	**इयं पङ्क्तिः, द्वितीयायां 'वृ०र०' इत्यन्तं च नेष्टम् ।**
१६६	१	सीमासीमन्तिनीनां
१७१	७	···गतिभावा
१८२	१	यत्सेवितं
१८४	९	···कुहकित···
१८४	१५	केचित् पादान्त
१८९	५	धृतश्रीर्नूजौ···त्रिःस्वराः ।
१८९	११	धृतश्रिय
१९०	१४	ततो मध्यलेखा···
१९५	७	तस्याधस्तात्त्रयं···च्चतुष्टयमेवं याव···
१९५	९	···रेकैकमङ्कं दद्यात् । द्वितीयमेकलघुकोष्ठं, तृतीयं द्विलघुकोष्ठं, चतुर्थं त्रिलघुकोष्ठं, पञ्चमं चतुर्लघुकोष्ठम् । एवमग्रेऽपि सर्वत्र ज्ञेयम् । ततस्तृतीयायां पङ्क्तौ पर्यन्तकोष्ठयोः परगतकोष्ठ एकैकमेकं दद्यात् ।

॥ श्रीः ॥

श्रीमत्पिङ्गलाचार्यविरचितं

छन्दःशास्त्रम्।

श्रीमद्भट्टहलायुधप्रणीतमृतसंजीविन्याख्यवृत्तिसमेतम्।

प्रथमोऽध्यायः।

नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शंभवे॥
वेदानां प्रथमाङ्गस्य कवीनां नयनस्य च।
पिङ्गलाचार्यसूत्रस्य मया वृत्तिर्विधास्यते॥
क्षीराब्धेरमृतं यद्वदुद्धृतं देवैः सदानवैः।
छन्दोऽब्धेः पिङ्गलाचार्यैश्छन्दोऽमृतं तथोद्धृतम्॥
श्रीमत्पिङ्गलनागोक्तछन्दःशास्त्रमहोदधौ।
वृत्तानि मौक्तिकानीव कानिचिद्विचिनोम्यहम्॥

म-य-र-स-त-ज-भ-न-ल-ग-संमितं भ्रमति वाङ्मयं जगति यस्य।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः॥
त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकाराख्यम्।
लघुमध्यमं तु रेफं सकारमन्ते गुरुनिबद्धम्॥
लघ्वन्त्यं हि तकारं जकारमुभयोर्लघु विजानीयात्।
आदिगुरुं च भकारं नकारमिह पैङ्गले त्रिलघुम्॥
दीर्घं संयोगपरं तथा प्लुतं व्यञ्जनान्तमूष्मान्तम्[1]।
सानुस्वारं च गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम्॥

---

१. व्यञ्जनान्तोपादानेनोष्मान्तस्यापि लाभात्पुनरूष्मान्तकथनेन विसर्जनीयजिह्वामूलीयोपध्मानीयानां ग्रहणम्। यथाह पाणिनीयशिक्षायाम्—'ओभावश्च विवृत्तिश्च शषसा रेफ एव च। जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥' (३।४) इत्यत ऊष्मशब्दो विसर्जनीयादेरुपलक्षको बोद्धव्यः।

आदिमध्यावसानेषु य-र-ता यान्ति लाघवम् ।
भ-ज-सा गौरवं यान्ति म-नौ तु गुरुलाघवम् ॥
त्रिविरामं दशवर्णं षण्मात्रमुवाच **पिङ्गलः** सूत्रम् ।
छंन्दोवर्गपदार्थप्रत्ययहेतोश्च शास्त्रादौ ॥

इह हि त्रैवर्णिकानां साङ्गवेदाध्ययनमाम्नायते । अर्थावबोधपर्यन्तश्चाध्ययनविधिः । वेदाङ्गं च छन्दः । ततस्तदध्ययनविधित्वात्तदनुष्ठेयम् । अथ 'त्रिष्टुभा यजति, बृहत्या गायति, गायत्र्या स्तौति' इत्येवमादिश्रवणात् अर्थायातमनुष्टुभादिज्ञानम् । किं च छन्दसामपरिज्ञानात्प्रत्युत प्रत्यवायः श्रूयते । यथा—'यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते वा म्रियते पापीयान् भवति । यातयामान्यस्य छन्दांसि भवन्ति ।' (छं. ब्रा. ३।७।५) तस्माच्छन्दोज्ञानं कर्तव्यं, तदर्थमिदं शास्त्रमारभ्यते । तथा लघुनोपायेन शास्त्रावबोधसिद्ध्यर्थं संज्ञाः परिभाषते सूत्रकारः—

धीश्रीस्त्री म् । १ । १ ॥

---

१. छन्दःकौस्तुभे तु—

'मयरसतजभनसंज्ञाश्छन्दस्यष्टौ गणास्त्रिवर्णाः स्युः ।
भूम्यम्बुवह्निवायुव्योमार्कसुधांशुनाकदेवास्ते ॥
('महीजलानलान्तकाः स्वरर्यमेन्दुपन्नगाः ।
फणीश्वरेण कीर्तिता गणाष्टकेऽष्टदेवताः ॥' (१।२४)

इति **वाणीभूषणो**क्तेरत्र 'नागदेवा' इति पाठो युक्तः । 'नो नाकश्च सुखप्रद' इति तु समविप्रतिपन्नत्वान्न निर्णायकम् ।)

क्रमतः श्रीवृद्धिमृतिप्रयाणरिक्तत्वरुग्यशोमोदान् ।
यच्छन्ति फलानि गणा माद्यास्तेऽष्टौ प्रयोक्तृभ्यः ॥

(**चम्पूरामायणटीकायां** तु-(१।१) 'तो द्यौरन्त्यलघुः शुभ' इत्युक्तम् तन्मूलं न विद्मः ।)

सर्वगुरुर्मः कथितो भजसा गुर्वादिमध्यान्ताः ।
छन्दसि नः सर्वलघुर्यरता लघ्वादिमध्यान्ताः ॥
(यदा दैववशादाद्यो गणो दुष्टफलो भवेत् ।
तदा तद्दोषशान्त्यर्थं शोध्यः स्यादपरो गणः ॥ वृ. प्र. को. २।४)

तद्यथा—

मनौ सखायौ कथितौ भयौ भृत्यावुदीरितौ ।
उदासीनौ तजौ प्रोक्तौ सरौ शत्रू मताविह ॥
सिद्धिर्भवेत्सखिभ्यां सखिभृत्याभ्यां जयः स्थिरत्वं च ।
स्याद्धत्यमित्रभृत्यैः शुभं स्वपीडा तु मित्रशत्रुभ्याम् ॥

धीश्रीस्त्री इत्यनेन गुरुत्रयं संज्ञित्वेनोपलक्षयति, मकारश्च संज्ञात्वेन । ततश्चायमर्थः– सर्वगुरोस्त्रिकस्य (ऽऽऽ) 'म' इति संज्ञा परिभाष्यते । ध्यादीनामुपादानप्रयोजनमुपरिष्टाद्वक्ष्यामः । मप्रदेशाः 'विद्युन्माला मौ गौ' (पि०सू० ६।६) इत्येवमादयः ॥

वरा सा य् । १ । २ ॥

वरासा इत्यनेनादिलघोस्त्रिकस्य (।ऽऽ) 'य' इति संज्ञा परिभाष्यते । यप्रदेशाः 'भुजङ्गप्रयातं यः' (पि० सू० ६।३६) इत्येवमादयः ॥

का गुहा र् । १ । ३ ॥

कागुहा इत्यनेन मध्यलघोस्त्रिकस्य (ऽ।ऽ) 'र' इति संज्ञा परिभाष्यते । रप्रदेशाः 'स्रग्विणी रः' (पि० सू० ६।३७) इत्येवमादयः ॥

वसुधा स् । १ । ४ ॥

वसुधा इत्यनेनान्त्यगुरोस्त्रिकस्य (।।ऽ) 'स' इति संज्ञा परिभाष्यते । सप्रदेशाः 'तोटकं सः' (पि० सू० ६।३१) इत्येवमादयः ॥

अफलमुदासीनाभ्यां शत्रुसखिभ्यां च तद्भवति ।
शत्रुभ्यां तु विरोधो नायकनाशश्च संप्रोक्तः ॥
शत्रूदासीनाभ्यां हानिरुदासीनभृत्याभ्याम् ।
अस्वायत्तिर्गदिता, श्रीनाशः शत्रुभृत्याभ्याम् ॥
क्षयवैरिभयप्राप्तिर्भवत्युदासीनशत्रुभ्याम् ।
मित्रोदासीनाभ्यामश्रीरिति गणफलान्याहुः ॥'

हजधा हितजीवनधनहरा नृपक्रोधकृद्रेफः
तनुपीडारुग्व्रणदा घनखा भ इहातिदूरगतिदायी ॥

गणा दुष्टफला राद्या दग्धवर्णाश्च हादयः ।
शुभश्लोकमुखेनैते प्रयोक्तव्याः शुभार्थिभिः ॥

अत्रापवाद उक्त **उमापतिना**—

'गणफलं हि कलाविषयेष्वलं विभुतया तदुपायितया तया ।
वदति कश्चिदितीह न वर्णगे न मृत पुंसि न पुंसि च केचन ॥
गणफलं न हि काव्यसमूहगे वदति कश्चिदथो सुरवाचके ।
शिवपरे न परत्र विचारणा लिपिगणेषु फलाफलयोस्ततः ॥' इति

अन्यत्रापि—

'देवतावाचकाः शब्दा य च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि च ॥' इति.

सा ते क त् । १ । ५ ॥

सातेक इत्यनेनान्त्यलघोस्त्रिकस्य (ऽऽ।) 'त' इति संज्ञात्वेनोपादीयते । तप्रदेशा 'तनुमध्या त्यौ' (पिं० सू० ६।२) इत्येवमादयः ॥

कदा स ज् । १ । ६ ॥

कदास इत्यनेन मध्यगुरोस्त्रिकस्य (।ऽ।) 'ज' इति संज्ञा परिभाष्यते । जप्रदेशा 'कुमारललिता ज्सौ ग्' (पिं० सू० ६।३) इत्येवमादयः ॥

किं वद भ् । १ । ७ ॥

किंवद इत्यनेनादिगुरोस्त्रिकस्य (ऽ॥) 'भ' इति संज्ञा ज्ञाप्यते । भप्रदेशाः 'चित्रपदा भौ गौ' (पिं० सू० ६।५) इत्येवमादयः ॥

न हस न् । १ । ८ ॥

नहस इत्यनेन सर्वलघोस्त्रिकस्य (॥।) 'न' इति संज्ञोपदिश्यते । नप्रदेशाः 'दण्डको नौ रः' (पिं० सू० ७।३१) इत्येवमादयः ॥

गृ ल् । १ । ९ ॥

गृ इत्यनेनोपलक्षितस्य ह्रस्वस्य (।) 'ल' इति संज्ञा परिभाष्यते । लशब्दश्च लघु-वाचकः । तेन ह्रस्वमक्षरं लघुसंज्ञं भवतीत्येवमर्थः प्रपद्यते । लप्रदेशाः 'लः समुद्रा गणः' (पिं० सू० ४।१२) इत्येवमादयः ॥

गन्ते । १ । १० ॥

गृग्रहणमनुवर्तते । गृशब्दोपलक्षितस्य ह्रस्वाक्षरस्य पदान्ते वर्तमानस्य गुरुसंज्ञातिदि-श्यते । 'ग' इति प्रथमाक्षरप्रतीकेन गुरुशब्दस्य ग्रहणम् ॥

---

१. 'गुर्गश्च गुरुरेकः स्याल्लस्त्वेको लघुरुच्यते ।
रेखाभ्यामृजुवक्राभ्यां ज्ञेयौ लघुगुरू क्रमात् ॥
अनुस्वारी विसर्गी च दीर्घो युक्तपरस्तथा ।
वर्णो गुरुर्मतो हेप्रे पादान्ते चापि वा लघुः ॥' इति छन्दःकौस्तुभे ।
'यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न च्छन्दोभङ्गमप्याहुस्तदा दोषाय सूरयः ॥' इति **छन्दःप्रकाशे ।**

अत्र **वृत्तप्रत्ययकौमुद्यां** विशेषः—

'अथ विभाषितगश्चरणान्तिमो 'ह' 'प्र' परो 'ब्र' परोऽपि न केचन ।
विषमपादसमाप्त्यविभाषितं मतमिदं न मनीषिमतं क्वचित् ।
प्रथम एव यदि व्यवलोकितो गुरुरसौ बहुशो हि विभाषितः ।
अथ पदादियुतः क्रमनामको यदि पुरो लघुताकर ऊनगं
क्वचिदिति प्रवदन्ति हि कोविदा गतमदा मतिदाः प्रमुदाः सदा ॥'

ननु 'ग्लिति समानी' (पि० सू० ५।७) इत्यादीनां पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वं न दृश्यते। नैष दोषः। सर्वत्र पादान्ते वर्तमानस्य ह्रस्वस्य गुरुत्वमुत्सर्गसिद्धम्। तच्च लकारश्रुत्यापवादेन बाध्यते। यथा—'ग्लिति समानी' (पि० सू० ५।७) 'गील्यार्या लः' (पि० सू० ४।४७) इत्यादौ। सामान्येन विशेषस्य बाधः कस्य न संमतः? तस्मात्कुचोद्यमेतत् ॥

केचिदिदं सूत्रं व्यवस्थितविभाषया व्याचक्षते। 'ग्लिति प्रमाणी' (पि० सू० ५।८) इत्यादीनामन्ते गुरुत्वमेव, 'समानी' (पि० सू० ५।७) इत्यादीनामन्ते लघुत्वमेव। तस्मादियं व्यवस्था प्रमाणम्। शेषाणामिच्छया गुरुत्वं लघुत्वं चेत्यनुपपन्नम्, विकल्पस्याप्रस्तुतत्वात्कस्य व्यवस्थेति न विद्मः ॥

ननु केनाप्युक्तम् 'वा पदान्ते त्वकः' (वृ. र. १।९) इति गुरुत्वम्। सत्यमुक्तम्, गुरुक्तं हि तत्। 'वान्ते त्वक इति प्रोक्तं यैश्च श्वेतपटादिभिः। तदुत्सर्गापवादेन बाधस्तैर्नावधारितः ॥' इच्छया गुरुत्वं लघुत्वं नोपपद्यते। कस्येच्छया? किं शास्त्रकारस्य? कवेर्वा?। न तावदाद्यः पक्षः, सूत्रेष्वदर्शनात्। नापि द्वितीयः, कवेरपीच्छायां व्यवस्थाभावात्। को जानाति कस्य कीदृशीच्छेति ॥

अन्ये त्वाहुः—ननु पदान्ते वर्तमानस्य ह्रस्वस्य पाणिनिना गुरुसंज्ञा न कृता। तेनोक्तम् 'संयोगे गुरु' (पा० सू० १।४।११), 'दीर्घं च' (पा० सू० १।४।१२) इति। नायं संयोगादिर्न च दीर्घः। तस्मात् 'गन्ते' इति सूत्रमयुक्तम् ॥

अत्रोच्यते—पाणिनिना स्वशास्त्रप्रयोजनार्थं गुरुसंज्ञा कृता। 'गुरोश्च हलः' (पा० सू० ३।३।१०३) इत्यकारप्रत्ययो यथा स्यात्—कुण्डा, हुण्डा; (इत्यादीनाम्। तथा—) ईहाञ्चक्रे, ऊहाञ्चक्रे, इत्येवमादीनाम् 'इजादेश्च गुरुमतोऽनृच्छः' (पा० सू० ३।१।३६) इत्याम्प्रत्ययश्च। पदान्ते वर्तमानस्य लघोर्गुरुत्वातिदेशे पाणिनेः प्रयोजनमेव नास्ति। किंचानुस्वारादिपूर्वस्य वर्णस्य 'बलं' 'संपदि'त्यादौ स्थितस्य गुरुसंज्ञा पाणिनिना न कृता, किमेतावतान्यैरपि न कर्तव्या?। तस्मात्सूक्तमिदम् 'गन्ते' इति। गप्रदेशाः 'गावन्त आपीडः' (पि० सू० ५।२२) इत्येवमादयः ॥

ध्रादिपरः । १ । ११ ॥

ध्र इति व्यञ्जनसंयोगस्योपलक्षणार्थमेतत्। ध्र आदिर्येषां ते ध्रादयः। आदिशब्देन

यदि हि युक्तपरः श्रममन्तरा लघुरपि प्रभवेच्चरणान्तरा।
अणु वदन्ति न वृत्तविदूषणं तमथ भूषणमेव मनीषिणः ॥' (२।१४–१७)

इति। अत एव 'ग्राहनाभिह्रदमज्जनमासु' (१०।६०) इति माघप्रयोगे ह्रदशब्दस्थानीय नदशब्दः पठनीय इति दुर्घटवृत्तिकारः। वस्तुतस्तु छन्दोविदां परिभाषया संयुक्तपाठेऽपि तत्र न गुरुत्वम् ॥ इति 'संयोगे गुरु' (१।४।११) सूत्रे सिद्धान्तकौमुदीविलासः।

१. श्वेतपटादिभिर्जैनविशेषैरित्यर्थः.   २. कुण्डाकं गुरुप्रयत्नोच्चार्योपलक्षणार्थम्।

विसर्जनीयानुस्वारजिह्वामूलीयोपध्मानीयानां ग्रहणम् । ध्रादयः परे यस्मात्स ध्रादिपरः । ततश्चायं सूत्रार्थः—व्यञ्जनसंयोगात्पूर्वस्य ह्रस्वस्यानुस्वारविसर्जनीयजिह्वामूलीयोपध्मानीयेभ्यश्च पूर्वस्य गुरुसंज्ञातिदिश्यते ॥

[1]हे । १ । १२ ॥

ग इत्यनुवर्तते । हे इति द्विमात्रोपलक्षणार्थम् । ततश्चायं सूत्रार्थः—द्विमात्रिकस्य दीर्घस्य 'ग' इति संज्ञा क्रियते ॥

लौ सः । १ । १३ ॥

स इति गकारस्य परामर्शः । स गकारो द्विमात्राः—गणनायां द्वौ लकारौ कृत्वा गणयितव्यः ॥

ग्लौ । १ । १४ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यत्र विशेषान्तरं न श्रूयते तत्र 'ग्लौ' इत्युपतिष्ठते, 'गायत्र्या वसवः' (पि० सू० ३।३) इत्येवमादिवत् । प्लुतेनेह व्यवहारो नास्ति ॥

अष्टौ वसव इति । १ । १५ ॥

अत्र शास्त्रे वसव इत्युच्यमानेऽष्टसंख्योपलक्षिता गुरुलघुस्वरूपा वर्णा गृह्यन्ते । [2]लौकिकप्रसिद्ध्युपलक्षणार्थमिदं सूत्रम् । तेन चत्वारो समुद्राः, पञ्चानामिन्द्रियाणि, इत्येवमादयः संज्ञाविशेषा लौकिकेभ्यः प्रत्येतव्याः । इतिकारोऽध्यायसमाप्तिसूचकः ॥

इह ध्यादीनामुपादानप्रयोजनं वर्ण्यते—अध्ययनाद्धीर्भवति । यस्य धीस्तस्य श्रीः, बुद्धिपूर्वकत्वाद्विभूतेः । यस्य श्रीस्तस्य स्त्री, अर्थमूलकत्वाद्गार्हस्थ्यस्य । 'वरा सा' इत्यनेन सर्वेषां स्त्रीसाधनोपायानां बुद्धेरुपायस्य माहात्म्यं दर्शयति । तथा चोक्तम्–'अर्धाङ्गुलपरीणाहजिह्वाग्रायासभीरवः । सर्वाङ्गीणपरिक्लेशमबुधाः कर्म कुर्वते ॥' तत्राह शिष्यः–'का गुहा'? गुहाशब्दः स्थानवाचकः । का गुहा यत्रासौ तिष्ठति? । उपाध्यायो ब्रूते—'वसुधा' । पृथिव्यां लभ्यते धीर्नात्र विषादः कर्तव्यः । पुनरप्याह शिष्यः—'सा ते क्व? सा धीस्त्वयोपदिष्टा पृथिव्यां क्वाश्रयस्थितेन लभ्यते? । तत्र पुनराचार्य आह—'गृहे' । पुनरप्याह शिष्यः—'कदा सः' स गृहस्थः पुरुषः कदा कस्मिन्काले तां धियं प्राप्नोति? ।

---

१. 'ए ओ क्वचित्प्राकृतके लघूक्त' (१।६) इति **वाणीभूषणे** । २. सङ्ख्येयपरैः पदैर्लोकव्यवहारात्सङ्ख्या लक्ष्यते । 'वसवोऽष्टौ च चत्वारो वेदा इत्यादि लोकतः ।' (३२८।३) इत्य**ग्निपुराणे** । तथा च–'समुद्र' (६।१९ इत्यादौ) पदेन 'वेद' (८।१०) पदेन चात्र चतुःसङ्ख्योपलक्ष्यते । एवं 'इन्द्रियाणि' (६।४१ इ०) 'भूतानि' (७।३० इ०) 'कामशराः' (६।४२) इत्येतैः पञ्च । 'ऋतवः' (३।८।३०) 'रसाः' (६।३३ इ०) इति षट् । 'ऋषयः' (३।९ इ०) 'स्वराः' (७।६ इ०) इति सप्त । 'वसवः' (३।३ इ०) इत्यष्टौ । 'दिशः' (३।५ इ०) इति दश । 'रुद्राः' (३।६इ०) इत्येकादश । 'आदित्याः' (३।४ इ०) 'मासाः' (७।२९) इति द्वादशेति ज्ञेयम् ।

ततोऽनन्तरं गुरुराह—'धादिपरः' धारणार्थावबोधपरोऽसौ यदा स्यात्तदा धियं लभते । भूयोऽपि शिष्यः पृच्छति—'किं वद' किं कुर्वन्नसौ तां धियं लभते ? तद्वद । तत्राह गुरुः—'न हसन्' हासादिचापल्यमकुर्वाणस्तां धियं लभत इति ॥

इति भट्टहलायुधकृतायां छन्दोवृत्तौ प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

छन्दः । २ । १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । इत ऊर्ध्वं यद्वक्ष्यामस्छन्दस्तत्रोपतिष्ठते । छन्दः-शब्देनाक्षरसंख्यावच्छेदोऽत्राभिधीयते ॥

गायत्री । २ । २ ॥

अधिकारोऽयमाद्वादशसूत्रपरिसमाप्तेः । 'तान्युष्णिग्-' (पि० सू० ३।१४) इत्यादि-सूत्रात्प्राग्यदुच्यते छन्दः, तद्गायत्रीसंज्ञं वेदितव्यम् ॥

दैव्येकम् । २ । ३ ॥

एकाक्षरं छन्दो दैवी गायत्रीति संज्ञायते । तत्रायं प्रदर्शनोपायः—चतुरङ्गक्रीडाया-मिव चतुःषष्टिकोष्ठान्[1] लिखित्वा तत्र प्रथमपङ्क्तौ आर्षीनाम लिखित्वा द्वितीयादिकोष्ठेष्व-ङ्कानामुपरि गायत्र्यादिसप्तच्छन्दसां नामानि विन्यसेत् । ततो द्वितीयायां पङ्क्तौ प्रथम-कोष्ठे दैवीशब्दं विन्यसेत्, संज्ञाज्ञापनार्थम् । द्वितीये एक (१) संख्याङ्कं विन्यसेत् ॥

आसुरी पञ्चदश । २ । ४ ॥

आसुरी गायत्री पञ्चदशाक्षरा । तानि चाक्षराणि 'ग्लौ' (पि० सू० १।१४) इत्यधि-काराद्गुरूणि लघूनि वा यथासंभवं द्रष्टव्यानि । अत्र तृतीयायां पङ्क्तौ प्रथमे कोष्ठे आसुरी-शब्दं लिखित्वा द्वितीये कोष्ठे पञ्चदश (१५) संख्याङ्कं लिखेत् ॥

प्राजापत्याष्टौ । २ । ५ ॥

प्राजापत्या गायत्र्यष्टाक्षरा भवति । यत्र क्वचिद्वेदेऽष्टाक्षरं छन्दस्तत्प्राजापत्या गाय-त्रीति ज्ञेयम् । चतुर्थ्यामत्र पङ्क्तौ प्रथमे कोष्ठे प्राजापत्याशब्दं लिखित्वा द्वितीयेऽष्ट (८)-संख्याङ्कं लिखेत् ॥

यजुषां षट् । २ । ६ ॥

यजुषां गायत्री षडक्षरा भवति । यत्र क्वचिद्वेदे षडक्षरं छन्दस्तद्याजुषी गायत्री संज्ञायते । अत्र पञ्चम्यां पङ्क्तौ प्रथमे कोष्ठे याजुषीशब्दं व्यवस्थाप्य द्वितीये षट् (६)-संख्याङ्कं लिखेत् ॥

१: 'चतुःषष्टिपदे लिखेत् ।' (अ० पु० ३१९।५)

साम्नां द्विः । २ । ७ ॥

षडित्यनुवर्तते । द्विरिति क्रियाभ्यावृत्तिदर्शनात्करोतिरध्याह्रियते; द्वादशाक्षरत्वम्भ्यावृत्त्या क्रियते । तेन द्विः कृता द्विगुणिता षट्संख्या साम्नां गायत्री भवति । यत्र क्वचिद्वेदे द्वादशाक्षरं छन्दः तत्साम्नां गायत्रीति संज्ञायते । अत्र षष्ठ्यां पङ्क्तौ प्रथमे कोष्ठे सामशब्दं लिखित्वा द्वितीये द्वादश(१२)संख्याङ्कं लिखेत् ॥[1]

ऋचां त्रिः । २ । ८ ॥

षडित्यनुवर्तते । अत्रापि पूर्ववत् क्रियाभिव्यावृत्तिः, तेन त्रिगुणा षट्संख्या ऋचां गायत्री भवति । यत्र क्वचिद्वेदेऽष्टादशाक्षरं छन्दः सा ऋचां गायत्री ज्ञेया । अत्र सप्तमपङ्क्तौ प्रथमे कोष्ठे ऋक्शब्दं व्यवस्थाप्य द्वितीयेऽष्टादश(१८)संख्याङ्कं लिखेत् ॥[2]

द्वौ द्वौ साम्नां वर्धेत । २ । ९ ॥

गायत्रीत्यनुवर्तते । साम्नां पङ्क्तौ गायत्री द्वौ द्वौ संख्याङ्कौ गृहीत्वा वर्धेत पूर्वात् पूर्वाद्वर्धेत यावदष्टमं कोष्ठं प्राप्नोति । तत्र साम्नां पङ्क्तौ तृतीयादिषु कोष्ठेषु क्रमेण वर्धमानान्यक्षराण्यङ्केन विन्यसेत् ॥

त्रींस्त्रीनृचाम् । २ । १० ॥

गायत्रीत्यनुवर्तते । ऋचां गायत्री त्रींस्त्रींस्त्रिसंख्याङ्कान् गृहीत्वा पूर्ववद्वर्धेत । अत्राप्यृचां पङ्क्तौ तृतीयादिषु कोष्ठेषु त्रि(३)संख्याङ्कक्रमेण वृद्धमङ्कं स्थापयेत् ॥

चतुरश्चतुरः प्राजापत्यायाः । २ । ११ ॥

प्राजापत्यापङ्क्तौ गायत्री चतुरश्चतुरः संख्याङ्कान् गृहीत्वा वर्धेत । अत्रापि तृतीयादिषु कोष्ठेषु विन्यासः पूर्ववदेव ॥

एकैकं शेषे । २ । १२ ॥

अनुक्तः शेषः । यत्र गायत्र्यां संख्यावृद्धिर्नोक्ता सैकैकं संख्याङ्कं गृहीत्वा वर्धेत । दैवी याजुषी च शेषशब्देनोच्यते । आसुर्या विशेषाभिधानात् । तेन दैवी तृतीयादिषु कोष्ठेषु क्रमेणैकैकमक्षरं गृहीत्वा वर्धेत । तथैव याजुषी ॥

जह्यादासुरी । २ । १३ ॥

एकैकमित्यनुवर्तते । आसुरी गायत्री एकैकमक्षरं त्यजेत् । उत्तरेषु कोष्ठेषु वृद्धौ प्राप्तायां ह्रासो विधीयते । तेऽङ्काः क्रमेण स्थाप्याः ॥

तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः । २ । १४ ॥

तानीति छन्दांसि गायत्र्याः पुरस्तात् उष्णिग्-अनुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुब्-जगत्याख्यानि क्रमेण भवन्ति ॥

---

१. 'साम्नां स्याद्द्वादशाक्षरा ।' (अ० पु० ३१९।२)

२ 'ऋचामष्टादशार्णा स्यात्–' (अ० पु० ३१९।२)

तिस्रस्तिस्रः सनाम्न्य एकैका ब्राह्म्यः । २ । १५ ॥

याजुषीं पङ्क्तिमारभ्य तिस्रो याजुषी साम्नी आर्ची चेति गायत्र्यो मिलिता एका षट्त्रिंशदक्षरा ब्राह्मी गायत्री भवति । सनाम्न्य इत्येकसंज्ञा इत्यर्थः । तिस्रस्तिस्र इति वीप्सया तेषामुष्णिगादीनामिह ग्रहणम् । तथैकैकेति वीप्सया ता एव ब्राह्म्यो भवन्तीति विधीयते । ब्राह्म्य इति गायत्र्यादीनां जगतीपर्यन्तानां विशेषणमेव । याजुषी साम्नी आर्ची चोष्णिङ्मिलिता एकीकृता द्वाचत्वारिंशदक्षरा ब्राह्म्युष्णिग्भवति । एवं तिस्रोऽनुष्टुभः संगताः सत्योऽष्टाचत्वारिंशदक्षरैका ब्राह्म्यनुष्टुब् भवति । ता एव तिस्रो बृहत्यः संगताः सत्यश्चतुःपञ्चाशदक्षरा एका ब्राह्मी बृहती भवति । ता एव तिस्रः पङ्क्तयः संगताः षष्ट्यक्षरा एका ब्राह्मी पङ्क्तिर्भवति । ता एव तिस्रस्त्रिष्टुभः संगताः षट्षष्ट्यक्षरा एका ब्राह्मी त्रिष्टुप भवति । ता एव तिस्रो जगत्यः संगता द्वासप्तत्यक्षरा एका ब्राह्मी जगती भवति । अत्राष्टम्यां पङ्क्तौ प्रथमे कोष्ठे ब्राह्मीशब्दं व्यवस्थाप्य द्वितीयादौ क्रमेण गायत्र्यादीनां षट्त्रिंशदा(३६) यङ्कान् विन्यसेत् ॥

प्राग्यजुषामार्ष्य इति । २ । १६ ॥

तिस्रस्तिस्र इत्यनुवर्तते । यजुषां पङ्क्तेः प्राक् प्राजापत्या आसुरी दैवीति यास्तिस्रो गायत्र्यः, ताः संगताः सत्यश्चतुर्विंशत्यक्षरा एका आर्षी गायत्री भवति । ता एव तिस्र उष्णिहः संगता अष्टाविंशत्यक्षरा एका आर्षी उष्णिक् संपद्यते । ता एव तिस्रोऽनुष्टुभः संगता द्वात्रिंशदक्षरा एका आर्षी अनुष्टुब् भवति । ता एव तिस्रो बृहत्यः संगताः षट्त्रिंशदक्षरा एका आर्षी बृहती भवति । ता एव तिस्रः पङ्क्तयः संगताश्चत्वारिंशदक्षरा एका आर्षी पङ्क्तिर्भवति । ता एव तिस्रस्त्रिष्टुभः संगताश्चतुश्चत्वारिंशदक्षरा एका आर्षी त्रिष्टुब् भवति । ता एव तिस्रो जगत्यः संगताः अष्टाचत्वारिंशदक्षरा एका आर्षी जगती भवति । अत्र प्रथमायां पङ्क्तौ प्रथमे कोष्ठे आर्षीशब्दं व्यवस्थाप्य द्वितीयादिषु क्रमेण चतुर्विंशत्याद्यङ्कान्विन्यसेत् । प्रथमपङ्क्तेर्द्वितीयादिकोष्ठेष्वङ्कानामुपरि गायत्र्यादीनि नामानि विन्यसेत् । अयं स्पष्टतरः प्रदर्शनोपायः ।

---

१. गायत्र्यादिसप्तच्छन्दसामार्ष्याद्यष्टसंज्ञाभिः षट्पञ्चाशद्भेदाः । तेषामुदाहरणानि वृत्तिकृता न दर्शितानि । अतः स्थालीपुलाकन्यायेन कानिचित्प्रदर्श्यन्ते—तत्र **आर्षी गायत्री**—'अ॒ग्निमी॑ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज॑म् । होता॑रं रत्न॒धात॑मम् ॥' (ऋ. सं. १।१।१।१) ॥ **दैवी**—'ॐ' ॥ **आसुरी**—'भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ।' (सा. सं. पू. ५।२।७।१०) केचित्तु—'आपो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भूर्भुव॒: सुव॒रोम् ।' (तै. आ. १०।२७) इत्युदाहरन्ति । तत् 'गायत्री शिरसः···'यजुश्छन्द (१।८) इत्याश्वलायनपरिशिष्टविरोधादुपेक्ष्यमित्यन्ये । वस्तुतस्तु यजुष्ट्वासुरीत्वयोः सामान्यविशेषभावेनोपपत्तेस्तत्र न कश्चिद्विरोधः ॥ **प्राजापत्या**—'इन्द्रो विश्वस्य राजति', (सा. सं. पू. ५।२।७।१०) ॥ **याजुषी**—'व॒र्षवृ॑द्धमसि' (य. तै. सं. १।१।२) ॥ **साम्नी**—इमं वृषणं कृणुतैकमिन्माम्' (सा. सं. पू. ६।३।१०।६) 'त एक'मिति व्यूहे

छन्दः		गायत्री	उष्णिग्	अनुष्टुब्	बृहती	पङ्क्तिः	त्रिष्टुब्	जगती
आर्षी	=	=२४	=२८	=३२	=३६	=४०	=४४	=४८
दैवी	३	१	२	३	४	५	६	७
आसुरी	२	१५	१४	१३	१२	११	१०	९
प्राजापत्या	१	८	१२	१६	२०	२४	२८	३२
याजुषी	१	६	७	८	९	१०	११	१२
साम्नी	२	१२	१४	१६	१८	२०	२२	२४
आर्ची	३	१८	२१	२४	२७	३०	३३	३६
ब्राह्मी	=	=३६	=४२	=४८	=५४	=६०	=६६	=७२

इति भट्टहलायुधकृतायां छन्दोवृत्तौ द्वितीयोऽध्यायः ।

नोक्तसङ्ख्यापूर्तिः ॥ आर्ची—'प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम्। अग्निं रथानां यमम् ॥' (ऋ. सं. ६।७।१४।५) इयमेकाक्षराधिक्याद् भुरिक् ॥ ब्राह्मी—'ब्रह्मणस्त्वा परस्पायाः । क्षत्रस्य तनुवः पाहि । विशस्त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे ॥' (य तै. आ. ४।११।७) इति ॥ एवमुष्णिगादीनामप्युदाहरणानि तत्र तत्र द्रष्टव्यानि । आर्षीणां तु तत्तत्प्रकरणे दर्शितान्येवेति दिक् ।

अत्रेदमवधेयम्—ऋषिभिस्तत्तच्छन्दोभिरुक्ता ये वैदिकमन्त्रा पिङ्गलाचार्यकृतगायत्र्यादिलक्षणैर्व्यभिचरिता भवन्ति, ते वक्ष्यमाणनिचृत्-भुरिग्-विराट्-स्वराड्-रूपैः समाधेयाः । यथा—स्वरित्यस्यैकाक्षरत्वेऽपि दैवीविराड्रूपेण नानुष्टुप्छन्दस्त्व विरुद्धम् । एवं च वेदेषु ये मन्त्राः सन्ति, तेषां कात्यायनादिभिः सर्वानुक्रमणिकाकारैर्मन्वादिभिश्च यानि च्छन्दांसि विहितानि तेषामेव 'स्थितेर्गतिश्चिन्तनीया' इति न्यायायथाशास्त्रत्वप्रतिपादनार्थमेव भगवता पिङ्गलाचार्येणेदं छन्दःशास्त्रं प्रणीतम्, न तु तेषां बाधकम् । तथा ह्येकाक्षरादिक्रमेण गायत्र्यादिच्छन्दसां शास्त्रविहितत्वं प्रदर्श्यते—

अक्षरा	गायत्री	
(१)	दैवी	०
(२)	,,	भुरिक्
(३)	,,	स्वराट्
(४)	याजुषी	विराट्
(५)	,,	निचृत्
(६)	,,	प्राजापत्या विराट्
(७)	,,	भुरिक्, निचृत्
(८)	प्राजापत्या	० याजुषी स्वराट्
(९)	,,	भुरिक्
(१०)	,,	स्वराट्, साम्नी विराट्
(११)	साम्नी	निचृत्

तृतीयोऽध्यायः ।

पादः । ३ । १ ॥

अधिकारोऽयमाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तत् 'पादः' इत्यधिकृतं वेदितव्यम् । वक्ष्यति च—'गायत्र्या वसवः' (पि० सू० ३।३) इति ॥

इयादिपूरणः । ३ । २ ॥

'पादः' इत्यनुवर्तते । इयादिः पूरणो यस्य स इयादिपूरणः । आदिकरणेन उवादयोऽपि गृह्यन्ते । तत्रायमर्थः—यत्र गायत्र्यादिच्छन्दसि पादस्याक्षरसंख्या न पूर्यते,

(१२)	,,	०
(१३)	,,	भुरिक्, आसुरी विराट्
(१४)	,,	स्वराट्, ,, निचृत्
(१५)	आसुरी	०
(१६)	,,	भुरिक्, आर्ची विराट्
(१७)	आसुरी	स्वराट्, निचृत्
(१८)	आर्ची	०
(१९)	,,	भुरिक्
(२०)	,,	स्वराट्
(२१)	पादनिचृत्	०
(२२)	आर्षी	विराट्
(२३)	,,	निचृत्
(२४)	,,	०
(२५)	,,	भुरिक्
(२६)	,,	स्वराट्
(३४)	ब्राह्मी	विराट्
(३५)	,,	निचृत्
(३६)	,,	०
(३७)	,,	भुरिक्
(३८)	,,	स्वराट्

उष्णिगादिच्छन्दसामप्यनया रीत्याक्षरसंख्योहनीया । एवमेवाथर्ववेदोक्तमन्त्रेष्वपि छन्दःसमाधानमूह्यम् ।

१. 'उवादयः' इत्यादिशब्देन यण्संयोगसवर्णदीर्घगुणवृद्धिव्यूहादयो गृह्यन्ते । तथा च **शौनकः**—'व्यूहेदेकाक्षरीभावान् पादेषूनेषु सम्पदे । क्षैप्रवर्णांश्च संयोगान् व्यवेयात्सदृशैः स्वरैः ॥' (ऋ० प्रा. १७।३६।३७) इति । **सर्वानुक्रमणिका**कारोऽपि (१।३)—'पादपूरणार्थं तु क्षैप्रसंयोगैकाक्षरीभावान् व्यूहेत्' । अनेनैतद्भाष्यकारश्च 'क्षैप्रसंयोगो यका

तत्रेयादिभिः पूरयितव्या । तथा—'तत्सवितुर्वरेणियम्' (ऋ. सं. ३।४।१०।१), 'दिवं गच्छ सुवः पत' (यजु. १२।४) इत्यादयः ॥

गायत्र्या वसवः । ३ । ३ ॥

'पादः' इत्यनुवर्तते । परिभाषेयम् । गायत्र्याः पादो वसवोऽष्टाक्षराणि भवन्ति । यत्र गायत्र्याः पादोऽभिधास्यते तत्राष्टाक्षरो ग्राह्यः ॥

जगत्या आदित्याः । ३ । ४ ॥

'पादः' इत्यनुवर्तते । जगत्याः पादो द्वादशाक्षरो भवति । यत्र क्वचिज्जागतः पादस्तत्र द्वादशाक्षरो गृह्यते ॥

विराजो दिशः । ३ । ५ ॥

पाद इत्यनुवर्तते । यत्र क्वचिद्वैराजः पाद इत्युच्यते, तत्र दशाक्षरः प्रत्येतव्यः ॥

त्रिष्टुभो रुद्राः । ३ । ६ ॥

त्रैष्टुभः 'पादः' इत्युक्ते सर्वत्रैकादशाक्षरो गृह्यते । अस्मिन्नेवाध्याये परिभाषा एताः तत्रः ॥

एकद्वित्रिचतुष्पादुक्तपादम् । ३ । ७ ॥

एभिश्चतुर्भिर्लक्षणैरुक्तः पादो यस्य तत् 'उक्तपादं' छन्दः । यस्य च्छन्दसो यादृशः पादः परिभाषितस्तच्छन्दस्तेनैव पादेन क्वचिदेकपात्, क्वचिद्द्विपात्, क्वचित्त्रिपात्, क्वचिच्चतुष्पाद् भवति । गायत्री च त्रिपदैव । चतुर्भिरष्टाक्षरैः पादैरनुष्टुबेव स्यात् ॥

रवकारसंयोगः, यण्संयोग इत्यन्ये, कुत एतत्? यण् हि क्षिप्रं भवति इति क्षैप्रः । तत्र त्रेत्यादावेकमात्रामर्धमात्रां करोतीति । 'एकः पूर्वपरयोः' (पा० सू० ६।१।८४) इत्यधिकारसंपन्नः संधिरेकाक्षरीभावः । तत्र द्वे अक्षरे एकाक्षरीक्रियेते इति । तत्र यण्व्यूहो यथा—'दिवस्पृथिव्याः पर्योज उद्भृतं' (ऋ. सं. ४।८।३५।२) 'नि नो होता वरेण्यः' (ऋ. सं. १।२।२०।२) इत्यादौ यकारं व्यूहेत् । 'द्रप्सः सुर्पिरा सुतिः' (ऋ. सं. २।५।२८।६) इत्यादौ वकारम् । 'एवा त्वामिन्द्र वज्रिन्नत्र' (ऋ. सं. ३।६।१।१) इत्यादौ रेफम् । तथा—'उपेन्द्र तव वीर्ये' (ऋ. सं. ४।६।२५।८) इत्यादौ गुणम् । 'प्र ब्रह्मैतु सदनादृतस्य' (ऋ. सं. ५।४।१।१) इत्यादौ वृद्धिम् । 'इन्द्र वाजेषु नोऽव' (ऋ. सं. १।१।१३।४) इत्यादौ पूर्वरूपम् । 'अद्याद्याश्वश्व' (ऋ. सं. ६।४।३९।२) इत्यादौ सवर्णदीर्घम् इति । अत्र 'उपेन्द्र' इत्यादीन्येकाक्षरीभावस्योदाहरणानि ।

छन्दोमात्राविषयकमिदम्. लौकिके तु 'पादश्चतुर्भागः' (पि० सू० ४।१०) इति विशेषेण वक्ष्यते । 'छन्द एकादिपादकम् ।' (३३०।२) इत्याग्नेये । 'पञ्च पङ्क्तेः पदानि सप्तेत्यति च्छन्दसाम्' इति साङ्ख्यायनश्रौतसूत्रे । (७।२७)

आद्यं[1] चतुष्पादृतुभिः । ३ । ८ ॥

'ऋतु'शब्देन लक्षणया षडक्षरः पादोऽभिधीयते । तैः पादैश्चतुष्पादं गायत्रं छन्दो भवति । एवं चतुर्विंशत्यक्षराणि संपद्यन्ते । यथा—

['दोषो गाय बृहद् (१) गाय द्युमद्धेहि (२) ।
आथर्वण स्तुहि (३) देवं सवितारम् (४) ॥']
(अथ० सं० कां० ६ सू० १ मं० १)

क्वचित्त्रिपादृषिभिः । ३ । ९ ॥

क्वचिद्वेदे सप्ताक्षरोपलक्षितैः पादैस्त्रिभिर्गायत्र्येव भवति । एवमेकविंशत्यक्षराणि जायन्ते । यथा—

'युवाकु हि शचीनां (१) युवाकु सुमतीनाम् (२) ।
भूयाम वाजदाव्नाम् (३) ॥' (ऋग्वेदे–अ० १ अ० १ व० ३२ मं०४)

सा पादनिचृत् । ३ । १० ॥

सैव गायत्री 'पादनिचृत्' इति संज्ञां लभते । प्रयोक्तुरदृष्टाभ्युदयसंबन्धज्ञापनार्थमियं संज्ञा वेदस्यानादित्वान्महत्त्वेऽपि च न दुष्टेति ॥

षट्कसप्तकयोर्मध्येऽष्टावतिपादनिचृत् । ३ । ११ ॥

प्रथमः षडक्षरः, द्वितीयोऽष्टाक्षरः, तृतीयः सप्ताक्षरः । एवं त्रिभिः पादैर्या गायत्री सा 'अतिपादनिचृत्' इति संज्ञां लभते । 'त्रिपात्' इत्यनुवर्तनीयम् । यथा—

['प्रेष्ठं वो अतिथिं (१) स्तुषे मित्रमिव प्रियम् (२) ।
अग्निं रथं न वेद्यम् (३) ॥' (ऋग्वेदे–अ० ६ अ० ६ व० ५ मं० १)]

द्वौ नवकौ षट्कश्च नागी । ३ । १२ ॥

द्वौ नवाक्षरौ पादौ, षडक्षरस्तृतीयः । एवं त्रिभिः पादैः 'नागी' नाम गायत्री भवति । यथा—

[2]['अग्ने तमद्याश्वं न स्तोमैः (१) क्रतुं न भद्रं हृदिस्पृशम् (२) ।
ऋध्यामा त ओहैः (३) ॥' (ऋग्वेदे–अ० ३ अ० ५ व० १० मं० १)]

---

१. आद्यमस्मिन्नध्यायेऽनुक्रान्तेषु प्रथमम्, सकलच्छन्दसामादिभूतं च । 'गायत्री प्रथमा छन्दसाम्' इति **शतपथश्रुतेः** । गीतासु च स्वयं साक्षाद्भगवता 'गायत्री छन्दसामहम्' (१०।३५) इत्युक्तत्वात् प्रधानभूतं चेति **षड्गुरुशिष्यः ॥**

ईदृशस्य गायत्रीछन्दसः प्रायो वेदेष्वदर्शनात्, उत्तरत्र लक्षितस्य सप्ताक्षरपादत्रयोपेतस्य दाशतय्यादौ बहुलमुपलम्भात्, गायत्र्यास्त्रिपात्त्वस्यैव सर्वत्र प्रसिद्धेश्चात्र 'आद्यं चतुष्पादृतुभिः क्वचित्' इति सूत्रविभाग एव युक्तः । 'लक्ष्यानुसारि हि लक्षणम्' इति न्यायात् ।

२. **शौनककात्यायनमते** त्वियं पदपङ्क्तिः । पादाश्च पञ्च, आदितस्त्रयः पञ्चाक्षराः, चतुर्थश्चतुरक्षरः, अन्त्यः षडक्षर इति ।

विपरीता वाराही । ३ । १३ ॥

इयमेव नागी गायत्री विपरीता यदा भवति तदा 'वाराही' नाम भवति । प्रथमः षडक्षरः पादो, द्वितीयतृतीयौ नवाक्षरौ । यथा—

['वीतंँस्तुके स्तुके (१) युवमस्मासु नियच्छतम् (२) ।
प्र प्र यज्ञपतिं तिर (३) ॥' (तै० आ० प्रपा० ३ अ० ११ मं० २०)]

षड्कसप्तकाष्टकैर्वर्धमाना । ३ । १४ ॥

षडक्षरः प्रथमः पादः, द्वितीयः सप्ताक्षरः, तृतीयोऽष्टाक्षरः । एवं त्रिभिः पादैः 'वर्धमाना' गायत्री भवति । यथा—

'त्वमग्ने यज्ञानां (१) होता विश्वेषां हितः (२) ।
देवेभिर्मानुषे जने (३) ॥' (ऋग्वेदे–अ० ४ अ० ५ व० २१ मं० १)

विपरीता प्रतिष्ठा । ३ । १५ ॥

सैव वर्धमाना गायत्री विपरीता यदा भवति तदा 'प्रतिष्ठा' नाम गायत्री भवति । [illegible]रः प्रथमः पादः, द्वितीयः सप्ताक्षरः, षडक्षरस्तृतीयः । यथा—

'आपः पृणीत भेषजं (१) वरूथं तन्वे ३ मम (२) ।
ज्योक्च सूर्यं दृशे (३) ॥' (ऋग्वेदे–अ० १ अ० २ व० १२ मं० १)

तृतीयं द्विपाज्जागतगायत्राभ्याम्³ । ३ । १६ ॥

तृतीयशब्देनैतदध्यायस्थसूत्रपाठक्रमापेक्षया विराजमाह । तथा चोक्तम्—'विराजो दिशः' (पि० सू० ३।५) इति । यदा द्वादशाक्षरोऽष्टाक्षरश्च पादः स्यात्, ततस्ताभ्यां 'द्विपाद् विराड्' नाम गायत्री भवति । यथा—

'नृभिर्येमानो हर्यतो विचक्षणो (१) राजा देवः समुद्रियः (२) ॥'
(ऋग्वेदे–अ० ७ अ० ५ व० १५ मं० १)

---

१. 'पर' इति व्यूहान्नवाक्षरत्वम् । उदाहरणान्तरं मृगयम् ।

२. **प्रातिशाख्ये** वर्धमानाया भेदान्तरमपि दृश्यते–'अष्टकौ मध्यमः षड्क एकेषामुपदिश्यते ।' (१६।२२) इति । उदाहरणं तु—

'निषसाद धृतव्रतो (१) वरुणः पस्त्या३स्वा (२) ।
साम्राज्याय सुक्रतुः (३) ॥' (ऋ० सं० अ० १ अ० २ व० १७ मं० ५)

तृतीयो व्यूहेनाष्टाक्षरः ।

३. अत्र क्रमोऽविवक्षितः । जागतग्रहणं च त्रैष्टुभस्याप्युपलक्षकम् । तेन—

'वसुरग्निर्वसुश्रवा (१) अच्छानक्षि द्युमत्तमं रयिं दाः (२) ॥'
(ऋ० सं० अ० ४ अ० १ व० १६ मं० २)

इत्यादीनामपि सङ्ग्रहः । यद्यपि भूम्ना विराडाख्यं स्वतन्त्रमेव छन्दः श्रूयते, तथापि लाघवार्थमस्य भेदानां तत्र तत्रान्तर्भावः सप्तच्छन्दोवादावष्टम्भेन विहित इति बोध्यम् ।

त्रिपात्त्रैष्टुभैः । ३ । १७ ॥

'तृतीयम्' इत्यनुवर्तते । एकादशाक्षरैः पादैः 'त्रिपाद् विराड्' नाम गायत्री भवति । यथा—

'दुहीयन्मित्रधितये युवाकु (१) राये च नो मिमीतं वाजवत्यै (२) ।
इषे च नो मिमीतं धेनुमत्यै (३) ॥' (ऋग्वेदे-अ० १ अ० ८ व० २३ मं० ४)

इति गायत्र्यधिकारः ।

---

१. शौनककात्यायनाभ्यां त्विदमनुष्टुब्भेदेषु परिगणितम् ।

२. गायतां त्राणात् गायत्री । 'गायत्री गायतेः स्तुतिकर्मणः । त्रिगमना वा विपरीता गायतो मुखादुदपतदिति च ब्राह्मणम् ।' (नि. अ. ७ खं. १२) इति **यास्कः** ।

भगवता **कात्यायनेन** तु गायत्र्या नव भेदाः प्रदर्शिताः—**'प्रथमं छन्दस्त्रिपदा गायत्री [१] पञ्चकाश्चत्वारः षट्कश्चैकः, चतुर्थश्चतुष्को वा पदपङ्क्तिः [२] षट्सप्तैकादशा उष्णिग्गर्भा [३] त्रयः सप्तकाः पादनिचृत् [४] मध्यमः षट्कश्चेदतिनिचृत् [५] दशकश्चेद्यवमध्या [६] यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमाना [७] विपरीता प्रतिष्ठा [८] द्वौ षट्कौ सप्तकश्च ह्रसीयसी [९]'** इति । (ऋ० सर्वा० ४ शु० य० सर्वा० ५।२)

[१] तत्र **त्रिपदा गायत्री** यथा—

'अग्निमीळे पुरोहितं (१) यज्ञस्य देवमृत्विजम् (२) ।
होतारं रत्नधातमम् (३) ॥' (ऋ० सं० १।१।१।१)

[२] **पदपङ्क्तिः** पङ्क्त्यधिकारे दर्शयिष्यते ।

[३] **उष्णिग्गर्भा**—

'ता मे अश्व्यानां (१) हरीणां नितोशना (२) ।
उतो नु कृत्व्यानां नृवाहसा (३) ॥' (ऋ० सं० ६।२।२५।३)

प्रथमतृतीयपादयोः संयोगव्यूहेनाक्षरसङ्ख्यापूर्तिः ।

[४] **पादनिचृदुदाहृतैव** (३।९) ।

[५] **अतिनिचृत्**—

'पुरूतमं पुरूणां (१) स्तोतॄणां विवाचि (२) ।
वाजेभिर्वाजयताम् (३) ॥' (ऋ० सं० ४।७।२६।४)

[६] **यवमध्या** दर्शयिष्यते (३।५८)

[७] **वर्धमाना** [८] **प्रतिष्ठा** चोदाहृते (३।१४,१५) यथास्थानम् ।

[९] **ह्रसीयसी**—आर्चीत्वेनोदाहृतैव (ऋ० सं० ६।७।१४।५) अत्राप्यनुसन्धेया । लक्षणे क्रमस्याविवक्षितत्वात्—

'इन्द्रः सहस्रदाव्नां (१) वरुणः शंस्यानाम् (२) ।
क्रतुर्भवत्युक्थ्यः (३) ॥' (ऋ० सं० १।१।३२।५) इत्यादीनामपि सङ्ग्रहः ॥

उष्णिग्गायत्रौ जागतश्च । ३ । १८ ॥

यत्र गायत्रावष्टाक्षरौ पादौ, जागतश्च द्वादशाक्षरः, एवं त्रिभिः 'उष्णिग्' नाम छन्दो भवति । अत्र च क्रमो न विवक्षितः । पादसंख्यामात्रं विधीयते ॥

ककुम्मध्ये चेदन्त्यः । ३ । १९ ॥

गायत्रयोः पादयोर्मध्ये जागतश्चेत्पादो भवति, तदेयम् उष्णिक् 'ककुप्'संज्ञां लभते । यथा—

['युष्माकं स्मा रथाँ अनु (१) मुदे दधे मरुतो जीरदानवः (२) ।
वृष्टीद्यावो यतीरिव (३) ॥' (ऋग्वेदे–अ० ४ अ० ३ व० ११ मं० ५)]

पुरउष्णिक्पुरः । ३ । २० ॥

स एव पादो जागतश्चेत् प्रथमो भवति, गायत्रौ च परतः, तदा 'परउष्णिक्' नाम भवति । यथा—

[1]'अप्स्व१ न्तरमृतमप्सु भेषज (१) मपामुत प्रशस्तये (२) ।
देवा भवत वाजिनः (३) ॥' (ऋग्वेदे–अ० १ अ० २ व० ११ मं० ४)

परोष्णिक्परः । ३ । २१ ॥

एवं जागतः पादः परतश्चेद्भवति, पूर्वौ च गायत्रौ, तदा 'परोष्णिक्' नाम च्छन्दो भवति ।

'उष्णिग्गायत्रौ जागतश्च' (पि० सू० ३।१८) इत्यनेन गतार्थमेतत् विशेषसंज्ञाभिधानार्थं पुनरुच्यते । प्रथमसूत्रे (पि० सू० ३।२०) उष्णिग्ग्रहणमधिकारार्थम् ॥

प्रातिशाख्येऽन्यदपि भेदद्वयं दृश्यते—**'अष्टको दशकः सप्तको विद्वांसाविति सा भुरिक् ।' 'स नो वाजेषु पादौ द्वौ जागतौ द्विपदोच्यते ।'**(पटलः १६ सू० १७,२३) इति । आद्या यथा—

'विद्वांसा विदुरः पृच्छे (१) दविद्वानित्थापरो अचेताः (२) ।
नूचिन्नु मर्ते अक्रौ (३) ॥' (ऋ० सं० १।८।२२।२)

कात्यायनस्त्विमां **ककुभ**मुक्तवान् । **द्वितीया** यथा—

'स नो वाजेष्ववितां पुरूवसुः (१) पुरस्थाता मघवा वृत्रहा भुवत् (२) ॥'
(ऋ० सं० ६।४।३।३)

क्वचिदष्टाक्षरपादद्वयवत्यपि **द्विपदा गायत्री** दृश्यते । यथा—

'ते सुतासो मदिन्तमाः (१) शुक्रा वायुमसृक्षत (२) ॥'
(ऋ० सं० ७।२।१६।३)

एवं **शङ्कुमती–ककुम्मत्या**दयोऽन्येऽपि गायत्रीभेदास्तत्र तत्र वक्ष्यमाणा इहानुसन्धेयाः । **दैव्यादय**स्तूक्ता एवेति दिक् ।

१ 'अप्सु अन्तः'इति व्यूहात् पादपूर्तिः ।

यथा—

'अग्ने वाजस्य गोमत (१) ईशानः सहसो यहो (२)।
अस्मे धेहि जातवेदो महि श्रवः (३) ॥' (ऋग्वेदे-अ०१ अ०५ व०२७ मं०४)

चतुष्पादृषिभिः । ३ । २२ ॥

सप्ताक्षरैश्चतुर्भिः पादैः 'उष्णिक्' एव भवति । यथा—

नदं व ओदतीनां (१) नदं यो युवतीनाम् (२)।
पतिं वो अघ्न्यानां (३) धेनूनामिषुध्यसि (४) ॥'

(ऋग्वेदे-अ० ६ अ० ५ व० ५ मं० २)

इत्युष्णिगधिकारः ।

---

१. 'अघ्नीयानाम्' इतीयशब्देन पूर्तिः. २. 'चतुरुत्तरच्छन्दसारम्भादूर्ध्वं स्निह्यतीत्युष्णिक् । उष्णिगुत्स्नाता भवति । स्निह्यतेर्वा स्यात् कान्तिकर्मणः । उष्णीषिणी वेत्यौपमिकम्' इति यास्कः (नि. अ. ७ खं. १२) । अयमेव शब्द आकारान्तोऽपि यथा—'उष्णिहा छन्द इन्द्रियम्', (यजुर्वेदे-अ० २१ मं० १३) 'बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा' (यजुर्वेदे-अ० २३ मं० ३३), 'शृणातु ग्रीवाः प्रशृणातूष्णिहा वृत्रस्येव शचीपतिः' (अथर्ववेदे-कां० ६ अ० १३४ सू० १) । भगवता कात्यायनेन तूष्णिहोऽष्टौ भेदा उक्ताः, यथा—'द्वितीयमुष्णिक्त्रिपदान्त्यो द्वादशकः [१] आद्यश्चेत्पुरउष्णिक् [२] मध्यमश्चेत्ककुप् [३] त्रैष्टुभजागतचतुष्काः ककुब् न्यङ्कुशिराः [४] एकादशिनोः परःषट्कस्तनुशिरा [५] मध्यश्चेत्पिपीलिकमध्या [६] आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा [७] चतुःसप्तकोष्णिगेव [८] इति' (सर्वा. खं. ५)

एषु [१] उष्णिक्—परोष्णिगेव (३।२१) । सा च दर्शिता ।

[२-३] पुरउष्णिक्-ककुप्-चोदाहृते (३।२०,१९)

[४] ककुब्न्यङ्कुशिराः—

'दुदी रेक्णस्तन्वे दुदिर्वसु (१) दुदिर्वाजेषु पुरुहूत वाजिनम् (२)।
नूनमथ (३) ॥' (ऋ० सं० ६।४।३।५)

प्रथमपादे व्यूहात्पूरणम् ।

[५] तनुशिराः—

'प्र या घोषे भृगवाणे न शोभे (१) यया वाचा यजति पज्रियो वाम् (२)।
प्रैषयुर्न विद्वान् (३) ॥' (ऋ० सं० १।८।२२।५)

[६] पिपीलिकमध्या—

'हरी यस्य सुयुजा विव्रता वे (१) रर्वन्तानुशेपा (२)।
उभा रजी न केशिना पतिर्दन् (३) ॥' (ऋ. सं. ८।५।२६।२)

अनुष्टुब्गायत्रैः । ३ । २३ ॥

'चतुष्पाद्' इत्यनुवर्तते । गायत्रैरष्टाक्षरैः पादैश्चतुष्पाच्छन्दः 'अनुष्टुप्'संज्ञं भवति । यथा—

सहस्रशीर्षा पुरुषः (१) सहस्राक्षः सहस्रपात् (२) ।
स भूमिं विश्वतो वृत्वा (३) त्यतिष्ठद्दशाङ्गुलम् (४)॥'
(ऋग्वेदे–अ० ८ अ० ४ व० १७ मं० १)

त्रिपात्कचिज्जागताभ्यां च । ३ । २४ ॥

'अनुष्टुब्' इत्यनुवर्तते । चकाराद्गायत्रग्रहणं च । गायत्रेणैकेन ततो द्वाभ्यां जागताभ्यां क्वचित् 'त्रिपादनुष्टुब्' भवति ॥

---

[७] अनुष्टुब्गर्भा—

'पितुं नु स्तोषं (१) महो धर्माणं तविषीम् (२) ।
यस्य त्रितो व्योजसा (३) वृत्रं वि पर्वमर्दयत् (४) ॥' (ऋ० सं०२।५।६।१)

तृतीयपादे 'विओ' इति विकर्षणेन पूर्तिः ।

[८] चतुष्पादुदाहृता (३।२२)

प्रागदर्शिता दैव्यादिभेदा (२।३–८,१५) अप्यत्रानुसन्धेयाः । तदुदाहरणानि तु-—

[१] दैवी—'भुवः' (तै० आ० प्र० १० अ० २७)

[२] आसुरी—नमस्ते अस्तु पश्यत पश्य मा पश्यत ।'
(अथ० सं० कां० १३ सू० ४ मं० ५५)

[३] प्राजापत्या—'निर्दग्धꣳ रक्षो निर्दग्धा अरातयः ।'
(तै० सं० कां० १ प्र० १ अ० ७)

[४] याजुषी—'यज्ञस्य घोषदसि ।' (तै० सं० कां० १ प्र० १ अ० २ मं० १)

[५] साम्नी—'शुन्धध्वं दैव्याय कर्मणे देवयज्यायै ।' (तै० सं० १।१।३।१)

[६] आर्ची—'तदग्निराह तदु सोम आह पूषा मा धात्सुकृतस्य लोके ।'
(अथ० सं० १६।९।२)

[७] ब्राह्मी—'होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्यो वज्रहस्तः पुरंदरो वेत्वाज्यस्य होतर्यज ।'
(शु० य० वा० सं० अ० २८ मं० ३) इति ।

यानि तूक्तेभ्य ईषत् विलक्षणानि—

'ऊर्ध्वा अस्य समिधो भव (१) न्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः (२) ।
द्युमत्तमा सुप्रतीकस्य सूनोः (३) ॥'

'तनूनपादसुरो विश्ववेदा (१) देवो देवेषु देवः (२) ।
पथ आनक्ति मध्वा घृतेन (३) ॥'

'मध्वा यज्ञं नक्षसे (१) प्रीणानो नराशꣳसो अग्ने (२) ।
सुकृद्देवः सविता विश्ववारः (३) ॥' (तै० सं० ४।१।४।१-३)

इत्यादीनि छन्दांसि वेदेषूपलक्ष्यन्ते, तेषां निचृदादिविशेषणवत्त्वकल्पनयोक्तेष्वेवान्तर्भाव ऊह्य इति दिक् ।

मध्येऽन्ते च । ३ । २५ ॥

जागतयोः पादयोर्मध्येऽन्ते च यदा गायत्रः पादो भवति, तदाप्यनुष्टुब्वेव स्यात् । यथा—

'पर्यूषु प्रधन्व वाजसातये (१) परिवृत्राणि सक्षणिः (२) ।
द्विषस्तरध्या ऋणया न ईयसे (३) ॥' (ऋग्वेदे–अ० ७ अ० ५ व० २२ मं० १)

अन्तपक्ष उदाहरणम्—

'मा कस्मै धातमभ्यमित्रिणे नो (१) माकुत्रा नो गृहेभ्यो धेनवो गुः (२) ।
स्तनाभुजो अशिश्वीः (३) ॥' (ऋग्वेदे–अ० १ अ० ८ व० २३ मं० ३)

इत्यनुष्टुबधिकारः ।

१.–२. 'प्रधनुव,' 'अधिया,' इत्युवियशब्देन पादपूर्तिः. ३.–४. 'अभियं,' 'अशिशुवी' इति पादपूर्तिः. । ५. 'अनुष्टुबनुष्टोभनात् । गायत्रीमेव त्रिपदां सतीं चतुर्थेन पादेनानुष्टोभतीति च ब्राह्मणम् ।' इति **यास्कः** (नि. ७।१२।९) ।

क्वचिदयं शब्दो हान्तोऽपि दृश्यते । यथा—'द्वात्रिंशदक्षरानुष्टुक् ।' (तै० सं० ७।४।४) 'सा वा एषर्गनुष्टुग्वागनुष्टुक् ।' (तै० सं० ६।१।२) अनुष्टुक्प्रथमा भवति । अनुष्टुगुत्तमा । वाग्वा अनुष्टुक् ।' (तै० ब्रा० १।८।८) इत्यादौ ।

सर्वानुक्रमणिकायां कात्यायनेन तु—'**तृतीयमनुष्टुप्, चत्वारोऽष्टकाः [१] पञ्च पञ्चकाः षट्कश्चैको महापदपङ्क्तिः [२] जागतावष्टकश्च कृतिः [३] मध्ये चेदष्टकः पिपीलिकमध्या [४] नवकयोर्मध्ये जागतः काविराट् [५] नववैराजत्रयोदशैर्नष्टरूपी [६] दशकास्त्रयो विराट् [७] एकादशका वा [८]**' (ऋ० सर्वा० ६) इत्यष्टावनुष्टुभो भेदा उक्ताः । तत्र—

[१] **अनुष्टुप्** उदाहृता (३।२३) ।

[२] **महापदपङ्क्तिः—**

'तव स्वादिष्ठा(१) ऽग्ने सन्दृष्टि (२) रिदा चिदह्न (३) इदा चिदक्तोः (४) ।
श्रिये रुक्मो न (५) रोचत उपाके (६) ॥' (ऋ० सं० ३।५।१०।५)

[३] **कृतिः—**

'मा कस्मै० ।' (ऋ० सं० १।८।२३।३) इत्युदाहृता ।

[४] **पिपीलिकमध्या—**

'पर्यूषु प्र० ।' (ऋ० सं० ७।५।२२।१)

[५] **काविराट्—**

'ता विद्वांसा हवामहे वां (१) ता नो विद्वांसा मन्म वोचेतमद्य (२) ।
प्रार्चद्दयमानो युवाकुः (३) ॥' (ऋ० सं० १।८।२२।३)

बृहती जागतस्त्रयश्च गायत्राः । ३ । २६ ॥

एको जागतः पादः, त्रयश्च गायत्राः, तदा 'बृहती' नाम छन्दो भवति ॥

यथा—

'मत्स्वा सुशिप्र हरिवस्तदीमहे (१) त्वे आ भूषन्ति वेधसः (२) ।
तव श्रवांस्युपमान्युक्थ्या (३) सुतेष्विन्द्र गिर्वणः (४) ॥'
(ऋग्वेदे-अ० ६ अ० ७ व० ३ मं० २)

पथ्या पूर्वश्चेत्तृतीयः । ३ । २७ ॥

'बृहती' इत्यनुवर्तते । पूर्वः पादो जागतो यदि तृतीयो भवति, अन्ये गायत्राः, तदासौ बृहती 'पथ्या' नाम छन्दो भवति । यथा—

'मा चिदन्यद्विशंसत (१) सखायो मा रिषण्यत (२) ।
इन्द्रमित्स्तोता वृषणं सचा सुते (३) मुहुरुक्था च शंसत (४) ॥'
(ऋग्वेदे-अ० ५ अ० ७ व० १० मं० १)

---

[६] नष्टरूपी—
'वि पृच्छामि पाक्यान देवान् (१) वषट्कृतस्याद्भुतस्य दस्रा (२) ।
पातं च सह्यसो युवं च रभ्यसो नः (३) ॥' (ऋ० सं० १।८।२२।४)

[७] विराट्—
'श्रुधी हवं विपिपानस्याद्रे (१) बोधा विप्रस्यार्चतो मनीषाम् (२) ।
कृष्वा दुवांस्यन्तमा सचेमा (३) ॥' (ऋ० सं० ५।३।५।४)

[८] विराट्—(३।१७) इत्यत्रोक्तैव ।

दैव्यादिप्रागुक्तभेदानामुदाहरणानि तु—

[१] दैवी—'मखोऽसि ।' (तै० आ० ४।२)

[२] आसुरी—'भृगूणामङ्गिरसां तपसा तप्यध्वम् ।' (तै० सं० १।१।७।१०)

[३] प्राजापत्या—'वृश्च प्र वृश्च सं वृश्च दह प्र दह सं दह ।' (अथ०सं०१२।५।६२)

[४] याजुषी—'विश्वे देवा विश्वे देवाः ।' (तै० सं० ४।१।११)

[५] साम्नी—'रात्रिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषा स्वाहा ।'
(शु० य० वा० सं० ३।२१)

[६] आर्ची—'देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ।
(तै० सं० १।१।५।१)

[७] ब्राह्मी—'अयं लोकः प्रियतमो देवानामपराजितः ।
यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे ।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ॥'(अथ०सं०५।३०।१७)

१. पूर्वसूत्रपठितः । प्रथम इत्यर्थः ॥

न्यङ्कुसारिणी द्वितीयः । ३ । २८ ॥

'पूर्वश्चेद्' इत्यनुवर्तते। पूर्वश्चेज्जागतः पादो द्वितीयो भवति, शेषाश्च गायत्राः, तदा 'न्यङ्कुसारिणी' नाम्नी बृहती भवति । यथा—

'मत्स्यपायि ते महः (१) पात्रस्येव हरिवो मत्सरो मदः (२) ।
वृषा ते वृष्ण इन्दुः (३) वाजी सहस्रसातमः (४) ॥'

(ऋग्वेदे-अ० २ अ० ४ व० १८ मं० १)

स्कन्धोग्रीवी क्रौष्टुकेः । ३ । २९ ॥

इयमेव 'न्यङ्कुसारिणी' क्रौष्टुकेराचार्यस्य मतेन 'स्कन्धोग्रीवी' नाम छन्दो भवति । आचार्यग्रहणं पूजार्थम् ॥

उरोबृहती यास्कस्य । ३ । ३० ॥

इयमेव न्यङ्कुसारिणी यास्कस्याचार्यस्य मतेन 'उरोबृहती' नाम्नी भवति ॥

उपरिष्टाद्बृहत्यन्ते । ३ । ३१ ॥

यदा जागतः पादोऽन्ते भवति, तदा 'उपरिष्टाद्बृहती' नाम भवति । यथा—

'न तमंहो न दुरितं (१) देवासो अष्ट मर्त्यम् (२) ।
सजोषसो यमर्यमा (३) मित्रो नयन्ति वरुणो अतिद्विषः (४) ॥'

(ऋग्वेदे-अ० ८ अ० ७ व० १३ मं० १)

पुरस्ताद्बृहती पुरः । ३ । ३२ ॥

स एव जागतः पादः पूर्वश्चेद् भवति, शेषाश्च गायत्राः, तदा 'पुरस्ताद्बृहती' नाम भवति । यथा—

'महो यस्पतिः शवसो असाम्या (१) महो नृम्णस्य तूतुजिः (२) ।
भर्ता वज्रस्य धृष्णोः (३) पिता पुत्रमिव प्रियम् (४) ॥'

(ऋग्वेदे-अ० ७ अ० ७ व० ६ मं० ३)

'बृहती जागतस्त्रयश्च गायत्राः' (पि० सू० ३।२६) इत्यनेनैव गतार्थमेतत् । संज्ञाविशेषप्रदर्शनार्थं पुनरुच्यते ॥

क्वचिन्नवकाश्चत्वारः । ३ । ३३ ॥

क्वचिद्वेदे नवाक्षराश्चत्वारः पादा दृश्यन्ते, सापि बृहत्येव ।

---

१. 'मत्सीय' 'वृषण' इति पूर्त्या विराट्त्वाद्वा न दोषः । २. 'मर्तीयम्' इति पूर्तिः । ३. 'यदि जागतः पादः पुरो भवति, अन्ते च त्रयो' इति लिखितपुस्तकयोः । ४. 'असामिया' इति पूरणात्पादपूर्तिः । ५. क्वचिदिति हि प्रयोगाल्पत्वं सूच्यते इति षड्गुरुशिष्यः ।

यथा—

['[1]'चक्षुषो हेते मनसो हेते (१) वाचो हेते ब्रह्मणो हेते (२) ।
यो माघायुरभिदासति (३) तमग्ने मेन्या मेनिं कृणु (४) ॥'
(यजुर्वेदे तै० ब्रा० कां० २ प्र० ४ अ० २ मं० १)]

वैराजौ गायत्रौ च । ३ । ३४ ॥

यत्र वैराजौ पादौ पूर्वौ दशाक्षरौ भवतः, ततो गायत्रौ च, सापि बृहती । यथा—

['कां सोस्मितां हिरण्यप्राकारां (१) मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्[2] (२) ।
पद्मेस्थितां पद्मवर्णां (३) तामिहोपह्वये श्रियम् (४) ॥'
(ऋग्वेदे–अ० ४ अ० ४ परि० मं० ४)

त्रिभिर्जागतैर्महाबृहती । ३ । ३५ ॥

त्रिभिर्जागतैः पादैश्छन्दो 'महाबृहती' नाम । यथा—

'अजीजनो अमृत मर्त्येष्वाँ (१) ऋतस्य धर्मन्नमृतस्य चारुणः (२) ।
सदासरो वाजमच्छा स निष्यदत् (३) ॥'
(ऋग्वेदे–अ० ७ अ० ५ व० २२ मं० ४)

सतोबृहती ताण्डिनः । ३ । ३६ ॥

इयमेव महाबृहती ताण्डिन आचार्यस्य मतेन 'सतोबृहती' नाम भवति ॥

इति बृहत्यधिकारः[3] ।

---

१. प्रथमपादेऽक्षराधिक्याद्भुरिग्रूपा । २. द्वितीयेऽक्षराधिक्यादियमपि भुरिक् । ३. 'बृहती परिबर्हणात् ।' (नि० ७।१२।१०) इति **यास्कः । सर्वानुक्रमणिकायां तु—'चतुर्थ बृहती तृतीयो द्वादश [१] आद्यश्चेत्पुरस्ताद्बृहती [२] द्वितीयश्चेन्न्यङ्कुसारिणी, उरोबृहती, स्कन्धोग्रीवी वा [३] अन्त्यश्चेदुपरिष्टाद्बृहती [४] अष्टिनोर्मध्ये दशकौ विष्टारबृहती [५] त्रिजागतोर्ध्वबृहती [६] त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या [७] नवकाष्ट्यैकादश्यष्टिनो विषमपदा [८] चतुर्नवका बृहत्येव [९]'** (ऋ. सर्वा. ७) इति नवविधा बृहत्य उक्ताः । तत्र [१–४] **बृहती**–पथ्या (३।२७) **पुरस्ताद्बृहती** (३।३२) **उरोबृहती** (३।२८-३०) **उपरिष्टाद्बृहत्य** (३।३१) उदाहृता एव ।

[५] विष्टारबृहती—

'युवं ह्यास्तं महो रन् (१) युवं वा यन्निरततंसतम् (२) ।
तानो वसू सुगोपा स्यातं (३) पातं नो वृकादघायोः (४) ॥'
(ऋ० सं० १।८।२३।२)

प्रथमतृतीयपादयोः 'ह्रिआ' 'सिया' इति व्यूहादक्षरपूर्तिः ।

[६] ऊर्ध्वबृहती—महाबृहत्यौ (३।३५) निरुक्ता ।

पङ्क्तिर्जागतौ गायत्रौ च । ३ । ३७ ॥

यदा द्वौ पादौ जागतौ भवतस्ततो गायत्रौ च, तदा 'पंक्तिः' नाम छन्दः ॥

पूर्वौ चेदयुजौ सतः पङ्क्तिः । ३ । ३८ ॥

यत्र पूर्वोद्दिष्टौ पादावयुजौ भवतः, प्रथमतृतीयौ पादौ जागतावित्यर्थः, द्वितीय-चतुर्थौ च गायत्रौ तच्छन्दः 'सतःपङ्क्तिः' नाम भवति ॥ यथा-

---

[७] **पिपीलिकमध्या—**

'अभिवो वीरमन्धसो मदेषु गाय (१) गिरा महा विचेतसम् (२) ।
इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा (३) ॥' (ऋ० सं० ६।४।३।४)

[८] **विषमपदा—**

'सनितः सुसनितरुग्र (१) चित्र चेतिष्ठ सूनृत (२) ।
प्रासहा सम्राट् सहुरिं सहन्तं (३) भुज्युं वाजेषु पूर्व्यम् (४) ॥'
(ऋ० सं० ६।४।४।५) चतुर्थपादे 'पूर्वियमिति व्यूहेन पूर्तिः ।

[९] **बृहती—**(३।३३) इत्यत्रोदाहृता । **शौनकस्तु—**

'तं त्वा वयं पितो वचोभिः (१) गावो न हव्या सुषूदिम (२) ।
देवेभ्यस्त्वा सधमाद (३) मस्मभ्यं त्वा सधमादम् (४) ॥'
(ऋ० सं० २।५।७।६) इतीमामुदाजहार (प्रा० शा० १६।४७)

तत्रोत्तमयोः पादयोः 'देवेभिय' 'अस्मभियं' इति व्यूहेन पूरणम् ।

दैव्यादयः प्रागुक्ता भेदा इहाप्यनुसन्धेयाः । तदुदाहरणानि तु—

[१] **दैवी—**'भूर्भुवः स्वः ।' (तै० आ० ३।१०।५।१)

[२] **आसुरी—**'महीनां पयोऽसि विहितं देवत्रा ।' (तै० आ० ४।१२।१)

[३] **प्राजापत्या—**'स्वस्त्यं१घोषसो दोषसंम सर्वं आपः सर्वंगणो अशीय ।'
(अथ० सं० १६।४।६)

[४] **याजुषी—**'देवानां परिषूतमसि ।' (तै० सं० १।१।२।५)

[५] **साम्नी—**'मरुतः पोत्रात् सुष्टुभः स्वर्कादृतुना सोमं पिबतु ।'
(अथ० सं० २०।२।१)

[६] **आर्ची—**'मध्वा यज्ञं नक्षति प्रैणानो नराशंसो अग्निः सुकृद्देवः सविता विश्ववारः ।' (अथ० सं० १५।२७।३)

[७] **ब्राह्मी—**'देवो अग्निः स्विष्टकृद्देवमिन्द्रं वयोधसंम् । देवो देवसंवर्धयत्
अतिच्छन्दसा छन्दसेन्द्रियम् । क्षत्रमिन्द्रे वयो दधत् ।
वसुवने वसुधेयस्य वेतु यज ॥' (तै० ब्रा० ६।२०।१)

१. उदाहरणमस्याः प्रस्तारपङ्क्त्यां द्रष्टव्यम् ।

'अग्निना तुर्वशं यदुं परावत (१) उग्रादेवं हवामहे (२)।
अग्निर्नयन्नववास्त्वं बृहद्रथं (३) तुर्वीतिं दस्यवे सहः (४)॥'
(ऋग्वेदे-अ० १ अ० ३ व० ११ मं० ३)

विपरीतौ च[1]। ३। ३९॥

यदा तावेव पादौ विपरीतौ भवतः; तदापि सतःपङ्क्तिरेव। अयमर्थः—प्रथमतृतीयौ पादौ गायत्रौ, द्वितीयचतुर्थौ [च] जागतौ तदापि सतःपङ्क्तिरेव भवति॥ यथा—

'य ऋष्वः श्रावयत्सखा (१) विश्वेत्स वेद जनिमा पुरुष्टुतः (२)।
तं विश्वे मानुषा युगे (३) न्द्रं हवन्ते तविषं यतस्रुचः (४)॥'
(ऋग्वेदे-अ० ६ अ० ४ व० ३ मं० २)

प्रस्तारपङ्क्तिः[3] पुरतः। ३। ४०॥

यदा जागतौ पादौ पूर्वौ भवतः, गायत्रौ च परतः, तदा 'प्रस्तारपङ्क्तिः' नाम। यथा-

'भद्रमिद्भद्रा कृणवत्सरस्वत्य (१) कवारी चेतति वाजिनीवती (२)।
गृणाना जमदग्निवत् (३) स्तुवाना च वसिष्ठवत् (४)॥'
(ऋग्वेदे-अ० ५ अ० ६ व० २० मं० ३)

'पङ्क्तिर्जागतौ गायत्रौ च' (पि० सू० ३।३७) इत्यनेन गतार्थमिदं संज्ञाविशेषज्ञापनार्थं पुनरुच्यते॥

आस्तारपङ्क्तिः परतः। ३। ४१॥

यदा जागतौ पादौ परौ भवतः, गायत्रौ च पूर्वौ, तदा 'आस्तारपङ्क्तिः' नाम। यथा-

'भद्रं नो अपि वातय (१) मनो दक्षमुत क्रतुम् (२)।
अधा ते सख्ये अन्धसो वि वो मदे (३) रणन् गावो न यवसे विवक्षसे (४)॥'
(ऋग्वेदे-अ० ७ अ० ७ व० ११ मं० १)

विष्टारपङ्क्तिरन्तः। ३। ४२॥

यदा जागतौ पादौ मध्ये भवतः, आद्यन्तयोश्च गायत्रौ, तदा 'विष्टारपङ्क्तिः' नाम यथा—

'अग्ने तव श्रवो वयो (१) महि भ्राजन्ते अर्चयो विभावसो (२)।
बृहद्भानो शवसा वाजमुक्थ्यं (३) दधासि दाशुषे कवे (४)॥'
(ऋग्वेदे-अ० ८ अ० ७ व० २८ मं० १)

---

१. सायणभाष्ये तु सतोबृहती नाम। २. लाघवाय 'युजौ चे'ति वक्तव्ये गौरवाङ्गीकारो 'विपरीते'ति संज्ञापीति सूचनार्थः। तथा चोक्तं शौनकेन—'विपरीता विपर्यये।' (प्रा० शा० १६।५४) इति। ३. कलिकातामुद्रितपुस्तके प्रथममास्तारपङ्क्तिः। तदयुक्तम्, 'प्रस्तारपङ्क्तिः पुरतः पश्चादास्तारपङ्क्तिका।' (३३०।१२) इत्यग्निपुराणविरोधात्, सर्वानुक्रमविरोधाच्च।

संस्तारपङ्क्तिर्बहिः । ३ । ४३ ॥

यदा तावेव जागतौ पादौ बहिर्भवतः, मध्ये च गायत्रौ, तदा 'संस्तारपङ्क्तिः' नाम छन्दः । यथा—

'पितुर्भृतो न तन्तुमित्सुदानवः (१) प्रति दध्मो यजामसि (२) ।
उषा अप स्वसुस्तमः (३) संवर्तयति वर्तनिं सुजाततां (४) ॥'
(ऋग्वेदे–अ० ८ अ० ८ व० ३० मं० ३,४)

अक्षरपङ्क्तिः पञ्चकाश्चत्वारः । ३ । ४४ ॥

पञ्चाक्षरैश्चतुर्भिः पादैः 'अक्षरपङ्क्तिः' नाम छन्दः । ननु चत्वारिंशदक्षरा पङ्क्तिश्छन्दः, तत्कथं 'पञ्चकाश्चत्वारः' इत्युच्यते ? तत्रोत्तरम्—'द्वावप्यल्पशः' (पि० सू० ३।४५) इत्यस्मात् सिंहावलोकितन्यायेनाल्पग्रहणमनुवर्तते । तेन पङ्क्तेरल्पत्वं विशेषात्प्रतिपादितं भवति । यथा—

'पश्वा न तायुं (१) गुहा चतन्तं (२)
नमो युजानं (३) नमो वहन्तम् (४) ॥'
(ऋग्वेदे–अ० १ अ० ५ व० ९ मं० १)

द्वावप्यल्पशः । ३ । ४५ ॥

पञ्चग्रहणमनुवर्तते । पञ्चाक्षराभ्यां पादाभ्यामल्पशः पङ्क्तिर्नाम छन्दो भवति, क्वचिदेव वेदे न सर्वत्र ॥ यथा—

'सदो विश्वायुः (१) शर्म सप्रथाः ।' (तै० आ० ४।११)

पदपङ्क्तिः पञ्च । ३ । ४६ ॥

'पञ्चकाः' इत्यनुवर्तते । यदा पञ्चाक्षराः पञ्च पादा भवन्ति, तदा 'पदपङ्क्तिः' नाम छन्दः । यथा—

'घृतं न पूतं (१) तनूररेपाः (२) शुचि हिरण्यम् (३) ।
तत्ते रुक्मो न (४) रोचत स्वधावः (५) ॥'
(ऋग्वेदे–अ० ३ अ० ५ व० १० मं० ६)

चतुष्कषट्कौ त्रयश्च । ३ । ४७ ॥

---

१. **कात्यायनमते** त्वियं दशाक्षरपादद्वयवती द्विपदा विराट् । **शौनकेन** पक्षद्वयमप्युक्तम्—'विराजो द्विपदाः केचित्सर्वा आहुश्चतुष्पदाः । कृत्वा पञ्चाक्षरान् पादांस्तांस्तथाक्षरपङ्क्तयः ॥' (ऋ० प्रा० शा० १७।५०) इति । साङ्ख्यायनोऽप्याह—'उत्तरस्या दशाक्षरां, तामक्षरपङ्क्तिरित्यप्याचक्षते ।' (श्रौ० सू० ७।२७) इति ।

२. भुरिग्रूपत्वादेकाक्षराधिक्यम् । कात्यायनेन तु 'पञ्चकाश्चत्वारः पङ्क्तिः' (सर्वा० ४।२) इत्येव सूत्रितम् ।

चकारः 'पञ्चकाः' इत्यनुकर्षणार्थः । यदा प्रथमश्चतुरक्षरः पादः द्वितीयः षडक्षरः, ततस्त्रयः पञ्चाक्षरास्तदा पञ्चपदा पदपङ्क्तिरेव । यथा—

'अधा ह्यग्ने (१) क्रतोर्भद्रस्य (२) दक्षस्य साधोः (३) ।
रथीर्ऋतस्य (४) बृहतो बभूथ (५) ॥'
(ऋग्वेदे-अ० ३ अ० ५ व० १० मं० २)

पथ्या पञ्चभिर्गायत्रैः । ३ । ४८ ॥

पञ्चभिरष्टाक्षरैः पादैः 'पथ्या' नाम पङ्क्तिर्भवति[2] । अस्योदाहरणम्—

'यो अर्यो मर्तभोजनं (१) परादादाति दाशुषे (२) ।
इन्द्रो अस्मभ्यं शिक्षतु (३) विभजा भूरि ते वसु (४)
भक्षीय तव राधसः (५) ॥' (ऋग्वेदे-अ० १ अ० ६ व० २ मं० १)

जगती[3] षड्भिः । ३ । ४९ ॥

'गायत्रैः' इत्यनुवर्तते । गायत्रैः षड्भिः पादैः 'जगती' नाम पङ्क्तिर्भवति । यथा—

'महि वो महतामवो (१) वरुण मित्र दाशुषे (२) ।
यमादित्या अभि द्रुहो (३) रक्षथा नेमघं नशत् (४)
दनेहसो व ऊतयः (५) सुऊतयो व ऊतयः (६) ॥'
(ऋग्वेदे-अ० ६ अ० ४ व० ७ मं० १)

---

१. वस्तुतस्त्वत्र क्रमो न विवक्षितः । यथा कथञ्चित्पादत्रयं पञ्चाक्षरम्, एकश्चतुरक्षरः, एकश्च षडक्षर इत्यर्थः । अत एव 'द्वौ वा पादौ चतुष्कश्च षट्कश्चैकत्रिपञ्चकाः । (ऋ० प्रा० शा० १६।१५) इति शौनकीयलक्षणम् 'द्वौ पादौ एकश्चतुष्कः, एकः षट्कः, त्रयश्च पञ्चाक्षरा भवन्ती'ति क्रमनैरपेक्ष्येणैव व्याचख्यावुव्वटः । तत्राद्यचतुष्कान्त्यषट्कोदाहरणम्—

'अधा ह्यग्ने० (ऋ० सं० ३।५।१०।२) इत्येव ।

तृतीयचतुष्कान्त्यषट्कोदाहरणम्—

'एभिर्नो अर्कैः (१) भवानो अर्वाङ् (२) स्वर्ण ज्योतिः (३) ।
अग्ने विश्वेभिः (४) सुमना अनीकैः (५) ॥' (ऋ० सं० ३।५।१०।३)

चतुर्थचतुष्कपञ्चमषट्कोदाहरणम्—

'अग्ने तमद्या- (१) श्वं न स्तोमैः (२) क्रतुं न भद्रं (३) हृदिस्पृशम् (४) ।
ऋध्यामा त ओहैः (५) ॥' (ऋ० सं० ३।५।१०।१)

अन्यान्यप्युदाहरणानि शाखान्तरे मृग्याणीति दिक् ।

२. यद्यप्यस्याः प्रथमेऽर्धे पादद्वयम्, उत्तरार्धे च त्रयमिति प्रायो दृश्यते, तथापि क्वचिद्वैपरीत्यस्यापि विद्यमानत्वात् न तथा नियमः । यथा—

'नकिर्देवा मिनीमसि (१) नकिरा योपयामसि (२) मन्त्रश्रुत्यं चरामसि (३) ।
पक्षेभिरपि कक्षेभि (४) रत्राभि सं रभामहे (५) ॥' (ऋ० सं० ८।७।२२।७)

३. 'महापङ्क्तिः षडष्टकाः' (प्रा० शा० १६।७१) इति शौनकः । कदाचिदत्रापि मूले 'महती' इति पाठः सम्भाव्यते ।

इति पङ्क्त्यधिकारः।

अथ त्रिष्टुब्जगत्यधिकारः।

एकेन त्रिष्टुब्ज्योतिष्मती । ३ । ५० ॥

त्रिष्टुभः प्रस्तुतत्वात्प्रत्यासत्तेश्च तस्या एव संबन्धः। एकेन त्रैष्टुभेन पादेनाधिकाराच्चतुर्भिर्गायत्रैः पञ्चपात् 'त्रिष्टुब्ज्योतिष्मती' नाम छन्दो भवति। त्रैष्टुभेन सह 'पञ्चभि-

---

१. 'पङ्क्तिः पञ्चपदे'ति यास्कः। (निरु० ७।१२।११)। **सर्वानुक्रमणिकायां कात्यायनेन** तु पङ्क्तेरष्टौ भेदा उक्ताः—**'पञ्चमं पङ्क्तिः पञ्चपदा** [१] **अथ चतुष्पदा—विराड् दशकैः** [२] **अयुजौ जागतौ सतोबृहती** [३] **युजौ चेद्विपरीता** [४] **आद्यौ चेत्प्रस्तारपङ्क्तिः** [५] **अन्त्यौ चेदास्तारपङ्क्तिः** [६] **आद्यन्त्यौ चेत्संस्तारपङ्क्तिः** [७] **मध्यमौ चेद्विष्टारपङ्क्तिः** [८]' (ऋ० सर्वा० ८) इति।
तत्र [१] **पङ्क्तिः**—(३।४८) इत्यत्रोदाहृता।

[२] **विराट्—**

'ऋतस्य॑ प॒थि वे॒धा अ॑पायि (१) श्रि॒ये मनां॑सि दे॒वासो॑ अक्रन् (२)।
दधा॑नो॒ नाम॑ म॒हो वचो॑भि॒ (३) र्वपु॑र्दृ॒शये॑ वे॒न्यो व्याव॑: (४) ॥'

(ऋ० सं० ४।७।१७।३)

चतुर्थपादे व्यूहेनाक्षरपूर्तिः।

[३–८] सतोबृहती-सतःपङ्क्तिः (३।३८), विपरीता (३।३९), प्रस्तारपङ्क्तिः (३।४०), आस्तारपङ्क्तिः (३।४१), संस्तारपङ्क्तिः (३।४३), विष्टारपङ्क्तिः (३।४२) इति उदाहृता एव।

दैव्यादिभेदानामुदाहरणानि तु—

[१] **दैवी—'नम॑स्ता॒राय॑।'** (तै० सं० ४।५।८।८)

[२] **आसुरी—'अ॒रि॒प्रा आपो॒ अप॑ रि॒प्रम॒स्मत्।'** (अथ० सं० १६।१।१०)

[३] **प्राजापत्या—'प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते।'** (साम० सं० पू० ५।२।६।१०)

[४] **याजुषी—'इन्द्र॑स्य त्वा बा॒हुभ्या॒मुद्य॑च्छे।'** (तै० सं० १।१।२)

[५] **साम्नी—'विश्वतो दावन् विश्वतो न आभर यं त्वा शविष्ठमीमहे।'** (सा० सं० पू० ५।२।६।१)

[६] **आर्ची—'वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः।**
वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः॥' (सा० सं० पू० ६।३।१३।२)

[७] **ब्राह्मी—'प्राची॒ दिग॒ग्निरधि॑पतिरसि॒तो र॑क्षि॒तादि॒त्या इष॑वः। तेभ्यो॒ नमोऽधि॑पतिभ्यो॒ नमो॑ रक्षि॒तृभ्यो॒ नम॒ इषु॑भ्यो॒ नम॑ एभ्यो अस्तु। यो॒३ऽस्मान्द्वेष्टि॒ यं व॒यं द्वि॒ष्मस्तं वो॒ जम्भे॑ दध्मः॥'** (अथ०सं० ३।२७।१)

गायत्रैः' (पि० सू० ३।४८) इत्युक्ते चत्वार एव गायत्राः पादा लभ्यन्ते। यथा 'उपाध्यायेन सह पञ्च शिष्या आगता' इत्युक्ते उपाध्यायपञ्चमाः प्रतीयन्ते॥

तथा जगती। ३। ५१॥

एकेन जागतेन पादेन चतुर्भिर्गायत्रैः पादैः पञ्चपाज्जगती 'ज्योतिष्मती' नाम छन्दो भवति॥

पुरस्ताज्ज्योतिः प्रथमेन। ३। ५२॥

प्रथमेन त्रैष्टुभेन पादेन, शेषैश्च गायत्रैः पादैः 'पुरस्ताज्ज्योतिः' नाम त्रिष्टुब भवति। यथा—

'कृधी नो अह्रयो देव सवितः (१) स च स्तुषे मघोनाम् (२)।
सहो न इन्द्रो वह्निभि (३) र्न्येषां चर्षणीनां (४) चक्रं रश्मिं न योयुवे[4] (५)॥'
(ऋग्वेदे-अ० ८ अ० ४ व० २७ मं० ४)

पूर्वेणैव गतार्थत्वाद्विशेषसंज्ञाज्ञापनार्थमिदम्। 'तथा जगती' इत्यनुवर्तनीयम्। तेनाद्येन जागतेन पादेन चतुर्भिश्च गायत्रैः 'पुरस्ताज्ज्योतिः' नाम जगती भवति। यथा—

'नमोवाके प्रस्थिते अध्वरे नरा (१) विवक्षणस्य पीतये (२)।
आयातमश्विना गत (३) मवस्युर्वामहं हुवे (४) धत्तं रत्नानि दाशुषे (५)॥'
(ऋग्वेदे-अ० ६ अ० ३ व० १७ मं० ५)

मध्येज्योतिर्मध्यमेन। ३। ५३॥

---

१. वस्तुतस्त्वत्र एकेनेति 'पथ्या पञ्चभिर्गायत्रैः' (३।४८) इत्यतो गायत्रपादस्य प्रस्तुतत्वात् प्रत्यासत्तेश्च तस्यैव संबन्धः। तस्मात् गायत्रेणैकेन पादेनाधिकारात् त्रिभिस्त्रैष्टुभैः पादैश्चतुष्पात् त्रिष्टुप् 'ज्योतिष्मती' नाम—इति व्याख्यानमेव युक्तम्, 'ततो ज्योतिर्यतोऽष्टकः।' (ऋ० प्रा० १६।६६) इति शौनकीयमप्येवं सङ्गच्छते।

२. 'एकेन गायत्रेण पादेन त्रिभिर्जागतैश्चतुष्पाद् 'ज्योतिष्मती' नाम।' इति व्याख्यानान्तरम्।

३. 'प्रथमेन गायत्रेण पादेन शेषैश्च त्रैष्टुभैस्त्रिभिः 'पुरस्ताज्ज्योतिः त्रिष्टुब्'।' यथा—
'मा छिदो मृत्यो मा वधीः (१)। मा मे बलं विवृहो मा प्रमोषीः (२)।
प्रजां मा मे रीरिष आयुरुग्र (३)। नृचक्षसं त्वा हविषा विधेम (४)॥'
(तै० आ० ३।१५।२)

४. द्वितीयचतुर्थपादयोर्व्यूहेनाक्षरपूर्तिः। ५. 'गायत्रेण पादेन त्रिभिर्जागतैः'। यथा—
'ताभिरायातं वृषणो (१) प मे हवं विश्वप्सुं विश्ववार्यम् (२)।
इषा मंहिष्ठा पुरुभूतमा नरा (३) याभिः क्रिविं वावृधुस्ताभिरा गतम् (४)॥'
(ऋ० सं० ६।२।७।२)

यदा मध्यमस्त्रैष्टुभः पादो भवति, उभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योतिः' नाम त्रिष्टुब् भवति । मध्येज्योतिरित्यलुक्समासः । यथा—

'बृहद्भिरग्ने अर्चिभिः (१) शुक्रेण देव शोचिषा (२) ।
भरद्वाजे समिधानो यविष्ठ्य (३) रेवन्नः शुक्र दीदिहि (४) द्युमत्पावक दीदिहि(५)॥'
(ऋग्वेदे–अ० ४ अ० ८ व० २ मं० २)

'तथा जगती' इत्यनुवर्तनीयम् । त्रेन मध्यमेन जागतेन एकेन जागतेन मध्यमेन तृतीयेनोभयतश्च द्वौ द्वौ गायत्रौ, तदा 'मध्येज्योतिः' नाम जगती भवति । यथा—

'यन्मे नोक्तं तद्रवतां (१) शकेयं यदनुब्रुवे (२) ।
निशामतं निशामहै मयि व्रतं (३) सह व्रतेषु भूयासं (४) ब्रह्मणा सङ्गमेमहि (५)॥'
(ऋग्वेदे–अ० ८ अ० ८ व० ९ परि० मं० ४)

उपरिष्टाज्ज्योतिरन्त्येन । ३ । ५४ ॥

यदा चत्वारो गायत्राः पादा भवन्ति, अन्ते च त्रैष्टुभः, तदा 'उपरिष्टाज्ज्योतिः' नाम त्रिष्टुब् भवति ।

---

१. यदा मध्यमो गायत्रो द्वितीयः पादो भवति उत्तरतश्च द्वौ त्रैष्टुभौ [१], यदा वा पूर्वौ अन्तिमश्चैकस्त्रैष्टुभः [२], तदा 'मध्येज्योतिर्नाम त्रिष्टुब्' भवति । यथा—

[१] 'स नो युवेन्द्रो जोहूत्रः सखा (१) शिवो नरामस्तु पाता (२) ।
यः शंसन्तं यः शशमानमूती (३) पचन्तं च स्तुवन्तं च प्रणेषत् (४) ॥'
(ऋ० सं० २।६।२५।३)

[२] 'आवो रुवण्युमौशिजो हुवध्यै (१) घोषेव शंसमर्जुनस्य नंशे (२) ।
प्र वः पूष्णे दावन आँ (३) अच्छा वोचेय वसुतातिमग्नेः (४) ॥'
(ऋ० सं० २।१।१।५)

२. 'एकेन गायत्रेण मध्यमेन द्वितीयेनोत्तरतश्च जागताभ्यां [१], प्रथमद्वितीयाभ्यां चतुर्थेन च जागतेन [२], 'मध्येज्योतिर्जगती' भवति ।' यथा—

[१] 'यद्वा यज्ञं मनवे सं मिमिक्षथु (१) रेवेत्काण्वस्य बोधतम् (२) ।
बृहस्पतिं विश्वान्देवाँ अहं हुव (३) इन्द्राविष्णू अश्विना वा शुहेषसा (४) ॥'
(ऋ० सं० ५।८।३४।२)

[२] 'तदश्विना भिषजा रुद्रवर्तनी (१) । सरस्वती वयति पेशो अन्तरः (२) ।
अस्थि मज्जानं मासरैः (३) । कारोतरेण दधतो गवां त्वचि (४) ॥'
(तै० ब्रा० २।६।४।३)

३. 'यदा त्रयस्त्रैष्टुभाः पादा भवन्ति, अन्ते च गायत्रस्तदा 'उपरिष्टाज्ज्योतिस्त्रिष्टुब्' नाम भवति ।' यथा—

'स इह्लेचिदभि तृणत्ति वाज (१) मर्वता स धत्ते अक्षिति श्रवः (२) ।
त्वे देवत्रा सदा पुरूवसो (३) विश्वा वामानि धीमहि (४) ॥'
(ऋ० सं० ६।७।१३।५)

यथा—

'संवेशिनीं संयमिनीं (१) ग्रहनक्षत्रमालिनीम् (२) ।
प्रपन्नोऽहं शिवां रात्रीं (३) भद्रे पारमशीमहि (४) भद्रे पारमशीमह्यों नमः (५) ॥'
(ऋग्वेदे-अ० ८ अ० ७ व० १४ परि० मं० ४)

'तथा जगती' इत्यनुवर्तनीयम् । तेनान्तेन जागतेन पादेन शेषैश्च गायत्रैश्चतुर्भिः 'उपरिष्टाज्ज्योतिः' नाम जगती भवति । यथा—

'लोकं पृण छिद्रं पृण (१) । अथो सीद शिवात्वम् (२) । इन्द्राग्नी त्वा बृहस्पतिः(३) । अस्मिन् योनावसीषदन् (४) । तया देवतयाङ्गिरस्वद्भुवा सीद (५) ॥'
(यजुर्वेदे-तै० ब्रा० अ० ३ प्र० ११ अ० ६ मं० ३)

इति त्रिष्टुब्जगत्यधिकारः ।

---

१. 'हिओं' इति व्यूहेनाक्षरपूर्तिः । २. 'तथा जगती'त्यनुवर्तनीयम् । तेनान्तेन गायत्रेण शेषैश्च जागतैस्त्रिभिः 'उपरिष्टाज्ज्योतिर्जगती' नाम भवति । यथा—

'अग्निरत्रिं भरद्वाजं गविष्ठिरं (१) प्रावन्नः कण्वं त्रसदस्युमाहवे (२) ।
अग्निं वसिष्ठो हवते पुरोहितो (३) मृळीकाय पुरोहितः (४) ॥'
(ऋ० सं० ८।८।८।५)

३. 'तु अ' इति व्यूहेनाक्षरपूर्तिः । ४. अक्षराधिक्याद्भुरिक् । एवमेवोत्तरत्र समाधेयम् । ५. 'त्रिष्टुप् स्तोभत्युत्तरपदा । का तु त्रिता स्यात्? तीर्णतमं छन्दः । त्रिवृद्वज्रस्तस्य स्तोभतीति वा । यत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमिति विज्ञायते ।' इति **यास्कः ।** (नि० ७।१५।१२) । क्वचित्तु त्रिष्टुगित्यपि श्रूयते—'एकादशाक्षरा त्रिष्टुगिन्द्रियं त्रिष्टुक् ।' (तै० सं० ६।३।३) 'चतुश्चत्वारिंशदक्षरा त्रिष्टुक् ।' (तै० सं० ७।२।६) 'त्रिष्टुग्भवति । इन्द्रियं वै त्रिष्टुक् ।' (तै० ब्रा० ३।३।९) इत्यादौ ।

सर्वानुक्रमणिकायां कात्यायनाचार्योक्ताः—'षष्ठं त्रिष्टुप्, त्रैष्टुभपदा [१] द्वौ तु जागतौ यस्याः सा जागते जगती, त्रैष्टुभे त्रिष्टुप् [२] वैराजौ जागतौ चाभिसारिणी [३] नवकौ वैराजस्त्रैष्टुभश्च; द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना [४] एकादशिनस्त्रयोऽष्टकश्च विराड्रूपा [५] द्वादशिनस्त्रयोऽष्टकश्च ज्योतिष्मती [६] यतोऽष्टकस्ततो ज्योतिः [७] चत्वारोऽष्टका जागतश्च महाबृहती [८] मध्ये चेद्यवमध्या [९] आद्यौ दशकावष्टकास्त्रयः पङ्क्त्युत्तरा, विराट्पूर्वा वा [१०]' (ऋ० सर्वा० ९) इति दशविधास्त्रिष्टुभः.

तत्र विशिष्टानामुदाहरणानि प्रदर्श्यन्ते ।

[१] त्रिष्टुप्—

'कस्य नूनं कतमस्यामृतानां (१) मनामहे चारु देवस्य नाम (२) ।
को नो मह्या अदितये पुनर्दात् (३) पितरं च दृशेयं मातरं च (४) ॥'
(ऋ० सं० १।२।१३।१)

[२] **जागतद्विपादा १ त्रिष्टुप्—**

'यूपव्रस्का उत ये यूपवाहा (१) श्रपालं ये अश्वयूपाय तक्षति (२) ।
ये चार्वतो पचनं सम्भरं (३) न्त्युतो तेषामभिगूर्तिर्न इन्वतु (४) ॥'

(ऋ० सं० २।३।८।१)

२ **जगती—**

'अस्मै भीमाय नमसा समध्वर (१) उषो न शुभ्र आभरा पनीयसे (२) ।
यस्य धाम श्रवसे नामेन्द्रियं (३) ज्योतिरकारि हरितो नायसे (४) ॥'

(ऋ० सं० १।४।२२।३)

[३] **अभिसारिणी—**

'यो व्याचा विवाचो मृध्रवाचः (१) पुरू सहस्राशिवा जघान (२) ।
तत्तदिदस्य पौंस्यं गृणीमसि (३) पितेव यस्तविषीं वावृधे शवः (४) ॥'

(ऋ० सं० ७।७।९।५)

[४] **विराट्स्थाना १—**

'स्वस्ति न इन्द्रो वृद्धश्रवाः (१) स्वस्ति नः पूषा विश्ववेदाः (२) ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः (३) स्वस्ति नो बृहस्पतिर्दधातु (४) ॥'

(ऋ० सं० १।६।१६।१)

२—

'धिष्वा शवः शूर येन वृत्र (१) मवाभिनद्दानुमौर्णवाभम् (२) ।
अपावृणोर्ज्योतिरार्याय (३) नि सव्यतः सादि दस्युरिन्द्र (४) ॥'

(ऋ० सं० २।६।६।३)

अत्र क्रमस्याविवक्षितत्वादन्येऽपि भेदा भवन्ति, तेषामुदाहरणानि (ऋ० सं० २।६।३-६) इत्यादौ द्रष्टव्यानि ।

[५] **विराड्रूपा**—व्याख्यानान्तरपक्षे ज्योतिष्मत्या गता ।

[६] **ज्योतिष्मती**—उदाहृता ।

[७] **ज्योतिः**—सभेदा पुरस्तादुदाहृता ।

[८] **महाबृहती**—उपरिष्टाज्ज्योतिषा गता ।

[९] **यवमध्या**—मध्येज्योतिरेव ।

[१०] **पङ्क्त्युत्तरा, विराट्पूर्वा वा—**

'समिन्द्रेरय गामनड्वाहं (१) य आवहदुशीनराण्या अनः (२) । भरतामप यद्रपो (३) द्यौः पृथिवि क्षमा रपो (४) मोषु ते किञ्चना ममत्(५) ॥'

(ऋ० सं० ८।१।२३।५)

तत्रैतादृशि त्रिष्टुप्छन्दसि विशेषमाह **कात्यायनाचार्यः**—'बहूना अपि त्रिष्टुभ एवेत्युद्देशः' (ऋ० सर्वा० ३।१०) इति । अस्यार्थस्तु-त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वे प्राप्ते सति बहुभिरक्षरैरूना अपि विराड्रूपादयस्त्रिष्टुबधिकारोक्ताः त्रिष्टुभ एव स्युः । एतेन पञ्चभिश्च-

तुर्भिस्त्रिभिर्वाक्षरैरूना अपि ऋचास्त्रिष्टुप्सूक्तस्थास्त्रिष्टुभ एव, न तु तासां निचृत्पङ्क्तित्वभुरिक्पङ्क्तित्वादि। यथा—

'अस्मा इदु त्यमुपमं स्वर्षां (१) भराम्याङ्गूषमास्येन (२)।
मंहिष्ठमच्छोक्तिभिर्मतीनां (३) सुवृक्तिभिः सूरिं वावृधध्यै (४)॥'
(ऋ० सं० १।४।२७।३)

इत्येषा षड्भिरक्षरैरूनापि त्रिष्टुबेव। इतिशब्दः प्रकारे। उद्देशः सङ्क्षेपः। पूर्वोक्तप्रकारो बहूनेषु तत्तदधिकारात्तदात्मकसप्तच्छन्दस्सु गायत्र्यादिष्वभिमत इत्यर्थः। तेन 'त्रयः सप्तकाः पादनिचृदि'त्येकविंशत्यक्षरापि, 'मध्यमः षट्कश्चेदतिनिचृदि'ति च विंशत्यक्षरापि गायत्र्येवेत्यादि सिद्धं भवति। समामनन्ति हि—'न वा एकेनाक्षरेण छन्दांसि वियन्ति, न द्वाभ्याम्' (ऐ० ब्रा० १।६।१) इति। न वियन्ति अन्यत्वं न गच्छन्तीत्यर्थः। द्व्येकयोरुपलक्षणत्वाद्बहूनेष्वपि भवतीति। एतेन—'न्य१ग्वातोऽव वाति (१) न्यक्तपति सूर्यः (२)। नीचीनमघ्न्या दुहे (३) न्यग्भवतु ते रपः (४)॥' (ऋ० सं० ८।१।२५।५) इत्यस्याः एकविंशत्यक्षराया अप्यनुष्टुप्त्वमपि व्याख्यातम्।

अथ दैव्यादयः प्रदर्श्यन्ते—

[१] दैवी—'देवं गममसि।' (तै० सं० १।१।२।२०,

[२] आसुरी—'स्वधा पितृभ्यः पृथिविषद्भ्यः।' (अथ० सं० १८।४।७८)

[३] प्राजापत्या—'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। आददे नारिरसि।' (शु० वा० सं० ३७।१)

[४] याजुषी—'अग्निजा असि प्रजापते रेतः।' (तै० आ० ४।२।१५)

[५] साम्नी—'ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र।'
(सा० सं० पू० ५।२।७।९)

[६] आर्ची—एता असदन्त्सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञनियम्।' (तै० सं० १।१।११)

[७] ब्राह्मी—'वि य और्णोत् पृथिवीं जायमान आ समुद्रमदधादन्तरिक्षे।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति।
उद्वेपय रोहित प्रक्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान्॥
(अथ० सं० १३।३।२२)

६. 'जगती गततमं छन्दः। जलचरगतिर्वा, जल्गल्यमानोऽसृजदिति च ब्राह्मणम्।' इति निरुक्तम् (७।१३।१)। कात्यायनाचार्योक्ता यथा—**'सप्तमं जगती, जागतपदा [१] अष्टिनस्त्रयः स्वौ च द्वौ महासतोबृहती [२] अष्टकौ सप्तकः षट्को दशको नवकश्च; षडष्टका वा महापङ्क्तिः [३] (ऋ० सर्वा० १०)** इति त्रिविधा जगत्यः.

[१] तत्र जगती—प्रदर्शयिष्यते (४।७) इत्यत्र।

एकस्मिन्पञ्चके छन्दः शङ्कुमती । ३ । ५५ ॥

यदैकः पञ्चाक्षरः पादो भवति, त्रयश्च षडक्षराः, तदा 'शङ्कुमती' नाम गायत्री । यथा—

['तिस्रो देवीर्बर्हिः (१) रेदꣳ सदन्त्विडा (२) सरस्वती भारती (३) ।
मही गृणाना (४) ॥' (य० तैत्तिरीयसंहिता—कां० ४ प्र० १ अ० ८ मं० ९)]

---

[२] महासतो बृहती—

'आ यः पप्रौ भानुना रोदसी उभे (१) धूमेन धावते दिवि (२) ।
तिरस्तमो ददृश ऊर्म्यास्वा (३) श्यावास्वरुषो वृषा (४)
श्यावा अरुषो वृषा (५) ॥' (ऋ० सं० ४।८।२।१)

[३] महापङ्क्तिः-१—

'सूर्ये विषमा सजामि (१) दृतिं सुरावतो गृहे (२) । सो चिन्नु न मराति (३) नो वयं मरामा (४) रे अस्य योजनं हरिष्ठा (५) मधु त्वा मधुला चकार (६) ॥' (ऋ० सं० २।५।१५।५)

२—षडष्टका (३।४९) इत्यत्रोदाहृता ।

दैव्यादिप्रागुक्तभेदोदाहरणान्यपि प्रदर्श्यन्ते । तत्र—

[१] दैवी—'ओषधे त्रायस्वैनम् ।' (तै० सं० १।२।१।२)

[२] आसुरी—'मधु त्वा मधुला करोतु ।' (तै० आ० ४।२।१८)

[३] प्राजापत्या—'हरिः पतङ्गः पटरी सुपर्णः । दिविक्षयो नभसा य एति । स न इन्द्रः कामवरं ददातु ॥' (तै० आ० ३।११)

[४] याजुषी—'नमः शर्वाय च पशुपतये च ।' (तै० सं० ४।५।५।२)

[५] साम्नी—'श्रियं च वा एष संविदं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ।' (अथ० सं० ९।६।३।६)

[६] आर्ची—'बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौक् ।' (तै० सं० १।१।९।६)

[७] ब्राह्मी—'आपो वा इदꣳ सर्वं विश्वा भूतान्यापः । प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दाꣳसि-स्यापो ज्योतीꣳष्यापो यजूꣳष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ओम् ।' (तै० आ० १०।२२)

१. 'यदैकः पञ्चाक्षरः पादो भवति त्रयश्च द्वादशाक्षरास्तदा 'शङ्कुमती जगती' नाम छन्दो भवति ।' इति क. मु. पु. टिप्पण्यां लिखितपुस्तके च । २. इदं चिन्त्यमेव । एकस्य पादस्य पञ्चाक्षरत्वमात्रं ह्यत्र विवक्षितम् । तथा च लक्ष्यमपि—

१ 'युक्तेन मनसा वयं (१) देवस्य सवितुः सवे (२) ।
स्वर्ग्याय शक्त्यै (३) ॥' (शु० य० सं० ११।२)

छन्दोग्रहणे प्रकृते पुनश्छन्दोग्रहणं छन्दोमात्रप्रतिपत्त्यर्थम् । तेन सर्वेषु छन्दःसु पञ्चाक्षरैकपादलक्षिता शङ्कुमती भवति । इतरथा ह्यनन्तरं सम्प्रत्ययः स्यात् ॥

षड्के ककुद्मती । ३ । ५६ ॥

एकस्मिन् षडक्षरे पादे, अन्येषु यथालक्षणमुपात्तेषु च्छन्दोमात्रं, ककुद्मती नाम ।

१.–२ **उष्णिहो** यथा—'सुवीर्यं स्वश्व्यं (१) सुगव्यमिन्द्र दद्धि नः (२) ।
होतेव पूर्वचित्तये प्राध्वरे ॥' (ऋ० सं० ६।१।६।८)

३ **अनुष्टुभो** यथा—'पितुं नु स्तोषं (१) महो धर्माणं तविषीम् (२) । यस्य त्रितो व्योजसा (३) वृत्रं विपर्वं मर्दयत् (४) ॥' (ऋग्वेदे–अ०२अ०५व०६मं०१)

४ **बृहत्या** यथा—'वास्तोष्पते ध्रुवा स्थूणां (१) संत्रं सोम्यानाम् (२) ।
द्रप्सो भेत्ता पुरां शश्वतीना (३) मिन्द्रो मुनीनां सखा (४) ॥'
(ऋ० सं० ६।१।२४।४)

५ **पङ्क्त्या** यथा—'अग्ने तव त्यदुक्थ्यं (१) देवेष्वस्त्याप्यम् (२) ।
स नः सत्तो मनुष्वदा (३) देवान्यक्षि विदुष्टरो (४)
वित्तं मे अस्य रोदसी (५) ॥' (ऋ० सं०१।७।२२।३)

६ **त्रिष्टुभो** यथा—'विधुं दद्राणं समने बहूनाम् (१) । युवानꣳ सन्तं पलितो जगार (२) । देवस्य पश्य काव्यं महित्वाद्यामार (३) ।
स ह्यः समान (४) ॥' (तै० आ० ४।२०।३)

७ **जगत्या**—मृग्यम् ।

२. अत्र दकारो 'यरोऽनुनासिकेऽनुनासिको वा' (पाणि० सू० ८।४।४५) इति छन्दसि पाक्षिकः । भाषायां तु यवादिगणे निपातनात् । ककुब्मती, ककुम्मती, इति क. मु.पुस्तके । तत्र—

१ **गायत्र्या** यथा—'नि येन मुष्टिहत्यया (१) नि वृत्रा रुणधामहै (२) ।
त्वोतासो न्यर्वता (३) ॥' (ऋ० सं० १।१।१५।२)

२ **उष्णिहो** यथा—'स्तुहीन्द्रं व्यश्ववद् (१) दनूर्मिं वाजिनं यमम् (२) ।
अर्यो गयं मंहमानं वि दाशुषे (३) ॥' (ऋ०सं०६।२।१९।२)

३ **अनुष्टुभो** यथा—'स पूर्व्यो महानां (१) वेनः क्रतुभिरानजे (२) । यस्य द्वारा मनुष्पिता (३) देवेषु धिय आनजे (४) ॥' (ऋग्वेदे–अ०६ अ०४ व० ४२ मं०३)

४ **बृहत्या** यथा—'एन्द्र याहि मत्स्व (१) चित्रेण देवराधसा (२) । सरो न प्रास्युदरं सपीतिभि (३) रा सोमेभिरुरु स्फिरम् (४)॥'(ऋ०सं०अ०५अ०७व०१४मं०३)

५ **पङ्क्त्या** यथा—'असदत्र सुवीर्य (१) मुत त्यदाश्वश्व्यम् (२) । देवानां य इन्मनो (३) यजमान इयक्षत्य (४) भीदयज्वनो भुवत् ॥' (ऋ० सं० अ० ६ अ० २ व० ४० मं० ८)

६ **त्रिष्टुभो** यथा—'विश्वेदेवा अनमस्यन्भियाना (१) स्त्वामग्ने तमसि तस्थिवांसम् (२) । वैश्वानरोऽवतूतये नोऽमर्त्यो (३) ऽवतूतये नः (४) ॥'
(ऋ० सं० अ० ४ अ० ५ व० ११ मं० ७)

त्रिपादणिष्ठमध्या पिपीलिकमध्या[1] । ३ । ५७ ॥

यदाद्यन्तौ पादौ बह्वक्षरौ, मध्यमोऽल्पतराक्षरः, तदाणिष्ठमध्या सती 'पिपीलिकमध्या' नाम भवति । अयमर्थः—आद्यन्तौ पादावष्टाक्षरौ, मध्यमस्त्र्यक्षरः, एवं त्रिपाद्गायत्री पिपीलिकमध्या नाम भवति । एवं चतुरक्षरे पञ्चाक्षरेऽपि मध्यमे पादे पिपीलिकमध्या सिद्ध्यति । यत्किंचित्त्रिपाच्छन्दो लघुमध्यमपादं तत्सर्वं पिपीलिकमध्यमुच्यते ॥

विपरीता यवमध्या । ३ । ५८ ॥

आद्यन्तौ पादौ लघ्वक्षरौ, मध्यमश्च बह्वक्षरः, सा गायत्री 'यवमध्या' नाम भवति । एवमुष्णिगादिष्वपि योज्यम् ॥

ऊनाधिकेनैकेन निचृद्भुरिजौ । ३ । ५९ ॥

चतुर्विंशत्यक्षरा गायत्री एकेनाक्षरेण न्यूनेन सा 'निचृत्' इति विशेषसंज्ञां लभते । एकेनाधिकेन 'भुरिक्' इति । एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥

---

१. 'पिपीलिकमध्येत्यौपमिकम्' (नि० ७।१३।३) इति **यास्कः** ।

१ **गायत्र्या** यथा—'नृभिर्येमानो हर्यतो (१) विचक्षणो (२) राजा देवः समुद्रियः (३) ॥' (ऋग्वेदे-अ० ७ अ० ५ व० १५ मं० १)

२ **उष्णिहो** यथा—'हरी यस्य सुयुजा विव्रता वे (१) रर्वन्ता नु शेपा (२) । उभा रजी न केशिना पतिर्दन् (३) ॥' (ऋग्वेदे-अ० ८ अ० ५ व० २६ मं० २)

३ **अनुष्टुभो** यथा—'पर्यूषु प्र धन्व वाजसातये (१) परि वृत्राणि सक्षणिः (२) । द्विषस्तरध्या ऋणया न ईयसे (३) ॥' (ऋग्वेदे-अ० ७ अ० ५ व० २२ मं० १)

४ **बृहत्या** यथा—'अभिवो वीरमन्धसो मदेषु गाय (१) गिरा महा विचेतसम् (२) । इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा (३) ॥' (ऋ०सं०अ०६अ०४व०३मं०४)

२. **गायत्र्या** यथा—'स सुन्वे यो वसूनां (१) यो रायामानेता य इळानाम् (२) । सोमो यः सुक्षितीनाम् (३) ॥' (ऋ० सं० ७।५।१९।३)

उष्णिहो यथा—'सुदेवः समहासति (१) सुवीरो नरो मरुतः स मर्त्यः (२) । यं त्रायध्वे स्याम ते (३) ॥' (ऋग्वेदे-अ० ४ अ० ३ व० १३ मं० ५)

३. **निचृद्गायत्र्या** यथा—'अग्निमिन्धानो मनसा (१) धियं सचेत मर्त्यः (२) । अग्निमीधे विवस्वभिः (३) ॥' (ऋग्वेदे-अ० ६ अ० ७ व० १२ मं० ७)

निचृदुष्णिहो यथा—'स इधानो वसुष्कवि (१) रग्निरीळेन्यो गिरा (२) । रेवदस्मभ्यं पुर्वणीक दीदिहि (३) ॥' (ऋ० सं० १।५।२७।५)

निचृदनुष्टुभो यथा—त्वेषस्ते धूम ऋण्वति (१) दिविषञ्छुक्र आततः (२) । सूरो नहि द्युता त्वं (३) कृपा पावक रोचसे (४) ॥'

(ऋग्वेदे-अ० ४ अ० ५ व० २ मं० १)

निचृद्बृहत्या यथा—'बलं धेहि तनूषु नो (१) बलमिन्द्रानळुत्सु नः (२)। बलं तोकाय तनयाय जीवसे (३) त्वं हि बलदा असि (४) ॥'

(ऋग्वेदे–अ० ३ अ० ३ व० २२ मं० ३)

निचृत्पङ्क्त्या यथा—'यच्चिद्धि सत्यसोमपा (१) अनाशस्ता इव स्मसि (२)। आतू न इन्द्र शंसय (३) गोष्वश्वेषु शुभ्रिषु (४) सहस्रेषु तुवीमघ (५) ॥'

(ऋ० सं० १।२।२७।१)

निचृत्त्रिष्टुभो यथा—'इदन्त एकं पर ऊ त एकं (१) तृतीयेन ज्योतिषा सं विशस्व (२)। संवेशने तन्व१श्चारुरेधि (३) प्रियो देवानां परमे जनित्रे (४) ॥'

(ऋग्वेदे–अ० ८ अ० १ व० १८ मं० १)

निचृज्जगत्या यथा—शतक्रतुमर्णवं शाकिनं नरं (१) गिरो म इन्द्रमुपयन्ति विश्वतः (२)। वाजसनिं पूर्भिदं तूर्णिमप्तुरं (३) धामसाचमभिषाचं स्वर्विदम् (४) ॥'

(ऋग्वेदे–अ० ३ अ० ३ व० १५ मं० २)

साङ्ख्यायनसूत्रे तु—'एकेन द्वाभ्यामित्यूनके निचृत्, अतिरिक्ते भुरिक्' (शां० श्रौ० सू० ७।२७) इति विराट् स्वराजावप्यत्रैवान्तर्भाविते।

४. **भुरिग्गायत्र्या** यथा—'परि द्युक्षः सनद्रयि (१) भरद्वाजं नो अन्धसा (२)। सुवानो अर्ष पवित्र आ (३) ॥' (ऋ० सं० ७।१।९।१)

भुरिगुष्णिहो यथा—'अप योरिन्द्रः पापज (१) आ मर्तो न शश्रमाणो बिभीवान् (२)। शुभे यद्युयुजे तविषीवान् (३) ॥' (ऋ० सं० ८।५।२६।३)

भुरिगनुष्टुभो यथा—'तां म आवह जातवेदो (१) लक्ष्मीमनपगामिनीम् (२)। यस्यां हिरण्यं विन्देयं (३) गामश्वं पुरुषानहम् (४) ॥' (ऋ०सं० ४।४।३४ परि०२)

भुरिग्बृहत्या यथा—'आ नः स्तोममुप द्रव (१) ह्रियानो अश्वो न सोतृभिः (२)। यं ते स्वधावन्त्स्वदयन्ति धेनव (३) इन्द्र कण्वेषु रातयः (४) ॥'

(ऋ० सं० ६।४।१४।५)

भुरिक्पङ्क्त्या यथा—'देवीरापो अपान्नपा (१) द्यो व ऊर्मिर्हविष्य (२) इन्द्रियावान्मदिन्तमः (३)। तं देवेभ्यो देवत्रा दत्त (४) शुक्रपेभ्यो येषां भागःस्थ (५) ॥' (शु० य० ६।२७)

भुरिक्त्रिष्टुभो यथा—'प्र ऋभुभ्यो दूतमिव वाचमिष्य (१) उपस्तिरे श्वैतरीं धेनुमीळे (२)। ये वातजूतास्तरणिभिरेवैः (३) परि द्यां सद्यो अपसो बभूवुः (४) ॥'

(ऋग्वेदे–अ० ३ अ० ७ व० १ मं० १)

भुरिग्जगत्या यथा—हयो न विद्वाँ अयुजि स्वयं धुरि (१) तां वहामि प्रतरणीमवस्युवम् (२)। नास्या वश्मि विमुचं नावृतं पुन (३) विद्वान्पथःपुरएत ऋजु नेषति (४) ॥' (ऋग्वेदे–अ० ४ अ० २ व० २८ मं० १)

द्वाभ्यां विराट्स्वराजौ । ३ । ६० ॥

'ऊनाधिक'ग्रहणमनुवर्तते । द्वाभ्यामक्षराभ्यां न्यूनाधिकाभ्यां गायत्री यथाक्रमं विराट्-स्वराट्-संज्ञा भवति । एवमुष्णिगादिष्वपि द्रष्टव्यम् ॥[3]

---

१. **विराड्गायत्र्या** यथा—'राजन्तमध्वराणां (१) गोपामृतस्य दीदिविम् (२) । वर्धमानं स्वे दमे (३) (ऋग्वेदे-अ० १ अ० १ व० २ मं० ३)

विराडुष्णिहो यथा—'त्वामग्ने मनीषिणः (१) सम्राजं चर्षणीनाम् (२) । देवं मर्तास इन्धते समध्वरे (३) ॥' (ऋग्वेदे-अ० ३ अ० १ व० ७ मं० १)

विराडनुष्टुभो यथा—'त्वामग्ने हविष्मन्तो (१) देवं मर्तास ईळते (२) । मन्ये त्वा जातवेदसं (३) स हव्या वक्ष्यानुषक् (४) ॥'

(ऋग्वेदे-अ० ४ अ० १ व० १ मं० १)

विराड्बृहत्या यथा—'अग्ने विवस्वदुषसः (१) श्चित्रं राधो अमर्त्य (२) । आ दाशुषे जातवेदो वहा त्व (३) मद्या देवाँ उषर्बुधः (४) ॥'

(ऋग्वेदे-अ० १ अ० ३ व० २८ मं० १)

विराट्पङ्क्त्या यथा—'नूनं इद्धि वार्यं (१) मासा सचन्त सूरयः (२) । ऊर्जो न पादभिष्टये (३) पाहि शग्धि स्वस्तय (४) उतैधि पृत्सुनो वृधे (५) ॥'

(ऋ० सं० ४।१।९।५)

विराट्त्रिष्टुभो यथा—'इदं नमो वृषभाय स्वराजे (१) सत्यशुष्माय तवसेऽवाचि (२) । अस्मिन्निन्द्र वृजने सर्ववीराः (३) स्मत्सूरिभिस्तव शर्मन्त्स्याम (४)॥'

(ऋग्वेदे-अ० १ अ० ४ व० ११ मं० ५)

विराड्जगत्या यथा—यूयमस्मभ्यं धिषणाभ्यस्परि (१) विद्वांसो विश्वा नर्याणि भोजना (२) । द्युमन्तं वाजं वृषशुष्ममुत्तम (३) मा नो रयिमृभवस्तक्षता वयः (४) ॥ (ऋग्वेदे-अ० ३ अ० ७ व० ८ मं० ३)

२. **स्वराड्गायत्र्या** यथा—'जोषा सवितुर्यस्य ते (१) हरः शतं सवाँ अर्हति (२) । पाहि नो दिद्युतः पतन्त्याः (३) ॥' (ऋग्वेदे-अ० ८ अ० ८ व० १६ मं० २)

स्वराडुष्णिहो यथा—'अश्विना घर्मं पातꣳ हार्द्वान (१) महर्दिवाभिरूतिभिः (२) । तन्त्रायिणे नमो द्यावा पृथिवीभ्याम् (३) ॥' (शु० य० ३८।१२)

स्वराडनुष्टुभो यथा—'यस्ते द्रप्सः स्कन्नो यस्ते अंशु (१) र्ग्रावच्युतो धिषणयोरुपस्थात् य: पर: स्रुचा (२) । अयं देवो बृहस्पतिः (३) सं तं सिञ्चतु राधसे (४) ॥'

(ऋ० सं० ७।६।२५।३)

स्वराड्बृहत्या यथा—'प्राणदा अपानदा व्यानदा (१) वर्चोदा वरिवोदाः (२) । अन्याँस्ते अस्मत्तपन्तु हेतयः (३) पावको अस्मभ्यꣳ शिवो भव (४) ॥'

(शु० य० १७।१५)

आदितः संदिग्धे । ३ । ६१ ॥

यदा षड्विंशत्यक्षरं छन्दो भवति, तदा किं प्रतिपत्तव्यम्?। किं गायत्री स्वराड्? उतोष्णिग्विराड्? इति । एवं संदिग्धे सति छन्दस्यादिभूतात् पादान्निर्णयः कर्तव्यः । यदि प्रथमः पादो गायत्र्यास्तदा गायत्र्येवासौ । अथोष्णिहस्तदोष्णिग् इति । एवं सर्वत्र ॥

देवतादितश्च । ३ । ६२ ॥

इदमपरं निर्णयनिमित्तमुच्यते । संदिग्धे छन्दसि देवतादेश्च निर्णयः कर्तव्यः । 'आदि'ग्रहणं स्वरादिपरिग्रहार्थम् ॥

स्वराट्पङ्क्त्या यथा—अयाश्चाग्नेऽस्यनभिशस्तीश्च (१) सत्यमित्त्वमया असि (२) । अयासावयसा कृतो (३) ऽया सन् हव्यमूहिषे (४) ऽया नो धेहि भेषजम् (५) ॥' (आश्व० श्रौ० सू० १।११।१३)

स्वराट्त्रिष्टुभो यथा—'इन्द्रासोमा परि वां भूतु विश्वत (१) इयं मतिः कक्ष्याश्वेव वाजिना (२)। यां वां होत्रां परिहिनोमि मेधये (३) मा ब्रह्माणि नृपतीव जिन्वतम् (४) ॥' (ऋग्वेदे–अ० ५ अ० ७ व० ६ मं० १)

स्वराड्जगत्या यथा—'आरोहतं दशतꣳशर्करीर्मम (१)। ऋतेनाग्न आयुषा वर्चसा सह (२)। ज्योग्जीवन्त उत्तरामुत्तराꣳ समाम् (३)। दर्शमहं पूर्णमासं यज्ञं यथा यजै (४) ॥' (तै० ब्रा० १।२।१।३५)

३. 'स्वराड्वै तच्छन्दो यत्किञ्च चतुस्त्रिंशदक्षरम्' (सां० ब्रा० १७।१) इति श्रुतिस्त्वनुष्टुप्परा । विशेषेण राजत इति विराट् । स्वेनैव राजत इति स्वराट् ।

१. 'उष्णिग्गायत्रौ जागतश्च' (छं० शा० ३।१८) इत्यनुशासनेनोष्णिहः प्रथमपादस्यापि गायत्रत्वान्नेदं सूत्रं गायत्र्युष्णिहोः सन्देहे नियामकं भवितुमर्हति । अतः—

'यो अग्नीषोमा हविषा सपर्या (१) देवद्रीचा मनसा यो घृतेन (२)।
तस्य व्रतं रक्षतं पातमंहसो (३) विशे जनाय महि शर्म यच्छतम् (४) ॥'
(ऋ० सं० १।६।२९।२)

इतीयं षट्चत्वारिंशदक्षरा किं त्रिष्टुप्स्वराट्? उत जगती विराट्? इति सन्देहे प्रथमापादस्यैकादशाक्षरत्वात्त्रिष्टुबेवेत्युदाहार्यम् ।

२. "भवत्येव संशये छन्दसां दैवतेनाध्यवसायः, यथा—'त्वम् स्वादिष्ठा–' (ऋ० सं० ३।५।१०।५) 'शिवा नः सख्या–' (ऋ० सं० ३।५।१०।८) इत्यनुष्टुबुष्णिहोर्मध्ये 'घृतं न पूतं–' (ऋ० सं० ३।५।१०।६) इति षड्विंशत्यक्षरे द्वे ऋचा दैवतेन स्वराजौ गायत्र्यावध्यवसीयेते, न विराजावुष्णिहौ ।" इत्यृक्प्रातिशाख्यव्याख्यायामुव्वटः (१७।२०) ।

कस्य छन्दसः का देवता, यथा निर्णयः कर्तव्यः ? इत्यपेक्षायामिदमुच्यते—

अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः । ३ । ६३ ॥

गायत्र्यादीनां जगतीपर्यन्तानां यथाक्रममग्न्यादयो देवता वेदितव्याः । तत्र संदिग्धे छन्दसि यदाग्नेयं, तदा गायत्री । यदि सावित्रं, तदोष्णिग् । एवं सर्वत्र । वैदिकेष्वेव

---

१. मित्रावरुणौ विराजो देवते, न पङ्क्तेः । अत्रोद्देशक्रमानुसारेण (छं० शा० २।१५) गायत्र्यादिछन्दःसप्तके पञ्चमस्य पङ्क्तित्वेन तत्र तद्देवताया एव वक्तव्यत्वेऽपि, तत्स्थाने विराड्देवतोक्तिः पङ्क्तिविराजोश्चत्वारिंशदक्षरत्वाविशेषेण 'अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् । विद्याद्द्विप्रतिपन्नानां पादवृत्ताक्षरैर्ऋचाम् ॥' (ऋ० प्रा० १७।३५) इति **शौनको**क्तिबलादभेदाभिप्रायेण, उपजीव्यश्रुत्यर्थानुसरणैकपरतया चेति ज्ञेयम् । तथा चैतन्मूलभूतौ मन्त्रौ दृश्येते—अ॒ग्नेर्गा॑य॒त्र्य॑भवत्स॒युग्वो॒ष्णिह॑या सवि॒ता सम्ब॑भूव । अ॒नु॒ष्टुभा॒ सोम॑ उ॒क्थैर्मह॑स्वान् बृह॒स्पते॑र्बृह॒ती वाच॑मावत् ॥ वि॒राण् मि॒त्रावरु॑णयोरभि॒श्रीरिन्द्र॑स्य त्रि॒ष्टुबि॒ह भा॒गो अह्नः॑ । विश्वा॑न् दे॒वान् जग॒त्या वि॑वेश॒ तेन॑ चाक्लृप्र ऋष॑यो मनु॒ष्या॑ः ॥' (ऋ० सं० ८।७।१८।४-५) इति । **कात्यायनस्तु** शुक्लयजुःसर्वानुक्रमणिकायाम्—'विराजो मित्रः, स्वराजो वरुण' (४।१०) इति विशेषमाह । 'पङ्क्तेर्वरुण' इत्यपि तत्रैव दृश्यते, परं भगवता **शौनकेन** पङ्क्तिं प्रकृत्य 'सा तु वासवी' (ऋ० प्रा० १७।२२) इत्युक्तत्वात्, अनुपदमेव वरुणस्य विराड्देवतात्वाभिधानाच्च 'वसव' इत्यस्य स्थले 'वरुण' इति लेखकप्रमाद एवेति सम्भाव्यते । 'छन्दसां देवताः क्रमात् । अग्निः सूर्यः शशी जीवो वरुणश्चेन्द्र एव च ॥ विश्वेदेवाश्च—' (३३०।१९) **इत्याग्नेय**संवादाच्छाखाभेदेन वा व्यवस्था । वासवी वसुदैवत्या । जगत्या देवता अवयुत्याह **साङ्ख्यायनब्राह्मणम्**—'वारुणं बार्हस्पत्यं वैष्णवमिति शंसति, जगती वा एतेषां छन्दः' (३०।२) इति । अन्येषामपि च्छन्दसां देवता आह **शौनकः**—'प्राजापत्यास्त्वतिच्छन्दां, विच्छन्दा वायुदैवता । द्विपदा पौरुषं छन्दो, ब्राह्मी त्वेकपदा स्मृता ॥' (ऋ० प्रा० १७।२३-२६) इति । अतिजगत्यादीनि च्छन्दांस्यतिच्छन्दः शब्देनोच्यन्ते । विच्छन्दा अवान्तरभेदाः पदपङ्क्त्यादय' **इत्युव्वटः । कृष्णीये** त्वन्या एव देवता उक्ताः—

'गायत्र्या देवता वह्निर्विश्वेदेवास्तथोष्णिहः ।
बृहत्या देवता सूर्यो बृहस्पतिरनुष्टुभः ॥
अश्विनौ देवता पङ्क्तेस्त्रिष्टुभश्च सुधाकरः ।
जगतीछन्दसः प्रोक्तो देवता नाकनायकः ॥
पृथ्वी विराट्छन्दसः स्यात्ककुदस्तु त्रिविक्रमः ।
ककुद्विराट्छन्दसस्तु केचिद्देवं हरिं विदुः ॥' (मं० मं० विं० ११).

इति । तत्र मूलं मृग्यम् ।

छन्दःसु निचृद्भुरिजौ, तथा विराट्स्वराजौ च दृश्येते; न लौकिकेषु । अतो लौकिकेषु संदेहाभावात्तन्निर्णयभूता देवतादयो नेष्यन्ते ॥

स्वराः षड्जर्षभगान्धारमध्यमपञ्चमधैवतनिषादाः । ३ । ६४ ॥

स्वरा गायत्र्यादिषु क्रमेण द्रष्टव्याः ॥

सितसारङ्गपिशङ्गकृष्णनीललोहितगौरा वर्णाः । ३ । ६५ ॥

गायत्र्यादिषु क्रमेण वर्णा वर्णनिर्णयनिमित्तमभिधीयन्ते ॥

आग्निवेश्यकाश्यपगौतमाङ्गिरसभार्गवकौशिकवासिष्ठानि गोत्राणि ३ । ६६ ॥[1]

---

१. एतदग्रे—'**श्यामान्यतिच्छन्दांसि**' ३।६७
रोचनाभाः कृतयः ३।६८
अनुक्तानां कामतो वर्णा इति ३।६९
इति सूत्रत्रयं स्पष्टार्थमेव ।

हलायुधीयमस्यानुपपन्नत्वप्रतिपादनमव्याख्यानं च 'द्वाभ्यां–' (छं० शा० ३।६०) इत्यस्योपलक्षणार्थत्वेन त्र्याद्यूनाधिकेष्वतिच्छन्दस्सु निर्णायकान्तरापेक्षासत्वात्, 'यश्छन्दसां वेद विशेषमेनं भूतानि च त्रैष्टुभजागतानि । सर्वाणि रूपाणि च भक्तितो यः स्वर्गं जयत्येति तथामृतत्वम् ॥' (ऋ० प्रा० १८।४६) इति विशेषज्ञानस्य श्रेयोहेतुत्वस्मरणात्, एतत्सूत्रत्रयत्यागे च प्रत्यध्यायसमाप्ति दृश्यमानेतिशब्दाभावेनात्र तृतीयाध्यायसमाप्त्यनिश्चयात्, अविच्छिन्नवैदिकाध्ययनपरम्परया 'गोरोचनाभाः कृतयो ह्यतिच्छन्दो हि श्यामलम् ।' (३३०।२२) **इत्यग्निपुराणे**ऽनुवाददर्शनेन चास्य मौलिकत्वनिश्चयात्, आर्षशास्त्रदूषणे 'यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतम् । दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनम् ॥' (म० भा० अनु० २४।८) इत्यादौ महादोषस्मरणाच्चातिसाहसमात्रम् ॥

अत्र विशेषः प्रातिशाख्ये—'अरुणं श्यामगौरे च बभ्रु वै नकुलं तथा । पृश्निवर्णं च वैराजं निचृच्छ्यावं पृषद्भुरिक् ॥ ब्रह्मसामर्ग्यजुश्छन्दः कपिलं वर्णतः स्मृतम् । (१७।२८-३२) इति । अरुणं प्रातःसन्ध्याभवर्णं पाङ्क्तम् । श्यामं कृष्णवर्णमतिच्छन्दः । गौरं सिद्धार्थवर्णं विच्छन्दः । बभ्रु कपिलवर्णं द्विपदं छन्दः । नकुलवर्णमेकपदं छन्दः । पृश्निवर्णं बहुवर्णचित्रं वैराजम् । अथ कस्मात् वैराजस्य द्विवर्णोपदेशः क्रियते? । तत्र क्रमेणैव नीलत्वं सिद्धम् । न सिध्यति; कथम्? एतास्तिस्रो विराजः,–अनुष्टुबेका, पङ्क्तिरेका, द्वाभ्यां न्यूना चैका । तत्र पूर्वयोर्नीलवर्णः, अस्याः पृश्निरिति वेदितव्यम् । एवमपि केनैतदध्यवसीयते–पूर्वयोर्नीलः, अस्याः पृश्निरिति? । निचृद्भुरिजोर्न्यूनाधिकयोः समीपोपदेशात् अस्याः पृश्निरिति, परिशेषादितरयोर्नील इत्यध्यवसीयते । **एके** क्रमात्पङ्क्तेरेव विराजो नीलं मन्यन्ते । श्यावं कृष्णदूषितपत्रवर्णं निचृद्भवति । विद्रुमवद्भुरिक् भवति ।

गायत्र्यादीनां क्रमेणैतानि गोत्राणि भवन्तीति वाक्यशेषः । अत्र 'रोचनाभाः कृतयः; श्यामान्यतिच्छन्दांसि', इत्येवमादिकमधीयते **छान्दसाः** । तन्नोपपद्यते । कृत्यतिच्छन्दसां च निचृद्भुरिजोर्विराट्स्वराजोश्च प्रदेशाभावात् कश्चिन्नास्ति संशयः, यस्य निर्णयनिमित्तं वर्णोपन्यासः क्रियते । तदपि ऋषिदेवतास्वरवर्णानां ज्ञानान्निःश्रेयसमिच्छन्ति **छान्दसाः** ॥

इति भट्टहलायुधकृतायां पिङ्गलछन्दोवृत्तौ तृतीयोऽध्यायः ।

ब्रह्मणः सामर्ग्यजुषां च छन्दो वर्णतः कपिलं जटाकलापसूर्यरश्मिवर्णं स्मृतम् ।—इत्युव्वटभाष्यम् ॥

छन्दसां धातवोऽप्युक्ताः **साङ्ख्यायनारण्यके**—'अश्मानं जागतमयस्त्रैष्टुभं लोहमौष्णिहं सीसं काकुभं रजतं स्वाराज्यं सुवर्णं गायत्रम्' (११।७) इति । एवमन्यदप्यतिच्छन्दसां स्वरादिग्रन्थान्तराज्ज्ञेयम् । विस्तरभयान्न सङ्गृह्यते ।

ननु भगवता पिङ्गलाचार्येण कृतो योऽयं देवतादिनियमः, स किं विधिर्नियमोऽनुवादार्थो वा, ? । नाद्यः, तत्तद्वेदानुक्रमणिकाकारैः स्मृतिकारैश्च संहितास्थमन्त्राणां कर्मकाण्डीयमन्त्राणां च देवतादीनां विहितत्वेनापूर्वत्वाभावात् । किंच 'गायत्र्याः सविता जातवेदसः' 'त्रिष्टुभोऽग्निर्देवता' इत्यादिना, सप्तव्याहृतीनामपि छन्दसां देवतानां चानेन महाविरोधापातात् । यथाह संवर्तः—'व्याहृतीनां च सर्वेषामार्षं चैव प्रजापतिः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिरेव च ॥ त्रिष्टुप् च जगती चैव छन्दांस्येतानि सप्त वै । अग्निर्वायुस्तथा सूर्यो बृहस्पतिरपांपतिः । इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥' इति । नापि द्वितीयः, अनन्तव्यभिचारात् । नापि तृतीयः, निष्फलत्वाद्विरोधापाताच्च ।

अत्रेदमवधेयम्—येषां मन्त्राणां छन्दोदेवतादीनि नोक्तानि, अपि तु विराट्स्वराडादिलक्षणद्वयलक्षितत्वेन 'गायत्र्युष्णिग्भ्याम्' 'उष्णिगनुष्टुब्भ्याम्' इत्यादि संशयो भवेत्. तत्राद्यपादेन क्वचिद्देवतादिभ्यश्च विरोधः परिहरणीय इत्यभिप्रयता भगवता पिङ्गलाचार्येण 'आदितः संदिग्धे' (पि० सू० ३ । ६१) इत्यादि नव सूत्राणि विहितानि, इति । एतेषामुदाहरणानि बहूनां वेदशाखानामनुपलम्भाद्दुर्लभानि । यत्तु—'शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च । श्यामं तु स्वरितं विद्यादग्निरुच्चस्य देवता ॥ नीचे सोमं विजानीयात्स्वरिते सविता भवेत् । उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च ॥ वैश्यं तु स्वरितं विद्यादुदात्तं तु भारद्वाजम् । नीचं गोतममित्याहुर्गार्ग्यं तु स्वरितं विदुः ॥ विद्यादुदात्तां गायत्रीं नीचं त्रैष्टुभमेव च । जागतं स्वरितं विद्यादेवमेव नियोगतः ॥ गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः । त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः ॥ उच्चौ निषादगान्धारौ नीचावृषभधैवतौ । शेषास्तु स्वरिते ज्ञेयाः षड्जमध्यमधैवताः ॥' इति याज्ञवल्कीयशिक्षोक्तेस्त्रिष्टुभो लोहितो वर्णः, सोमो देवता, ऋषभधैवतौ स्वरौ, गोतमऋषिः । जगत्याः श्यामो वर्णः, सविता देवता, षड्जमध्यमपञ्चमाः स्वराः, गार्ग्यऋषिरित्यादिभिः पिङ्गलोक्तेनानैक्यं; तदपि शाखाभेदेन परिहरणीयम् ।

चतुर्थोऽध्यायः ।

चतुःशतमुत्कृतिः । ४ । १ ॥

चतुरधिकं शतं चतुःशतम् । मध्यमपदलोपी समासः । अथ वा चत्वारि च शतं च चतुःशतम् । द्वन्द्वसमासः । कर्मधारयस्तु नेष्यते । तत्र चतुःशतानीति प्राप्नोति । यत्र चतुःशतमक्षराणां संख्या भवति, तत् 'उत्कृतिः' नाम छन्दः । यथा—

छागस्य हुविष आत्तामद्य (१) मध्यतो मेद उद्भृतं (२) पुरा द्वेषोभ्यः (३) पुरा पौरुषेय्या गृभो (४) घस्तां नूनं (५) घासे अज्राणां यवसप्रथमानाᳬं (६) सु क्षराणाᳬं शतरुद्रियाणाम् (७) अग्निष्वात्तानां पीवोपवसनानां (८) पार्श्वतः श्रोणितः (९) शितामतः उत्सादतः (१०) अङ्गादङ्गादवत्तानां (११) करत एवाश्विना (१२) जुषेतांᳬ हुविः (१३)' (यजुर्वेदे—अ० २१ मं० ४३)

चतुरश्चतुरस्त्यजेदुत्कृतेः । ४ । २ ॥

चतुःशताक्षराच्छन्दसः क्रमेण चतुरश्चतुरः संख्याविशेषांस्त्यजेत् । एतदुक्तं भवति—उत्कृतेरारभ्य चतुर्भिश्चतुर्भिरक्षरैर्न्यूनानि छन्दांस्यन्यानि स्थापयेत्, अष्टाचत्वारिंशदक्षरं यावत् ॥

तान्यभिसंव्याप्रेभ्यः कृतिः । ४ । ३ ॥

तान्युत्कृतेरनन्तराणि छन्दांसि अभि-सं-वि-आङ्-प्र इत्येतेभ्यः पराणि 'कृति'संज्ञानि भवन्ति । तत्र शताक्षरं छन्दः **'अभिकृतिः'** । यथा—

'देवो अग्निः स्विष्टकृत् (१) । देवान्यक्षद्यथायथम् (२) । होताराविन्द्रमश्विना (३) । वाचा वाचᳬ सरस्वतीम् (४) । अग्निᳬ सोमᳬ स्विष्टकृत् (५) । स्विष्ट इन्द्रः सुत्रामा (६) । सविता वरुणो भिषक् (७) । इष्टो देवो वनस्पतिः (८) । स्विष्टा देवा आज्यपाः (९) । इष्टो अग्निरग्निना (१०) । होता होत्रे स्विष्टकृत् (११) । यशो न दधदिन्द्रियम् (१२) । ऊर्जमपचितिं स्वधाम् (१३) ॥' (तैत्तिरीयब्राह्मणे—अ० २ प्र० ६ अ० १४ मं० ११)

षण्णवत्यक्षरं **संकृतिः** । यथा—

'देवो अग्निः स्विष्टकृत् (१) । सुद्रविणा मन्द्रः कविः (२) । सत्यमन्मा यजी होता (३) । होतुर्होतुरायजी यान् (४) । अग्ने यान् देवानयाट् (५) । याᳬ अपि प्रेः (६) । येते होत्रे अमत्सत (७) । ताᳬ ससनुषीᳬ होत्रां देवंगमां (८) । दिवि

---

१. उत्कृत्यादिकृतिपर्यन्तानामुदाहरणानि श्रीमता हलायुधेन न दर्शितानि, अतस्तानि सर्वानुक्रमभाष्योपलब्धानि, अन्यत्र सुप्रसिद्धानि च सर्वोपकृतये वृत्तिमध्येऽस्माभिर्निवेशितानि ।

२. 'कृतिः प्रकृतिराकृतिः । विकृतिः सङ्कृतिश्चैव तथातिकृतिरुत्कृतिः ॥' (नार० पु० पू० ५७।१३)

देवेषु यज्ञमेरयेमम् (९) । स्विष्ट कृच्चाग्ने होताभूः (१०) । वसुवने वसुधेयस्य नमो वाके वीहि (११) ॥' (तैत्तिरीयब्राह्मणे–अ० ३ अ० ६ अं० १४ मं० १)

द्वानवत्यक्षरं विकृतिः । यथा—

'इमे सोमाः सुरामाणः (१) । छागैर्न मेषैर्ऋषभैः सुताः (२) । शष्पैर्न तोक्मभिः (३) । लाजैर्महस्वन्तः (४) । मदा मासरेण परिष्कृताः (५) । शुक्राः पयस्वन्तोऽमृताः (६) । प्रस्थिता वो मधुश्चुतः (७) । तानश्विना सरस्वती (८) इन्द्रः सुत्रामा वृत्रहा (९) । जुषन्ताꣳ सोम्यं मधु (१०) पिबन्तु मदन्तु वियन्तु सोमम् (११) ॥' (तैत्तिरीयब्राह्मणे–अ० २ प्र० ६ अ० ११)

अष्टाशीत्यक्षरमाकृतिः । यथा—

'तच्चक्षुर्देवहितं (१) पुरस्ताच्छुक्रमुच्चरत् (२) । पश्येम शरदः शतं (३) जीवेम शरदः शतं (४) नन्दाम शरदः शतं (५) मोदाम शरदः शतं (६) भवाम शरदः शतꣳ (७) शृणवाम शरदः शतं (८) प्रब्रवाम शरदः शत (९) मजीताः स्याम शरदः शतं (१०) ज्योक्च सूर्यं दृशे ॥' (तैत्तिरीयारण्यके–प्र० ४ अ० ४२ मं० ३२)

चतुरशीत्यक्षरं प्रकृतिः । यथा—

'अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः (१) । पापेभ्यो रक्षन्ताम् (२) । यदह्ना पापमकार्षम् (३) । मनसा वाचा हस्ताभ्याम् (४) । पद्भ्यामुदरेण शिश्ना (५) । अहस्तदवलुम्पतु (६) । यत्किंच दुरितं मयि (७) । इदमहं माममृतयोनौ (८) । सत्ये ज्योतिषि जुहोमि स्वाहा (९) ॥' (तै० आ० प्र० १० अ० २४)

प्रकृत्या चोपसर्गवर्जितः । ४ । ४ ॥

उपसर्गेण वर्जितः शुद्धः कृतिशब्दः प्रकृत्या स्वरूपेणैवावतिष्ठते । तेनैतदुक्तं भवति—अशीत्यक्षरं छन्दः 'कृतिः' नाम । यथा—

---

१. **कात्यायनेन** त्वतिच्छन्दसां पादनियमविशेष उक्तः—**'पादा अतिजगत्यास्तु त्रयो द्वादशकाः परौ । अष्टकौ शक्करीपादाः सप्तैवाष्टाक्षराः स्मृताः ॥१॥ अतिशाक्करपादौ द्वावादितः षोडशाक्षरौ । जागतोऽथाष्टका वष्टिपादाः षोडशकास्त्रयः ॥२॥ अष्टकौ चात्यष्टिपादौ जागतौ चाष्टकास्त्रयः । जागतश्चाष्टकश्चाथ धृतिपादौ तु जागतौ ॥३॥ पादास्त्रयोऽष्टकाश्चाथ षोडशाक्षर एव च । अष्टकश्चाथातिधृतौ द्वौ पादौ जागतौ ततः ॥४॥ त्रयोऽष्टका जागतश्च तथाष्टाक्षरकावपि । परः सप्तकपादास्तु प्रसङ्गात्स्वयमीरिताः ॥५॥'** इति । **शौनकोऽप्याह**—'सन्त्यतिच्छन्दसां पादा एकोत्कर्षेण जागतात् । षोडशाक्षरपर्यन्ता एकश्चाष्टादशाक्षरः ॥' (ऋ० प्रा० १७।५८) इति । एक एवाष्टादशाक्षरः—'अभि त्यं देवं सवितारमोण्योः कविक्रतु (१) मर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविम् (२) । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि (३) हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः (४) ॥' (आश्व० श्रौ० सू० ४।६ शु० य० ४।२५) इत्यस्यामृचि द्वितीयः ।

'दे॒व इन्द्रो॑ नरा॒शꣳस॒ (१) स्त्रिवरू॒थस्त्रि॒वन्धु॒रो (२) दे॒वमिन्द्र॑मवर्धयत् (३)। श॒तेन॑ शितिपृ॒ष्ठाना॒माहि॑तः (४) स॒हस्रे॑ण॒ प्रव॑र्तते (५) मि॒त्रावरु॑णेद॒स्य हो॒त्रमर्ह॑तो (६) बृह॒स्पति॑ः स्तो॒त्र (७) म॒श्विनाध्व॑र्य॒वं (८) वसु॒वने॑ वसु॒धेय॑स्य वे॒तु यज॑ (९) ॥' (यजुर्वेदे—अ० २८ मं० १९)

धृत्यष्टिशक्करीजगत्यः । ४ । ५ ॥

कृतेरधस्ताद्धृतिरष्टिः शक्करी जगतीत्येते शब्दाः क्रमेण व्यवस्थापनीयाः ॥

पृथक्पृथक्पूर्वत एतान्येवैषाम् । ४ । ६ ॥

एषां धृत्यादीनां पूर्वतः पृथक्पृथगेतान्येव शब्दरूपाणि विन्यसेत् । पृथक्पृथग्ग्रहणं प्रत्येकं पूर्वत्वज्ञापनार्थम् । अन्यथा हि समुदायपूर्वत्वमेषां स्यात् । तेनायमर्थः—धृतिशब्दात् पूर्वं धृतिशब्दः, अष्टिशब्दात्पूर्वमष्टिशब्दः, शक्करीशब्दात्पूर्वं शक्करीशब्दः, जगतीशब्दात् पूर्वं जगतीशब्दः ॥

द्वितीयं द्वितीयमतितः । ४ । ७ ॥

अत्र द्वितीयं द्वितीयं शब्दरूपमतिशब्दात्परतः प्रयोक्तव्यम् । एवं सत्युत्तरेषां छन्दसामेताः संज्ञाः क्रमेण भवन्ति । तत्र षट्सप्तत्यक्षर**मतिधृतिः** । यथा—

'स हि शर्धो॒ न मारु॑तं तुवि॒ष्वणि॒ (१) रप्न॑स्वतीषू॒र्वरा॑स्वि॒ष्टनि॒ (२) रार्त॑नास्वि॒ष्टनि॑ः (३) । आद॑द्धव्यान्या॒द॒दि (४) य॒ज्ञस्य॑ के॒तुर॒र्हणा॑ (५) । अध॑ स्मास्य॒ हर्ष॑तो॒ हृषी॑वतो (६) विश्वे॑ जुषन्त॒ पन्था॑ं (७) नरः॑ शु॒भेन॒ पन्था॑म् (८) ॥' (ऋग्वेदे—अ० २ अ० १ व० १३ मं० १)

द्वासप्तत्यक्षरं **धृतिः** । यथा—

'अ॒वर्म॑ह इन्द्र दादृहि श्रु॒धी नः॑ (१) शु॒शोच॒ हि द्यौः क्षा न भी॒षाँ अ॑द्रिवो (२) घृणान्न भी॒षाँ अ॑द्रिवः (३)। शु॒ष्मिन्त॑मो हि शु॒ष्मिभि॒ (४) र्व॒धैरु॒ग्रेभि॒रीय॑से (५) । अपू॑रुषघ्नो अप्रतीत शूर॒ सत्व॑भि (६) स्त्रि॒स॒प्तैः शू॑र॒ सत्व॑भिः (७) ॥' (ऋग्वेदे—अ० २ अ० १ व० २२ मं० ६)

अष्टषष्ट्यक्षरमत्यष्टिः । यथा—

'अद॑र्शि गा॒तुरु॒रवे॒ वरी॑यसी॒ (१) पन्था॑ ऋ॒तस्य॒ सम॑यंस्त र॒श्मिभि॒ (२) श्चक्षु॒र्भग॑स्य र॒श्मिभि॑ः (३) । द्यु॒क्षं मि॒त्रस्य॒ साद॑न (४) मर्य॒म्णो वरु॑णस्य च (५) । अथा॑ दधाते बृ॒हदु॒क्थ्यं॑[१] वय॑ (६) उप॒स्तुत्यं॑ बृ॒हद्वय॑ः (७) ॥'

(ऋग्वेदे—अ० २ अ० १ व० २६ मं० २)

चतुःषष्ट्यक्षरमष्टिः । यथा—

'त्रिक॑द्रुकेषु महि॒षो यवा॑शिरं (१) तुवि॒शुष्म॑स्तृ॒पत्सोम॑मपिब॒ (२) द्विष्णु॑ना सु॒तं

---

१. एषु व्यूहान्न्यूनता परिहार्या.

यथावंशत् (३)। स ईं ममाद् महि कर्म कर्तवे महामुरुं (४) सैनं सश्चद्देवो देवं (५) सत्यमिन्द्रं सत्य इन्दुः (६) ॥' (ऋग्वेदे–अ० २ अ० ६ व० २८ मं० १)

षष्ट्यक्षरम**तिशक्वरी** । यथा—

'साकं जातः क्रतुना साकमोजसा ववक्षिथ (१) साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः (२) । दाता राधः स्तुवते काम्यं वसु (३) सैनं सश्चद्देवो देवं (४) सत्यमिन्द्रं सत्य इन्दुः (५) ॥' (ऋग्वेदे–अ० २ अ० ६ व० २८ मं० ३)

षट्पञ्चाशदक्षरा **शक्वरी** । यथा—

'प्रौष्वस्मै पुरोरथ (१) मिन्द्राय शूषमर्चत (२) । अभीके चिदु लोककृत् (३) सङ्गे समत्सु वृत्रहा (४) ऽस्माकं बोधि चोदिता (५) नभन्तामन्यकेषाम् (६) ज्याका अधिधन्वसु (७)' (ऋग्वेदे-अ० ८ अ० ७ व० २१ मं० १)

द्विपञ्चाशदक्षरम**तिजगती** । यथा—

'स भ्रातरं वरुणमग्न आववृत्स्व (१) देवाँ अच्छा सुमती यज्ञवनसं (२) ज्येष्ठं यज्ञवनसम् (३) । ऋतावानमादित्यं चर्षणीधृतं (४) राजानं चर्षणीधृतम् (५) ॥'

(ऋग्वेदे-अ० ३ अ० ४ व० १२ मं० २)

अष्टाचत्वारिंशदक्षरा **जगती** । यथा—

इन्द्रं मित्रं वरुणमग्निमूतये (१) मारुतं शर्धो अदितिं हवामहे (२) ।
रथं न दुर्गाद्वसवः सुदानवो (३) विश्वस्मान्नो अंहसो निष्पिपर्तन (४) ॥
(ऋग्वेदे-अ० १ अ० ७ व २४ मं० १)

अथ लौकिकम् । ४ । ८ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । पूर्वेषां छन्दसां वैदिकत्वमेव । इतः प्रभृत्यार्यादीनां चूलिकापर्यन्तानां लौकिकत्वमेव । समान्यादीनामुत्कृतिपर्यन्तानां वैदिकत्वं लौकिकत्वं च । अत्र वैदिकच्छन्दसां प्रस्तावे प्रसङ्गाद्वेदवदनादिमुनिपारम्पर्यागतं स्मृतिपुराणेतिहासादिषु दृश्यमानमार्यादिदण्डकपर्यन्तं लौकिकच्छन्दोजातमधिक्रियते । तन्मूलत्वात्काव्यस्य । काव्यं च कीर्तिरूपत्वादानन्दहेतुत्वाच्च पुरुषार्थः ।:

आत्रैष्टुभाच्च यदार्षम् । ४ । ९ ॥

आङभिविधौ । त्रिष्टुबेव त्रैष्टुभम् । स्वार्थे तद्धितः । गायत्र्यादित्रिष्टुप्पर्यन्तं यदार्षं छन्दोजातं वैदिके व्याख्यातं, लौकिके च तत्तथैव द्रष्टव्यम् । किं तदार्षम्? चतुर्विंशत्यक्षरा गायत्री, अष्टाविंशत्यक्षरोष्णिक्, द्वात्रिंशदक्षरानुष्टुप्, षट्त्रिंशदक्षरा बृहती, चत्वारिंशदक्षरा पङ्क्तिः, चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । चः समुच्चये ॥

---

१. २. ३. एषु व्यूहाद्न्यूनता परिहार्या. ४. 'गिलति समानी' (पि० सू० ५।६) इति सूत्रबोधितं छन्दः. ५. 'आर्षमा त्रैष्टुभात्स्मृतम् । त्रिष्टुप्पङ्क्तिश्च बृहती अनुष्टुबुष्णिगीरितम् ॥ गायत्री स्यात्सुप्रतिष्ठा प्रतिष्ठा मध्यया सह । अत्युक्तोक्ता आदितश्च एकैकाक्षरवर्जितम् ॥' (३३१।३-४) इत्याग्नेये ।

पादश्चतुर्भागः । ४ । १० ॥

चतुर्भागश्चतुर्विंशत्यक्षराया गायत्र्याश्चतुर्थो भागः पादसंज्ञां लभते । गायत्र्याः षडक्षरपादः । एवमुष्णिगादिष्वपि द्रष्टव्यम् । समवृत्तविषयमेतत् ॥

यथावृत्तसमाप्तिर्वा । ४ । ११ ॥

यस्य वृत्तस्य यादृशैः पादैर्न्यूनाक्षरैरधिकाक्षरैर्वा समाप्तिर्दृश्यते, तस्य तादृशा एव पादा ग्रहीतव्याः । वाशब्दो व्यवस्थितविभाषा । उद्गतादिषु विषमवृत्तेषु चतुर्भागातिक्रमेणापि पादव्यवस्थादर्शनात् ।

आदौ तावद्गणच्छन्दो मात्राछन्दस्ततः परम् ।
तृतीयमक्षरच्छन्दश्छन्दस्त्रेधा तु लौकिकम् ॥
आर्याद्युद्गीतिपर्यन्तं गणच्छन्दः समीरितम् ।
वैताल्यादिचूलिकान्तं मात्राछन्दः प्रकीर्तितम् ।
समान्याद्युत्कृतिं यावदक्षरच्छन्द एव च ॥

तत्रादौ तावदार्यालक्षणमिच्छर्थं गणसंज्ञां करोति—

लः समुद्रा गणः । ४ । १२ ॥

ल इत्येकमात्रिकस्याक्षरस्य ग्रहणम् । समुद्रा इति चतुःसंख्योपलक्षणार्थम् । चतुर्णां लकाराणां 'गणः' इत्येषा संज्ञा विधीयते ॥

गौ गन्तमध्यादिर्न्लश्च । ४ । १३ ॥

अनेन गणस्य विन्यासभेदं दर्शयति । स हि गणः कदाचिद्गुरुद्वयेन (ऽऽ) भवति, कदाचिदन्तेनैकेन गुरुणा (।।ऽ), कदाचिन्मध्यमेन (।ऽ।), कदाचिदाद्येन (ऽ।।), कदाचिच्चतुर्भिर्लघुभिः (।।।।) । षष्ठस्य भेदस्याभावाद् विस्पष्टार्थमिदं सूत्रम् । अन्तमध्यादिरिति प्रथमं द्वन्द्वसमासं कृत्वा पश्चाद्गकारेण बहुव्रीहिः । द्वन्द्वात् परो यः श्रूयते लभतेऽसौ प्रत्येकाभि-

---

१. इदं च लक्षणं प्रायिकत्वात् । आर्यासु अर्धसमविषमेषु च न्यूनाधिकाक्षरदर्शनात् । विपुलाचूलिकादिषु विपुलायां यतिमात्रं निषिद्धं त्रिपु गणेषु; 'चूलिकार्धमेकोनत्रिंशत्–' (छं० शा० ४।५२) इत्यर्धस्य लक्षणकथनेऽपि एकाक्षरन्यूनाधिकभावेन पादः कल्पनीयः इति **तरुणवाचस्पतिः** । पादलक्षणं **मन्दारमरन्दे**—'छन्दसा ग्रथितः शब्दः पाद इत्यभिधीयते ।' (१।९) इति । इदमत्रावगन्तव्यम्–एकद्वयादिवर्णघटितपादचतुष्टयात्मकवृत्ते वक्तुः श्रोतुर्वा पादत्वेन तात्पर्ये सति पाद एव, वृत्तत्वेन तात्पर्ये सति वृत्तमेव । एतदेकाक्षरमारभ्य चतुर्विंशतिवर्णपर्यन्तवर्णघटितवाक्य एव । पञ्चविंशतिषड्विंशतिवर्णात्मकवाक्ये पादत्वमेव । तत ऊर्ध्वं तु न पादत्वम् इति तद्व्याख्यायाम् । २. 'गायत्र्या वसवः' (पि० सू० ३।२) इति यत्तृतीयाध्याये दर्शितं, तद्वैदिकविषयमात्रम् । तेन लौकिकच्छन्दसां त्रिपञ्चषट्पदता निषिद्धा । यतो लौकिकविषमवृत्तेऽपि लौकिकविषम एव भविष्यति न तु वैदिकोक्तः, किं तु चतुष्पदत्वं तत्राप्यक्षतमेव ज्ञेयम् ।

संबन्धम् । द्वौ गकारौ चत्वारो लघवो भवन्ति, स एको (ऽऽ) गणः । गकारोऽन्ते यस्य स गन्तो द्वितीयो (।।ऽ) गणः । गकारो मध्ये यस्य स गमध्यस्तृतीयो (।ऽ।) गणः । गकार आदौ यस्यासौ गादिश्चतुर्थो (ऽ।।) गणः । नकारलकारौ मिलितौ चत्वारो लघवो भवन्ति, स पञ्चमो (।।।।) गणः ॥

एवं गणेषु सिद्धेष्विदानीमार्यालक्षणं करोति—

स्वरा अर्धं चार्यार्धम् । ४ । १४ ॥

गणग्रहणमनुवर्तते । स्वरा इति सप्तानां संज्ञा । यत्र प्रस्तारे गणाः सप्त भवन्ति, अर्धं च गणस्य, तदार्यार्धं निष्पद्यते । द्वितीयमप्यर्धं तादृशमेव । समप्रविभागेऽर्धशब्दः । यद्येवमर्धशब्दस्य 'अर्धं नपुंसकम्' (पा० सू० २।२।२) इत्यनेनैकदेशिसमासे सति पूर्वनिपातः प्राप्नोति, यथा—अर्धोदकम्, अर्धपलम्, अर्धखारीति । नैष दोषः; सत्यपि समप्रविभागत्वे संबन्धमात्रस्यात्र विवक्षितत्वात् । समप्रविभागस्याप्यर्धशब्दस्यैकदेशिसमासव्यभिचारदर्शनात् । यथा—तुलार्धेन गां क्रीणाति ।

पणार्धक्रीतताम्बूलचर्वणाद्धुर्वितानना ।
अनभ्यासाद्गलल्लाला यान्त्येते वारयात्रिकाः ॥

---

१. आर्यायाः प्रथमं लक्षणप्रयोजनमुक्तं **वृत्तमणिकोशे**—

'घटिकासहस्रयुग्भिः शिवो जगौ पञ्चभिर्मुखैरार्याम् ।
त्र्यब्दान् द्वादश दिवसान् षोडश घटिकाश्च निर्निद्रः ॥
आर्याद्बोधः कठिनो ज्ञातुं व्यक्तानि वर्णवृत्तानि ।
आदौ सलक्षणममूं तानि च परतः सलक्षणं ब्रूमः ॥' (वि० ३ श्लो० १-२)

'पढमं बारहमत्ता वीए अट्ठादहेहिं संजुत्ता ।
जह पढमं तह तीअं दहपञ्चविहूसिआ गाहा ॥' इति प्रा० पि० सू० ११४९.

'सव्वाए गाहाए सत्तावण्णाइँ होन्ति मत्ताइं ।
पुव्वद्धम्मि अ तीसा सत्ताईसा परद्धम्मि ॥' इति प्रा० पि० ११५१.

'गाथा' इति नामान्तरमार्यायाः प्राकृतपिङ्गले. २. गुरुरूपो द्विमात्र इत्यर्थः. ३. इदं सूत्रं श्रीमता भगवता पतञ्जलिना प्रत्याख्यातम् 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' (पा० सू० २।४।२६) इति सूत्रे भाष्ये. तथा च भाष्यम्—'एकदेशिसमासो नारभ्यते । कथमर्धपिप्पलीति ? । समानाधिकरणसमासो भविष्यति, अर्धं च सा पिप्पली चार्धपिप्पलीति । न सिध्यति, परत्वात्षष्ठीसमासः प्राप्नोति । अद्य पुनरयमेकदेशसमास आरभ्यमाणः षष्ठीसमासं बाधते । इष्यते च षष्ठीसमासोऽपि । तद्यथा—अपूपार्धं मया भक्षितम् । ग्रामार्धं मया लब्धमिति । एवं पिप्पल्यर्धमिति भवितव्यम् ।' इति. अत एव 'प्रेम्णा शरीरार्धहरां

तथात्रासमप्रविभागत्वेऽप्यर्धशब्दस्यैकदेशिसमासदर्शनाच्च ।

अर्धचन्द्रं दधन्मूर्ध्नि पातु वः पार्वतीपतिः ।
कालकूटविषं हन्तुं संगृहीतमिवामृतम् ॥

तथा च ।

तुल्यार्थं तुल्यसामर्थ्यं मर्मज्ञं व्यवसायिनम् ।
अर्धराज्यहरं भृत्यं यो न हन्यात्स हन्यते ॥

अत्रार्धस्य लक्षणं कुर्वाण एवं ज्ञापयत्याचार्यो यदार्यायामेकान्तरपदव्यवस्था नास्ति । तेन 'द्वीपादन्यस्मादपि' इत्यादौ गणत्रयस्यान्ते गुरुत्वं न स्यात् ।

१ S·S, २ S·S, ३ S·I·I, ४ S·S, ५ I·I·I·I, ६ IS·I, ७ S·S, S

द्वीपा—दन्य—स्मादपि मध्या—दपि जल—निधेर्दि—शोऽप्य—न्तात् ।

१ S·S, २ I·I·I·I, ३ I·I·I·I, ४ I·I·I·I, ५ I·I·I·I, ६ I, ७ S·S, S

आनी—य झटिति घटयति विधिरभि—मतमभि—मु—खीभू—तः ।
(रत्नावली–अं० १ श्लो० ६)

अत्रायुङ् न ज् । ४ । १५ ॥

अत्रार्याच्छन्दसि, अयुग्गणः, प्रथमस्तृतीयः पञ्चमः सप्तमश्च, न जगणो (ISI) मध्यगुरुर्न कर्तव्यः । शेषास्तु कामतो भवन्ति ॥

षष्ठो ज् । ४ । १६ ॥[1]

अत्रार्याच्छन्दसि षष्ठो जगणो (ISI) मध्यगुरुरेव भवति । तत्रोदाहरणम्—

१ S·I·I, २ I·I·S, ३ S·S, ४ S·S, ५ I·IS, ६ I·S·I, ७ I·I·I·I, S

सा जय—ति जग—त्यार्या देवी दिवसु—त्पतिष्णु—रतिरुचि—रा ।

१ S·S, २ I·S·I·I, ३ I·IS, ४ S·I·I, ५ S·S, ६ I·S·I, ७ I, S,

यां दृ—श्यते ऽम्ब—रतले कंसव—धोत्पा—तविद्यु—दि—व ॥

न्लौ वा । ४ । १७ ॥[3]

'षष्ठः' इत्यनुवर्तते । आर्यायाः षष्ठो गणः (IIII) सर्वलघुर्वा भवति । तत्रोदाहरणम्—

१ S·S, २ I·S·I, ३ S·S, ४ S·S, ५ S·S, ६ I·I·I·I, ७ I·I·I·I, S

रूपा—न्तरेण देवीं तामे—व स्तौ—मि सपदि किल महि—षः ।

१.–२.–३. एतदर्थानुवादकं प्राकृतपिङ्गलसूत्रम्.

'सत्तगणा दीहंता जो णलहू छट्ठ णेह जो विसमे ।
तह गाहे बिअअद्धे छट्ठं लहुअं विआणेहु ॥' (गाथा–) इति.

१ २ ३ ४ ५ ६ ७
S·S—S·।·।—S·।·। S·।·।—।·।·S— । — S·S — S,
पाद—स्पर्शसु—खादिव मीलित—नयनो—ऽभ—**वद्य**—स्याः ॥

न्लौ चेत्पदं द्वितीयादि । ४ । १८ ॥

षष्ठो (।।।।) गणः सर्वलघुश्चेद्भवति, तदा द्वितीयाक्षरादारभ्य **पदं** प्रवर्तते । **पूर्वमेवो**दाहरणम् ॥

सप्तमः प्रथमादि । ४ । १९ ॥

षष्ठे गणे मध्यगुरौ (।S।) सर्वलघौ (।।।।) वा जाते सप्तमो गणः (।।।।) सर्वलघुश्चेद्भवति, तदा प्रथमाक्षरादारभ्य पदं प्रवर्तते । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७
S·S—S·।·।—S·S ।·S·।—S·S—।·S·।—।·।·।·।—S,
ब्रह्म—क्षत्रकु—लीनः समस्त—साम—न्तचक्र—नुतचर—णः ।

१ २ ३ ४ ५ ६ ७
।·।·।·।—।·S·।—S·S S·S S·S—।·S·।— । —S,
सकलसु—कृतैक—पुञ्जः श्रीमान् **मुञ्ज**—श्चिरं ज—य—**ति** ॥

१ २ ३ ४ ५ ६ ७
।·।·।·।—।·S·।—S·S S·S—।·।·।·।—।·।·।·।—।·।·।·।—S,
जयति भु—वनैक—वीरः सीरा—युधतुलि—तविपुल—बलविभ—**वः** ।

१ २ ३ ४ ५ ६ ७
।·।·।·।—।·S·।—।·।·।·।—S·।·।—S·S— । —S·S—S,
अनवर—तवित्त—वितरण—निर्जित—चम्पा—धि—पो **मु**—**ञ्जः** ॥

अन्त्ये पञ्चमः । ४ । २० ।[1]

अन्त्ये भवमन्त्यम् । दिगादित्वाद्यत् । अन्त्ये द्वितीयार्धे पञ्चमश्चेद्गणः (।।।।) सर्वलघुर्भवति, तदा प्रथमादि पदं प्रवर्तते । तत्रोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·।·।—S·।·।—S·S ।·।·S—।·।·S—।·S·।—S·।·।—S,
स जयति—**वाक्पति-राजः** मल्ला—र्थिमनो—रथैक—कल्पत—**रुः** ।

१ २ ३ ४ ५ ६ ७
S·S—।·S·।—S·।·।—S·S—।·।·।·।—।·S·।— । —S,
प्रत्य—र्थिभूत—पार्थिव—लक्ष्मी—हठहर—णदुर्ल—लि—तः ॥

षष्ठश्च ल् । ४ । २१ ॥

'अन्त्ये' इत्यनुवर्तते । अन्त्ये द्वितीयेऽर्धे मध्यगुरौ (।S।) सर्वलघौ (।।।।) वा षष्ठे गणे प्राप्ते तदपदादो लकारो विधीयते । पूर्वमेवोदाहरणम् ॥

---

१. 'प्रलीनसामन्त' इति लिखितोदाहरणपुस्तके । २. इदं सूत्रं 'लः समुद्रा गणः' (पि० सू० ४।१२) इत्यस्यापवादभूतम्, तेन द्वितीयार्धे एकेनापि लघुना षष्ठो गणो भवतीति बोध्यम्.

त्रिषु गणेषु पादः पथ्याद्ये च। ४। २२॥

चकारोऽन्त्य इत्यनुकर्षणार्थः। यस्या आर्याया अन्त्येऽर्धे आद्ये च त्रिषु गणेषु पादः समाप्यते, सा आर्या 'पथ्या' नाम भवति। तद्यथा—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ— ऽ·ऽ — ऽ·ऽ ऽ·।·।—ऽ·ऽ ।·ऽ। ऽ·ऽ ऽ,
पथ्या—शी व्या—यामी स्त्रीषु जि—तात्मा नरो न रोगी स्यात्।

१ २ ३ ४ ५ ६ ७
।·।·।·।—ऽ·।·।— ऽ·ऽ —ऽ·।·।—ऽ·ऽ। ऽऽ— ऽ,
यदि वच—सा मन—सा वा—द्रुह्यति नित्यं न भूते—भ्यः॥

पादग्रहणं यत्युपलक्षणार्थम्॥

विपुलान्या। ४। २३॥

यस्य आर्याया अन्त्येऽर्धे, आद्ये वोभयोर्वा त्रिषु गणेषु पादो न विश्राम्यति, सा आर्या 'विपुला' नाम। सा चाद्यन्तोभयपूर्वकत्वात्त्रिधा भवति। सामान्येन विधानमेतत्॥

तत्रादिविपुला—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—ऽ·ऽ ऽ·ऽ—।·ऽ।—ऽ·ऽ—।।।।—ऽ·ऽ—ऽ,
स्निग्ध—च्छाया लाव—ण्यलेपि—नी किं—चिदवन—तग्रा—णा।

१ २ ३ ४ ५ ६ ७
।।।।— ऽ·ऽ—ऽ·ऽ ।·।·ऽ ऽ·ऽ— । ऽ·ऽ — ऽ,
मुखविपु—ला सौ—भाग्यं लभते स्त्रीला—ह **माण्ड—व्यः**॥

अन्त्यविपुला—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ ।·ऽ·।।·।·ऽ—ऽ·।·।·— ऽ ·ऽ—।·ऽ ·।— ऽ·ऽ·—ऽ,
चित्तं हरन्ति हरिणी—दीर्घदृ—शः का—मिनां क—लाला—पैः।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।·।·।·।—।·।ऽ—।·।·।·।—।—ऽ,
नीवी—विमोच—नव्या—जकथित—जघना जघनवि—पु—लाः॥

उभयविपुला—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ ।·।·।·।—।·।·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·।·।—ऽ,
या स्त्री कुचकल—शनित—म्बमण्ड—ले जा—यते म—हाविपु—ला।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—।·।·ऽ—।·ऽ·।—ऽ·।·।—।·ऽ·। —।—ऽ,
गम्भी—रनाभि—रतिदी—र्घलोच—ना भव—ति सा सु—भ—गा।

अत्रोच्यते—पथ्याविपुलालक्षणयोः सहानवस्थानलक्षणो विरोधः, तेन मिश्रीभावो नात्र। य एवांशो विपुलयाभिस्पृष्टस्तेनैव पथ्यात्वं नष्टं भवति, उभयाश्रयत्वाच्च

पथ्यालक्षणस्य विपुलायास्तत्रांशेनापि प्रवेशो दुर्लभः । ततश्च पथ्यालक्षणैकांशवैकल्येऽपि तदन्यमात्रविषयत्वाद्विपुला भवत्येव । पथ्याचपलयोश्च विरोधाभावाद्बाध्यबाधकभावो नास्ति । तत्रायं संग्रहः—

'एकैव भवति पथ्या तिस्रो विपुलाश्चतस्र एवं ताः ।
चपलाभेदैस्त्रिभिरपि भिन्ना इति षोडशार्याः स्युः ॥
गीतिचतुष्टयमित्थं प्रत्येकं षोडशप्रकारं स्यात् ।
साकल्येनार्याणामशीतिरेवं विकल्पाः स्युः ॥'

---

१. उक्ता आर्याभेदाः सुखावबोधाय क्रमेण प्रदर्श्यन्ते—

१ पथ्यार्या
२ आदिविपुला
३ अन्तविपुला
४ उभयविपुला
५ मुखचपला पथ्या
६ मुखचपलादिविपुला
७ मुखचपलान्तविपुला
८ मुखचपलोभयविपुला
९ जघनचपला पथ्या
१० जघनचपलादिविपुला
११ जघनचपलान्तविपुला
१२ जघनचपलोभयविपुला
१३ महाचपला पथ्या
१४ महाचपलादिविपुला
१५ महाचपलान्तविपुला
१६ महाचपलोभयविपुला
१७ गीतिपथ्या
१८ गीत्यादिविपुला
१९ गीत्यन्तविपुला
२० गीत्युभयविपुला
२१ मुखचपला गीतिपथ्या
२२ मुखचपला गीत्यादिविपुला
२३ मुखचपला गीत्यन्तविपुला
२४ मुखचपला गीत्युभयविपुला
२५ जघनचपला गीतिपथ्या
२६ जघनचपला गीत्यादिविपुला
२७ जघनचपला गीत्यन्तविपुला
२८ जघनचपला गीत्युभयविपुला
२९ महाचपला गीतिपथ्या
३० महाचपला गीत्यादिविपुला
३१ महाचपला गीत्यन्तविपुला
३२ महाचपला गीत्युभयविपुला
३३ उपगीति पथ्यार्या
३४ उपगीत्यादिविपुला
३५ उपगीत्यन्तविपुला
३६ उपगीत्युभयविपुला
३७ मुखचपलोपगीतिपथ्या
३८ मुखचपलोपगीत्यादिविपुला
३९ मुखचपलोपगीत्यन्तविपुला
४० मुखचपलोपगीत्युभयविपुला
४१ जघनचपलोपगीतिपथ्या
४२ जघनचपलोपगीत्यादिविपुला
४३ जघनचपलोपगीत्यन्तविपुला
४४ जघनचपलोपगीत्युभयविपुला
४५ महाचपलोपगीतिपथ्या
४६ महाचपलोपगीत्यादिविपुला
४७ महाचपलोपगीत्यन्तविपुला
४८ महाचपलोपगीत्युभयविपुला
४९ उद्गीतिपथ्या
५० उद्गीत्यादिविपुला

तेषामनुक्तोदाहरणान्यूह्यानि ॥

चपला द्वितीयचतुर्थौ ग्मध्ये जौ । ४ । २४ ॥

अधिकारोऽयम् । द्वितीयचतुर्थौ गणौ मध्यगुरू (।ऽ।) भवतः । प्रथमश्चान्तगुरुः (॥ऽ), तृतीयो द्विगुरुः (ऽऽ), पञ्चमश्चादिगुरुः (ऽ॥) । शेषं यथाप्राप्तम् । एवं गकारयोर्मध्ये द्वितीयचतुर्थौ जकारौ भवतः, सा आर्या 'चपला' नाम । उदाहरणमग्रतः ॥

पूर्वे मुखपूर्वा । ४ । २५ ॥

पूर्वेऽर्धे चपलालक्षणं चेद्भवति, तदासौ 'मुखचपला' आर्या । पथ्यापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·। ऽ·ऽ—।·ऽ·।— ऽ·।·।—ऽ,
अतिदा—रुणा द्वि—जिह्वा परस्य रन्ध्रा—नुचारि—णी कुटि—ला ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·।·।·।—ऽ·ऽ ऽ·ऽ ऽ·ऽ—।·।·।·।—।—ऽ,
दूरा—त्परिहर—णीया नारी नागी—व मुखच—प—ला ॥

आदिविपुलापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ ।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ· ऽ—ऽ,
यैस्या विलोच—ने पि—ङ्गले भ्रु—वौ सं—गते मु—खं दी—र्घम् ।

---

५१ उद्गीत्यन्तविपुला
५२ उद्गीत्युभयविपुला
५३ मुखचपलोद्गीतिपथ्या
५४ मुखचपलोद्गीत्यादिविपुला
५५ मुखचपलोद्गीत्यन्तविपुला
५६ मुखचपलोद्गीत्युभयविपुला
५७ जघनचपलोद्गीतिपथ्या
५८ जघनचपलोद्गीत्यादिविपुला
५९ जघनचपलोद्गीत्यन्तविपुला
६० जघनचपलोद्गीत्युभयविपुला
६१ महाचपलोद्गीतिपथ्या
६२ महाचपलोद्गीत्यादिविपुला
६३ महाचपलोद्गीत्यन्तविपुला
६४ महाचपलोद्गीत्युभयविपुला
६५ आर्यागीतिपथ्या
६६ आर्यागीत्यादिविपुला
६७ आर्यागीत्यन्तविपुला
६८ आर्यागीत्युभयविपुला
६९ मुखचपलार्यागीतिपथ्या
७० मुखचपलार्यागीत्यादिविपुला
७१ मुखचपलार्यागीत्यन्तविपुला
७२ मुखचपलार्यागीत्युभयविपुला
७३ जघनचपलार्यागीतिपथ्या
७४ जघनचपलार्यागीत्यादिविपुला
७५ जघनचपलार्यागीत्यन्तविपुला
७६ जघनचपलार्यागीत्युभयविपुला
७७ महाचपलार्यागीतिपथ्या
७८ महाचपलार्यागीत्यादिविपुला
७९ महाचपलार्यागीत्यन्तविपुला
८० महाचपलार्यागीत्युभयविपुला

१. 'मर्मानुसारिणी' इति लिखितोदाहरणपुस्तके । २. 'यस्याश्च' इत्यपि तत्रैव ।

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·। ऽ·ऽ ऽ·ऽ—ऽ·।·।—।·।·।·।—।—ऽ,
विपुलो—न्नताश्च दन्ताः कान्ता—सौ भव—ति मुखच—प—ला ॥

अन्त्यविपुलापूर्वकं मुखचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ— ।·ऽ·।—ऽ·ऽ—।·ऽ·। ऽ·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
विपुला—भिजात—वंशो—द्भवापि रूपा—तिरेक—रम्या—पि ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·। ऽ·।·।—।·।·।·।—।—ऽ,
[2]निर्वा—स्यते गृ—हाद्ब—ह्मापि चेद्भव—ति मुखच—प—ला ॥

जघनपूर्वेतरत्र । ४ । २६ ॥

द्वितीयेऽर्धे चपलालक्षणं चेद्भवति, सार्या 'जघनचपला' नाम । तत्र पथ्यापूर्वकं जघनचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—ऽ·।·।—ऽ·ऽ ऽ·।·।—।·।·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
यस्या—दस्य क—निष्ठा न स्पृश—ति मही—मनामि—का वा—पि ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·।—ऽ·ऽ· ।·।·।·।—।—ऽ,
सा स—र्वधूर्त—भोग्या भवेद—वश्यं जघनच—प—ला ॥

अन्त्यविपुलापूर्वकं जघनचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ ऽ·ऽ—ऽ·ऽ ।·ऽ·। ऽ·ऽ ।·ऽ·।—ऽ·ऽ—ऽ,
यस्याः पादा—ङ्गुष्ठं व्यतीत्य याति प्रदेशि—नी दी—र्घा ।

१ २ ३ ४ ५ ६ ७
।·।·ऽ ।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·।·।—।—।·।·ऽ ऽ,
विपुले कुले प्र—सूता—पि सा ध्रु—वं जघ—न—चपला स्यात् ॥

महाविपुलापूर्वकं जघनचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·।·ऽ—।·।·ऽ—।·ऽ·।—ऽ·।·।—।·ऽ·।—ऽ·ऽ—ऽ,
मकर—ध्वजस—द्मनि दृ—श्यते स्फु—टं तिल—कलञ्छ—नं य—स्याः ।

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·।·।—।—।·।·ऽ—ऽ,
विपुला—न्वयप्र—जाता—पि जाय—ते जघ—न—च-पला-सौ ॥

१. 'उभयविपुलापूर्वं' इति क० मु० पुस्तके । २. 'निःसार्यते' इत्यपि च तत्रैव ।

उभयोर्महाचपला । ४ । २७ ॥

यस्या उभयोरर्धयोश्चपलालक्षणं भवति, [illegible] 'महाचपला' नाम । तत्र पथ्यापूर्वकं महाचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ ।·ऽ·। ऽ·ऽ ।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
हृदयं हरन्ति नार्यो मुनेर—पि भ्रू—कटाक्ष—विक्षे—पैः ।
१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ ऽ·।—ऽ·ऽ ।·ऽ·।—।—ऽ,
दोर्मू—लनाभि—देशं निदर्श—यन्त्यो महाच—प—लाः ॥

विपुलापूर्वकं महाचपलोदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ ।·ऽ·।—ऽ·ऽ— ।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
चिबुके कपोल—देशे—ऽपि कूपि—का दृ—श्यते स्मि—तं य—स्याः ।
१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·।—।—ऽ,
विपुला—न्वयप्र—जाता—पि जाय—ते सा महाच—प—ला ॥

आद्यर्धसमा गीतिः । ४ । २८ ॥

आद्यर्धेन सममन्त्यमर्धं यस्याः साद्यर्धसमा 'गीतिः' नाम । अन्त्यपदलोपी समासः एतदुक्तं भवति—द्वितीयेऽप्यर्धे षष्ठो गणो (।ऽ।) जकारो न्लौ (।।।।) वा कर्तव्यः ॥

तत्र पथ्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ ऽ·ऽ—।·।·ऽ ऽ·।·।—।·।·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
मधुरं वीणा—रणितं पञ्चम—सुभग—श्च कोकि—लाला—पः ।
१ २ ३ ४ ५ ६ ७
ऽ·ऽ ऽ·।·।—ऽ·ऽ ऽ·ऽ ।·।·ऽ—।·ऽ·।—ऽ·।·।—ऽ,
गीतिः पौरवं—धूनां सुप्तं कुसुमा—युधं प्र—बोधय—ति ॥

आदिविपुलागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·।·।—ऽ·।·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—।·।·ऽ—ऽ,
इयमप—रा विपु—ला गी—तिरुच्य—ते स—र्वलोक—हितहे—तोः ।
१ २ ३ ४ ५ ६ ७
।·।ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·। ।·।·ऽ— ।·ऽ·।—ऽ·ऽ—ऽ,
यदनि—ष्टमात्म—नस्त—त्परेषु भवता—पि मा कृ—चित्का—रि ॥

पथ्यामहाचपलागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

S·S I·S·I — S·S — I·S·I — S ·S — I·S·I — I·I·S — S,

कामं चकास्ति—गीति—र्मृगीदृ—शां सी—धुपान—चपला—नाम् ।

१ २ ३ ४ ५ ६ ७

I·I·S — I·S·I — S·S I·S·I — S·S — I·I·I·I — I·I·S —S,

सुरतं—च मुक्त—लज्जं निरर्ग—लोल्ला—पमणित—रमणी—यम् ॥

महाविपुलामहाचपलागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

S·S — I·S·I —S ·S — I·S·I — S·S — I·I·I·I — I·I·I·I — S,

पद्ये—पुवल्ल—भः प—श्चमध्व—निस्त—त्र भवति—यदि विपु—लः ।

१ २ ३ ४ ५ ६ ७

I·I·S — I·S·I S·S — I·S·I — S·S — I·S·I — S· S — S,

चपलं—करोति कामा—कुलं म—नः का—मिनाम—सौ गी—तिः ॥

अन्त्येनोपगीतिः । ४ । २९ ॥

'समा' इत्यनुवर्तते । अन्त्येनार्धेन सममाद्यमर्धं यस्याः, सार्या 'उपगीतिः' नाम । तत्र पथ्योपगीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

S · S — S·I·I — S·I·I — S·S — S · S — I·S·I — I — S,

गान्ध—र्वं मक—रध्वज—देव—स्यास्त्रं जगद्वि—ज—यि ।

१ २ ३ ४ ५ ६ ७

I·I·I·I — S·I·I — S·I·I — I·I·S -- S · S — I — S·S — S,

इति सम—वेक्ष्य मु—मुक्षुभि—रुपगी—तिस्त्य—ज्य—ते दे—शः ॥

महाविपुलोपगीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

I·I·S — I·S·I — S·S — I·I·I·I — S·I·I — I — S·S — S,

विपुलो—पगीति—झङ्का—रमुखरि—ते भ्रम—र—माला—नाम् ।

१ २ ३ ४ ५ ६ ७

S·I·I — S·I·I — S·S — I·S·I I·I·S I — S· S — S,

रैवत—कोपव—ने व—स्तुमस्तु सततं म—म प्री—तिः ॥

पथ्यामहाचपलोपगीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

I·I·S — I·S·I — S·S I·S·I S·S I·S·I — I —S,

विषया—मिषाभि—लाषं करोति चित्तं सदा च—प—लम् ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·।—ऽ·ऽ ।—ऽ·ऽ—ऽ,
वैरा—ग्यभाव—नानां तथोप—गीत्या भ—वेत्स्व—स्थम् ॥

महाविपुलमहाचपलोपगीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·। ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।—ऽ·ऽ—ऽ,
विपुलो—पगीति संत्य—ज्यतामि—दं स्था—न—कं भि—क्षो ।

१ २ ३ ४ ५ ६ ७
।·।·ऽ—।·ऽ·।—ऽ·ऽ—। ऽ ।—ऽ·ऽ—।—ऽ·ऽ—ऽ,
विषया—भिलाष—दोषे—ण बाध्य—ते च—ञ्च—लं चि—त्तम् ॥

उत्क्रमेणोद्गीतिः[1] । ४ । ३० ॥

पूर्वोक्तात्क्रमाद्विपरीतः क्रम उत्क्रमः । अयमर्थः—आद्यमन्त्यं भवत्यर्धम्, अन्त्यमादौ, सा 'उद्गीतिः' नाम आर्या । तत्र पथ्योद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·।·।—ऽ·ऽ—।·।·ऽ ।·।·ऽ ऽ·ऽ—।·ऽ·।—।—ऽ,
व्याध इ—वोद्गी—तिरवैः प्रथमं ताव—न्मनो ह—र—सि ।

१ २ ३ ४ ५ ६ ७
ऽ·।·।—।·।·ऽ—ऽ·।·। ऽ·ऽ—ऽ·ऽ—।·ऽ·।—ऽ·ऽ—ऽ,
दुर्नय—कर वि—श्राम्यसि पश्चा—त्प्राणे—षु विप्रि—यैः श—ल्यैः ॥

महाविपुलोद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ ।·ऽ·।—ऽ·ऽ—।·ऽ·। ।·।·ऽ ।·ऽ·।—।—ऽ,
एषा तवाप—रोद्गी[2]—तिरत्र विपुला परिभ्र—म—ति ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·। ऽ·ऽ—।·।·।·।—ऽ·ऽ—।·ऽ·।—।·।·ऽ—ऽ,
त्वद्व—ल्लभापि यत्की—र्तिरखिल—दिक्पा—लपार्श्व—मुपया—ति ॥

पथ्यामहाचपलोद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·। ऽ·ऽ ।·ऽ·।—ऽ·ऽ—।—।·।·ऽ—ऽ,
उद्गी—तिरत्र नित्यं प्रवर्त—ते का—म—चपला—नाम् ।

१ २ ३ ४ ५ ६ ७
ऽ·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·।—ऽ·ऽ ।·ऽ·।—ऽ·ऽ—ऽ,
तस्मा—न्मुने वि—मुञ्च प्रदेश—मेतं समेत—मेता—भिः ॥

---

१. व्युत्क्रमेणेति क्वचित्पाठः । २. उद्गीतिर्विगीतिः, दुष्कीर्तिरिति यावत् । अत्र निन्दया स्तुतिव्यक्तिरूपो व्याजस्तुतिरलङ्कारः ।

महाविपुलामहाचपलोद्गीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७

I·I S I·S·I—S·S—I·S·I—S·S—I·S·I—I—S,

विपुला पयोध—रश्रो—णिमण्ड—ले च—क्षुपोश्च—प—ला ।

१ २ ३ ४ ५ ६ ७

S·S—I·S·I—S·S—I·S·I S·S—I·S·I—S·I·I—S,

उद्गी—तिशालि—नी का—मिनी च सा वा—णिनी म—नो हर—ति ॥

अर्धे वसुगणं आर्यागीतिः । ४ । ३१ ॥

अष्ट गणाः प्रथमेऽर्धे यस्या भवन्ति सा 'आर्यागीतिः' नामार्या । अष्टमोऽपि गणश्चतुर्मात्रिको भवतीत्यर्थः । विशेषाभावात् द्वितीयमप्यर्धं तादृशमेव । अत्रापि षष्ठो गणो द्विविकल्प एव, न लकारः । अर्धे इति वर्तमाने पुनरर्धग्रहणाद्गणग्रहणाच्च । इयमपि पथ्यादिलक्षणपूर्वकत्वात् तद्वदार्यागीतिः ॥ पथ्यार्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८

I·I·I·I—I·I·I·I—S·S S·S—S·S—I·S·I—S·S—I·I·I

अजमज—रममर—मेकं प्रत्य—क्चैत—न्यमीश्व—रं ब्र—ह्म परम् ।

१ २ ३ ४ ५ ६ ७ ८

S·S—S·S—I·I·S I·I·S—S·S—I·S·I—S·S—S·S,

आत्मा—नं भा—वयतो भवमु—क्तिः स्या—दितीय—मार्या—गीतिः ।।

महाविपुलार्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८

I·I·S—I·S·I—I·I·S—I·S·I—S·I·I—I·I·I·I—I·I·I·I—I·I·S

विषयी—भिलाष—मृगतृ—ष्णिका ध्रु—वं हॅर—ति हरिण—मिव हृत—हृदयम् ।

१ २ ३ ४ ५ ६ ७ ८

I I·S—I·S·I—I·I·S—I·SI·—S·S—I·S·I—I·I·I·I—S·S,

विपुला—त्ममोक्ष—सुखका—ङ्क्षिभिस्त—तस्त्य—ज्यते वि—षयरस—सङ्गः ॥

पथ्याजघनचपलार्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८

S·S—I·S·I—S·S—I·I·S S·S—I· I·I·I—I·I·S—I·I·S,

वाता—हतोर्मि—माला—चपलं संप्रे—क्ष्य विषय—सुखम—स्पतरम् ।

१ २ ३ ४ ५ ६ ७ ८

S·S I·S·I—S·S I·S·I—S·S—I·S·I S·S—I·I·S,

मुक्त्वा समस्त—सङ्गं तपोव—नान्या—श्रयन्ति तेना—त्मविदः ॥

---

१. 'मालिनी' इति लि० पु०. २. 'गणाः' इति पाठः. ३. 'आर्याणामासमन्ताद्गीतिः. ४. 'विपुलाभिलाष' इति लि० पु०. ५. 'हन्ति' इति लि० पु०.

महाविपुलामहाचपलार्यागीत्युदाहरणम्—

१ २ ३ ४ ५ ६ ७ ८

।·।·ऽ—।· ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·ऽ ।·ऽ·। ।·।·।·।—।·।·ऽ,

चपला—नि चक्षु—रादी—नि चित्त—हारी च हन्त हृतविष—यगणः।

१ २ ३ ४ ५ ६ ७ ८

ऽ·ऽ—।·ऽ·।—ऽ·ऽ—।·ऽ·।—ऽ·।·।—।·।·।·।—।·।·ऽ—ऽ·ऽ,

एका—न्तशालि—नां यो—गिनाम—तो भव—ति परम—सुखसं—प्राप्तिः॥

इत्यार्याधिकारः।

वैतालीयं द्विःस्वरा अयुक्पादे युग्वसवोऽन्ते ल्र्गः। ४। ३२॥

'लः' इत्यनुवर्तते। यत्रायुक्पादे प्रथमे तृतीये च द्विःस्वराश्चतुर्दश लकारा भवन्ति, युक्पादे च द्वितीये चतुर्थे च युग्वसवः षोडश लकाराः, तत् 'वैतालीयं' नाम छन्दः। तेषां लां मध्ये उभयोरपि पादयोरन्ते रेफलकारगकाराः कर्तव्याः। आद्ये पादे षड् लकाराः पश्चादेवशिष्यन्ते, द्वितीये चाष्टौ। एवं वैतालीयार्धं सिध्यति। द्वितीयमप्यर्धं तादृशमेव। तत्रोदाहरणम्—

रगणः ल. गु. रगणः ल. गु.

२. ४ ५. ६. ८. ९ ११. १२. १४. २. ४. ६. ७. ८. १०. ११. १३. १४. १६.

ऽ—ऽ—।—।—ऽ—।—ऽ—।—ऽ ऽ—ऽ—ऽ—।—।—ऽ—।—ऽ—।—ऽ,

क्षु–त्क्षा–ण–श–री–र–सं–च–या व्य–क्ता–भू–त–शि–रा–स्थि–प–ञ्ज–राः।

रगणः ल. गु. रगणः ल. गु.

२. ४. ५. ६. ८. ९. ११.१२.१४. २. ४. ६. ७. ८. १०. ११. १३. १४. १६.

ऽ—ऽ—।—ऽ—।—ऽ—।—ऽ ऽ—ऽ—ऽ—।—।—ऽ ।—ऽ—।—ऽ,

के–शैः प–रु–षै–स्त–वा–र–यो वै–ता–ली–य–त–नुं वि–त–न्व–ते॥

---

१. मन्दारमरन्देऽन्येपि केचिद्गीतिभेदा दृश्यन्ते—

'तत्रैकद्वित्रिमात्राणामाधिक्यं प्रथमे यदि।
तदा विगीतिः कथिता द्वितीये चेत्सुगीतिका॥
तृतीये त्वतिगीतिः स्याच्चतुर्थे स्वरगीतिका।
कटुगीतिस्त्वोजयोश्चेत्समयोर्मधुगीतिका॥
यदि द्वितीयादिमयोर्बालगीतिरुदाहृता।
वक्रगीतिस्तु कथिता चेत्तृतीयचतुर्थयोः॥' इति। (बि० १)

२. पश्चात् रेफलकारगकाराणां प्रागिति भावः।

अपि च ।

रगणः ल. गु.　　　　रगणः ल. गु.

१. २. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११. १२. १४. १६.

।-।-ऽ-।　।-ऽ-।-ऽ-।-ऽ　।-।-ऽ-ऽ　।-।-ऽ-।-ऽ-।-ऽ,

त-व-त-न्वि क-टा-क्ष-वी-क्षि-तैः प्र-स-र-द्भिः श्र-व-णा-न्त-गो-च-रैः ।

रगणः ल. गु.　　　　रगणः ल. गु.

१. २. ३. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११. १२. १४. १६.

।-।-ऽ-।-।　ऽ-।-ऽ-।-ऽ　।-।-ऽ　ऽ-।-।　ऽ-।-ऽ।-ऽ,

वि-शि-खै-रि-व ती-क्ष्ण-को-टि-भिः प्र-ह-तः प्रा-णि-ति दु-ष्क-रं न-रः ॥

यथा च ।

रगणः ल. गु.　　　　रगणः ल. गु.

१.-२. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११. १२. १४. १६.

।-।-ऽ-।-।-।-ऽ-।-ऽ-।-ऽ　।-।-ऽ-ऽ-।-।-ऽ-।-ऽ-।-ऽ,

रा-व-शो-णि-त-प-ङ्क-च-र्चि-तं पु-रु-षा-न्त्र-ग्र-थि-तो-र्ध्व-मू-र्ध-जम्

रगणः ल. गु.　　　　रगणः ल. गु.

१. २. ३. ५. ६. ८. ९. ११. १२. १४. २. ३. ६. ७. ८. १०. ११. १२. १४. १६.

।-।-ऽ-।-।-ऽ-।-ऽ-।-ऽ　ऽ-ऽ-ऽ-।-।-ऽ　।-ऽ-।-ऽ,

व-पु-रा-न्त-र-व-ह्नि-दी-पि-तं वै-ता-ली-य-मि-दं वि-लो-क्य-ताम् ॥

वैतालीयमिति वेतालशब्दात्कृशाश्वा(पा० सू० ४।२।८०) देराकृतिगणत्वाच्छण्प्रत्ययश्चातुरर्थिकः । अत्र पादग्रहणमिदं ज्ञापयति, यत्–आर्यादीनां 'पादश्चतुर्भागः' (पि० सू० ४।१०) इति व्यवस्था नास्ति ॥

औपच्छन्दसकम् । ४ । ३३ ॥

अस्मिन् वैतालीये छन्दस्यन्ते गकारश्चेदधिको भवति, तद् 'औपच्छन्दसकं' नाम छन्दः । तत्रोदाहरणम्—

रगणः ल. गु. गु.　　　　रगणः ल. गु. गु.

२. ४. ५. ६. ८. ९. ११. १२. १४. १६. २. ४. ६. ७. ८. १०. ११. १२. १४. १६. १८.

ऽ-ऽ-।-।-ऽ　।-ऽ-।　ऽ-ऽ　ऽ ऽ-ऽ-।-।-ऽ-।-ऽ।　ऽ-ऽ,

वा-क्यै-र्म-धु-रैः प्र-ता-र्य पू-र्वं यः प-श्चा-द-ति-सं-द-धा-ति मि-त्रम् ।

रगणः ल. गु. गु.　　　　रगणः ल. गु. गु.

२. ४. ५. ६. ८. ९. ११. १२. १४. १६. २. ४. ६. ७. ८. १०. ११. १२. १४. १६. १८.

ऽ-ऽ-।-।-ऽ　।-ऽ-।-ऽ-ऽ-ऽ-ऽ-ऽ-।-।-ऽ　।-ऽ-।　ऽ-ऽ,

तं दु-ष्ट-म-तिं वि-शि-ष्ट-गो-ष्ठ्या-मौ-प-च्छ-न्द-स-कं व-द-न्ति बा-ह्यम् ॥

१. लगयोरन्ते गकारेऽधिके यगणः सिध्यति । अत एवोक्तं **गारुडे**—'अन्तेयौ पूर्ववदिदमौपच्छन्दसिकं मतम् ।' (पू. खं. २०८।६) इति ।

अपि च ।

रगणः यगणः रगणः यगणः

१. २. ४. ५. ६. ८. ९. ११. १२.१४.१६. १. २. ४. ६. ७. ८. १०.११. १३.१४.१६.१८.

।–।–ऽ–।–।–ऽ–।–ऽ–।–ऽ–ऽ ।–।–ऽ–ऽ–।–।–ऽ–।– ऽ–।–ऽ–ऽ,

प–र–म–र्म–नि–री–क्ष–णा–नु–र–क्तं स्व–य–म–त्य–न्त–नि–गू–ढ–चि–त्त–वृ–त्तिम् ।

रगणः यगणः रगणः यगणः

१. २. ४. ५. ६. ८. ९. ११. १२.१४. १६. २. ४. ६. ७. ८. १०. ११.१२.१४.१६. १८.

।–।–ऽ– ।–।–ऽ–।–ऽ– ।–ऽ–ऽ– ऽ–ऽ– ऽ– ।–।–ऽ ।–ऽ–। ऽ–ऽ,

अ–न–व–स्थि–त–म–र्थ–लु–ब्ध–मा–रा–द्दी–प–च्छ–न्द–स–कं ज–ही–हि मि–त्रम् ॥

उपछन्दःशब्दादरीहणादि(पा० सू० ४।२।८०)पाठाच्चातुरर्थिको वुञ्प्रत्ययः ॥

आपातलिका भ्गौ ग् । ४ । ३४ ॥

रेफलकारगकाराणामपवादः । 'द्विस्वरा अयुक्पादे युग्वसवोऽन्ते'(पि० सू० ४।३२) इत्यनुवर्तते । पूर्वलक्षणयोरन्ते भकारो गकारौ—च भवतः, तद्वैतालीयम् 'आपातलिका' नाम लभते । तत्रोदाहरणम्—

भगणः गु. गु. भगणः गु. गु.

२. ३. ४. ६. ८. ९. १०. १२. १४. २. ४. ६ ७. ८. १०. ११.१२.१४.१६.

ऽ–।–।–ऽ–ऽ ।–।–ऽ–ऽ ऽ–ऽ–ऽ ।–।–ऽ–।–।–ऽ–ऽ,

पि–ङ्ग–ल–के–शी क–पि–ला–क्षी वा–चा–टा वि–क–टो–न्न–त–द–न्ती ।

भगणः गु. गु. भगणः गु. गु.

२. ४. ५. ६. ८. ९. १०.१२.१४. १. २. ३. ४. ६. ७. ८. १०. ११. १२. १४.१६.

ऽ–ऽ–।–।–ऽ ।–।–ऽ–ऽ ।–।–।–।–ऽ– । । ऽ–।–।–ऽ–ऽ,

आ–पा–त–लि–का पु–न–रे–षा नृ–प–ति–कु–ले–ऽपि न भा–ग्य–मु–पै–ति ॥

आपातलिका अस्थिरेत्यर्थः ॥

शेषे परेण युङ् न साकम् । ४ । ३५ ॥

अत्र वैतालीयाधिकारे येषां लकाराणां नियम उक्तस्तद्व्यतिरिक्तो लकारवर्णः शेषः, तस्मिन्नियमः क्रियते—युग्लकारः परेण साकं न मिश्रीकर्तव्यः । द्वितीयस्तृतीयेन, चतुर्थः पञ्चमेन, युक्पादे षष्ठश्च सप्तमेन । एवं वदता शेषाणां मिश्रीभावोऽप्यनुज्ञातः । अत्रोदाहरणं पूर्वमेव ॥

षट् चामिश्रा युजि । ४ । ३६ ॥

अत्र द्वितीयचतुर्थयोः पादयोः षट् लकारा अमिश्रा न कर्तव्याः । पृथग् न प्रयोक्तव्या इत्यर्थः । प्रथमतृतीययोश्च पादयोः स्वरुचिः । तत्रोदाहरणं वैतालीये तावत्—

रगणः ल. गु. रगणः ल. गु.

१. २. ३. ४. ५. ६. ८. ९.११.१२. १४. १. २. ३. ४. ६. ७. ८.१०. ११. १३. १४.१६.

।–।–।–।–।–। ऽ–।–ऽ ।–ऽ ।–।–।–।–ऽ–।–।–ऽ–।–ऽ–।–ऽ,

स–म–र–शि–र–सि स–ह्य–ते द्वि–षां न–व–नि–शि–त्रा–यु–ध–वृ–ष्टि–र–ग्र–तः ।

रगणः ल. गु. रगणः ल. गु.
१. २. ३. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११. १२. १४. १६.
।–।–।–।–।–।–ऽ–।–ऽ–।–ऽ ।–।–ऽ–ऽ । ।–ऽ–।–ऽ–।–ऽ,
कु–व–ल–य–द–ल–दी–र्घ–च–क्षु–षां प्र–म–दा–नां न क–टा–क्ष–वी–क्षि–तम् ॥

औपच्छन्दसकोदाहरणम्—

रगणः यगणः रगणः यगणः
१. २. ३. ४. ५. ६. ८. ९. ११. १२. १४. १६. २. ४. ६. ७. ८. १०. ११. १२. १४. १६. १८.
।–।–।–।– ।–। ऽ–।–ऽ–।–ऽ–ऽ ऽ–ऽ–ऽ–।–।–ऽ ।–ऽ ।–ऽ–ऽ,
प–र–यु–व–ति–पु त्रु–त्र–भा–व–मा–दौ कृ–त्वा–प्रा–र्थ–य–ते त–तः प–ति–त्वम् ।

रगणः यगणः रगणः यगणः
१. २. ३. ४. ५. ६. ८. ९. ११. १२. १४. १६. २. ४. ६. ७. ८. १०. ११. १२. १४. १६. १८.
।–।–।–।–।–।–ऽ– ।–ऽ ।–ऽ–ऽ–ऽ–ऽ–ऽ–।–।–ऽ ।–ऽ–। ऽ–ऽ,
इ–द–म–प–र–मि–हो–च्य–ते वि–शे–षा–दौ–प–च्छन्द–स–कं ख–ल–स्य वृ–त्तम् ॥

आपातलिकोदाहरणम्—

भगणः गु. गु. भगणः गु. गु.
१. २. ३. ४. ५. ६. ८. ९. १०. १२. १४. २. ३. ४. ६. ७. ८. १०. ११. १२. १४. १६.
।–।–।–।–।–।–। ऽ–।–।–ऽ–ऽ ऽ–।–।–ऽ ।–।–ऽ–।–।–ऽ–ऽ,
अ–भि–र–म–य–ति किं–न–र–क–ण्ठी हं–स–ग–तिः श्र–व–णा–य–त–ने–त्रा ।

भगणः गु. गु. भगणः गु. गु.
१. २. ३. ४. ५. ६. ८. ९. १०. १२. १४. १. २. ३. ४. ६. ७. ८. १०. ११. १२. १४. १६.
।–।–।–।–।–।–ऽ–।–।–ऽ–ऽ ।–।–।–।–ऽ ।–।–ऽ ।–।–ऽ–ऽ,
वि–श–द–क–म–ल–को–म–ल–गा–त्री यु–व–ति–रि–यं हृ–द–यं त–रु–णा–नाम् ॥

पञ्चमेन पूर्वः साकं प्राच्यवृत्तिः । ४ । ३७ ॥

इदानीं विशेषलक्षणमाह—'शेषे परेण युङ् न साकम्' (पि० सू० ४।३५) इत्यत्र पञ्चमचतुर्थयोरेकीभावो निषिद्धः सोऽनेन विधीयते । 'युजि' इत्यनुवर्तते । यदा युक्पादे पञ्चमेन लकारेण पूर्वः संगच्छते तदा 'प्राच्यवृत्तिः' नाम वैतालीयं भवति । शेषं यथाप्राप्तम् । तत्रोदाहरणम्—

रगणः ल. गु. रगणः ल. गु.
१. २. ४. ५. ६. ८. ९. ११. १२. १४. २. ३. ५. ६. ७. ८. १०. ११. १२. १४ १६.
।–।–ऽ–।–।–।–ऽ–।–ऽ–।–ऽ, ऽ–। ऽ–। ।।–ऽ–। ऽ–।–ऽ,
वि–पु–ला–र्थ–सु–वा–च–का–क्ष–राः क–स्य ना–म न ह–र–न्ति मा–न–सम्[१] ।

---

१. 'वैतालीयप्राच्यवृत्तिः, औपच्छन्दसकप्राच्यवृत्तिः, आपातलिकाप्राच्यवृत्तिः' इति भेदत्रयमुपलभ्यते छन्दःकौस्तुभादौ ।

रगणः ल. गु. रगणः ल. गु.
१. २. ४. ५. ६. ८. ९. ११. १२. १४. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६.
।–।–S–।–।–S–।–S–।–S S–।–S–।–।–।–S–।–S–।–S,
र–स–भा–व–वि–शे–ष–पे–श–लाः प्रा–च्य–वृ–त्ति–क–वि–का–व्य–सं–प–दः ॥

अयुक्तृतीयेनोदीच्यवृत्तिः । ४ । ३८ ॥

'पूर्वः साकम्' इत्यनुवर्तते। अयुक्पादे तृतीयेन लकारेण यदि पूर्वः संगच्छते, तदा 'उदीच्यवृत्तिः' नाम वैतालीयम्। शेषं यथाप्राप्तमेव। तत्रोदाहरणम्—

रगणः ल. गु. रगणः ल. गु.
१. ३. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११ १३. १४. १६.
।–S–।–।–।–S–।–S–।–S ।–।–S–S ।–।–S–।–S–।–S,
अ–वा–च–क–म–नू–र्जि–ता–क्ष–रं श्रु–ति–दु–ष्टं य–ति–क–ष्ट–म–क्र–मम्।

रगणः ल. गु. रगणः ल. गु.
१. ३ ४ ५. ६. ८. ९. ११. १२. १४. १. २. ४. ६. ७. ८. १०. ११. १३. १४. १६.
।–S–।–।–।–S । S–।–S ।–।–S S–।–।–S–।–S–।–S,
प्र–सा–द–र–हि–तं च ने–ष्य–ते क–वि–भिः का–व्य–मु–दी–च्य–वृ–त्ति–भिः ॥

आभ्यां युगपत्प्रवृत्तकम्[2] । ४ । ३९ ॥

आभ्यां पूर्वोक्तलक्षणाभ्यां युगपत्प्रवृत्ताभ्यां 'प्रवृत्तकं' नाम वैतालीयम्। युक्पादे पञ्चमेन पूर्वः संगच्छते, अयुक्पादे तृतीयेन द्वितीय इत्यर्थः। तत्रोदाहरणम्—

रगणः ल. गु. रगणः ल. गु.
१. ३. ४. ५. ६. ८. ९. ११. १२. १४. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६.
।–S ।–।–।–S–।–S–।–S S–।–S ।–।–।–S–।–S–।–S,
इ–द भ–र–त–वं–श–भू–भृ–तां श्रू–य–तां श्रु–ति–म–नो–र–सा–य–नम्।

रगणः ल. गु. रगणः ल. गु.
१. ३. ४. ५. ६. ८. ९. ११. १२. १४. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६.
।–S–।–।–।–S ।–S–।–S S–।–S–।–।–।–S ।–S–।–S,
प–वि–त्र–म–धि–कं शु–भो–द–यं व्या–स–व–क्त्र–क–थि–तं प्र–वृ–त्त–कम्॥

अयुक्चारुहासिनी[3] । ४ । ४० ॥

यस्य सर्वे पादा अयुग्लक्षणयुक्तास्तद्वैतालीयं 'चारुहासिनी' नाम। किं तल्लक्षणम्? चतुर्दशमात्रत्वं, तृतीयेन पूर्वस्य योगः। तत्रोदाहरणम्—

---

१. अस्यापि 'वैतालीयोदीच्यवृत्तिः, औपच्छन्दसकोदीच्यवृत्तिः, आपातलिकोदीच्यवृत्तिः' इति भेदत्रयमुपलभ्यते तत्रैव। २. 'वैतालीयप्रवृत्तम्, औपच्छन्दसकप्रवृत्तम्, आपातलिकाप्रवृत्तकम्' एवं त्रिविधं छन्दःकौस्तुभादौ। ३. तथैव चारुहासिन्यपि त्रिविधा।

रगणः ल. गु.   रगणः ल. गु.

१. २. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ५. ६. ८. ९. ११. १२. १४.

।-ऽ-।-।-।-ऽ-।-ऽ-।-ऽ ।-ऽ-।-।-।-ऽ-।-ऽ-।-ऽ,

म-ना-क्प्र-सू-त-द-न्त-दी-धि-तिः स्म-रो-ल्ल-सि-त-ग-ण्ड-म-ण्ड-ला ।

रगणः ल. गु.   रगणः ल. गु.

१. २. ४. ५. ६. ८. ९. ११. १२. १४. १. २. ४. ५. ६. ८. ९. ११. १२. १४.

।-ऽ-।-।-।-ऽ। ऽ-।-ऽ, ।-ऽ।-।-। ऽ-।-ऽ-।-ऽ,

क-ठा-क्ष-ल-लि-ता तु का-मि-नी म-नो ह-र-ति चा-रु-हा-सि-नी ॥

युगपरान्तिका । ४ । ४१ ॥

युग्लक्षणयुक्तैश्चतुर्भिः पादैः 'अपरान्तिका' नाम वैतालीयम् । किं तल्लक्षणम् ? षोडशमात्रत्वम्, पञ्चमेन पूर्वस्य योगः, एषां मिश्राणां प्रयोगश्च । तत्रोदाहरणम्—

रगणः ल. गु.   रगणः ल. गु.

१. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६. १. २. ३. ५. ६. ८. १०. ११. १३. १४. १६.

।-।-।-ऽ-।-।-।-ऽ-।-ऽ-।-ऽ, ।-।-।-ऽ-।-ऽ-ऽ ।-ऽ-।-ऽ,

स्थि-र-वि-ला-स-न-त-मौ-क्ति-का-व-ली क-म-ल-को-म-ला-ङ्गी मृ-गे-क्ष-णा ।

रगणः ल. गु.   रगणः ल. गु.

१. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६. १. २. ३. ५. ६. ७. ८. १०. ११. १३. १४. १६.

।-।-। ऽ-। ।-।-ऽ । ऽ-।-ऽ, ।-।-।-ऽ-।-।-।-ऽ-।-ऽ-।-ऽ,

ह-र-ति क-स्य हृ-द-यं न का-मि-नः? सु-र-त-के-लि-कु-श-ला-प-रा-न्ति-का ॥[1,2]

अपरस्यान्तिके समीपे स्थिता, परकीयेत्यर्थः[3] ॥

इति वैतालीयाधिकारः[4] ।

गन्ता द्विर्वसवो मात्रासमकं ल् नवमः । ४ । ४२ ॥

'वैतालीयम्–' (पि॰ सू॰ ४।३२) इत्यादिसूत्रात्सप्तम्यन्तं 'पाद'ग्रहणमनुवर्तते। 'ल्' इति च महानधिकारः । तेनायमर्थः—यत्र पादे गन्ताः सन्तः, षोडश लकारा भवन्ति, तत् 'मात्रासमकं' नाम छन्दः । अन्ते द्वाभ्यामेको गुरुः (ऽ) कर्तव्यः । नवमश्च लकार

---

१. अपरान्तिकापि त्रिधोपलभ्यते तत्रैव. अस्या **एकपादिके**ति संज्ञा **गारुडे** (पृ. २०८।९). २. 'स्मितविलासरसोक्तिपेशला' इति लि. पु. ३. वस्तुतस्तु–'वानवासिका' (४।४३) वत् अपरान्तिका अपरान्तदेशोद्भवा स्त्री इत्येव युक्तम् । ४. छन्दःकौस्तुभवृत्तरत्नाकरादिग्रन्थेषु नव वैतालीयभेदा उपलभ्यन्ते, तेष्वेकतमो 'दक्षिणान्तिका' इति नाम्ना भेदोऽत्र नोपलभ्यते । **गरुडपुराणे** तु लक्षितोऽसौ 'ज्ञेयायो दक्षिणान्तिका । पराश्रितो द्वितीयो लः पादेषु निखिलेष्वपि ॥ (पृ. २०८।७) इति । इयमपि पूर्ववत्त्रिविधैव. ५. 'मात्रासमकं नवमो ल् गोऽन्त्यः' इति वृ॰ र॰.

(।) एव। 'द्विर्वसवः' इति द्विगुणिता वसवः, लकाराः षोडशेत्यर्थः। 'शेषे परेण युङ् न साकम्' (पि० सू० ४।३५) इत्यनुवर्तनीयम्। तत्रोदाहरणम्—

२. ४. ५. ६. ८. ९.१०.१२.१४.१६. २. ४. ६. ८. ९.१०.१२. १४. १६.
ऽ–ऽ–।–।–ऽ ।–।–ऽ–ऽ–ऽ, ऽ–ऽ–ऽ–ऽ ।–।–ऽ–ऽ–ऽ,
अ–श्म–श्रु–मु–खो वि–र–लै–र्द–न्तै र्ग–म्भी–रा–क्षो न–त–ना–सा–ग्रः।
२. ४. ५. ६. ८. ९. १०. १२. १४.१६. २. ४. ५. ६. ८. ९.१०.१२.१४.१६.
ऽ–ऽ–।–।–ऽ ।–।–ऽ ऽ–ऽ, ऽ–ऽ–।–।–ऽ ।–।–ऽ ऽ–ऽ,
नि–माँ–स–ह–नुः स्फु–टि–तैः के–शै र्मा–त्रा–स–म–कं ल–भ–ते दुः–खम्॥

'गन्त–' (पि० सू० ४।३२) इत्यनेनैवान्तस्य गुरुत्वे सिद्धे पुनर्गन्तग्रहणमातिदेशिकगुरुत्वनिवृत्त्यर्थम्। तेनात्र द्वौ लकारौ (।।) भङ्क्त्वा द्विमात्रिको गुरुः (ऽ) क्रियत इति वाक्यशेषः॥

द्वादशश्च वानवासिका[2]।४।४३॥

यस्य मात्रासमकस्य पादे द्वादशो लकारः (।) स्वरूपेणावतिष्ठते चकारान्नवमश्च, तन्मात्रासमकं 'वानवासिका' नाम। तत्रोदाहरणम्—

२. ३. ४. ६. ८. ९. १०.११.१२.१४.१६. १. २. ३.४. ६. ७. ८. ९.१०.११.१२.१४.१६.
ऽ–।–।–ऽ–ऽ–।–।–।–।–ऽ–ऽ, ।–।–।–।–ऽ–। –।–।–।–।–।–।–ऽ–ऽ,
म–न्म–थ–चा–प–ध्व–नि–र–म–णी–यः सु–र–त–म–हो–त्स–व–प–ट–ह–नि–ना–दः।
१. २. ४. ६. ८. ९. १०. ११.१२.१४.१६. २. ३. ४. ६. ८. ९. १०.११.१२.१४.१६.
।–।–ऽ–ऽ–ऽ–।–।–।–।–ऽ–ऽ, ऽ–। । ऽ–ऽ ।–।–।–। ऽ–ऽ,
व–न–वा–सै–स्त्री–स्व–नि–त–वि–शे–षः क–स्य न चि–त्तं र–म–य–ति पुं–सः॥

विश्लोकः[4] पञ्चमाष्टमौ।४।४४॥

द्वादशग्रहणं नवमग्रहणं च निवृत्तम्। यत्र चतुर्षु पादेषु पञ्चमाष्टमौ लकारौ (।) तिष्ठतः, शेषं यथाप्राप्तम्, तन्मात्रासमकं 'विश्लोको' नाम। तत्रोदाहरणम्—

२. ४. ५ ६ ७ ८. १०. १२.१४.१६. २. ३. ४. ५. ६. ७. ८.१०.११.१२.१४.१६.
ऽ–ऽ–।–।–।–।–ऽ ऽ–ऽ–ऽ ऽ–।–।–।–।–।–।–ऽ–।–।–ऽ–ऽ,
श्रा–त–गु–ण–र–हि–तं वि–श्लो–कं दु–र्न–य–क–र–ण–क–द–र्थि–त–लो–कम्।
२ ४. ५. ६. ७. ८. १०. ११. १२.१४.१६. २. ४. ५. ६. ७. ८.१०.११.१२.१४.१६.
ऽ–ऽ ।–।–।–।–ऽ– ।–।–ऽ–ऽ, ऽ–ऽ ।–।–।–। ऽ–।–।–ऽ–ऽ,
जा–तं म हि–त–कु–ले–ऽप्य–वि–नी–तं मि–त्रं प–रि–ह–र सा–धु–वि–गी तम॥

चित्रा[5] नवमश्च।४।४५॥

---

१. 'अन्त्यस्य' इति लि० पु०. २. 'तद्युगलाद्वानवासिका स्यात्' इति वृ० र०. ३. कोङ्कणदेशात्पूर्वो भागो वनवासदेशः, 'सर्वसहा मध्यमवेगभाजस्त्रियो रमन्ते वनवासदेश्याः।' (५।१८) इति **रतिरहस्ये**। ४. 'जो लूनावथाम्बुधेर्विश्लोकः' इति वृ० र०. ५. 'वाणाष्टनवसु यदि लश्चित्रा' इति वृ० र० '**चित्रा** नाम च्छन्दश्चित्रं चेत्रयो मा यकारौ' इति **च्छन्दोमञ्जर्या**दिषूपलब्धं **चित्रा चित्रं** वा च्छन्दस्त्वन्यत्.

यस्य नवमो लकार (।) एवावशिष्यते चकारात्पञ्चमाष्टमौ च, तन्मात्रासमकं 'चित्रा'-नाम । तत्रोदाहरणम्—

१. २. ४. ५. ६. ७. ८. ९.१०.१२.१४.१६. २. ४. ५. ६. ७. ८. ९. १०.११.१२.१४. .६.
।–। ऽ– । –। ।–।–।–।–ऽ – ऽ–ऽ, ऽ– ऽ ।–।–।–। ।–। ।– ।–ऽ– ऽ,
य–दि वा–ञ्छ–सि प–र–प–द–मा–रो–ढुं मै–त्रीं प–रि–ह–र स–ह व–नि–ता–भिः ।
२. ३. ४. ५. ६. ७. ८. ९.१०.१२. १४. १६. २. ४. ५. ६. ७. ८. ९.१०.१२.१४.१६
ऽ–।–। ।–।–।–। ।–।–ऽ–ऽ–ऽ, ऽ–ऽ–।–।–। । ।–।–ऽ ऽ–ऽ,
मु–ह्य–ति मु–नि–र–पि वि–ष–या–स–ङ्गा–च्चि-त्रा भ–व–ति हि म–न–सो वृ–त्तिः ॥

'नवमः' (पि० सू० ४।४२) इत्यनुवर्तमानेऽपि पुनर्नवमग्रहणमुपचित्राप्रतिप्रसवार्थम् ।

परयुक्तेनोपचित्रा[1] । ४ । ४६ ॥

परयुक्तेन दशमेन सहैकीभूतेन नवमेन 'उपचित्रा' नाम भवति । पूर्वं लघुनियमेन लक्षणं प्रोक्तम् । इदं तु गुरुनियमेनोच्यते । तत्रोदाहरणम्—

२. ४. ६. ७. ८. १०. ११. १२.१४.१६. २. ४. ६. ७. ८. १०. ११.१२. १४.१६.
ऽ–ऽ–ऽ ।–।–ऽ–।–।–ऽ–ऽ, ऽ–ऽ– ऽ –।–।–ऽ–।–।–ऽ ऽ,
य–स्वि–त्तं गु–रु–स–क्त–मु–दा–रं वि–द्या–भ्या–स–म–हा–व्य–स–नं च ।
२. ४. ६. ७. ८.१०. ११.१२.१४.१६. २. ३. ४. ६. ७. ८. १०. ११.१२.१४. १६.
ऽ–ऽ ऽ–। ।–ऽ–।–।–ऽ–ऽ, ऽ–। –।–ऽ– ।–। –ऽ–।–।–ऽ–ऽ,
पृ–थ्वी त–स्य गु–णै–रु–प–चि–त्रा च–न्द्र–म–री–चि–नि–भै–र्भ–व–ती–यम् ॥

एभिः पादाकुलकम्[2] । ४ । ४७ ॥

एषां पञ्चानां मध्ये यैः कैश्चिदपि चतुर्भिः पादैः 'पादाकुलकं' नाम ।

मात्रासमकविश्लोकवानवासिकोपचित्राणां पादैरुदाहरणम्—

१. २. ४. ६. ७. ८. ९. १०. ११. १२. १४.१६. २. ४. ५. ६. ७. ८. १०.११. १२.१४.१६.
।–।–ऽ– ऽ–।–।–। ।–।–।–ऽ–ऽ ऽ–ऽ ।–।–।–।–ऽ–।–।–ऽ–ऽ,
अ–लि–वा–चा–लि–त–वि क–सि–त–चू–ते का–ले म–द–न–स–मा–ग–म–दू–ते ।
२. ४. ६. ८. ९. १०.११.१२.१४. १६. २. ४. ५. ६. ८. १०.११.१२. १४.१६.
ऽ–ऽ ऽ– ऽ ।–।–।–।–ऽ–ऽ ऽ–ऽ–।–।–ऽ ऽ–।–। ऽ–ऽ,
स्मृ–त्वा का–न्तां प–रि–हृ–त–सा–र्थः पा–दा–कु–ल–कं धा–व–ति पा–न्थः ॥

तथा विश्लोकोपचित्रामात्रासमकोपचित्राणां पादैः 'पादाकुलकम्' । तत्रोदाहरणम्—

२. ४. ५. ६. ७. ८. १०. ११. १२. १४.१६. २. ३. ४. ५. ६. ८. १०.११. १२. १४.१६.
ऽ– ऽ– ।–।–।–।–ऽ–।–।–ऽ–ऽ ऽ– ।–।–।–।–ऽ–ऽ–।–।–ऽ–ऽ,
पुं–स्को–कि–ल–कृ–त–शो–भ–न–गी–ते द–क्षि–ण–प–व–न–प्रे–रि–त–शी–ते ।

---

१. 'उपचित्रा नवमे परयुक्ते' इति वृ० र०. अर्धसमवृत्तान्तर्गतमुपचित्र-नामकं छन्दस्त्वितोऽन्यत् । २. 'लहु गुरु एक्क णिम्म णहि जेहा, पअ पअ लेक्खह उत्तमरेहा । सुकइ फणिंदह कंठहवलअं, सोरहमत्ता पाआकुलअम् ॥ इति प्रा० पि० सू० १।१०४ ।

१. २. ३. ४. ६. ८. ९. १०. १२. १४. १६. २. ४. ५. ६. ८. १०. ११. १२. १४. १६.
।–।–।–।–ऽ– ऽ–।–।–ऽ– ऽ–ऽ ऽ–ऽ–।–।–ऽ ऽ–।–। ऽ–ऽ,
म–धु–स–म–ये–ऽस्मि–न्कृ–त–वि–श्लो–कः पा–दा–कु–ल–कं नृ–त्य–ति लो–कः ॥

मात्रासमकस्यैकेन पादेन, द्वाभ्यामुपचित्रायाः, विश्लोकस्यैकेन 'पादाकुलकम्'। तत्रोदाहरणम्—

२. ४. ६. ८. ९. १०. १२. १४. १६. २. ४. ५. ६. ८. १०. ११. १२. १४. १६.
ऽ–ऽ ऽ–ऽ–।–।–ऽ– ऽ–ऽ ऽ–ऽ–।–।–ऽ–ऽ–।–।–ऽ–ऽ,
चि–त्तं भ्रा–म्य–त्य–न–व–स्था–नं पा–दा–कु–ल–क–श्लो–क–स–मा–नम् ।
२. ४. ६. ७. ८. १०. ११. १२. १४. १६. १. २. ३. ४. ५. ६. ७. ८. १०. १२. १४. १६.
ऽ–ऽ ऽ–।–। ऽ–।–। ऽ–ऽ–।–।–।–। ।–।–।–।–ऽ–ऽ ऽ–ऽ,
का–यः का–य–ति शा–य–ति श–क्ति–स्त–द–पि न म–म प–र–लो–के भ–क्तिः ॥

यथा पादाकुलकनाम्नः श्लोकस्य पादेष्वस्थिरता तथेत्यर्थः ।

उपचित्रापादेनैकेन, वानवासिकापादेन, पुनरुपचित्रापादाभ्यां पादाकुलकम् । तत्रोदाहरणम्—

१. २. ३. ४. ६. ७. ८. १०. ११. १२. १४. १६.
।–।–।–।–ऽ–।–।–ऽ–।–।–ऽ–ऽ.
प–रि–हृ–त–स–र्व–प–रि–ग्र–ह–लो–कः
१. २. ३. ४. ६. ७. ८. ९. १०. ११. १२. १४. १६.
।–।–।–।–ऽ–।–।–।–।–।–।–ऽ–ऽ,
प्र–ति–दि–न–व–र्धि–त–गु–रु–त–र–शो–कः ।
२. ३. ४. ६. ७. ८. १०. ११. १२. १४. १६.
ऽ–।–।–ऽ–।–।–ऽ–।–।–ऽ–ऽ,
दुः–ख–वि–व–र्धि–त–लो–च–न–वा–रिः
२. ४. ५. ६. ८. १०. ११. १२. १४. १६.
ऽ–ऽ–।–।–ऽ ऽ–। ।–ऽ–ऽ,
पा–दा–कु–ल–कं या–ति त–वा–रिः ॥

इति मात्रासमकाधिकारः ।

---

१. 'यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् । अनियतवृत्तपरिणामसहितं प्रथितं जगत्सु पादाकुलकम् ॥' इति वृ० र०.

२. 'त्यक्त्वा दलयुगनियमं वृत्तानि चतुष्पदानि बहुधा स्युः ।
त्रयमधिकरणं तेषां मात्रासमकं च कुलकमथ तिलकम् ॥ (२१४)
मात्रासमकपद्भेदाः शतोपर्यष्टविंशतिः ।
सर्वेषु योग्येष्वल्पानां निष्फलं नामकल्पनम् ॥
चतुर्धा यदि युक्तोऽङ्घ्रिर्मात्राभिः पञ्चभिर्यदि ।
षड्भिर्वा सप्तभिः पूर्णस्त्रिधाकुलकमीरमहे ॥'
मात्रासमकद्वयघटितं यदि । तिलकमिति प्रथयन्तु महान्तः ॥,
—(३।१४,१५,१९) इति वृत्तमणिकोशे ।

गीत्यार्या लः । ४ । ४८ ॥

यत्र पादे द्विर्वसवः षोडश लकारा भवन्ति सा 'गीत्यार्या' नाम जातिः । 'लः' इत्यनुवर्तमाने पुनर्लग्रहणं द्विमात्रिकनिवृत्त्यर्थम् । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
म–द–क–ल–ख–ग–कु–ल–क–ल–र–व–मु–ख–रि–णि

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
वि–क–सि–त–स–र–सि–ज–प–रि–म–ल–सु–र–भि–णि ।

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।–।–।–।–।–।–।–।–।–।–।–। ।–।–। ।–।
गि–रि–व–र–प–रि–स–र–स–र–सि म–हृ–ति ख–लु

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।–।–।–।–।–।–।–। ।–। ।–। ।–।–।–।
र–ति–र–ति–श–य–मि–ह म–म हृ–दि वि–ल–स–ति ॥

सर्वलघुच्छन्दसि गीत्यार्याशब्दस्य प्रवेशयितुमशक्यत्वात्तन्नाम नोक्तम् ॥

शिखा[3] विपर्यस्तार्धा । ४ । ४९ ॥

सैव गीत्यार्या विपर्यस्तार्धा यदा भवति तदा 'शिखा' इत्याख्यां लभते । अयमर्थः—यत्रार्धं सर्वलघु भवति, अर्धं च सर्वगुरु, इति ।

'चतुष्पदानां पादस्तु षोडशारभ्य मातृकाः ।
द्वात्रिंशद्भिः परिमितश्चरितार्थो विभाति नः ॥
यदि द्वात्रिंशतोऽप्यूर्ध्वं मात्राः पादे नियोजिताः ।
ध्वन्यादिसंज्ञं गीतं स्यान्न तद्वृत्तं प्रशस्यते ॥' (२।६,७) इत्यपि तत्रैव ।

१. 'द्विगुणितवसुलघुर**चलधृतिः**' इति नामान्तरं वृ० र०. २. 'चउमत्ता अट्ठगणा पुव्वद्धे, उत्तरद्ध होइ समरूआ । सो **खंधआ** विआणहु पिंगल पभणेइ मुद्धि बहुसंभेआ ॥' इति प्रा० पि० सू० १।६३ इत्यनुसारेण स्कन्धकमित्यपि संज्ञान्तरं भवेत् । ३. 'मत्त अठाइस पढमे, बीए बत्तीस मत्ताइ । पअ पअ अंते लहुआ मुद्धा **सिखा** विहाणेहु ॥' इति प्रा० पि० सू० १।१२७ उक्तशिखाच्छन्दस्त्वन्यत् । **वृत्तमणिकोशे** तु–'दशनगणोपरि गुरुयुतमलघुयुगं वा दलं पुरः परतः । उभयं द्वात्रिंशल्लघु सगुरु नवगणं च सम्मतास्ति शिखा ॥' (३।८) इत्यन्यथैव शिखा दृश्यते । सा च 'शिखा कल्प्यते चतुर्विधान् भेदान्' (२।३) इति तत्रैव । ४. 'णंदउभद्दउसेससारंगसिवबंभवारणवरुण । णीलुमअणतालंकसेहरुसरुगअणुसरहुविमइरवीर ॥' इति प्रा० पि० सू० १।६४ इति सूत्रोक्तस्कन्धकभेदान्तर्गत**शरभा**ख्यं छन्दोनामान्तरम् ।

एवं तस्या एव विन्यासभेदेन संज्ञाद्वयमाह—

लः पूर्वश्चेज्ज्योतिः । ४ । ५० ॥

पूर्वश्चेदर्धभागः सर्वलघुर्द्वात्रिंशल्लकारो (३२) भवति, उत्तरश्च सर्वगुरुः षोडश (१६) गकारस्तदा 'ज्योतिः' नाम शिखा भवति । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९.१०.११.१२.१३.१४.१५.१६.
।–। ।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
य–दि सु–ख–म–नु–प–मं–म–प–र–म–भि–ल–ष–सि
१७.१८.१९.२०.२१.२२.२३.२४.२५.२६.२७.२८.२९.३०.३१.३२.
।–।–।–। ।–।–।–। ।–।–।–।–।–।–।–।
प–रि–ह–र यु–व–ति–षु र–ति–म–ति–श–य–मि–ह ।
१. २. ३. ४. ५. ६. ७. ८.
ऽ–ऽ– ऽ–ऽ–ऽ–ऽ– ऽ–ऽ,
आ–त्म–ज्यो–ति–र्यो–गा–भ्या–सा-
९.१०. ११. १२. १३.१४.१५.१६.
ऽ–ऽ ऽ–ऽ–ऽ–ऽ ऽ– ऽ
द्दृ–ष्ट्वा दुः–ख–च्छे–दं कु–र्याः ॥

गश्चेत्सौम्या । ४ । ५१ ॥

तस्या एव शिखायाः पूर्वार्धभागः सर्वगुरुः षोडश (१६) गकारश्चेद्भवति, उत्तरश्च द्वात्रिंश (३२) ल्कारो भवति, तदा 'सौम्या' नाम शिखा भवति । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८.
ऽ– ऽ ऽ–ऽ ऽ–ऽ ऽ–ऽ
सौ–म्यां द्द–ष्टिं दे–हि स्ने–हा-
९.१०. ११. १२.१३.१४.१५. १६.
ऽ–ऽ– ऽ –ऽ ऽ–ऽ ऽ– ऽ
दे–हे–ऽस्मा–कं मा–नं मु–क्त्वा ।
१. २. ३. ४. ५. ६. ७. ८. ९.१०.११.१२.१३.१४.१५.१६.
।–।–।–।–।–। ।–।–।–।–।–। ।–। ।–।,
श–श–ध–र–मु–खि! सु–ख–मु–प–न–य म–म हृ–दि
१७.१८.१९.२०.२१.२२.२३.२४.२५.२६.२७.२८.२९.३०.३१.३२.
।–।–।–।–।–।–।–।–।–।–। ।–।–।–।–।–।
म–न–सि–ज–रु–ज–म–प–ह–र ल–घु–त–र–मि–ह ॥

चूलिकैकोनत्रिंशदेकत्रिंशदन्ते ग् । ४ । ५२ ॥

'अर्ध'ग्रहणम् (पि० सू० ४।४९) अनुवर्तते । यत्र प्रथमेऽर्धे एकोनत्रिंश (२९) लकारा भवन्ति, द्वितीये चार्धे एकत्रिंशत् (३१), तयोश्चान्ते द्वौ (।।) लकारावुन्मूल्य

---

१. 'अनङ्गक्रीडा' इति नामान्तरमस्य वृ० र०.

प्रत्येकमेको गुरुः (ऽ) क्रियते, तत् 'चूलिका' नाम छन्दः । 'अन्ते ग्' इति विशेषोपादानसामर्थ्यादन्येषां लघुत्वमुक्तं भवति। तेनाद्ये सप्तविंशति (२७) र्लघवः, अन्ते गुरुरेको भवति । द्वितीयेऽप्येकोनत्रिंश (२९) ल्लघवः, अन्ते गुरुश्चैकः । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४.
।–।–।–।–।–।–।–।–।–।–। ।–।–।–।,
र–ति–क–र–म–ल–य–म–रु–ति शु–भ–श–श- (?)
१५. १६. १७. १८. १९. २०. २१. २२. २३. २४. २५. २६. २७. २९.
।–।–।–।–।–।–।–।–।–। ।–।–।–।–ऽ,
म–भि–ह–त–हि–म–म–ह–सि म–धु–स–म–ये ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।–।–।–। ।–।–। ।–।–।–। ।–।–।–। ।,
प्र–व–स–सि प–थि–क! वि–र–हि–त! क–थ–मि–ह तु
१७. १८. १९. २०. २१. २२. २३. २४. २५. २६. २७. २८. २९. ३१.
।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ,
प–रि–हृ–त–यु–व–ति–र–ति–च–प–ल–त–या ॥

अन्यैः पुनरन्यथैवेदं सूत्रमधीयते—'चूलिकार्धमेकोनत्रिंशदन्ते ग्' इति । तेषामुभयोश्चाप्यर्धयोरेकोनत्रिंशन्मात्रा गुर्वन्ता भवन्ति । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४.
।–।–।–।–।–।–।–।–।–।–।–।–।–।
घ–न–प–रि–म–ल–मि–ल–द–लि–कु–ल–मु–ख-
१५. १६. १७. १८. १९. २०. २१. २२. २३. २४. २५. २६. २७. २९.
।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ,
रि–त–नि–खि–ल–क–म–ल–म–ल–य–प–व–ने ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४.
।–।–।–। ।–।–। ।–।–।–। ।–।–।
ज–न–य–ति म–न–सि श–शि–मु–खि मु–द–म-
१५. १६. १७. १८. १९. २०. २१. २२. २३. २४. २५. २६. २७. २९.
।–।–।–।–। ।–। ।–।–।–। ।–।–ऽ.
ति–श–य–मि–ह म–म म–धु–र–य म–धु–ना ॥
'अर्ध' ग्रहणादत्र पादव्यवस्था नास्ति[२] ॥

इदानीं गणमात्राच्छन्दसां गुरुलघुसंख्यापरिज्ञानार्थमिदमाह—

सा ग् येन न समा लां ग्ल इति । ४ । ५३ ॥

सा गुरुसंख्या वेदितव्या । येन यावद्भिरक्षरैः । लां लघूनां मात्राणाम् । समाः समसंख्या ग्लो न स्युः । अपि तु न्यूनसंख्या एव । 'ग्लः' इत्यक्षराण्यभिधीयन्ते तेषां

---

१. 'अतिरुचिरा' इति संज्ञान्तरं वृत्तरत्नाकरादिषु । २. अत एवैतत्प्रकरणं 'द्विपात्प्रकरण'मिति निर्दिष्टं रत्नाकरे ।

गुरुलघुरूपत्वात् । अयमभिप्रायः—आर्यादिषु शास्त्रे यावत्यो मात्रा उपदिष्टास्तावन्त्यक्षराणि यथासंख्यं न पूर्यन्ते, सा तत्र गुरुसंख्या वेदितव्या । अवशिष्टा लघुसंख्या । तत्रायमुपयोगः—यदा कश्चित्पृच्छति, चत्वारिंशदक्षरायामार्यायां कति गुरवः संपद्यन्ते, ? कति वा लघव ? इति, तदा सप्तपञ्चाशन्मात्रोपदिष्टयामार्यायां मात्रासंख्यायां चत्वारिंशदक्षरसंख्या (४०) मपनीय तत्र येऽवशिष्यन्ते, तान् गुरूनुपदिशेत् । ते च सप्तदशैव (१७) । शेषांस्तु त्रयोविंशति (२३) लघुरूपानुपदिशेत्[1] । तद्यथा—

१. २. ३. ४. ५–६. ७–८. ९–१०. ११–१२.
। – । – । – । – ऽ – ऽ – ऽ – ऽ,
स्त – न – यु – ग – म – श्रु – स्रा – तं
(१). (२). (३). (४). (५). (६). (७). (८).

१३. १४–१५. १६. १७. १८. १९–२०. २१. २२. २३. २४. २५–२६. २७–२८. २९–३०.
। – ऽ – । । – । – ऽ – । । – । – । – ऽ – ऽ – ऽ,
स – मी – प – त – र – व – र्ति हृ – द – य – शो – का – ग्नेः ।
(९). (१०). (११). (१२). (१३). (१४). (१५). (१६). (१७). (१८). (१९). (२०). (२१).

३१. ३२. ३३. ३४. ३५–३६. ३७–३८. ३९–४०. ४१–४२.
। – । – । । – ऽ – ऽ – ऽ – ऽ
च – र – ति वि – मु – क्ता – हा – रं
(२२). (२३). (२४). (२५). (२६). (२७). (२८). (२९).

४३. ४४. ४५. ४६. ४७. ४८. ४९–५०. ५१. ५२–५३. ५४–५५. ५६–५७. मात्राङ्काः ।
। – । – । – । । – । – ऽ । – ऽ ऽ – ऽ
व्र – त – मि – व भ – व – तो रि – पु – स्त्री – णाम् ॥
(३०). (३१). (३२). (३३). (३४). (३५). ३६). (३७). (३८). (३९). (४०). अक्षराङ्काः ।

(बाणभट्टस्य)

इति श्रीभट्टहलायुधविरचितायां पिङ्गलच्छन्दोवृत्तौ चतुर्थोऽध्यायः ।

---

१. अस्याभिप्रायः स्फुटं प्रकाश्यते—पुरोदर्शितायामार्यायां कति गुरवो लघवश्च वर्तन्ते ? इति पृष्टे सति पूर्वं तावदार्यायां मात्रागणना विधेया । तन्मात्रासंख्यापिण्डीभूताङ्काश्च कुत्रचन पत्रादौ संस्थाप्याः । पुनस्तस्या एव सर्वेषामक्षराणां गणनां विधाय तदक्षरसंख्यापिण्डीभूताङ्का मात्रासंख्यापिण्डीभूताङ्कानां संमुखे संस्थाप्याः । ततो मात्रासंख्यापिण्डीभूताङ्केभ्योऽक्षरसंख्यापिण्डीभूताङ्कानपनयेत् । तत्र ये संख्याङ्का अवशिष्यन्ते, तावत्संख्याकास्तस्यामार्यायां गुरवो भवन्ति । पुनरक्षरसंख्याङ्कत एतदवशिष्टगुरुसंख्याङ्कानपनयेत् । तत्र यावन्तोऽङ्का अवशिष्यन्ते, तावन्तो लघवो जायन्ते । अनयैव रीत्या गणमात्राच्छन्दसां गुरुलघुज्ञानं भवति । तद्रीतिर्यथा—

मा० सं० ङ्कः अ० सं० ङ्कः गु० सं० ङ्कः अ० सं० ङ्कः गु० सं० ङ्कः ल० सं० ङ्कः
" ५७ – ४० = १७ " " ४० – १७ = २३ "

पञ्चमोऽध्यायः ।

वृत्तम् । ५ । १ ॥

अधिकारोऽयमाशास्त्रपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तद् 'वृत्तम्' वेदितव्यम् । तेन प्राक्तनं लौकिकं छन्दोजातं 'जातिः' इत्युच्यते । इत उत्तरं च 'वृत्तम्' । तथा चोक्तम्—

'पद्यं चतुष्पदी[1] तच्च वृत्तं जातिरिति द्विधा ।' (का० द० १।११)

गायत्र्यादौ छन्दसि वर्तत इति 'वृत्तम्' । तच्च स्थिरगुरुलध्वक्षरविन्यासमिष्यते । पादेन संयोगात् 'पद्यम्' । यथा—आर्यादिच्छन्दःस्वपि पादव्यवस्था नास्तीति पादौ संयुक्तौ, वृत्ते पुनः पृथग्भवत इत्यर्थः । पादेन संयोगाभावात् । तथा चोक्तम्—

'एकदेशस्थिता जातिर्वृत्तं गुरुलघुस्थितम्' इति ॥

सममर्धसमं विषमं च । ५ । २ ॥

समसर्वावयवत्वात् 'समम्' । यस्य चत्वारः पादा एकलक्षणयुक्तास्तत् 'समं' वृत्तम् । शेषं च संज्ञानुरूपमेव । तत्रार्धे समे यस्य तत् 'अर्धसमम्' सर्वावयवेभ्यः । अर्धाभ्यां च विगतं समं यस्य तद् 'विषमम्' । एवं त्रिप्रकारमपि वृत्तजातमुक्तम् ॥

समं तावत्कृत्वः कृतमर्धसमम् । ५ । ३ ॥

'समम्' इति समवृत्तसंख्योच्यते । तयैव गुणितं 'तावत्कृत्वः कृतम्' उच्यते । एतदुक्तं भवति—समवृत्तसंख्यागुणिते समवृत्तसंख्यायाः पिण्डे या संख्या निष्पद्यते, तावत्संख्यमर्धसमं वेदितव्यम् । तत्र गायत्रे छन्दसि समवृत्तसंख्या चतुःषष्टि (६४) रष्टमाध्यायसिद्धा । तस्यां चतुःषष्टि (६४) संख्यागुणितायामर्धसमवृत्त संख्या संपद्यते—चत्वारि सहस्राणि, षण्णवतिश्च वृत्तानि । अङ्कतोऽपि (६४×६४)=४०९६ ॥

विषमं च । ५ । ४ ॥

अर्धसमं तावत्कृत्वः कृतं 'विषमं' भवति । एतदुक्तं भवति—अर्धसमवृत्तसंख्या (४०९६) अर्धसमवृत्तसंख्यया(४०९६) एव गुणिता विषमवृत्तसंख्या संपद्यते—एका कोटिः, सप्तषष्टिर्लक्षाणि, सप्तसप्ततिसहस्राणि, द्वे शते, षोडशोत्तरे । अङ्कतोऽपि (४०९६×४०९६)=१६७७७२१६ इति ॥

समसमार्धसमोपचितमर्धसमं विषमं च यथाक्रमं समोपचितं समार्धसमाभ्यां चोपचितं वेदितव्यम् ॥

राश्यूनम् । ५ । ५ ॥

तद् विषमं वृत्तं (१६७७७२१६) अर्धसमं (४०९६) वा राश्यूनम् (१६७७७२१६

---

१. अत्र पादपर्यायः पदशब्दः । चतुर्णां पदानां समाहारश्चतुष्पदी । चतुष्पदीति पद्यलक्षणं प्रायिकत्वादुक्तम्, द्विपदीपञ्चपदीषट्पदीनामपि दृश्यमानत्वात्–इति **तरुण-वाचस्पतिः** ।

−४०९६=१६७७३१२०) कर्तव्यम् । मूलराशिः (४०९६) समुदायात् (१६७७७२१६) अपनेतव्य इति । कोटिरेका, सप्तषष्टिर्लक्षाणि, त्रिसप्ततिसहस्राणि, विंशत्युत्तरं शतं शुद्धविषमवृत्तस्य संख्या । अङ्कतः १६७७३१२० । चत्वारि सहस्राणि, द्वात्रिंशच्चेति शुद्धार्धसमसंख्या । अङ्कतोऽपि−(४०९६−६४)=४०३२ उभयशेषोऽयं राश्यूनमिति ॥

ग्लिति समानी[1] । ५ । ६ ॥

गकार (ऽ) लकारा (।) भ्यां यद्वृत्तं समाप्यते, तत् 'समानी' नाम । 'पादस्यानुष्टुब्वक्त्रम्' (पि० सू० ५।९) इत्यतः सूत्रात् सिंहावलोकितन्यायेनानुष्टुब्ग्रहणमनुवर्तते । तेनाष्टाक्षरः पादो यावद्भिर्गकारलकारैः पूर्यते, तावतामेव ग्रहणम् । तत्रोदाहरणम्—

ऽ−।−ऽ− । ऽ−।−ऽ−। ऽ−।−ऽ−।−ऽ । ऽ−।

वा−स−वो−ऽपि वि−क्र−मे−ण य−त्स−मा−न−तां न या−ति ।

ऽ− । ऽ−।−ऽ−।−ऽ−। ऽ−। ऽ−।−ऽ ।−ऽ−।

त−स्य व−ल्ल−भे−श्व−र−स्य के−न तु−ल्य−ता क्रि−ये−त? ॥

अपि च ।

ऽ−।−ऽ ।−ऽ−।−ऽ−। ऽ−।−ऽ−।−ऽ−।−ऽ−।

ओँ न−मो ज−ना−र्द−ना−य पा−प−बं−ध−मो−च−ना−य ।

ऽ−।−ऽ−।−ऽ−।−ऽ−। ऽ−।−ऽ−।−ऽ−।−ऽ−।

दु−ष्ट−दै−त्य−म−र्द−ना−य पु−ण्ड−री−क−लो−च−ना−य ॥

लिगति प्रमाणी[2] । ५ । ७ ॥

लकार (।) गकारा (ऽ) भ्यां यद्वृत्तं समाप्यते तत् 'प्रमाणी' नाम । 'जरौ लगौ' इत्यपरे । तत्रोदाहरणम्—

।−ऽ−।−ऽ−।−ऽ−।−ऽ ।−ऽ−।−ऽ ।−ऽ−।−ऽ

स−रो−ज−यो−नि−र−म्ब−रे र−सा−त−ले त−था−च्यु−तः ।

।−ऽ ।−ऽ−।−ऽ−।−ऽ ।−ऽ । ऽ ।−ऽ−।−ऽ

त−व प्र−मा−ण−मी−क्षि−तुं क्ष−मौ न तौ ब−भू−व−तुः ॥

वितानमन्यत् । ५ । ८ ॥

आभ्यां समानी-प्रमाणीभ्यामन्यदष्टाक्षरपादं छन्दो 'वितानं' नाम । तत्रोदाहरणम्—

ऽ−ऽ ।−। ऽ−ऽ ।−। ऽ−ऽ ।−।−ऽ ऽ ।−।

तृ−ष्णां त्य−ज ध−र्मं भ−ज पा−पे हृ−द−यं मा कु−रु ।

---

१. 'हारगंधबंधुरेण दिट्ठअट्ठअक्खरेण । बारहाहि मत्त जाण मल्लिआसुछंदमाण ॥' इति प्रा० पि० सू० २।७१ इत्यनुसारेण मल्लिकाख्यं नामान्तरम् । नव्यमतेऽस्य सूत्रस्य गद्यपरत्वमाह व्यङ्कटाचलसूरिः । २. 'लहू गुरू णिरंतरा पमाणि अट्ठअक्खरा ।' इति प्रा० पि० सू० २।६९. 'द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा । तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥' इति श्रुतबोधानुसारेण नगस्वरूपिणीत्यपि नामान्तरम् । ३. 'नाराचम्' इति कलिकातामुद्रिते. ४. छन्दोमञ्जरीकाराः. ५. प्राकृतपिङ्गलानुसारेणात्र दोहाभेदान्तर्गतकरभच्छन्दः ।

ऽ–ऽ ।–। ऽ– ऽ –।–। ऽ–ऽ–।–।–ऽ ऽ–।–।
इ–च्छा य–दि क–क्ष्मी–स्त–व शि–च्या–न–नि–शं सं–श्र–य ॥

द्वितीयं च—

।–।–ऽ ऽ–। ।–ऽ–ऽ ।–।–ऽ–ऽ–।–।–ऽ–
हृ–द–यं य–स्य वि–शा–लं ग–ग–ना–भो–ग–स–मा–नम् ।
।–।–ऽ–ऽ ।–।–ऽ–ऽ ।–।–ऽ–ऽ–। ।–ऽ–ऽ
ल–भ–ते–ऽसौ म–णि–चि–त्रं नृ–प–ति–र्मू–र्ध्नि वि–ता–नम् ॥

अन्यच्च—

ऽ–ऽ–।–ऽ–।–ऽ–।–ऽ ऽ–ऽ–।–ऽ–।–ऽ–।–ऽ
कं–ङ्का–ल–मा–ल–भा–रि–णं कं–द–र्प–द–र्प–हा–रि–णम् ।
ऽ– –।–ऽ–।–ऽ–।–ऽ ऽ–ऽ–।–ऽ ।–ऽ–।–ऽ
सं–सा–र–ब–न्ध–बो–च–नं व–न्दा–म–हे त्रि–लो–च–नम् ॥

अपि च—

ऽ–ऽ ।–ऽ–। ऽ–।–ऽ ऽ–ऽ–।–ऽ–।–ऽ–।–ऽ
त–स्याः स्म–रा–मि सु–न्द–रं च–न्द्रो–प–मा–न–मा–न–नम् ।
ऽ–ऽ–।–ऽ–।–ऽ–।–ऽ ऽ–ऽ–।–ऽ–।–ऽ–।–ऽ
कं–द–र्प–चा–प–भ–ङ्गु–र– भ्रू–वि–भ्र–मो–प–शो–भि–तम् ॥

[अपि च]—

ऽ–।–।–ऽ । ।–ऽ–ऽ ऽ–।–।–ऽ–। ।–ऽ–ऽ
अं–न्य–द–तो हि वि–ता–नं श्वे–त–प–ट्टे–न य–दु–क्तम् ।
ऽ–।–।–ऽ–। । ऽ–ऽ ऽ–। ।–ऽ–।–।–ऽ–ऽ
चि–त्र–प–दा–पि च भौ गौ ते–न ग–ता–र्थ–मि–वै–तत् ॥

किं च 'वितानमन्यत्' इति ब्रुवन् सूत्रकारो वितानस्यानेकप्रकारतां दर्शयति । अन्यथा 'वितानं भौ गौ' इत्येव ब्रूयात् ॥

पादस्यानुष्टुब्वक्त्रम्³ । ५ । ९ ॥

'पादस्य' इत्ययमधिकार आसप्तमाध्यायपरिसमाप्तेः । 'अनुष्टुब्वक्त्रम्' इति च प्राक् पदचतुरूर्ध्वात् (वि० सू० ५।२०) अधिकृतं वेदितव्यम् ॥

---

१. 'नाराचकं तरौ लगौ' इति छन्दःकौस्तुभानुसारेणात्र नाराचकं छन्दः । २. 'चित्रपदा भौ गौ' इति (६।५) सूत्रानुसारेणात्र चित्रपदाख्यं छन्दः । ३. यद्यपि नभेदमिदमुत्तरत्र षष्ठेऽध्यायेऽनुष्टुबधिकार एव वक्तुमुचितम्; तथापि यथा मात्राछन्दसि लघुगुरुनियमो नास्ति, तथात्रापीति पृथगुक्तम् इति केचित् ।

न प्रथमात्स्नौ । ५ । १० ॥

प्रतिषेधार्थमिदं सूत्रम् । अत्र वक्त्रजातौ पादस्य प्रथमादक्षरादूर्ध्वं सगण-(।।ऽ) नगणौ (।।।) न कर्तव्यौ ॥

द्वितीयचतुर्थयो रश्च । ५ । ११ ॥

द्वितीयचतुर्थयोश्च पादयोः प्रथमादूर्ध्वं रेफो (ऽ।ऽ) न कर्तव्य इत्युपदेशः ॥

वान्यत् । ५ । १२ ॥

अन्येषां षण्णां गणानां मध्ये यत्किंचित् गणान्तरं प्रथमान्तरं कर्तव्यम् ॥

यं चतुर्थात् । ५ । १३ ॥

'य' इति लुप्तविभक्तिको निर्देशः । पादस्य चतुर्थादक्षरादूर्ध्वं यगणः (।ऽऽ) प्रयोक्तव्यः । सर्वेषामुदाहरणानि—

ल० यगणः यगणः ल० ल० यगणः यगणः गु०
। — ।·ऽ·ऽ — ।·ऽ·ऽ — । — । — ।·ऽ·ऽ — ।·ऽ·ऽ — ऽ
नै(१)वधारा(४)म्बुसंसि–क्त– व(१)सुधाग(४)न्धिनिःश्वा–सम् ।

गु० जगणः यगणः गु० ल० तगणः यगणः गु०
ऽ — ।·ऽ·। — ।·ऽ·ऽ — ऽ । — ऽ·ऽ·। — ।·ऽ·ऽ — ऽ
किं(१)चिदुन्न(४)तघोणा–ग्रं म(१)ही काम(४)यते व–क्त्रम् ॥

अन्यैरप्युक्तम्—

गु० भगणः यगणः ल० ल० मगणः यगणः गु०
ऽ — ऽ·।·। — ।·ऽ·ऽ — । । — ऽ·ऽ·ऽ — ।·ऽ·ऽ — ऽ
नी(१)लोत्पल(४)वनेष्व–द्य च(१)रन्त्यश्वा(४)रुसंरा–वाः ।

गु० मगणः यगणः गु० ल० मगणः यगणः गु०
ऽ — ऽ·ऽ·ऽ — ।·ऽ·ऽ — ऽ । — ऽ·ऽ·ऽ — ।·ऽ·ऽ — ऽ
रा(१)माः कौशे(२)यसंवी –ताः प्र(१)नृत्यन्ती–व(४)काद–म्बाः ॥

---

१. 'रेफोऽपि' इति क. का. मु. पुस्तके. २. कलिकातामुद्रिते तु 'सगण (।।ऽ), नगणाभ्या(।।।)मन्यन्मगणा(ऽऽऽ)दित्रिकषङ्कमध्ये यत्किंचित्त्रिकान्तरं वा कर्तव्यम् ॥' ३. यश्चतुर्थात्–इत्येव वैदिकपाठः । 'अब्धेर्योऽनुष्टुभि ख्यातम्' इति प्रा० पि० सू० २।३३२. ४. पि० सू० ५।१० सूत्रस्योदाहरणम्. ५. पि० सू० ५।१३ इत्यस्योदाहरणम् । श्लोकोऽयं **शवरस्वामिना** मीमांसाभाष्ये (१।१।२४) उदाहृतः । तत्र '···चरन्तः···नीलकौशेय···प्रणश्यन्तीव···' इति पाठः ।

तथा—

गु॰　रगणः　यगणः　गु॰　गुं॰　मगणः　यगणः　गु॰

S — S·I·S — I·S·S—S　S — S·I·I — I·S·S—S

दुं(१)र्भाषिते(४)ऽपि सौभा–ग्यं प्रा(१)यः प्रकु(४)रुते प्री–तिः ।

गु॰　रगणः　यगणः　ल॰　गु॰　मगणः　.गणः　गु॰

S — S·I·S — I·S·S — I　S — S·S·S — I·S·S—S

मा(१)तुर्मनो(४)हरन्त्ये –व　दौ(१)र्ललित्यो(४)क्तिभिर्बा–लाः ॥

इत्यादि ॥

पथ्या[3] युजो ज् । ५ । १४ ॥

'चतुर्थात्' (पि॰ सू॰ ५।१३) इति वर्तते । अत्र वक्त्रे युजः (२,४) पादस्य चतुर्था-दक्षरादूर्ध्वं जगणः (।ऽ।) प्रयुज्यते, तद्वक्त्रं 'पथ्या' नाम । 'य' (।ऽऽ) स्यापवादः । अत्रो-दाहरणम्—

गु॰　तगणः　यगणः　ल॰　गु॰　मगणः　जगणः　ल॰

S — S· S·I — I·S·S—I　S — S· S·S — I·S·I—I

नि(१)त्यं नीति(४)निषण्ण–स्य　रा(१)ज्ञो राष्ट्रं(४)न सीद–ति ।

ल॰　यगणः　यगणः　गु॰　गु॰　मगणः　जगणः　गु॰

I — I·S·S — I·S·S—S　S — S·S·S — I·S·I—S

न(१)हि पथ्या(४)शिनः का–ये　जा(१)यन्ते व्या(४)धिवेद नाः ॥

विपरीतै[3]कीयम् । ५ । १५ ॥

उक्त[4]लक्षणाद्विपरीता 'पथ्या' भवतीत्येकीयं मतम्. 'अयुक्पादे चतुर्थादक्षरात् परतो जकारः कर्तव्यः, युक्पादे य एवावतिष्ठते । अत्रोदाहरणम्—

गु॰　यगणः　जगणः　गु॰　गु॰　मगणः　यगणः　गु॰

S — I·S·S — I·S·I—S·　S — S· S· S — I·S·S—S

भ(१)र्तुराज्ञा(४)नुवर्ति– नी　या(१)स्त्री स्यात्सा(४) गृहे ल–क्ष्मीः ।

गु॰　यगणः　जगणः　गु॰　ल॰　यगणः　यगणः　गु॰

S — I·S·S — I·S·I—S　I — I·S·S — I·S·S — S

ख(१)प्रभुत्वा(४)भिमानि–नी　नि(१)परीता(४)परित्या–ज्या ॥

---

१. पि॰ सू॰ ५।११ इत्यस्योदाहरणम्. 'दुर्भाविते' इति लि. पुस्तके । २. 'युजोश्च-तुर्थतो जेन **पथ्यावक्त्रं** प्रकीर्तितम्' इति प्रा॰ पि॰ सू॰ २।३३४. 'पथ्यायुजो जः' इति लि. पुस्तके. ३. 'ओजयोर्जेन वारिधेस्तदेव **विपरीता**दि' इति छन्दःकौस्तुभे. ४. कलिकातामुद्रिते तु–'उक्तलक्षणाद्विपरीतलक्षणा एकीयमते 'पथ्या' भवति । यथा–'.

चपलायुजो न् । ५ । १६ ॥

अयुक् (१,३) पादस्य यदा चतुर्थादक्षरादूर्ध्वं नकारो (।।।) भवति युक्-(२,४) पादे य (।ऽऽ) एवावतिष्ठते, तदा 'चपला' नाम सानुष्टुब् । तत्रोदाहरणम्—

गु० यगणः नगणः गु० गु० यगणः यगणः गु०

ऽ—।·ऽ·ऽ—।·।·।—ऽ ऽ—।·ऽ·ऽ—।·ऽ·ऽ—ऽ

क्षी(१)यमाणा(४)प्रदश–ना व(१)क्रनिर्मा(४)सनासा-प्रा ।

गु० यगणः नगणः गु० ल० यगणः यगणः गु०

ऽ—।·ऽ·ऽ—।·।·।—ऽ ।—।·ऽ·ऽ—।·ऽ·ऽ—ऽ

क(१)न्यका वा(४)क्यचप–ला ल(१)भते धू(४)र्तसौभा–ग्यम् ॥

विपुला युग्लः सप्तमः । ५ । १७ ॥

अधिकारोऽयम् । 'य चतुर्थात्' (पि० सू० ५।१३) इत्यनेन सर्वत्र यकारे (।ऽऽ) कृते यदा युक् (२,४) पादे सप्तमो वर्णो लघुर्भवति, तदा 'विपुला' नाम सानुष्टुब् ॥

ननु पथ्यालक्षणेऽन्तर्भूतत्वात् पुनरुक्तमेतत् । नैवम्, विपुलावर्गस्येदानीमारभ्यमाणत्वात्तद्विनानुपपत्तेः । युक् (२,४) पादे सप्तमेन लघुनावश्यमेव भवितव्यम् । प्रथमतृतीययोश्चैतावता यकारस्यापवादः । तथा च वक्ष्यति—'सैर्वतः सैतवस्य' (पि० सू० ५।१८) इत्यादिना । पथ्यायां तु यकार (।ऽऽ) एवावतिष्ठते ॥

सैर्वतः सैतवस्य । ५ । १८ ॥

सैतवस्याचार्यस्य मतेन युक् (२,४)पादे अयुक् (१,३) पादे च सप्तमो लकार (।) एव कर्तव्यः । अत्रोदाहरणम्—

गु० जगणः जगणः गु० गु० भगणः जगणः गु०

ऽ—।·ऽ·।—।·ऽ·।—ऽ ऽ—ऽ·।·।—।·ऽ·।—ऽ

सै(१)तवेन(४)पथार्ण(७)वं ती(१)र्णो दश(४)रथात्म(७)जः ।

गु० भगणः जगणः गु० ल० मगणः जगणः गु०

ऽ—ऽ·।·।—।·ऽ·।—ऽ ।—ऽ·ऽ·ऽ—।·ऽ·।—ऽ

र(१)क्षः क्षय(४)करीं पु(७)नः प्र(१)तिज्ञां खे(४)न वाहु(७)ना ॥

न्तौ च । ५ । १९ ॥

'सर्वतः सैतवस्य' (पि० सू० ५।१८) इति निवृत्तम् । 'चपलायुजो न्' (पि० सू० ५।१६) इत्येतस्मादयुग्ग्रहणमनुवर्तते । 'विपुला युग्लः सप्तमः' (पि० सू० ५।१७) इति

---

१. चपलावक्रमयुजोर्नकारश्चेत्पयोराशेः' इति छन्दःकौस्तुभे. २. 'यस्यां तसप्तमो युग्मे सा युग्मविपुला' इति छन्दःकौस्तुभे युग्मविपुलेति नामान्तरम्. ३. लिखितपुस्तके सूत्रमत्रंतन्नास्ति. ४. 'सैतवस्याखिलेष्वपि' इति छन्दःकौस्तुभे.

सर्वमनुवर्तनीयम् । अयुक् (१,३) पादे यदा चतुर्थादक्षरात्परतो यकारं (ISS) बाधित्वा भकार (SII) रेफ (SIS) नकार (III) तकारा (SSI) विकल्पेन भवन्ति, तदासौ 'विपुला' नाम । तत्र भकारेण विपुलोदाहरणम्—

ल० रगणः भगणः गु० ल० मगणः जगणः गु०

I — S·I·S — S·I·I — S　I — S·S·S — I·S·I — S

इ(१)यं सखे(४)चन्द्रमु(७)खी　स्मि(१)तज्योत्स्ना(४)च मानि(७)नी ।

गु० रगणः भगणः गु० गु० जगणः जगणः गु०

S — S·I·S — S·I·I — S · S — I·S·I — I·S·I — S

इ(१)न्दीवरा(४)क्षी हृद(७)यं　द(१)न्दहीति(४)तथापि(७)मे ॥

'अयुजः' (पि० सू० ५।१६) इति जातिपक्षे द्वयोरपि पादयोर्ग्रहणम् । व्यक्तिपक्षे पुनरेकस्य । एकपक्षे पुनः प्रथमस्य तृतीयस्य वा । तथा च महाकवीनां प्रयोगाः—

ल० रगणः भगणः गु० गु० यगणः जगणः गु०

I — S·I·S — S·I·I — S　S — I·S·S — I·S·I — S

व(१)टे वटे(४)वैश्रव(७)णः[१]　च(१)त्वरे च(४)त्वरे शि(७)वः ।

गु० यगणः यगणः गु० गु० भगणः जगणः गु०

S — I·S·S — I·S·S — S　S — S·I·I — I·S·I — S

प(१)र्वते प(४)र्वते रा(७)मः　स(१)र्वत्र म(४)धुसूद(७)नः[२] ॥

(अग्निपु० ३०५।१४)

गु० भगणः यगणः गु० गु० यगणः जगणः गु०

S — S·I·I — I·S·S — S　S — I·S·S — I·S·I — S

दे(१)वः स ज(४)यति श्री(७)मान्　द(१)ण्डधारो(४)महाम(७)तिः[३] ।

गु० रगणः भगणः गु० गु० जगणः जगणः ल०

S — S·I·S — S·I·I — S　S — I·S·I — I·S·I — I

य(१)स्य प्रसा(४)दाद्भुव(७)नं　शा(१)श्वते प(४)थि तिष्ठ(७)ति ॥

ल० रगणः भगणः गु० ल० तगणः जगणः गु०

I — S·I·S — S·I·I — S　I — S·S·I — I·S·I — S

उ(१)पस्थितं(४)प्राञ्जलि(७)ना　वि(१)नीतेन(४)गरुत्म(७)ता ।

---

१. 'भेनाऽब्धितो भाद्विपुला' इति छन्दःकौस्तुभे. २. मूले त्वेतद् द्वितीयान्तं दृश्यते, तत्र 'संसरन् मुक्तिमुक्तिभाक् ।' (३०५।१५) इत्युत्तरेण सम्बन्धः। ३. 'दण्डधारी महीपतिः' इति क. पुस्तके.

गु० रगणः मगणः गु० गु० तगणः जगणः गु०

S — S·I·S — S·I·I — S S — S·S·I — I·S·I — S

ना(१)रायणं(४)स्तौमि स(७)दा भ(१)क्तानां भ(४)यनाश(७)नम् ॥

इत्यादि ॥

इदानीं रेफं(ऽ।ऽ)विपुलोदाहरणम्—

गु० रगणः रगणः गु० ल० भगणः जगणः गु०

S — S·I·S — S·I·S — S I — S·I·I — I·S·I — S

ल(१)क्ष्मीपतिं(४)लोकना(७)थं र(१)थाङ्गध(४)रमच्यु(७)तम् ।

गु० रगणः रगणः गु० ल० जगणः जगणः गु०

S — S·I·S — S·I·S — S I — I·S·I — I·S·I — S

य(१)द्वेश्वरं(४)शार्ङ्गपा(७)णिं प्र(१)णमामि(४)त्रयीत(७)नुम् ॥

व्यक्तिपक्षे प्रथमे पादे—

ल० रगणः रगणः गु० गु० मगणः जगणः गु०

I — S·I·S — S·I·S — S S — S·S·S — I·S·I — S

म(१)हाकविं(४)कालिदा(७)सं व(१)न्दे वाग्दे(४)वतां गु(७)रुम् ।

गु० मगणः यगणः ल० गु० जगणः जगणः गु०

S — S·S·S — I·S·S — I S — I·S·I — I·S·I — S

य(१)ज्ज्ञाने वि(४)श्वमाभा(७)ति द(१)र्पणे प्र(४)तिबिम्ब(७)वत् ॥

तृतीये पादे—

गु० यगणः सगणः गु० गु० तगणः जगणः गु०

S — I·S·S — I·I·S — S S — S·S·I — I·S·I — S

का(१)मिनीभिः(४)सह प्री(७)तिः क(१)स्मै नाम(४)न रोच(७)ते ।

ल० यगणः रगणः ल० गु० जगणः जगणः गु०

I — I·S·S — S·I·S — I S — I·S·I — I·S·I — S

य(१)दि न स्या(४)द्वारिवी(७)चि च(१)ञ्चलं ह(४)तजीवि(७)तम् ॥

इदानीं नकार(।।।)विपुलोदाहरणम्—

गु० रगणः नगणः गु० गु० यगणः जगणः गु०

S — S·I·S — I·I·I — S S — I·S·S — I·S·I — S

य(१)स्या विभा(४)ति विपु(७)ला म(१)न्मथस्था(४)नपिण्ड(७)का ।

१. 'इत्थमन्या रश्चतुर्थात्' इति छ. कौ०. २. 'ईश्वरम्' इति क. पुस्तके. ३. 'नोऽम्बुधेश्चेन्नविपुला' इति छन्दःकौस्तुभकारः

गु० यगणः नगणः गु० गु० तगणः जगणः गु०

S — I·S·S — I·I·I — S　S — S·S·I — I·S·I — S

या(१)चतुःष(४)ष्टिचतु(७)रा　सा(१)त्री स्यात्पृ(४)थवल्ल(७)भा ॥[1]

तथैव **भारविः**—

ल० रगणः नगणः गु० ल० नगणः जगणः गु०

I — S·I·S — I·I·I — S　I — S·S·I — I·S· I — S

युं(१)युत्सुने(४)व कव(७)चं　कि(१)मामुक्त(४)मिदं त्व(७)या ? ।

ल० रगणः नगणः गु० गु० जगणः जगणः गु०

I — S·I·S — I· I·I — S　S — I·S·I — I·S·I·— S

त(१)पस्विनो(४)हि वस(७)ने[3]　के(१)वलाजि(४)नवल्क(७)ले ॥

(कि० ११।१५)

व्यक्तिपक्षे **कालिदासः**—

ल० मगणः नगणः गु० गु० मगणः जगणः गु०

I — S·S·S — I· I·I — S　S — S·S· S — I·S·I — S

अं(१)नाकृष्ट(४)स्य विष(७)यैर्　वि(१)द्यानां पा(४)रदृश्व(७)नः ।

गु० जगणः यगणः गु० गु० नगणः जगणः गु०

S — I· S·I — I·S·S — S　S — S·S·I — I·S· I — S

त(१)स्य धर्म(४)रतेरा(७)सीद्　वृ(१)द्धत्वं ज(४)रसा वि(७)ना ॥

(र० वं० १।२३)

तथा च—

ल० जगणः यगणः गु० गु० नगणः जगणः गु०

I — I·S·I — I·S·S — S　S — S·S·I — I·S·I — S

तें(१)व मन्त्र(४)कृतो म(७)न्त्रैर्　दू(१)रात्संश(४)मितारि(७)भिः ।

गु० मगणः नगणः गु० गु० जगणः जगणः गु०

S — S·S·S — I· I·I — S　S — I·S·I — I·S·I — S

प्र(१)त्यादिश्य(४)न्त इव(७)मे　दृ(१)ष्टलक्ष्य(४)भिदःश(७)राः ॥

(र० वं० १।६१)

---

१. 'चतुःषष्टिरङ्गविद्याः कामसूत्रस्यावयविन्यः' वात्स्यायनसूत्रे (१।३।१६) द्रष्टव्याः । २. नकारविपुलोदाहरणानि । ३. 'वसतें' इति मूले।

इदानीं तकार (ऽऽ।) विपुलोदाहरणम्—

जातिपक्षे—

गु० मगणः तगणः गु० ल० भगणः जगणः गु०

ऽ — ऽ·ऽ·ऽ — ऽ·ऽ·। — ऽ　। — ऽ·।·। — ।·ऽ·। — ऽ

व(१)न्दे देवं(४)सोमेश्व(७)रं　ज(१)टामुकु(४)ट्मण्डि(७)तम् ।

गु० भगणः तगणः गु० ल० भगणः मगणः गु०

ऽ — ऽ·।·। — ऽ·ऽ·। — ऽ　। — ऽ·।·। — ।·ऽ·। — ऽ

ख(१)ट्वाङ्गध(४)रं चन्द्र(७)मः　शि(१)खामणि(४)विभूषि(७)तम् ॥

व्यक्तिपक्षे—

गु० रगणः तगणः गु० गु० जगणः जगणः गु०

ऽ — ऽ·।·ऽ — ऽ·ऽ·। — ऽ　ऽ — ।·ऽ·। — ।·ऽ·। — ऽ

व(१)न्दे कविं(४)श्रीभार(७)विं　लो(१)कसंत(४)मसच्छि(७)दम् ।

ल० मगणः यगणः ल० गु० तगणः जगणः गु०

। — ऽ·ऽ·ऽ — ।·ऽ·ऽ — ।　ऽ — ऽ·ऽ·। — ।·ऽ·। — ऽ

दि(१)वा दीपा(४)इवाभा(७)न्ति　य(१)स्याग्रे क(४)वयोऽप(७)रे ॥

तथान्येषामपि प्रयोगाः—

गु० जगणः यगणः गु० गु० यगणः जगणः गु०

ऽ — ।·ऽ·। — ।·ऽ·ऽ — ऽ　ऽ· — ।·ऽ·ऽ — ।·ऽ·। — ऽ

लो(१)कवत्प्र(४)तिपत्त(७)व्यो　लौ(१)किकोऽर्थः(४)परीक्षि(७)कैः ।

गु० भगणः तगणः ल० ल० यगणः जगणः गु०

ऽ — ऽ·।·। — ऽ·ऽ·। — ।　। — ।·ऽ·ऽ — ।·ऽ·। — ऽ

लो(१)कव्यव(४)हारं प्र(७)ति　स(१)दृशौ बा(४)लपण्डि(७)तौ[1] ॥

इदानीं चकाराकृष्टं मकार[2] (ऽऽऽ) विपुलोदाहरणम्—

गु० रगणः मगणः गु० गु० रगणः जगणः गु०

ऽ — ऽ·।·ऽ — ऽ·ऽ·ऽ — ऽ　ऽ — ।·ऽ·ऽ — ।·ऽ·। — ऽ

स(१)र्वीतिरि(४)क्तं लाव(७)ण्यं　बि(१)भ्रती चा(४)रुविभ्र(७)मा ।

गु० रगणः मगणः ल० गु० मगणः जगणः गु०

ऽ — ऽ·।·ऽ — ऽ·ऽ·ऽ — ।　ऽ — ऽ·ऽ·ऽ — ।·ऽ·।· — ऽ

त्री(१)लोकस्(४)ष्टिस्त्वन्यै(७)व　निः(१)सामान्य(४)स्य वेध(७)सः ॥

---

१. 'शंकरं चन्द्ररेखाशिवाननम्' इति लि. पुस्तके । २. एते विपुलाभेदाश्छन्दःकौस्तुभादौ नोपलभ्यन्ते ।

व्यक्तिपक्षे श्रीकालिदासः—

ल० रगणः मगणः गु० ल० यगणः जगणः गु०

I — S·I·S — S·S·S — S　I — I·S·S — I·S·I — S

म(१)नोभिरा(४)माः शृण्व(७)न्तौ　र(१)थनेमि(४)स्वनोन्मु(७)खैः ।

गु० यगणः यगणः गु० ल० मगणः जगणः गु०

S — I·S·S — I·S·S — S　I — S·S·S — I·S·I — S

ष(१)ड्जसंवा(४)दिनीः के(७)का　द्वि(१)धा भिन्नाः(४)शिखण्डि(७)भिः ॥

(र० वं० १।३९)

ल० रगणः मगणः गु० गु० तगणः जगणः गु०

I — S·I·S — S·S·S — S　S — S·S·I — I·S·I — S

अ(१)थ प्रदो(४)षे दोष(७)ज्ञः　सं(१)वेशाय(४)विशांप(७)तिम् ।

गु० तगणः यगणः गु० ल० यगणः जगणः गु०

S — S·S·I — I·S·S — S　I — I·S·S — I·S·I — S

सू(१)नुः सूनृ(४)तवाक्स्र(७)ष्टु—र्वि(१)ससर्जो(४)र्जितश्रि(७)यम् ॥

(र० वं० १।९३)

तृतीयपादे—

ल० रगणः यगणः गु० गु० भगणः जगणः गु०

I — S·I·S — I·S·S — S　S — S·I·I — I·S·I — S

अ(१)दूरव(४)र्तिनीं सि(७)द्धिं　रा(१)जन्विग(४)णयात्म(७)नः ।

ल० रगणः मगणः गु० गु० जगणः जगणः गु०

I — S·I·S — S·S·S — S　S — I·S·I — I·S·I — S

उ(१)पस्थिते(४)यं कल्या(७)णी　ना(१)म्नि कीर्ति(४)त एव(७)यत् ॥

(र० वं० १।८७)

गु० मगणः यगणः गु० गु० मगणः जगणः गु०

S — S·S·S — I·S·S — S　S — S·S·S — I·S·I — S

श्ला(१)घ्यस्त्यागो(४)ऽपि वैदे(७)ह्याः　प(१)त्युः प्राग्वं(४)शवासि(७)नः ।

ल० रगणः मगणः गु० गु० यगणः जगणः गु०

I — S·I·S — S·S·S — S　S — I·S·S — I·S·I — S

अ(१)नन्यजा(४)नेस्तस्या[1](७)सीत्　सै(१)व जाया(४)हिरण्म(७)यी ॥

(र० वं० १५।६१)

---

१. 'अनन्यजानेर्यस्यासीत्' इति लि. पुस्तके । 'अनन्यजानेः सैवासीद् यस्माज्जाया' इति मुद्रिते रघुवंशे ।

सकारेणा(॥ऽ)पि क्वचिद्विपुला दृश्यते। यथा—

ल० भगणः भगणः गु० ल० तगणः जगणः गु०

। — ऽ·।·। — ।·ऽ·ऽ — ऽ । — ऽ·ऽ·। — ।·ऽ·। — ऽ

जि(१)ते न ल(४)भते ल(७)क्ष्मीं मृ(१)तेनापि(४)सुराङ्ग(७)नाः।

ल० यगणः सगणः गु० गु० तगणः जगणः गु०

। — ।·ऽ·ऽ — ।·।·ऽ — ऽ ऽ — ऽ·ऽ·। — ।·ऽ·। — ऽ

क्षै(१)णविध्वं(४)सिनि का(७)ये का(१)चिन्ता म(४)रणे र(७)णे? ॥

(परा० स्मृ० ३।३८)

संकीर्णाश्च विपुलाप्रकारा दृश्यन्ते। तथा च भामहेनोक्तम्—

ल० मगणः नगणः गु० ल० यगणः जगणः गु०

। — ऽ·ऽ·ऽ — ।·।·। — ऽ । — ।·ऽ·ऽ — ।·ऽ·। — ऽ

क(१)चित्काले(४)प्रसर(७)ता क(१)चिदाप(४)त्य निम्न(७)ता।

ल० रगणः भगणः गु० ल० मगणः जगणः गु०

। — ऽ·।·ऽ — ऽ·।·। — ऽ । — ऽ·ऽ·ऽ — ।·ऽ·। — ऽ

शु(१)नेव सा(४)रङ्गकु(७)लं त्व(१)या भिन्नं(४)द्विषां ब(७)लम् ॥

(का० लं० २।५४)

इत्यादयो विपुलाविकल्पाः संकीर्णाश्च कोटिशः काव्येषु दृश्यन्ते। सर्वासां विपुलानां चतुर्थो वर्णः प्रायेण गुरुर्भवतीत्याम्नायः॥

अतः परं विषमवृत्तान्याह—

प्रतिपादं चतुर्वृद्ध्या पदचतुरूर्ध्वम्।५।२०॥

चतुर्णामक्षराणां वृद्धिश्चतुर्वृद्धिः। अनुष्टुभः पादादूर्ध्वं प्रतिपादं चतुरक्षरवृद्ध्या यद्वृत्तं निष्पद्यते, तत् 'पदचतुरूर्ध्वं' नाम। तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८.

त-स्याः क-टा-क्ष-वि-क्षे-पैः

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.

क-म्पि-त-त-नु-कु-टि-लै-र-ति-दी-र्घैः।

---

१. 'यकारेण' इति लि. पुस्तके। एते विपुलाभेदाश्छन्दःकौस्तुभादौ नोपलभ्यन्ते।

२. 'क्षणध्वंसिनि कायेऽस्मिन्' इति मूले पाठः।

३. 'विषमसमाङ्घ्रयोर्भेदैराविरभूवन्ननुष्टुभि श्लोकाः।
षोडशलक्षाण्यष्टात्रिंशत्साहस्रसागरशतानि॥' (वृ० म० को० ५।१)

४. 'आद्यः पादोऽष्टभिर्वर्णैस्ततोऽन्ये चतुरक्षरैः क्रमाद्वृद्धाः। पादा यस्य द्वितीयाद्याः षट्पञ्चाशद्वर्णा यत्र तदिह विबुधजनैरुक्तं पदचतुरूर्ध्वं नाम वृत्तम्॥' इति छन्दःकौस्तुभे।

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
त-क्ष-क-द-ष्ट इ-न्द्रि-य-शू-न्यः क्ष-त-चै-त-न्यः
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६. १७. १८. १९. २०.
प-द-च-तु-रू-र्ध्वं न च-ल-ति पु-रु-षः प-त-ति स-ह-सै-व ॥

अत्र गुरुलघुविभागो नेष्यते ॥

गावन्त आपीडः । ५ । २१ ॥

गकारौ (ऽऽ) द्वावन्ते चेद्भवतश्चतुर्णामपि पादानां तत् पदचतुरूर्ध्वं 'आपीड'संज्ञकं भवति । अन्ते गुरुद्वयग्रहणादत्र शेषाणां लघुत्वमभ्यनुज्ञातं सूत्रकारेणेति मन्यामहे[2] । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८.
।-।-।-।-।-।-ऽ-ऽ
कु-सु-मि-त-स-ह-का-रे
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.
।-।-।-।-।-।-।-।-।-।-ऽ-ऽ
ह-त-हि-म-म-हि-म-शु-चि-श-शा-ङ्के ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
।-।-।-।-।-।-।-।-।-।-।-।-।-।-ऽ-ऽ
वि-क-सि-त-क-म-ल-स-र-सि म-धु-स-म-ये-ऽस्मिन्
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६. १७. १८. १९. २०.
।-।-।-।-।-।-।-।-।-।-।-।-।-।-।-।-।-।-ऽ-ऽ
प्र-व-सा-सि-प-थि-क-ह-त-क! य-दि भ-व-ति त-व-वि-प-त्तिः ॥

गावादौ चेत्प्रत्यापीडः । ५ । २२ ॥

गकारौ (ऽऽ) द्वावादौ चेद्भवतश्चतुर्णामपि पादानां, तदा तत् पदचतुरूर्ध्वं 'प्रत्यापीड'-संज्ञं भवति । अत्रापि पूर्ववच्छेषाणां लघुत्वमेव । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८.
ऽ-ऽ ।-। ।-।-।-।
चि-त्तं म-म र-म-य-ति
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.
ऽ-ऽ ।-।-।-।-।-।-।-।-।-।
का-न्तं व-न-मि-द-मु-प-गि-रि-न-दि ।

---

१. 'आपीड इदमेवान्त्यौ वर्णौ चेद्गौ' इति छन्दःकौस्तुभे । २. 'आपीडः सर्वलःप्रोक्तः पूर्वपादान्तगद्वयः' (ग० पु० पू० खं० २११।२) ३. अयं भेदश्छन्दःकौस्तुभ-वृत्तरत्नाकरादिषु नोपलभ्यते । मन्दारमरन्दे त्वस्ति ।

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
ऽ–ऽ–।–।–।–।–।–।–।–।–।–।–।–।–।–।
कू–ज–न्म–धु–क–र–कै–ल–र–व–क्र–त–ज–न–धु–ति
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६. १७. १८. १९. २०.
ऽ–ऽ–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।
पुं-स्को-कि-ल-मु–ख-रि–त–सु–र-भि-कु–सु–म–चि–त–त–रु–त–ति ॥

प्रत्यापीडो गावादौ च । ५ । २३ ॥

चकारोऽन्त इति समुच्चयार्थः । तस्यैव पदचतुरूर्ध्वस्यान्ते आदौ च यदि गकारौ(ऽऽ) भवतस्तदापि 'प्रत्यापीड' एव भवति । तत्रोदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८.
ऽ–ऽ–।–।–।–।–ऽ–ऽ
का–न्ता–व–द–न–स–रो–जं
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.
ऽ–ऽ–।–।–।–।–।–।–।–।–ऽ–ऽ
हृ–द्यं घ–न–मु–र–भि–म–धु–र–सा–त्म्यम् ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६.
ऽ–ऽ।–।–।।–।–।–।–।–।–।–।।–ऽऽ
पा–तुं र–ह–सि स–त–त–म–भि–ल–ष–ति म–नो मे
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२. १३. १४. १५. १६. १७. १८. १९. २०.
ऽ–ऽ–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–।–ऽ–ऽ
किं-चि-न्मु-कु-लि-त-न–य-न-स्म–वि–र–त–म–णि–त–र–म–णी–यम् ॥

तदेवं द्विप्रकारः प्रत्यापीडो भवति ॥

प्रथमस्य विपर्यासे मञ्जरीलवल्यमृतधाराः । ५ । २४ ॥

आपीडग्रहणं निवृत्तम् । तेनैव समं लघ्वक्षराभ्यनुज्ञानं च । तदेव पदचतुरूर्ध्वं प्रथमस्य विपर्यासे मञ्जरी–लवली–अमृतधाराभिधानं भवति । प्रथमस्य पादस्य द्वितीयेन

---

१. 'कुलकलरवक्रनयति' इति लि. पुस्तके. २. अयं भेदश्छन्दःकौस्तुभ–वृत्तरत्नाकरादिषु नोपलभ्यते, **नाग्नेये** (३३२) ऽस्य सूत्रस्यानुवादो दृश्यते, न च वृत्तिकृदुक्तार्थसूचनार्थमेतावद्गुरुसूत्रकरणापेक्षास्ति, नापि नाम्नः पुनरुपादाने प्रयोजनमस्तीति पूर्वसूत्रस्यैव पाठान्तरमिदं लेखकप्रमादान्मूले प्रविष्टं वृत्तिकृता 'स्थितस्य गतिश्चिन्तनीये'ति न्यायमनुसृत्य व्याख्यातमिति सम्भाव्यते । 'अत्यापीड' इति पाठः कैश्चिद्दृश्यते । वैदिकैस्तु यथावस्थितमधीयत एवेत्यत्र तत्त्वे सुधिय एव प्रमाणम् । ३. **'कलिका'** इति नामान्तरं गारुड-छन्दःकौस्तुभ-वृत्तरत्नाकरादौ । **'मण्डरी'**त्यपि **कृष्णीये** । 'अथादिना । क्रमात्पादेन चेत्पादा द्वितीयाद्यास्त्रयस्तदा । **कलिका लवली** प्रोक्ताऽ**मृतधारा** च सूरिभिः ॥' इति **छन्दःकौस्तुभे** ।

विपर्यासे 'मञ्जरी'। प्रथमस्य तृतीयेन विपर्यासे 'लवली'। प्रथमस्य चतुर्थेन विपर्यासे 'अमृतधारा'[1] ॥

तत्र मञ्जर्युदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९. १०.११.१२.
ज–न–य–ति म–ह–तीं प्री–तिं हृ–द–ये
१. २. ३. ४. ५. ६. ७. ८.
का–मि–नां चू–त–म–ञ्ज–री ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०.११. १२. १३.१४.१५.१६.
मि–ल–द–लि–च–क्र–च–ञ्चु–प–रि–चु–म्बि–त–के–स–रा
१. २. ३. ४. ५. ६. ७. ८.९.१०.११.१२.१३.१४.१५.१६.१७.१८.१९.२०.
को–म–ल–म–ल–य–वा–त–प–रि–न–र्ति–त–त–रु–शि–र–सि स्थि–ता ॥

लवल्युदाहरणम्—

१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११.१२.१३.१४.१५.१६.
वि–र–ह–वि–धु–र–रू–ण–का–म्–ना–क–पो–लो–प–मं
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.
प–रि–ण–ति–ध–रं पी–त–पा–ण्डु–च्छ–वि[2] ।
१. २. ३. ४. ५. ६. ७. ८.
ल–व–ली–फ–लं नि–दा–घे
१.२. ३. ४.५. ६. ७.८.९.१०.११. १२.१३.१४.१५. १६. १७. १८. १९.२०.
भ–व–ति ज–ग–ति हि–म–क–र–शी–त–ल–म–ति–स्वा–दू–ष्ण–ह–रम्[3] ॥

अमृतधारोदाहरणम्—

१.२. ३. ४. ५. ६. ७. ८. ९. १०.११.१२.१३.१४.१५. १६.१७.१८. १९. २०.
य–दि वा–ञ्छ–सि क–र्ण–र–सा–य–नं स–त–त–म–मृ–त–धा–रा–भिः
१. २. ३. ४. ५. ६. ७. ८. ९. १०.११.१२.
य–दि हृ–दि वा प–र–मा–न–न्द–र–सम् ।
१. २. ३. ४. ५. ६. ७. ८. ९. १०. ११. १२.१३.१४.१५.१६.
चे–तः! शृ–णु **ध–र–णी–ध–र**–वा–णी–म–मृ–त–म–यीं
१. २. ३. ४. ५. ६. ७. ८.
त–त्का–व्य–गु–ण–भू–ष–णम् ॥

केचिदापीडादिष्वपि पादविपर्यासे सति मञ्जर्यादिनामानीच्छन्ति ॥

इति पदचतुरूर्ध्वाधिकारः ।

---

१. 'आपीडस्यादिमस्तुर्यस्तुरीयश्चेत्तृतीयकः। तृतीयोऽपि द्वितीयोऽङ्घ्रिर्द्वितीयः प्रथमो यदि। उक्ता साऽ**मृतधारे**ति **मञ्जरी**त्यपि कैश्चन ॥' इति मं० म०। २. 'कपोलावदातपरिणति आपीतपाण्डुच्छवि' इति लि. पुस्तके. ३. 'जयति हिमशीतलं खण्डवत्स्वादु तृष्णाहरं सुन्दरम्' इति लि. पुस्तके.

उद्गतामेकतः सजौ सलौ, नसौ जगौ, भनौ जलौ ग, सजौ सजौ ग । ५ । २५ ॥

'पाद–' (पि० सू० ५।९) इति प्रकृतमनुवर्तते । यत्र प्रथमे पादे सकार (॥ऽ)जकार(।ऽ।)सकार(॥ऽ)ल(।)कारैर्दशाक्षराणि भवन्ति, द्वितीये पादे नकार(॥।)सकार(॥ऽ)-जकार(।ऽ।)ग(ऽ)कारैर्दशैव, तृतीये पादे भकार(ऽ॥)नकार(॥।)जकार(।ऽ।)लकार(।)-ग(ऽ)कारैरेकादशैव, चतुर्थे पादे सकार(॥ऽ)जकार(।ऽ।)सकार(॥ऽ)जकार(।ऽ।)ग(ऽ)-कारैस्त्रयोदश तद्वृत्तम् 'उद्गता' नाम । तत्रोदाहरणम्—

सगणः जगणः सगणः ल०

। · । · ऽ — । ऽ । — । · । · ऽ ।

मृ–ग–लो–च–ना श–शि–मु–खी च

(१).(२).(३).(४).(५).(६).(७).(८).(९).(१०).

नगणः सगणः जगणः गु०

। · । · । — । · । · ऽ । · ऽ । — ऽ

रु–चि–र–द–श–ना नि–त–म्बि–नी ।

(१).(२).(३).(४).(५).(६). (७).(८).(९).(१०).

भगणः नगणः जगणः ल० गु०

ऽ · । · । — । · । · । — । · ऽ · । — । — ऽ

हं–स–ल—लि–त–ग—म–ना ल—ल–ना

(१).(२).(३). (४). (५).(६). (७).(८).(९).(१०).(११).

सगणः जगणः सगणः जगणः गु०

। · । · ऽ — । · ऽ · । — । · । · ऽ — । · ऽ · । — ऽ

प–रि–णी—य–ते य—दि भ–वे—त्कु–लो–द्ग—ता ॥

(१).(२).(३). (४).(५).(६).(७).(८).(९).(१०).(११).(१२).(१३).

यत्र सूत्रे गकारो(ऽ) लकारो(।) वा श्रूयते, तत्र तेनैव वृत्तस्य पादः परिसमाप्यते । 'उद्गताम्' इति कर्मविभक्तिश्रवणात् पठेदित्यध्याहार्यम् । 'एकतः' इति प्रथमं पादं द्वितीयेन सहाविलम्बेन पठेदित्यर्थः । 'उपस्थितप्रचुपितं पृथगाद्यम्' (पि० सू० ५।२८)

---

१. 'प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरे । यद्यथ भनजलगाः स्युरथो सजसा जगौ प्रभवतीयमुद्गता ॥', 'प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरे । यद्यथ च भनभगाः स्युरथो सजसा जगौ भवतीयमुद्गता ॥' इति प्रा० पि० सू० २।३२४, ३२२ एवं च प्राकृतपिङ्गले लक्षणद्वयमुक्तमुद्गतायाः.

इत्यतः सिंहावलोकितन्यायेन 'आद्य'ग्रहणमनुवर्त्तनीयम् । तेनाद्यमेव पादमेकतः पठेत् ।
'एकतः' इति ल्यब्लोपे पञ्चमी ॥

तृतीयस्य सौरभकं र्नौ भ्गौ । ५ । २६ ॥

'तृतीयस्य' इति ग्रहणात्तस्या उद्गताया एवान्ये त्रयः पादा गृह्यन्ते । तृतीयपादे तु विशेषः । तृतीये पादे रेफ(ऽ।ऽ)नकार(।।।)भकार(ऽ।।)ग(ऽ)कारैर्दशाक्षराणि भवन्ति तत् 'सौरभकं' नाम । तत्रोदाहरणम्—

सगणः जगणः सगणः ल० नगणः सगणः जगणः गु०

।·।·ऽ—।·ऽ·।।·।·ऽ—। ।·।·। ।·।·ऽ—।·ऽ·।—ऽ

वि–नि–वा–रि–तोऽपि न–य–ने–न त–दं–पि कि–मि–हा–ग–तो भ–वान्?

(१).(२).(३).(४).(५).(६).(७).(८).(९).(१०). (१).(२).(३).(४).(५).(६).(७).(८). (९).(१०).

रगणः नगणः भगणः गु० सगणः जगणः सगणः जगणः गु०

ऽ·।·ऽ—।·।·। ऽ·।·।·ऽ ।·।·ऽ—।·ऽ·।—।·।·ऽ—।·ऽ·।—ऽ

ए–त–दे–व त–व सौ–र–भ–कं य–दु–दी–रि–ता–र्थ–म–पि ना–व–बु–ध्य–ते ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०) (१)(२)(३) (४) (५) (६) (७)(८)(९)(१०)(११)(१२)(१३)

ललितं[3] नौ सौ । ५ । २७ ॥

तस्या एव उद्गतायास्तृतीयपादस्थाने यदा नौ(।।।.।।।)सौ(।।ऽ.।।ऽ) भवतस्तदा 'ललितं' नाम वृत्तम् । तत्रोदाहरणम्—

सगणः जगणः सगणः ल०

।·।·ऽ ।·ऽ·।—।·।·ऽ—।

स–त–तं प्रि–यं–व–द–मु–दा—र-

(१).(२).(३). (४).(५).(६).(७).(८).(९).(१०).

नगणः सगणः जगणः गु०

।·।·।—।·।·ऽ ।·ऽ ।—ऽ

म–म–ल—हृ–द–यं गु–णो–त्त–रम्[4] ।

(१).(२).(३).(४).(५).(६).(७).(८).(९).(१०).

---

१. 'एकतः पठे'दिति—अर्धद्वयमप्येकीकृत्य एकत उच्चारयेत् । द्वितीयपादस्तृतीयपादश्च सन्धिसमासवशादेकीभवतीत्यर्थः । उक्तं च **जयदेवेन**—'तरसोदिता सजसले-ष्वि'त्यादि । तत्र च तरसोदिता वेगेनोच्चारिता—अर्धान्ते विराममन्तरेणार्धद्वयमेकीकृत्य पठितेत्यर्थः—इति **वृत्तरत्नाकरपञ्जिका** (५।६)। २. 'त्रयमुद्गतासदृशमेव पदमिह तृतीयमन्यथा । जायते रनभगैर्ग्रथितं कथयन्ति **सौरभकमे**वदीदृशम् ॥' इति प्रा० पिं० सू० २।३३७. । 'अन्ये **सौरलक**मूचिरे ।' इति **कृष्णीये** । ३. 'नयुगं सकारयुगलं च भवति चरणे तृतीयके । तदुदितमुरुमतिभि**र्ललितं** यदि शेषमस्य सकलं यथोद्गता ॥' इति प्रा० पिं० सू० २।३२९। ४; 'गुणोन्नतं' इति लिं. पुस्तके.

नगणः नगणः सगणः सगणः

।·।· ।—।·।· ।—।·।· ऽ—।·।·ऽ

सु—ल—लि—त—म—ति—क—म—नी—य—त—नुं

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

सगणः जगणः सगणः जगणः गु०

।·।·ऽ ।·ऽ·। ।·।·ऽ—।·ऽ·।—ऽ

पु—रु—षं त्य—ज—न्ति न—तु—जा—तु यो—षि—तः ॥

(१)(२)(३) (४)(५) (६) (७)(८) (९)(१०)(११)(१२)(१३)

उपस्थितप्रचुपितं पृथगाद्यं म्सौ ज्भौ गौ, स्नौ ज्रौ ग्, नौ स्, नौ न् ज्यौ । ५ । २८ ॥

यत्र प्रथमे पादे मकार(ऽऽऽ) सकार(।।ऽ) जकार(।ऽ।) भकारा(ऽ।।) गकारौ (ऽऽ) च भवतः, द्वितीये पादे सकार(।।ऽ) नकार(।।।) जकार(।ऽ।) रेफा(ऽ।ऽ) गकार(ऽ)श्च, तृतीये नकारौ(।।।.।।।) सकार(।।ऽ)श्च, चतुर्थे त्रयो नकारा(।।।.।।।.।।।) जकार(।ऽ।) यकारौ(।ऽऽ) च, तत् 'उपस्थितप्रचुपितं' नाम वृत्तं भवति । तत्रोदाहरणम्—

मगणः सगणः जगणः भगणः गु० गु०

ऽ·ऽ·ऽ — ।·।·ऽ—।·ऽ·।—ऽ·। ।—ऽ—ऽ

रा—मा का—म—क—रे—णु—का मृ—गा—य—त—ने—त्रा

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)

सगणः नगणः जगणः रगणः गु०

।·।·ऽ ।·।·। ।·ऽ·।—ऽ·।·ऽ—ऽ

हृ—द—यं ह—र—ति प—यो—ध—रा—व—न—म्रा ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)

नगणः नगणः सगणः

।·।·।— ।·।·।—।·।·ऽ

इ—य—म—ति—श—य—सु—भ—गा

(१)(२)(३)(४)(५)(६)(७)(८)(९)

नगणः नगणः नगणः जगणः यगणः

।·।·।—।·।·।—।·।·।—।·ऽ·।—।·ऽ·ऽ

ब—हु—वि—ध—नि—धु—व—न—कु—श—ला ल—लि—ता—ङ्गी ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)

---

१. 'म्सौ ज्भौ गौ प्रथमाङ्घ्रिरीक्ष्यते खलु यस्मिंस्त्रितयं सनजरगास्तथा ननसौ सः । अथ नननयुतजयं प्रचुपितमिदमुदितमुपस्थितपूर्वम् ॥' इति छन्दःकौस्तुभे । कृष्णीये तूद्गतायाः सरलाख्योऽन्योऽपि भेद उपलभ्यते—'उद्गतायाश्चतुर्थोऽङ्घ्रिर्नननगैः सरलं मतम् ।' इति । 'उपस्थितप्रकुपित'मिति—कृष्णीये ।

'पृथगाद्यम्' इति 'उद्गतामेकतः पठेत्' (पि० सू० ५।२५) इत्यनुवृत्तिनिरासार्थम्[1]।
अत्र तृतीयपादव्यवस्था सकारस्य[2] विभज्य पाठलिङ्गात् ॥

वर्द्धमानं[3] नौ स्नौ नूसौ । ५ । २९ ॥

'तृतीयस्य' (पि० सू० ५।२६) इत्यनुवर्तते । तस्मिन्नुपस्थितप्रचुपिते तृतीयस्य पादस्य स्थाने यदा नकारौ (।।।.।।।) सकार(।।ऽ) नकारौ(।।।) पुनर्नकार(।।।) सकारौ(ऽ।।) च भवतस्तदा 'वर्द्धमानं' नाम वृत्तं भवति । तत्रोदाहरणम्—

मगणः सगणः जगणः भगणः गु० गु०
ऽ· ऽ· ऽ ।· ।· ऽ—।· ऽ· ।— ऽ· ।· ।—ऽ ऽ
बि-म्बो-ष्ठी क-ठि-नो—न्न-त-स्त—ना-व-न—ता-ङ्गी
(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)(११)(१२)(१३)(१४)

सगणः नगणः जगणः रगणः गु०
।· ।· ऽ — ।· ।· ।—।· ऽ· ।—ऽ· ।· ऽ—ऽ
ह-रि-णी—शि-शु-न—य-ना नि-त-म्ब-गु—र्वी ।
(१)(२)(३) (४)(५)(६) (७)(८) (९)(१०)(११)(१२)(१३)

नगणः नगणः सगणः नगणः नगणः सगणः
।· ।· ।—।· ।· ।— ।·।· ऽ ।· ।· ।— ।· ।· ।—।· ।· ऽ
म-द-क-ल-क-रि—ग-म-ना प-रि-ण—त-श-शि-क-ल-मा
(१)(२)(३)(४)(५)(६) (७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)(१६)(१७)(१८)

नगणः नगणः नगणः जगणः यगणः
।· ।· ।—।· ।· । ।· ।· । ।· ऽ· ।— ।· ऽ· ऽ
ज-न-य—ति म-म म-न-सि मु-दं म—दि-रा-क्षी ॥
(१)(२)(३) (४) (५)(६) (७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)

शुद्धविराडृषभं तजराः । ५ । ३० ॥

तस्मिन्नेव उपस्थितप्रचुपिते यदा तृतीयस्य पादस्य स्थाने तकार(ऽऽ।) जकार(।ऽ।)-रेफा(ऽ।ऽ) भवन्ति, तदा 'शुद्धविराडृषभं' नाम वृत्तं भवति । तत्रोदाहरणम्—

मगणः सगणः जगणः भगणः गु० गु०
ऽ· ऽ· ऽ ।· ।· ऽ — ।· ऽ· ।—ऽ· ।· ।—ऽ ऽ
क-न्ये-यं क-न-को-ज्ज्व-ला म—नो-ह-र—दी-प्तिः
(१) (२) (३)(४)(५) (६) (७) (८) (९) (१०)(११)(१२)(१३)(१४)

---

१. 'शङ्कानिरासार्थम्' इति लि. पुस्तके. २. 'स्नौ' इति सूत्रस्थपाठदेहे नकारात्सकारं दूरीकृत्येत्यर्थः । ३. 'वर्धमानं तृतीये नौ–' इत्येव वैदिकपाठः । 'वर्द्धमानं तृतीयस्थे नंनैर्नेनसैरिह' इति छन्दःकौस्तुभे । ४. लिखितपुस्तके सर्वत्रापि 'नयगौ सगण-नगणौ' इत्यादि । ५. 'तजरैस्तु शुद्धविराजर्षभम्' इति छन्दःकौस्तुभे ।

सगणः नगणः जगणः रगणः गु०

।·।·ऽ—।·।·।—।·ऽ·।—ऽ·।·ऽ—ऽ

श–शि–नि—र्म–ल–व—द–ना वि—शा–ल–ने–त्रा।

(१) (२) (३) (४)(५)(६) (७)(८)(९) (१०)(११)(१२)(१३)

तगणः जगणः रगणः

ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

पी–नो–रु—नि–त–म्ब—शा–लि–नी

(१) (२) (३) (४) (५) (६) (७) (८) (९)

नगणः नगणः नगणः जगणः यगणः

।·।·।—।·।।—।·।·।—।·ऽ·।—।·ऽ·ऽ

सु–ख–य—ति हृ–द—य–म–ति—श–यं त—रु–णा–नाम्॥

(१)(२)(३) (४) (५)(६) (७)(८)(९) (१०)(११)(१२)(१३)(१४)(१५)

उपस्थितप्रचुपितादीनामस्मिन्प्रवेशयितुं न शक्यन्ते संज्ञाः, इति नोक्ताः॥

अर्द्धे।५।३१॥

पूर्वमुच्चावचानि छन्दांस्युक्तानि। इदानीं नियमेनोच्यन्ते। 'अर्द्धे' इत्यधिकारोऽयमाध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः, अर्द्ध एव तद्वेदितव्यम्॥

उपचित्रकं सौ स्लौ ग्, भौ भ्गौ ग्।५।३२॥

यस्य प्रथमे पादे सकारास्त्रयः(॥ऽ.॥ऽ.॥ऽ), लकार(।) गकारौ(ऽ) च क्रमेण, द्वितीये भकारास्त्रयो(ऽ॥.ऽ॥.ऽ॥) गकारौ(ऽऽ) च भवतः, तत् 'उपचित्रकं' नाम वृत्तम्। अर्द्धशब्दस्य समप्रविभागवचनत्वाद्वितीयमप्यर्द्धं तादृशमेव। तत्रोदाहरणम्—

सगणः सगणः सगणः ल० गु०

।·।·ऽ—।·।·ऽ—।·।·ऽ—।—ऽ

उ–प–चि—त्र–क–म—त्र वि–रा—ज–ते

(१)(२)(३) (४)(५)(६) (७) (८)(९)(१०)(११)

भगणः भगणः भगणः गु० गु०

ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ ऽ

चू–त–व—नं कु–सु—मै–र्वि–क–स–द्भिः।

(१) (२) (३) (४) (५) (६) (७) (८) (९)(१०)(११)

---

१ 'विषमे यदि सौ सलगा दले भौ युजि भाद्गुरुकावुपचित्रम्' इति प्रा० पि० सू० २।३११।

सगणः　सगणः　सगणः　ल० गु०

। । ऽ—। । ऽ—। । ऽ—।—ऽ

प–र–पु–ष्ट–वि–घु–ष्ट–म–नो–ह–रं

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

भगणः　भगणः　भगणः　गु० गु०

ऽ । । ।—ऽ । । ।—ऽ । । ।—ऽ—ऽ

न–न्म–थ–के–लि–नि–के–त–न–मे–तत् ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

द्रुतमध्या[1] भौ भृगौ ग्, नृजौ ज्यौ । ५ । ३३ ॥

यस्य प्रथमे पादे त्रयो भकारा (ऽ।।.ऽ।।.ऽ।।) गकारौ(ऽ.ऽ) च, द्वितीये नकार (।।।)-जकारौ (।ऽ।) जकार (।ऽ।) यकारौ (।ऽऽ) च, तद् 'द्रुतमध्या' नाम वृत्तम् । अत्रापि प्रथमद्वितीयाविव तृतीयचतुर्थौ पादौ । तत्रोदाहरणम्—

भगणः　भगणः　भगणः　गु० गु०

ऽ । । । ऽ । । ।—ऽ । । ।—ऽ—ऽ

य–द्य–पि शी–घ्र–ग–ति–र्मृ–दु–गा–मी

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

नगणः　जगणः　जगणः　यगणः

। । । ।—। ऽ । ।—। ऽ । ।—। ऽ ऽ

ब–हु–ध–न–वा–न–पि दुः–ख–मु–पै–ति ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

भगणः　भगणः　भगणः　गु० गु०

ऽ । । ।—ऽ । । ।—ऽ । । ।—ऽ—ऽ

ना–ति–श–य–त्व–रि–ता न च मृ–द्वी

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

नगणः　जगणः　जगणः　यगणः

। । । ।—। ऽ । ।—। ऽ । ।—। ऽ ऽ

नृ–प–ति–ग–तिः क–थि–ता द्रु–त–म–ध्या ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

वेगवती[2] सौ सगौ, भौ भृगौ ग् । ५ । ३४ ॥

---

१. 'भत्रयमोजगतं गुरुकौ चेत् युजि च नजौ ज्यगुतौ **द्रुतमध्या**' इति छन्दःकौस्तुभे । २. 'विषमे प्रथमाक्षरहीनं दोधकवृत्तमेव **वेगवती** स्यात्' इति प्रा० पि० सू० २।३।१३.

यस्य प्रथमे पादे त्रयः सकारा (।।ऽ.।।ऽ.।।ऽ) गकार(ऽ)श्चैकः, द्वितीये भकारास्त्रयो (ऽ।।.ऽ।।.ऽ।।) गकारौ(ऽऽ) च भवतः, तत् 'वेगवती' नाम वृत्तम्। तत्रोदाहरणम्—

सगणः सगणः सगणः गु०

।·।· ऽ—।·।· ऽ—।·।· ऽ—ऽ

त-व मु-ञ्च न-रा-धि-प! से-नां

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)

भगणः भगणः भगणः गु० गु०

ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ

वे-ग-व-तीं स-ह-ते स-म-रे-षु।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

सगणः सगणः सगणः गु०

।·।· ऽ—।·।· ऽ—।·।· ऽ—ऽ

प्र-ल-यो-र्मि-मि-वा-भि-मु-खीं तां

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)

भगणः भगणः भगणः गु० गु०

ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ

कः स-क-ल-क्षि-ति-भृ-न्नि-व-हे-षु? ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

भद्रविराट् तजौ गौ, म्सौ ज्गौ ग्। ५। ३५॥

यस्य प्रथमे पादे तकार (ऽऽ।) जकारौ(।ऽ।) रेफ(ऽ।ऽ) गकारौ(ऽ) च, द्वितीये मकार-(ऽऽऽ) सकार (।।ऽ) जकारा (।ऽ।) गकारौ (ऽऽ) च, तद् वृत्तं 'भद्रविराट्' नाम। तत्रोदाहरणम्—

तगणः जगणः रगणः गु०

ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ—ऽ

य-त्पा-द-त-ले च-का-स्ति च-क्रं

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)

मगणः सगणः जगणः गु० गु०

ऽ·ऽ·ऽ ।·।·ऽ ।·ऽ·।—ऽ ऽ

ह-स्ते वा कु-लि-शं स-रो-रु-हं वा।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

---

१. 'ओजे तपरौ जरौ गुरुश्चेत् म्सौ ज्गौ ग् भद्रविराड् भवेदनोजे' इति छन्दःकौस्तुभे।

तगणः जगणः रगणः गु०

S · S · I—I · S · I—S · I · S—S

रा–जा ज–ग–दे–क–च–क्र–व–र्ती

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०)

मगणः सगणः जगणः गु० गु०

S · S · S—I · I · S I · S · I—S S

स्या–च्छं भ–द्र–वि–राट् स–म–श्नु–ते ऽसौ ॥

(१) (२) (३) (४) (५) (६) (७) (८) (९) (१०) (११)

अस्यौपच्छन्दसिकान्तःपातित्वेऽपि विशेषसंज्ञार्थमर्द्धसमाधिकारे पाठः[१] ॥

केतुमती[२] सजौ सगौ, भरौ नगौ ग् । ५ । ३६ ॥

यस्य प्रथमे पादे सकार (IIS) जकारौ (ISI) सकार (IIS) गकारौ (S) च, द्वितीये भकार (SII) रेभ (SIS) नकारा (III) गकारौ (SS) च, तत् 'केतुमती' नाम वृत्तं भवति । तत्रोदाहरणम्—

---

१. अत्र केषाञ्चिद्भद्रविराडादीनामौपच्छन्दसिकादिभ्यो वैतालीयभेदेभ्योऽभेदेऽपि गणनियमानियमरूपोपाधिभेदाद्भेदो बोध्यः । अत एव **केदारोऽपि** औपच्छन्दसिकं विराड्वृत्तमप्याह स्म–'वदन्त्यपरवक्त्राख्यं वैतालीयं विपश्चितः । पुष्पिताग्राभिधं केचि-दौपच्छन्दसिकं तथा ॥' (वृ० र० ४।१२) इति **माधुर्यरञ्जनी** । २. 'विषमे सजौ सगुरुयुक्तौ **केतुमती** समे भरनगाद्गः' इति छन्दःकौस्तुभे ।

भगणः रगणः नगणः गु० गु०

S · I · I—S · I · S—I · I · I S—S

के–तु–म–तीं न–रे–न्द्र! त–व से–नाम् ॥

(१)(२)(३)(४)(५)(६)(७) (८)(९)(१०)(११)

आख्यानकी[1] तौ जगौ ग्, जतौ जगौ ग् । ५ । ३७ ॥

यस्य प्रथमे पादे तकारौ (SSI.SSI) जकारो (ISI) गकारौ (SS) च, द्वितीये जकार-(ISI) तकारौ (SSI) जकार (ISI) गकारौ (SS) च, तत् 'आख्यानकी' नाम वृत्तम् । तत्रोदाहरणम्—

तगणः तगणः जगणः गु० गु०

S · S · I—S · S · I—I · S · I—S—S

भृ–ङ्गा–व–ली म–ङ्ग–ल–गी–त–ना–दै-

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

जगणः तगणः जगणः गु० गु०

I · S · I S · S · I—I · S · I—S—S

र्ज–न–स्य चि–त्ते मु–द–मा–द–धा–ति ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

तगणः तगणः जगणः गु० गु०

S · S · I—S · S · I—I · S · I—S—S

आ–ख्या–न–की–व स्म–र–ज–न्म–वी–र्ता-

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

जगणः तगणः जगणः गु० गु०

I · S · I—S · S · I—I · S · I—S—S

म–हो–त्स–व–स्या–म्र–व–णे क्व–ण–न्ती ।[2]

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

आख्यानकी वार्ताहारिकोच्यते ॥

विपरीताख्यानकी[3] जतौ जगौ ग्, तौ जगौ ग् । ५ । ३८ ॥

---

१. 'अख्यानिकी' इति कलिकातामुद्रितपुस्तके पाठः । एवं वृत्तावपि तत्र । 'आख्यातकी'ति **रत्नाकरे** । '**आख्यानकी** तौ जगुरू गमोजे जतावनोजे जगुरू गुरुश्चेत्' इति छन्दःकौस्तुभे । उपजातिचतुर्दशभेदान्तर्गतप्राकृतपिङ्गलोक्त**भद्रा**ख्यदशमभेदरूपत्वात् '**भद्रा**' इत्यपरं नाम. २. 'यात्रामहोत्सवस्य श्रवणे क्वणन्ती' इति लिखितोदाहरणपुस्तके. ३. 'विपरीताख्यानिकी इति क. मु. पु. 'जतौ जगौ गो विषमे समे तौ जगौ ग एषा **विपरीत**पूर्वा' इति छन्दःकौस्तुभे । प्राकृतपिङ्गलोक्तोपजातिचतुर्दशभेदान्तर्गत**हंसी**नामकपञ्चमभेदरूपत्वात्पञ्चमोऽयं भेद उपजातेः, अतो '**हंसी**' इति नामान्तरम्.

यस्य प्रथमे पादे जकार (।ऽ।) तकारौ (ऽऽ।) जकारो (।ऽ।) गकारौ (ऽऽ) च, द्वितीये तकारौ (ऽऽ।.ऽऽ।) जकारो (।ऽ।) गकारौ (ऽऽ) च, तद् 'विपरीताख्यानकी' नाम वृत्तम् । तत्रोदाहरणम्—

जगणः सगणः जगणः गु० गु०

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ

अ–लं त–वा–ली–क–व–चो–भिं–रे–भिः

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

तगणः तगणः जगणः गु० गु०

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ

स्वा–र्थं प्रि–ये! सा–ध–य का–र्य–म–न्यत् ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

जगणः तगणः जगणः गु० गु०

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ

क–थं क–था–क–र्ण–न–कौ–तु–कं स्या-

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

तगणः तगणः जगणः गु० गु०

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ

दा–ख्या–न–की चे–द्वि–प–री–त–वृ–त्तिः ? ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

एतयोश्च वक्ष्यमाणोपजात्यन्तर्गतत्वेऽपि विशेषसंज्ञार्थमर्द्धसमाधिकारे पाठः ।

हरिणप्लुता सौ स्लौ ग्, न्भौ भ्रौ । ५ । ३९ ॥

यस्य प्रथमे पादे सकारास्त्रयो (॥ऽ.॥ऽ.॥ऽ) लकार (।) गकारौ (ऽ) च, द्वितीये नकार (।।।) भकारौ (ऽ॥) भकार (ऽ॥) रेफौ (ऽ।ऽ) च, तद् वृत्तं 'हरिणप्लुता' नाम । तत्रोदाहरणम्—

सगणः सगणः सगणः ल० गु०

।·।·ऽ—।·।·ऽ—।·।· ऽ—।—ऽ

त–व–मु–ञ्ज–न–रा–धि–प! वि–द्वि–षां

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

---

१. 'अयुजि प्रथमेन विवर्जितो द्रुतविलम्बितनो हरिणप्लुता' इति प्रा० पि० सू० २।३१५.

नगणः भगणः भगणः रगणः

।·।·।—ऽ·।·।—ऽ·।·।—ऽ·।·ऽ

भ-य-वि-व-र्जि-त-के-तु-ल-घी-य-साम् ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

सगणः सगणः सगणः ल० गु०

।·।·ऽ—।·।·ऽ—।·।·ऽ—।—ऽ

र-णं-भू-मि-प-रा-ङ्मु-ख-व-र्म-नां

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

नगणः भगणः भगणः रगणः

।·।·।—ऽ·।·।—ऽ·।·।—ऽ·।·ऽ

भ-व-ति शी-घ्र-ग-ति-र्ह-रि-ण-प्लु-ता ॥

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

अपरवक्त्रं नौ र्लौ ग्, न्जौ ज्रौ । ५ । ४० ॥

यस्य प्रथमे पादे नकारौ (।।।.।।।) रेफ (ऽ।ऽ) लकार (।) गकारा (ऽ) श्च, द्वितीये नकार (।।।) जकारौ (।ऽ।) जकार (।ऽ।) रेफौ (ऽ।ऽ) च, तद्वृत्तम् 'अपरवक्त्रं' नाम । तत्रोदाहरणम्—

नगणः नगणः रगणः ल० गु०

।·।·।—।·।··।—ऽ·।·ऽ—।—ऽ

स-कृ-द-पि कृ-प-णे-न च-क्षु-षा

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

नगणः जगणः जगणः रगणः

।·।·।—।·ऽ·।—।·ऽ·।—ऽ·।·ऽ

न-र-व-र! प-श्य-ति-य-स्त-वा-न-नम् ।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)

नगणः नगणः रगणः ल० गु०

।·।·।—।·।·।—ऽ·।·ऽ—।—ऽ

न-पु-न-र-प-र-व-क्त्र-मी-क्ष-ते

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)

---

१. 'भयविसर्जितहेतिलघीयसाम्' इति लि. पुस्तके. २. 'अयुजि ननरला गुरुः समे तदपरवक्त्रमिदं नजौ ज्रौ' इति ग्रा० पि० सू० २।३।१८ अस्यैव 'पल्लविताग्र'मिति नामान्तरं वृ० म० को० ।

नगणः जगणः जगणः रगणः

।·।·।—।·ऽ· ।—।·ऽ·।—ऽ·।·ऽ

स हि सु–खि–तो–ऽर्थि–ज–न–स्त–था–वि–धः ॥

(१)(२) (३)(४) (५) (६) (७) (८)(९)(१०)(११)(१२)

अस्य वैतालीयान्तर्गतत्वेऽपि विशेषसंज्ञार्थमिहोपन्यासः ॥

पुष्पिताग्रा नौ र्यौ, न्जौ ज्रौ ग् । ५ । ४१ ॥

यस्य प्रथमे पादे नकारौ (।।।.।।।) रेफ (ऽ।ऽ) यकारौ (।ऽऽ) च, द्वितीये नकार-(।।।) जकारौ (।ऽ।) जकार (।ऽ।) रेफौ (ऽ।ऽ) गकार (ऽ) श्च, तद्वृत्तं 'पुष्पिताग्रा'[1] नाम । तत्रोदाहरणम्—

नगणः नगणः रगणः यगणः

।·।·।—।·।·।—ऽ·।·ऽ—।·ऽ·ऽ

स–म–सि–त–द–श–ना मृ–गा–य–ता–क्षी

(१)(२)(३)(४)(५)(६)(७) (८)(९)(१०)(११)(१२)

नगणः जगणः जगणः रगणः गु०

।·।·।—।·ऽ· ।—।·ऽ·।—ऽ·।·ऽ—ऽ

स्मि–त–सु–भ–गा प्रि–य–वा–दि–नी वि–द–ग्धा ।

(१) (२)(३)(४)(५) (६)(७)(८)(९)(१०)(११)(१२)(१३)

नगणः नगणः रगणः यगणः

।·।·।—।·।·।—ऽ·।·ऽ—।·ऽ—ऽ

अ–प–ह–र–ति नृ–णां म–नां–सि रा–मा

(१)(२)(३)(४)(५) (६)(७) (८)(९)(१०)(११)(१२)

नगणः जगणः जगणः रगणः गु०

।·।·। ।·ऽ·। ।·ऽ·। ऽ·।·ऽ—ऽ

भ्र–म–र–कु–ला–नि ल–ते–व पु–ष्पि–ता–ग्रा ॥

(१) (२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)

इयमप्यौपच्छन्दसकान्तर्गता विशेषसंज्ञापनार्थमत्रोच्यते ॥

यवमती[2] ज्रौ ज्रौ, ज्रौ ज्रौ ग् । ५ । ४२ ॥

यस्य प्रथमे पादे रेफ(ऽ।ऽ)जकारौ (।ऽ।) भूयोऽपि रेफ(ऽ।ऽ)जकारौ (।ऽ।) भवतः, द्वितीये जकार(।ऽ।)रेफौ (ऽ।ऽ) पुनर्जकार(।ऽ।)रेफौ (ऽ।ऽ) गुरु (ऽ) श्च, तद्वृत्तं 'यवमती' नाम । अत्र संप्रदायात्पादव्यवस्था । तत्रोदाहरणम्—

---

१. 'अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च **पुष्पिताग्रा**' इति प्रा० पि० सू० २।३०८. २. **'परावती'** इत्यपि नामान्तरं **श्रीकृष्णमते**.

यवान्विता यवमतीत्यर्थः ॥

शिखैकोनत्रिंदशदेकत्रिंद्शदन्ते ग् । ५ । ४३ ॥

यस्य प्रथमे पादे एकोनत्रिंशद् (२९) अक्षराणि, द्वितीये च एकत्रिंशत् (३१), द्वयोरपि (१. २) पादयोरन्ते च प्रत्येकं गुरुः (ऽ), तद्वृत्तं 'शिखा' नाम। 'अर्धे' (पि० सू० ५।३१) इत्यधिकाराद्वितीयमप्यर्धं तादृशमेव। 'अन्ते ग्' इति नियमार्थमेतत्। अन्ते एव गुरुर्नान्यत्र। तेन अयुक् (१,३) पादे अष्टाविंशति(२८)रक्षराणि लघूनि, अन्ते गुरु (१) रेकः। युक् (२, ४) पादे त्रिंश(३०)ल्लघवः, अन्ते गुरु (१) श्च। तत्रोदाहरणम्—

गु०
ऽ
अभिमतबकुलकुसुमघनपरिमलमिलदलिमुखरितहरिति मधौ
(२९).

---

१. 'तथा च यस्याः' इति लि. पु०. २. 'शिखैकान्नत्रिंश-'दिति वैदिकपाठः। पिङ्गलसूत्र(४।४९)प्राकृतपिङ्गलसूत्र(१।१२६)बोधित'**शिखा**'छन्दस्त्वस्माद्भिन्नमेव। ३. 'अभिनव' इति लि. पुस्तके.

गु॰ ऽ

सहचरमलयपवनरयतरलितसरसिजरजसि ¹शयतरणिवितते ।
(३१).

गु॰ ऽ

विकसितविविधकुसुमसुलभसुरभिशरमदननिहतसकलजने
(२९).

गु॰ ऽ

ज्वलयति मम हृदयमविरतमिह सुतनु ! तव विरहदहनविभ्रमशिखा ॥
(३१).

²खञ्जा महत्ययुजीति । ५ । ४४ ॥

इयमेव शिखा पूर्वोक्ते महति बह्वक्षरे पादे अयुजि (१, ३) सति, पारिशेष्यादितरस्मिंश्च युजि (२, ४) सति 'खञ्जा' नाम च्छन्दो भवति । अयमर्थः—एकत्रिंशदक्षरो विषमः पादः कर्तव्यः; एकोनत्रिंशद(२९)क्षरश्च समः पादः । शेषं यथाप्राप्तमेव । तत्रोदाहरणम्—

गु॰ ऽ

अपगतघनविशददशदिशि हृतजनदृशि परिणतकणकपिलकलमे
(३१).

गु॰ ऽ

प्रविकसदसमकुसुमघनपरिमलसुरभितमरुति शरदि समये ।
(२९).

गु॰ ऽ

शुचिशशिमहसि विकृतसरसिरुहि मुदितमधुलिहि विमलितधरणितले
(३१).

---

¹१. 'मनसि शयवितते'ति लि. पुस्तके, लिखितोदाहरणपुस्तके च. २. 'प्राकृतपिङ्गलसूत्र(१।१२४)बोधित'**खञ्जा**'छन्दस्त्वस्माद्भिन्नमेव । '**खजा**' इति नामान्तरमस्याः क्वचित् । 'शिखाखञ्जे दण्डकभेदौ । अत्र दर्शिते मात्रासमकप्रस्तावात्'—इति **वृ॰ र॰ पञ्चिका** ।

गु०
—
ऽ

किमपरमिह कमलमुखि! सुखमनुभवति मम हृदयकमलमधुना ॥
(२९).

अर्धसमवृत्ताधिकारो निवृत्तः ।

इति भट्टहलायुधविरचितायां छन्दोवृत्तौ पञ्चमोऽध्यायः ।

षष्ठोऽध्यायः ।

यतिर्विच्छेदः । ६ । १ ॥

विच्छिद्यते विभज्यते पदपाठोऽस्मिन्निति विच्छेदो विश्रामस्थानं, स च यतिरित्युच्यते[1] । नन्वत्र शास्त्रे यतिशब्देन व्यवहारादर्शनान्निरर्थकं संज्ञाकरणम्! । नैष दोषः, यतिरित्यागमादिष्वाचार्यपारम्पर्यागता संज्ञेयं 'तनुमध्यादि'वत् । तस्याः शिष्यव्युत्पत्त्यर्थमर्थकथनम् 'यतिर्विच्छेदः' इति । अस्ति च लोके शास्त्रान्तरेषु च यतिसंज्ञाव्यवहारः । अपि च 'यतिः' इत्यधिकार आसप्तमाध्यायपरिसमाप्तेः समुद्रेन्द्रियरसादिनिर्देशेषूपतिष्ठते । समुद्रादिशब्दाः साकाङ्क्षत्वात् 'यतिः' इत्यनेनैव संबध्यन्ते । यतिशब्दस्याधिकरणव्युत्पत्त्या समुद्रायवच्छिन्नेष्वक्षरेषु यतिः कर्तव्येत्यर्थः सिध्यति । तत्रैषा यत्युपदेशोपनिषद्भवति[2]—

'यतिः सर्वत्र पादान्ते श्लोकार्धे तु विशेषतः ।
समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके ॥
क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् ।
यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥
पूर्वान्तवत्स्वरः संधौ क्वचिदेव परादिवत् ।
द्रष्टव्यो यतिचिन्तायां यणादेशः परादिवत् ॥
नित्यं प्राक्पदसंबन्धाश्चादयः प्राक्पदान्तवत् ।
परेण नित्यसंबन्धाः प्रादयश्च परादिवत् ॥'

'यतिः सर्वत्र पादान्ते' इत्यस्योदाहरणम्—'विशुद्धज्ञानदेहाय' (मी. श्लो. वा. १।१) इत्यादि । तस्यैव प्रत्युदाहरणम्—

'नमस्तस्मै महादेवा,-य शशाङ्कार्धधारिणे' इत्यादि ।

---

१. यतिश्छन्दोऽधिरूढानां शब्दानां या विधारणा ।' (का. लं. ४।२४) इति **भामहः** ।
२. 'पादान्त एव केचिच्च पादमध्येऽपि केचन । यतिं वदन्ति तत्रापि विशेषः स्फुटमुच्यते ॥ धातुनामस्वभिन्नेषु यतिर्भवति नान्यथा । उपसर्गान्ततश्छेदः प्रत्ययादौ तयोः क्वचित् ॥ स्वरसन्धौ तु सम्प्राप्तसौन्दर्याद्यतिरिच्यते । तु चादयो न प्रयोज्या विच्छेदात्परतस्तथा ॥ प्रत्ययादौ यतिर्नाम्नां षष्ठ्यामेवेति केचन ।'–इति **मन्दारमरन्दे** (शे. बि.) ।

'श्लोकार्धे तु विशेषतः' इत्यत्र संधिकार्याभावः स्पष्टविभक्तिकत्वं च विशेषः । तत्रोदाहरणं यथा—

'नमस्यामि सदोद्भूतमिन्धनीकृतमन्मथम् ।
ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ॥'

अत्र 'ईश्वराख्यम्' इत्यस्य पूर्वमकारेण संयोगो न कर्तव्यः । समासे प्रत्युदाहरणं [यथा—]

'सुरासुरशिरोरत्नस्फुरत्किरणमञ्जरी- ।
पिञ्जरीकृतपादाब्जद्वन्द्वं वन्दामहे शिवम् ॥'

'समुद्रादिपदान्ते च व्यक्ताव्यक्तविभक्तिके' तत्र श्रूयमाणविभक्त्यन्तं व्यक्तविभक्तिकम् समासान्तर्भूतविभक्त्यन्तमव्यक्तविभक्तिकम् । तत्रोदाहरणं [यथा—]

'यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु' (मे. सं. १।१) इत्यादि ।

'व्यक्ताव्यक्तविभक्तिके' इति 'यतिः सर्वत्र पादान्ते' इत्यनेन संबध्यते । तत्रोदाहरणम्—

'वशीकृतजगत्कालं कण्ठेकालं नमाम्यहम् ।
महाकालं कलाशेषशशिलेखाशिखामणिम् ॥'

अपि च ।

'नमस्तुङ्गशिरश्चुम्बिचन्द्रचामरचारवे ।
त्रैलोक्यनगरारम्भमूलस्तम्भाय शम्भवे ॥'

'क्वचित्तु पदमध्येऽपि समुद्रादौ यतिर्भवेत् । यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ ॥' तत्रोदाहरणम्—

'पर्याप्तं तप्तचामी,—करकटकतटे श्लिष्टशीतेतरांशौ' इत्यादि । तथा—'कूजत्कोयष्टिकोला,—हलमुखरभुवः प्रान्तकान्तारदेशाः' इत्यादि । तथा—'हासो हस्ताग्रसंवा,—हनमपि तुलिता,—द्रीन्द्रसारद्विषोऽसौ' इत्यादि । तथा—'वैरिञ्चानां तथोच्चा,—रितरुचिरऋचां चाननानां चतुर्णाम्' इत्यादि । तथा—'खङ्गे पानीयमाशा,—दयति च महिषं पक्षपाती पृथक्कः' इत्यादि । समुद्रादाविति किम् ? । पदमध्ये यतिः पादान्ते मा भूत् । तद्यथा—'प्रणमत भवबन्धक्लेशनाशाय नारा,–यणचरणसरोजद्वन्द्वमानन्दहेतुम्' इत्यादि ।

पूर्वोत्तरभागयोरेकाक्षरत्वे तु यतिर्दुष्यति । तत्रोदाहरणम्—

'एतस्या ग,—ण्डतलममलं गाहते चन्द्रकक्षाम्' इत्यादि । 'एतस्या रा,–जति सुमुखमिदं पूर्णचन्द्रप्रकाशम् ।' इत्यादि । तथा—'सुरासुरशिरोनिघृ,—ष्टचरणारविन्दः शिवः' इत्यादि ।

'पूर्वान्तवत्स्वरः संधौ क्वचिदेव परादिवत्' । अस्यार्थः—योऽयं पूर्वपरयोरेकादेशः स्वरसंधौ विधीयते, स क्वचित्पूर्वस्यान्तवद्भवति क्वचित्परस्यादिवत् । तथा च पाणिनेः

सरणम्—'अन्तादिवच्च' (पा० सू० ६।१।८५)। तत्र पूर्वान्तवद्भावे उदाहरणम्—
'स्यादस्थानो—पगतयमुनासंगमेवाभिरामा' (मे. सं. १।५१)। 'जम्भारातीभकुम्भो,—द्भवमिव दधतः' इत्यादि।

तथा—

'दिक्कालाद्यनवच्छिन्ना—नन्तचिन्मात्रमूर्तये।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे॥' (नी. श. १) इत्यादि।

परादिवद्भावे उदाहरणम्—

'स्कन्धं विन्ध्याद्रिबुद्ध्या, निकषति महिष—स्याहितोऽसूनहार्षीत्' इत्यादि।

'शूलं शूलं तु गाढं प्रहर हर! हृषीकेश! केशोऽपि वक्र—श्चक्रेणाकारि किं ते' इत्यादि।

तत्र हि स्वरस्य परादिवद्भावे व्यञ्जनमपि तद्भक्तत्वात्तदादिवद्भवति।

'यदि पूर्वापरौ भागौ न स्यातामेकवर्णकौ' इत्यन्तादिवद्भावविधावपि संबध्यते। तेन 'अस्या वक्त्रा—ब्जमवजितपू—र्णेन्दुशोभं विभाति' इत्येवंविधा यतिर्न भवति।

'यणादेशः परादिवत्' इत्यस्योदाहरणम्—

'विततघनतुषारक्षोदशुभ्रांशुपूर्वा-
स्वविरलपदमालां श्यामलामुल्लिखन्तः' इत्यादि।

'नित्यं प्राक्पदसंबन्धाश्चादयः प्राक्पदान्तवत्'। तेभ्यः पूर्वा यतिर्न कर्तव्येत्यर्थः। तत्रोदाहरणम्—

'स्वादु स्वच्छं च हिमसलिलं प्रीतये कस्य न स्यात्'? इत्यादि।

नित्यं प्राक्पदसंबन्धा इति किम्?। अन्येषां पूर्वपदान्तवद्भावो मा भूत्। तद् यथा—
'मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः' (मे. सं. १।३८)
तथा—'इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे' (मे. सं. १।५) इत्यादि।

'परेण नित्यसंबन्धाः प्रादयश्च परादिवत्'। तेभ्यः परा यतिर्न भवतीत्यर्थः। तत्रोदाहरणम्—

'दुःखं मे प्र—क्षिपति हृदये दुःसहस्त्वद्वियोगः' इत्यादि।

परेण नित्यसंबन्धा इति किम्?। कर्मप्रवचनीयेभ्यः परापि यतिर्यथा स्यात् इति, तत्रोदाहरणम्—

'प्रियं प्रतिस्फुरत्पादे मन्दायन्ते नखत्विषः।'
'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इत्यादि।

अयं तु चादीनां प्रादीनां चैकाक्षरत्वेनैकाक्षराणामेव पादान्ते यतावन्तादिवद्भाव इष्यते, न त्वनेकाक्षराणां पदमध्ये यतौ। तत्र हि पदमध्येऽपि चामीकरादिष्विव यतेरभ्यनुज्ञातत्वात्। तत्र चादीनामुदाहरणम्—

'प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्' (मे. सं. २।२८) इति।

प्रादीनामुदाहरणम्—

'द्वारारूढप्रमोदं हसितमिव परिस्पष्टमासा सखीभिः' इत्यादि ।

न पर्यन्तोऽस्ति वृत्तानां प्रस्तारगणनाविधौ ।
पूर्वाचार्यकृतैर्भिख्याचिह्नं किंचिदिहोच्यते ।

(उक्थायाम्) एकाक्षरायाम्—

श्रीच्छन्दः (१।१)—श्री सा ।
जं गो ॥ प्रा० पिं० सू० २।१ ॥

(अत्युक्थायाम्) द्व्यक्षरायाम्—

कामच्छन्दः (२।१)—दीहा वीहा ।
कामो रामो ॥ प्रा० पिं० सू० २।४ ॥

(**'स्त्री'** इति नामान्तरं **कामस्य** च्छन्दःकौस्तुभादौ ।)

महीच्छन्दः (२।२)—लगो जहीं ।
मही कही ॥ प्रा० पिं० सू० २।८ ॥

सारुच्छन्दः (२।३)—सारु एह ।
गो वि रेह ॥ प्रा० पिं० सू० २।१० ॥

(**चारु**—वृत्तचन्द्रिकायाम्)

मधुच्छन्दः (२।४)—लहु जुअ ।
महु धुअ ॥ प्रा० पिं० सू० २।६ ॥

(मध्यायाम्) त्र्यक्षरायाम्—

तालीच्छन्दः (३।१)—ताली ए जाणीए ।
गो कण्णो तिण्णो ॥ प्रा० पिं० सू० २।१२ ॥

('नारी'—वृ० र०)

शशीच्छन्दः (३।२)—ससी यो जणीयो ।
फणींदो भणीओ ॥ प्रा० पिं० सू० २।१६ ॥

('केसा'—वृ० र०)

---

१. 'परिस्पष्टमाशासखीभिः' इति क. मु. पुस्तके । २. प्रस्तारगणना त्वष्टमाध्याये प्रपञ्चयिष्यते । अत्र तु श्रीमता भगवता पिङ्गलाचार्येण गायत्र्याद्युत्कृतिपर्यन्तच्छन्दोऽनुसारीणि वृत्तानि, दण्डकजातयश्च प्रदर्शिताः, न तूक्थादिच्छन्दःपञ्चकानुसारीणि वृत्तानि । तानि च्छन्दांसि प्राकृतपिङ्गलच्छन्दःकौस्तुभप्रभृतिग्रन्थोपलब्धानि प्रदर्श्यन्ते । यथा— ३. 'पूर्वाचार्यकृतं वृत्तचिह्नं' इति क. मु. पुस्तके । ४. 'प्राकृतेष्वष्टभिर्मार्यैर्गोकर्णा' च **'शशिप्रभा'** । **'रमणं'** चैव **'पाञ्चालं'** **'मृगेन्द्र'**श्चैव **'मन्दरः'** ॥ **'कमलं'** चैव **'संज्ञाश्वं'** वृत्ताष्टकमुदीरितम् ॥

प्रियाच्छन्दः (३।३)—हे **पिए** लेक्खिए ।
अक्खरे तिण्णि रे ॥ प्रा० पिं० सू० २।१४ ॥
(**'मृगी'** इति छन्दःकौस्तुभादौ ।)

रमणच्छन्दः (३।४)—सगणो **रमणो ।**
सहिओ कहिओ ॥ प्रा० पिं० सू० २।१८ ॥

पञ्चालच्छन्दः (३।५)—तक्कार जं दिट्ठ ।
पंचाल उक्किट्ठ ॥ प्रा० पिं० सू० २।२० ॥

मृगेन्द्रच्छन्दः (३।६)—णरेंद ठवेहु ।
मिएंद करेहु ॥ प्रा० पिं० सू० २।२२ ॥

मन्दरच्छन्दः (३।७)—भो जहि सो सहि ।
मंदर सुंदर ॥ प्रा० पिं० सू० २।२४ ॥

कमलच्छन्दः (३।८)—**कमल** पभण ।
सुमुहि णगण ॥ प्रा० पिं० सू० २।२६ ॥
(प्रतिष्ठायाम्) चतुरक्षरायाम्—

तीर्णाच्छन्दः (४।१)—चारी हारा इट्ठा कारा ।
वीए कण्णा जाणे **तिण्णा** ॥ प्रा० पिं० सू० २।२८ ॥

व्रीडाच्छन्दः (४।२)—यगौ **व्रीडा** । वृ० र० ३।७

समृद्धिच्छन्दः (४।३)—गौ **समृद्धिः** । वृ० र० ३।११

सुमतिच्छन्दः (४।४)—**सुमतिः** स्गौ । वृ० र० ३।१०

लासिनीच्छन्दः (४।६)—जग **लासिनी** । वृ० र० ३।८
('नगाणिका'–प्रा० पिं० सू० २।३२)

सुमुखीच्छन्दः (४।७)—भ्गौ **सुमुखी** । वृ० र० ३।९

धारीच्छन्दः (४।११)—वण्ण चारि मुद्धि **धारि ।**
विण्णि हार दो स सार ॥ प्रा० पिं० सू० २।३० ॥
('धारि'–वा० भू०)
(सुप्रतिष्ठायाम्) पञ्चाक्षरायाम्—

संमोहाच्छन्दः (५।१)—**संमोहा**रूअं दिट्ठो सो भूअं ।
बे कण्णा हारा भूअत्तासारा ॥ प्रा० पिं० सू० २।३४ ॥
(**'पङ्क्तिः'** इति नामान्तरं **संमोहा**ख्यच्छन्दसः)
('कन्या'–ग० पु०, वृ० र० । 'कीर्णा'–वृ० चं०)

तत्र गायत्रे छन्दसि वृत्तम्—

तनुमध्या त्यौ ॥ ६ । २ ॥

यस्य पादे तकार (ऽऽ।) यकारौ (।ऽऽ), तत् 'तनुमध्या' नाम वृत्तम् । तत्रोदाहरणम्—

तगणः	यगणः	तगणः	यगणः
ऽ · ऽ · ।	। · ऽ · ऽ	ऽ · ऽ · ।	। · ऽ · ऽ

ध–न्या त्रि–षु नी–चा; क–न्या त–नु–म–ध्या ।

हारीच्छन्दः (५।५)—आईहि अंते **हारे** सुजुत्ते ।
मज्झेक्कगंधो हारी अछंदो ॥ प्रा० पिं० सू० २।३६॥

(**'हारीतबन्ध'** इति नामान्तरं **हारी**च्छन्दसः)

हंसच्छन्दः (५।७)—पिंगलदिट्ठो भ इइ सिट्ठो ।
कण्णइ दिज्जो **हंस** मुणिज्जो ॥ प्रा० पिं० सू० २।३८ ॥

(**'पङ्क्तिः'** इति नामान्तरं **हंसस्य** छन्दःकौस्तुभादौ, छन्दोमञ्जर्यां न.)

विदग्धकच्छन्दः (५।११)—'रो लगौ यदा स्याद्विदग्धकः' ।

प्रियाच्छन्दः (५।१२)—'सलगैः **प्रिया**' इत्यधिकं छन्दःकौस्तुभवृत्तरत्नाकरादावुपलभ्यते, न प्राकृतपिङ्गले ॥

यमकच्छन्दः (५।३२)—सुपिअगण सरसुगुण ।
सरह गण जमअ भण ॥ प्रा० पिं० सू० २।४० ॥

१. षडक्षरचतुष्पादार्षगायत्रीच्छन्दसः प्रस्तारे क्रियमाणे चतुःषष्टिभेदा जायन्ते तत्र त्रयोदशोऽयं भेदः, प्राकृतपिङ्गले नायं वर्णितः.

अत्र त्वेकमेव वृत्तं दर्शितम्, प्राकृतपिङ्गलच्छन्दःकौस्तुभादावु[illegible]यानि वृत्तानि प्रदर्श्यन्ते । यथा—

शेषाच्छन्दः (६।१)—'बाराहा मत्ता जं कण्णा तीआ होतं ।
हारा छक्का बंधो **सेसा** राआ छंदो' ॥
प्रा० पिं० सू० २।४२ ॥

(**'शेषराज'** इत्यपि नामान्तरं रविदासमते, **'विद्युल्लेखा'** इति च नामान्तरं वृत्तरत्नाकरादौ **शेषाख्य**च्छन्दसः) ।

शङ्खनारीच्छन्दः (६।१०)—'खडावण्णबद्धो भुअंगापअद्धो ।
पआ पाअ चारी कही **संखणारी** ॥'
प्रा० पिं० सू० २।५३ ॥

(**'सोमराजी, शङ्खधारी'** इति नामान्तरे छन्दःकौस्तुभादौ **शङ्खनार्याख्य**च्छन्दसः) ।

तगणः — भगणः तगणः यगणः

ऽ · ऽ · । —। · ऽ · ऽ ऽ · ऽ · ।—। · ऽ · ऽ

श्रो-णी-स्त—न-गु-र्वी[1]; उ-र्वी-प-ति-भो-ग्या ॥

अत्र तु पादान्ते विशेषेण विश्रामः कर्तव्य इत्याम्नायः ॥

(उष्णिहि)

चतुरंसाच्छन्दः (६।१६)—'ठउ चउरंसा फणिवइभासा ।
दिअवरकण्णो फुल रसवण्णो ॥'
प्रा० पिं० सू० २।४८ ॥

('शशिवदना, चण्डरसा, चतुर्वर्णा' इति नामान्तराणि छन्दःकौस्तुभादौ चतुरंसाख्यच्छन्दसः । गारुडे (पू० खं० २०९।२) तु 'बालललिता' इति ।

विज्जोहाच्छन्दः (६।१९)—'अक्खरा जे छआ पाअ पाअ ट्ठिआ ।
मत्त पंच हुणा विण्णि जोहागणा' ॥
प्रा० पिं० सू० २।४६ ॥

('विमोहा' इति नामान्तरं वाणीभूषणे, 'वल्लरी' इति छन्दःकौस्तुभादौ विज्जोहाख्यच्छन्दसः) ।

अनघच्छन्दः (६।२५)—'मो सश्चेदनघः ॥' अ० वृ० र०

तिलकाच्छन्दः (६।२८)—'पिअ तिल्ल धुअं सगणेण जुअं ।
छअ वण्ण पओ कल अट्ठ धओ ॥'
प्रा० पिं० सू० २।४४ ॥

(रविदासमते 'डिल्ला, भद्र' इति नामान्तरे तिलकाच्छन्दसः) ।

वसुमतीच्छन्दः (६।२९)—'त्सौ चेद्वसुमती' इत्यधिकं छन्दःकौस्तुभादौ ।

मन्थानच्छन्दः (६।३७)—'कामावआरेण अद्धेण पाएण ।
मत्ता दहा सुद्ध मंथाण सो मुद्ध ॥'
प्रा० पिं० सू० २।५१ ॥

मालतीच्छन्दः (६।४६)—'धअं सरवीअ मणीगुण तीय ।
दई लहु अंत स मालइ कंत ॥'
प्रा० पिं० सू० २।५५ ॥

('सुमालतिका' इति नामान्तरं वाणीभूषणे मालत्याख्यच्छन्दसः) ।

दमनकच्छन्दः (६।६४)—'दिअवर किअ भणहि सुपिअ ।
दमणअ गुणि फणिवइ भणि ॥'
प्रा० पिं० सू० २।१७ ॥

१. 'इकोऽसवर्णे—' (पा० सू० ६।१।१२७) इति प्रकृतिभावः । 'भूयात् पतिभोग्या' इति पाठः. २. 'अत्र त्वेकमेव वृत्तं दर्शितम्, प्राकृतपिङ्गलच्छन्दःकौस्तुभप्रभृतिग्रन्थोपलब्धानि वृत्तानि प्रदर्श्यन्ते यथा—

कुमारललिता ज्सौ ग् ॥ ६ । ३ ॥

यस्य पादे जकार (।ऽ।) सकारौ (।।ऽ) गकार (ऽ) श्च तद्वृत्तं 'कुमारललिता' नाम । त्रिभिश्चतुर्भिश्च यत्युपदेशं वर्णयन्ति । तत्रोदाहरणम्--

जगणः सगणः गु० जगणः सगणः गु०
।·ऽ·।—।·।·ऽ—ऽ ।·ऽ·।—।·।·ऽ—ऽ
(३) (४) (३) (४)
य-दी-य,-र-त-भू-मौ वि-भा-ति,-ति-ल-का-ङ्कः ।

जगणः सगणः गु० जगणः सगणः गु०
।·ऽ·।—।·।·ऽ—ऽ ।·ऽ·।—।·।·ऽ—ऽ
(३) (४) (३) (४)
कु-मा-र,-ल-लि-ता-सौ कु-ला-न्य,-ट-ति ना-री ॥

अत्र केचिद् द्वाभ्यां(२) पञ्चभि(५) श्च यतिमिच्छन्ति । तत्रोदाहरणम्—

जगणः सगणः गु० जगणः सगणः गु०
।·ऽ · ।—।·।·ऽ—ऽ ।·ऽ · ।—।·।·ऽ ऽ
इ-दं(२),व-द-न-प-द्मं(५) प्रि-ये(२),त-व वि-भा-ति(५) ।

जगणः सगणः गु० जगणः सगणः गु०
।·ऽ · ।—।·।·ऽ—ऽ ।·ऽ · ।—।·।·ऽ ऽ
इ-ह(२),व्र-ज-ति मु-ग्धे(५) म-नो(२),भ्र-म-र-तां मे(५) ॥

---

१. उक्त सप्ताक्षरप्रस्तारस्य त्रिंशत्तमो (३०) भेदः **'कुमारललिता'** इति प्रसिद्धः ।

शीर्षाच्छन्दः (७।१)—'सत्ता दीहा जाणेही कण्णा ती गो माणेही ।
चाउद्दाहा मत्ताणा **सीसारूअं** छंदाणा ॥'
प्रा० पिं० सू० २।६५ ॥

हंसमालाच्छन्दः (७।२०)—'सरगा **हंसमाला** ॥'

मदलेखाच्छन्दः (७।२५)—'म्सौ गः स्यात् **मदलेखा** ॥'

समानिकाच्छन्दः (७।४३)—'चारि हार किज्जही तिण्णि गंध दिज्जही ।
सत्त अक्खरा ठिआ सा **समाणिआ** पिआ' ॥
प्रा० पिं० सू० २।५९ ॥

चूडामणिच्छन्दः (७।५३)—'**चूडामणि**स्तभगाः ॥'

मधुमतीच्छन्दः (७।६०)—'नन्गा **मधुमती** ॥'

करहञ्चीच्छन्दः (७।९६)—'चरण गण विप्प पढम लइ थप्प ।
जगण तसु अंत मुणइ **करहंच** ॥
प्रा० पिं० सू० २।६३ ॥

(अनुष्टुभि)

माणवकाक्रीडितकं भ्तौ ल्गौ ॥ ६ । ४ ॥

यस्य पादे भकार(ऽ।।)तकारौ (ऽऽ।) लकार(।)गकारौ (ऽ) च, तत् 'माणवकाक्रीडितकं' नाम वृत्तम् ॥ तत्रोदाहरणम्—

भगणः तगणः ल० गु० भगणः तगणः ल० गु०

ऽ·।·।—ऽ · ऽ·।—।—ऽ ऽ· ।·।—ऽ — ऽ·।—।—ऽ

माणव–का(४),क्रीडि–त–कं(४) यः कुरु–ते(४),वृद्ध–व–याः ।

भगणः तगणः ल० गु० भगणः तगणः ल० गु०

ऽ·।·।—ऽ · ऽ·।—।·ऽ ऽ·।·।—ऽ · ऽ·।—।—ऽ

हास्यम–सौ(४),याति ज–ने(४) भिक्षुरि–व(४),क्षीच–प–लः ॥

अत्र चतुर्भि(४)श्चतुर्भिश्च यतिरित्याम्नायः ॥

सुवासच्छन्दः (७।११२)—'भणउ **सुवासउ** लहु सुविसेसउ ।
रचि चतुमत्तह भगणइ अंतह ॥'
प्रा० पिं० सू० २।६१ ॥

१. 'अत्र तु चत्वार्येव वृत्तानि दर्शितानि, परंतु प्राकृतपिङ्गलच्छन्दःकौस्तुभप्रभृतिच्छन्दोग्रन्थेष्वन्यान्यपि छन्दांस्युपलभ्यन्ते ।' यथा—

पद्ममालाच्छन्दः (८।१९)—'**पद्ममाला** च रौ गौ' (छन्दःकौस्तुभादौ ॥)

मोदच्छन्दः (८।५२)—'स भगा गो यदि **मोदः** ।' अ० वृ० र०

तुङ्गाच्छन्दः (८।६४)—'तरलणअणि **तुंगो** पढमगणसुरंगो ।
णगणजुअलबद्धो गुरुजुअलपसिद्धो ॥'
प्रा० पिं० सू० २।७३ ॥

मृत्युञ्जयच्छन्दः (८।६९)—'तो मोगला **मृत्युञ्जयः** ।' अ० वृ० र०

लताच्छन्दः (८।७५)—'रौ यलौ गुरुः स्या**ल्लता**' (क्वचित्)

कमलच्छन्दः (८।९६)—'पढम गण विप्पओ विहु तह णरेंदओ ।
गुरुसहित अंतिणा **कमल** एम भत्तिणा ॥'
प्रा० पिं० सू० २।७५ ॥

गजगतिच्छन्दः (८।१२०)—'नभलगा **गजगतिः**' (छन्दोमञ्जर्याम् ॥)

सुविलासाच्छन्दः (८।१३२)—'**सुविलासा** सरौ ग्लौ हि(छन्दःकौस्तुभादौ ॥)

सुचन्द्राभाच्छन्दः (८।१४६)—'**सुचन्द्राभा** य्रौ ग्लौ' (छन्दःकौस्तुभादौ ॥)

अचलच्छन्दः (८।२५६)—'वसुल**मचल**मिति' (क्वचित्)

२. उक्ताष्टाक्षरप्रस्तारस्य त्र्यधिकशततमोऽयं (१०३) भेदो **'माणवकाक्रीडितकं'** इति प्रसिद्धः । ३. **'माणवकम्'** इति नामान्तरं छन्दःकौस्तुभवृत्तरत्नाकरादौ ॥

चित्रपदा भौ गौ ॥ ६ । ५ ॥

यस्य पादे भकारौ (ऽ॥.ऽ॥) गकारौ (ऽ.ऽ) च भवतस्तत् 'चित्रपदा' नाम वृत्तम् ।

तत्रोदाहरणम्—

भगणः भगणः गु० गु० भगणः भगणः गु० गु०

ऽ·।·।—ऽ· ।·।—ऽ· ऽ ऽ·।·।—ऽ·।·।—ऽ—ऽ

यस्य मु–खे प्रिय–वा–णी चेतसि सज्जन–ता च ।

भगणः भगणः गु० गु० भगणः भगणः गु० गु०

ऽ·।·।—ऽ·।·।—ऽ—ऽ ऽ·।·।—ऽ·।·।—ऽ—ऽ

चित्रप–दापि च लक्ष्मी—स्तं पुरु–षं न ज–हा–ति ॥

अत्र पादान्ते यतिः ॥

विद्युन्माला मौ गौ ॥ ६ । ६ ॥

यस्य पादे मकारौ (ऽऽऽ.ऽऽऽ) गकारौ (ऽ.ऽ) च तद् 'विद्युन्माला' नाम वृत्तम् ॥

तत्रोदाहरणम्—

मगणः मगणः गु० गु०

ऽ·ऽ·ऽ—ऽ · ऽ·ऽ ऽ—ऽ

विद्युन्मा–ला(४),लोलान् भो–गान्

मगणः मगणः गु० गु०

ऽ· ऽ·ऽ—ऽ · ऽ·ऽ—ऽ—ऽ

मुक्त्वा मु–क्तौ(४), यत्नं कु–र्यात् ।

मगणः मगणः गु० गु०

ऽ· ऽ·ऽ—ऽ · ऽ· ऽ—ऽ—ऽ

ध्यानोत्प–न्नं(४), निःसा–मा–न्यं

---

१. उक्ताष्टाक्षरप्रस्तारभेदानां मध्ये पञ्चपञ्चाशत्तमो (५५) भेदश्चित्रपदेति नाम्ना प्रसिद्धः । **'वितानम्'** इति नामान्तरं **चित्रपदायाः** 'वितानमन्यत्' पिं० सू० ५।८ इति रीत्या । २. उक्ताष्टाक्षरप्रस्तारे सर्वगुर्वात्मक आद्यो भेदो **'विद्युन्माला'** इति नाम्ना प्रसिद्धः । **'विज्जूमाला** मत्ता सोला पाए कण्णा चारी लोला । एअंरुअं चारी पाआ मत्ती वृत्ती विज्जू राआ ॥' (प्रा० पिं० सू० २।६७) **विद्युल्लेखा** इति नामान्तरम् । एतदतिरिक्तानि **'समानिका–प्रमाणिका–वितान–नाराचक'**–प्रभृतीनि च्छन्दांसि पञ्चमाध्याये समालोच्यानि ।

मगणः मगणः गु० गु०

ऽ·ऽ·ऽ ऽ·ऽ·ऽ—ऽ—ऽ

सौख्यं भो-(४), कुं यद्या-का-ङ्क्षेत् ॥

अत्र चतुर्भि-(४) श्चतुर्भिश्च यतिरित्याम्नायः ॥

[हंसरुतं[1] म्नौ गौ ॥ ६ । ७ ॥]

यस्य पादे मगण (ऽऽऽ) नगणौ (।।।) गकारौ (ऽ.ऽ) च भवतस्तद् 'हंसरुतं' नाम ॥ तत्रोदाहरणम्—

मगणः नगणः गु० गु० मगणः नगणः गु० गु०

ऽ·ऽ·ऽ—।·।·।—ऽ—ऽ ऽ·ऽ·ऽ—।·।·।—ऽ—ऽ

लावण्यं वपुषि का-न्ते लोकाती-तमति-सौ-म्यम् ।

मगणः नगणः गु० गु० मगणः नगणः गु० गु०

ऽ·ऽ·ऽ—।·।·।—ऽ—ऽ ऽ·ऽ·ऽ—।·।·।—ऽ—ऽ

नैष्टुर्यं मनसि य-त्ते द्वैविध्यं किमिति ध-त्से ? ॥

(बृहत्याम्[2])

---

१. उक्ताष्टाक्षरप्रस्तारभेदेषु सप्तपञ्चाशत्तमो भेदो (५७) **'हंसरुतं'** इति नाम्ना प्रसिद्धः- लिखितपुस्तकेऽस्य सूत्रस्य नवमत्वेन, भुजगशिशुसृतालक्षणात्मकस्याग्रिमसूत्रस्य चाष्टम- त्वेन निर्देशः । २. अत्र तु द्वावेव भेदौ संदर्शितौ, परन्तु **प्राकृतपिङ्गलच्छन्दःकौ- स्तुभ**प्रभृतिग्रन्थेषूपलब्धा भेदाः प्रकाश्यन्ते यथा—

रूपामालीच्छन्दः (९।१)—'णाआराआ जप्पे सारा ए चारी कण्णा हंते हारा ए ।
अट्ठादाहा मत्ता पाआए **रूआमाली** छंदा जंपीए ॥
प्रा० २।८९ ॥

'रूपामाला' 'कर्पूरम्' इति नामान्तरे **रूपामाल्याः** क्वचित् ॥

स्निग्धाच्छन्दः (९।७)—'**स्निग्धा** स्याद्भममा यत्र हराननयुगैर्यतिः ।' (श्रीकृष्णः)

बिम्बच्छन्दः (९।९६)—'रइअ फणि **बिंब** एसो गुरुजुअल सव्वसेसो ।
सिरहि दिअ मज्झ राओ गुणह गुणि गसहाओ ॥'
प्रा० २।८५ ॥

'बिम्बा' इति नामान्तरं क्वचित् । **वाणीभूषणे** तु गणभेदेन **बिम्बलक्षणमुक्तम्** ।

महालक्ष्मीच्छन्दः (९।१४७)—
'दिट्ठ जोहा गणा तिण्णिआ णाअराएण जा विण्णिआ ।
मासअद्धेण पाअ ट्ठिअं जाण सुद्धे **महालच्छिअं** ॥'
प्रा० २।७७ ॥ **'वीरलक्ष्मी'** नामान्तरमस्य ।

भुजगशिशुसृता नौ म् ॥ ६ । ७ ॥

यस्य पादे नकारौ (।।।.।।।) मकार (ऽऽऽ) श्च भवति, तत् 'भुजगशिशुसृता' नाम वृत्तम् ॥ तत्रोदाहरणम्—

नगणः नगणः मगणः　नगणः नगणः मगणः

।·।·।—।·।·।—ऽ · ऽ · ऽ　।·।·।—।·।·।—ऽ　ऽ · ऽ

इयम-धिकत-रं(७),रम्या　विकच—कुवल—य(७),-श्यामा ।

कुसुमिताच्छन्दः (९।१५२)—'कुसुमिता नरौ रो यदा ।' क्वचित् ।

भुजङ्गसंगताच्छन्दः (९।१७२)—'सजरैर्**भुजङ्गसंगता** ।' छन्दःकौस्तुभे ।

भद्रिकाच्छन्दः (९।१८७)—'भद्रिका भवति रो नरौ' वृत्तरत्नाकरे.

मणिमध्यच्छन्दः (९।१९९)—'स्यान्**मणिमध्यं** चेद्भमसाः ।' छन्दःकौस्तुभे ।

'मणिबन्ध' इति श्रुतबोधे ।

सारङ्गिकाच्छन्दः (९।२०८)—

'दिअवर कण्णो सअणं पअ पअ मत्तागणणं ।
सुरमुणिमत्ता लहिअं सहि **सरंगिक्का** कहिअं ॥'
प्रा० २७९ ॥

'सारसा, शार्ङ्गिका' इत्यपि नामान्तरे **सारङ्गिकायाः** क्वचित् ।

पाइत्ताच्छन्दः (९।२४१)—'कुंतीपुत्ताजुअ लहिअं तीए विप्पो धुअ कहिअं ।
अंते हारो जह जणिअं **पाइत्ता**रू फणिभणिअं ॥
प्रा० २।८१ ॥

'कुसुमवती, 'पवित्रा,' 'पारन्तीयम्' इति नामान्तराणि **पाइत्ता**ख्यस्य ।

तोमरच्छन्दः (९।३४४)—'जसु आइ हत्थ विआण तह ब पओहर जाण ।
पभणेइ णाअणरिंद इम माणु **तोमर**छंद ॥'
प्रा० २।८७ ॥

कमलच्छन्दः (९।५१२)—'सरसगणरमणिआ दिअगणजुअ पलिआ ।
गुरु धरिअ पइपउ दहकलअ कमलउ ॥'
प्रा० २।८३ ॥

'कमला' इत्यपि नामान्तरं **कमलस्य** क्वचित् ।

१. चतुष्पादार्षबृहतीपादघटकीभूतानां नवाक्षराणां प्रस्तारे क्रियमाणे द्वादशाधिक-पञ्चशतभेदा (५१२) भवन्ति । तत्र (६४) चतुःषष्ठितमोऽयं भेदो **'भुजगशिशुसृता'** इति नाम्ना प्रसिद्धः, अस्या एव **'भुजगशिशुभृता'**, **'भुजगशिशुयुता'**, **'भुजग-शिशुवृता'**, **'भुजगशिशुसुता'** इति नामान्तराणि छन्दःकौस्तुभादौ लभ्यन्ते । गारुडे तु **'शिशुभृता'** इत्येव, 'नौ मः **शिशुभृता** भवेत् ।' (१।२०९।५) इति ।

नगणः नगणः मगणः नगणः नगणः मगणः

।·।·।—।·।·।—ऽ · ऽ·ऽ ।·।·।—।·।·।—ऽ · ऽ·ऽ

रमय—ति हृद-यं(७),यूनां भुजग-शिशुसृ-ता(७),नारी ॥

वक्रगतिरित्यर्थः ॥ शिशुशब्दस्य सार्थकत्वात्। अन्यैरप्युक्तम्—

'अभ्यस्यता नु तरणीगतिवक्रभावा-

नुन्मूलिताः फणिशिशोर्भवतापराधाः।' इति

सप्तभिर्द्वाभ्यां च यतिरित्याम्नायः ॥

हलमुखीर्नौ स् ॥ ६ । ८ ॥

यस्य पादे रेफ (ऽ।ऽ) नकार (।।।) सकारा (।।ऽ) भवन्ति तद्वृत्तं 'हलमुखी'। तत्रोदाहरणम्—

रगणः नगणः सगणः रगणः नगणः सगणः

ऽ·।·ऽ — ।·।·।—।·।·ऽ ऽ·।·ऽ ।·।·। ।·।·ऽ

गण्डयो(३),-रतिश-यकृशं(६) यन्मुखं(३), प्रकट-दशनम् (६) ॥

रगणः नगणः सगणः रगणः नगणः सगणः

ऽ·।·ऽ — ।·।·।—।·।·ऽ ऽ · ।·ऽ — ।·।·।—।·।·ऽ

आयतं(३), कलह-निरतं(६) तां स्त्रियं(३), त्यज ह-लमुखीम् (६) ॥

त्रिभिः षड्भिश्च यतिरित्याम्नायः।

(पङ्क्तिः)

---

१. उक्तनवाक्षरप्रस्तारस्यैकपञ्चाशदधिकद्विशततमोऽयं भेदो (२५१) **'हलमुखी'**ति नाम्ना ख्यातः। कलिकातामुद्रिते प्राचीनपुस्तके हंसरुतलक्षणसूत्रस्यास्मात् सूत्रात् प्रथमं निर्देशः। ''हलमुखीति संज्ञात्वेऽपि पिप्पल्यादेराकृतिगणत्वात् ङीप् भवतीति 'नखमुखात् संज्ञायाम्-' (पा० सू० ४।१।५८) इत्यस्य न प्रवृत्तिः।''-इति वेङ्कटाचलसूरिः। २.—**पङ्क्तिच्छन्दः**पादघटकीभूतानां दशाक्षराणां प्रस्तारे क्रियमाणे चतुर्विंशत्यधिकसहस्रभेदा (१०२४) जायन्ते। तेष्वत्र षडेव भेदाः प्रदर्शिताः सन्ति, परंतु प्राकृतपिङ्गलच्छन्दःकौस्तुभादिग्रन्थेषूपलभ्यमाना भेदा अपि प्रदर्श्यन्ते। यथा—

कलगीतच्छन्दः (१०।१००)—'कलगीतं सतयगाः शरैर्वाणैर्यतिर्भवेत्।' मं० म०।

आन्दोलिकाच्छन्दः (१०।१२९)—'आन्दोलिका ततरगाः सायकैः सायकैर्यतिः।' मं० म० ॥

त्रयीच्छन्दः (१०।१८७)—'रत्रयश्चे**त्त्रयी**नामकं गः।' अ० वृ० र० ॥

दीपकमालाच्छन्दः (१०।३२७)—'दीपकमाला भो मजौ गुरुः।' क्वचित्।

शुद्धविराड् म्सौ ज्गौ ॥ ६ । ९ ॥

यस्य पादे मकार (ऽऽऽ) सकार (ॖॖऽ) जकार (।ऽ।) गकारा (ऽ) भवन्ति तद्वृत्तं 'शुद्धविराड्' नाम ॥ तत्रोदाहरणम्—

पथ्याच्छन्दः (१०।३३१)—'रो यजौ च **पथ्या** गुरूत्तरा ।' **'लोचनं'** इति क्वचित् । **'मरालिका'** इति नामान्तरं 'शिवाननशरैर्यतिः' इति विशेषश्च कृष्णीये ।

मनोरमाच्छन्दः (१०।३४४)—'नरजगैर्भवेन्मनोरमा ।' छन्दःकौस्तुभे । 'शास्त्रसागरैः ।' इति यतिरप्युक्तः कृष्णीये ।

कमलाच्छन्दः (१०।३६४)—'**कमला** स्यात्सज्ञगगा विच्छिन्ना सायकैः शरैः ।' मं० म० ॥

कमलाया एव **'संयुता'** इति नाम प्राकृतपिङ्गले ।

सुषमाच्छन्दः (१०।३९७)—

'कण्णो पढमो हत्थो जुअलो कण्णो तिअलो हत्थो पअलो ।
सोला कलआ छक्का वलआ एसा **सुसमा** दिट्ठासुसमा ॥'
प्रा० २।९७ ॥

माणिक्यमालाच्छन्दः (१०।४००)—'न्यभा **माणिक्यमाला** गाऋतुभिः ... यकैर्यतिः ।' मं० म० ॥

सारवतीच्छन्दः (१०।४३९)—

'दीह लहूजुअ दीहलहू **सारवई** धुअ छंद कहू ।
अंत पओहर ठानु धआ चोदहमत्तविरामकआ ॥'
प्रा० २।९५ ॥

'हारवती' इत्यपि नामान्तरं **सारवत्याः** ।

अमृतगतिच्छन्दः (१०।४९६)—

'दिअवर हार पअलिआ पुण वि तह ट्ठिअ करिआ ।
वसुलहु वे गुरुसहिआ **अमिअगइ**, धुअ कहिअ ।'
प्रा० २।९९ ॥

'त्वरितगतिः, अमृततिलका, अमृतगतिका' इति नामान्तराणि अमृतगतेः । **'कुलटा'** इति कृष्णीये । 'कलटा स्यान्नजनगाः पञ्चभिः पञ्चभिर्यतिः ।' इति विशेषश्च तत्र ।

हंसीच्छन्दः (१०।४९७)—'**हंसी** मभनगैः प्रोक्ता यतिर्वेदैर्गुहाननैः ।' कृष्णीये ।

रञ्जिताच्छन्दः (१०।७४७)—'**रञ्जिता** रजसा लो गो विरामः सायकर्तुभिः ।' मं० म० ॥

१. उक्तदशाक्षरप्रस्तारस्य पञ्चचत्वारिंशदुत्तरत्रिशततमोऽयं भेदः (३४५) **'शुद्धविराट्'** नाम्ना प्रसिद्धः । **'विराट्'** इत्यपि नामान्तरं क्वचित् ।

मगणः सगणः जगणः गु० मगणः सगणः जगणः गु०

S·S·S—I·I·S—I·S·I—S S·S·S—I·I·S—I·S·I—S

विश्वं ति–ष्ठति कु–क्षिकोट–रे वक्त्रे य–स्य सर—स्वती स–दा।

मगणः सगणः जगणः गु० मगणः सगणः जगणः गु०

S·S·S—I·I·S—I·S·I—S S·S·S—I·I·S—I·S·I—S

अस्मद्वं–शपिता–महो गु–रुर् ब्रह्मा शु–द्धविराद् पुनातु नः।

अत्र पादान्ते यतिः॥

पणवो म्नौ य्गौ॥ ६। १०॥

यस्य पादे मकार(SSS)नकार(III)यकार(ISS)गकारा (S) भवन्ति तद्वृत्तं 'पणवो' नाम॥ तत्रोदाहरणम्—

मगणः नगणः यगणः गु० मगणः नगणः यगणः गु०

S·S·S—I·I·I—I·S·S—S S·S·S—I·I·I—I·S·S—S

मीमांसा–रस(५),–म–मृतं पी–त्वा शास्त्रोक्तिः कटु(५),–रि–तरा भा–ति।

मगणः नगणः यगणः गु० मगणः नगणः यगणः गु०

S·S·S—I·I·I—I·S·S—S S·S·S—I·I·I—I·S·S—S

एवं सं–सदि(५),–वि–दुषां म–ध्ये जा–गमो जय(५),–प–णबन्ध–त्वात्॥

अत्र पञ्चभिः पञ्चभिर्यतिरित्याम्नायः॥

रुक्मवती भ्मौ स्गौ॥ ६। ११॥

यस्य पादे भकार(SII)मकार(SSS)सकार (IIS)गकारा (S) भवन्ति तद्वृत्तं 'रुक्मवती' नाम॥ तत्रोदाहरणम्—

भगणः मगणः सगणः गु० भगणः मगणः सगणः गु०

S·I·I—S·S·S—I·I·S—S S·I·I—S·S·S—I·I·S—S

पादत–ले पद्मो–दरगौ–रे राजति यस्या ऊ–र्ध्वगरे–खा।

---

१. उक्तदशाक्षरप्रस्तारस्यैकविंशत्यधिकशततमोऽयं भेदः (१२१) **'पणव'** नाम्ना ख्यातः। **'प्रणव'** इत्यपि नामान्तरम्। २. उक्तदशाक्षरप्रस्तारस्य नवनवत्यधिकशततमोऽयं भेदो (१९९) **'रुक्मवती'** नाम्ना प्रसिद्धः। अस्या नामान्तराणि यथा—**'रूपवती'** इति छन्दोमञ्जरी, **'विलास'** क्वचित्, **'चम्पकमाला'** प्राकृतपिङ्गले। तल्लक्षणं यथा—

'हार ठवीजे काहलदुज्जे कुंतिअपुत्ता एगुरुजुत्ता।
हत्थ करीजे हार ठवीजे **चंपकमाला** छंद कहीजे॥' प्रा० २।९३॥

पादान्ते यतिः। 'शरैर्बाणैर्यतिर्भवेत्' इति मन्दारमरन्दे।

भगणः मगणः सगणः गु० भगणः मगणः सगणः गु०

S·I·I—S·S·S—I·I·S—S　S·I·I—S·S·S—I·I·S—S

सा भव-ति स्त्री ल-क्षणयु—क्ता रुक्मव-ती सौभा-ग्यवती च ॥

मयूरसारिणी जौं गौं ॥ ६ । १२ ॥ [1]

यस्य पादे रेफ (SIS) जकारौ (ISI) रेफ (SIS) गकारौ (S) च, तद्वृत्तं 'मयूरसारिणी' नाम ॥ तत्रोदाहरणम्—

रगणः जगणः रगणः गु० रगणः जगणः रगणः गु०

S·I·S—I·S·I—S·I·S—S　S·I·S—I·S·I—S·I·S—S

या वना-न्तराण्यु-पै-ति र-न्तुं या भुज-ङ्गभोग-सक्तचि-त्ता ।

रगणः जगणः रगणः गु० रगणः जगणः रगणः गु०

S·I·S—I·S·I—S·I·S—S　S·I·S—I·S·I—S·I·S—S

या द्रुतं प्रयाति सन्नतां-सा तां मयू-रसारि-णीं विज-ह्यात् ॥

अत्र पादान्ते यतिः ॥

मत्ता म्भौ सगौ ॥ ६ । १३ ॥ [2]

यस्य पादे मकार (SSS) भकार (SII) सकार (IIS) गकाराः (S), तद्वृत्तं 'मत्ता' नाम । तत्रोदाहरणम्—

भगणः मगणः सगणः गु० मगणः भगणः सगणः गु०

S S·S—S · I·I—I·I·S—S　S·S·S—S · I·I—I·I·S—S

स्वैरोल्ला-पैः(४),श्रुति-पटुपे-यैर्(६) गीतक्री-डा(४),सुर-तविशे-षैः(६) ।

मगणः भगणः सगणः गु० मगणः भगणः सगणः गु०

S·S·S—S · I·I—I·I·S—S　S·S·S—S · I·I—I·I·S—S

वासागा-रे(४),कृत-सुरता-नां(६) मत्ता ना-री(४),रम-यति चे-तः(६) ॥

चतुर्भिः षड्भिश्च यतिरित्याम्नायः ॥

उपस्थिता त्जौ ज्गौ ॥ ६ । १४ ॥ [3]

यस्य पादे तकार (SSI) जकारौ (ISI), जकार (ISI) गकारौ (S) च, तद्वृत्तं 'उपस्थिता' नाम । तत्रोदाहरणम्—

तगणः जगणः जगणः गु० तगणः जगणः जगणः गु०

S·S · I—I·S·I—I·S·I—S　S·S · I—I·S · I—I·S·I—S

एषा(२),ज-गदेक-मनोहृ-रा(८) कन्या(२),क-नकोज्ज्व-लदीधि-तिः(८) ।

---

१. उक्तदशाक्षरप्रस्तारस्यैकसप्तत्यधिकशततमोऽयं भेदो 'मयूरसारिणीनाम्ना' प्रसिद्धः ।
२. उक्तदशाक्षरप्रस्तारस्यैकचत्वारिंशाधिकद्विशततमोऽयं भेदो (२४१) 'मत्ता' नाम्ना प्रसिद्धः । ३. उक्तदशाक्षरप्रस्तारस्य पञ्चषष्ठ्यधिकत्रिशततमोऽयं भेदः (३६५) 'उपस्थिता' नाम्ना प्रसिद्धः ।

तगणः जगणः जगणः गु० तगणः जगणः जगणः गु०

ऽ ऽ । । ऽ । । ऽ । ऽ ऽ ऽ । । ऽ । । ऽ । ऽ

लक्ष्मी(२),-रि-व दान-वसूद-नं(८) पुण्यै(२),-र्न-रनाथ-मुपस्थि-ता(८) ॥

अत्र द्वाभ्यामष्टाभिश्च यतिरित्याम्नायः ॥

(त्रिष्टुभि)

ईन्द्रवज्रा तौ ज्गौ ग् ॥ ६ । १५ ॥

---

१. त्रिष्टुप्पादघटकीभूतानामेकादशाक्षराणां प्रस्तारे कृतेऽष्टचत्वारिंशाधिका द्विसहस्रभेदा (२०४८) जायन्ते। तेषु द्वादश भेदा एवात्र निर्दिष्टाः, परं प्राकृतपिङ्गलच्छन्दःकौस्तुभप्रभृतिग्रन्थेषूपलब्धा बहुशो भेदाः प्रकाश्यन्ते यथा— २. उक्तैकादशाक्षरप्रस्तारस्य सप्तपञ्चाशदधिकत्रिशततमोऽयं (३५७) भेदः **'इन्द्रवज्रा'** इति नाम्ना प्रसिद्धः । एतल्लक्षणं प्राकृतपिङ्गले यथा—

'दिज्जे तआराजुअला पएसु अंते णरेंदो गुरुजुग्ग सेसं ।

जंपें फणिंदा धुअ **'इंदवज्जा'** मत्ता दहा अट्ठ समा सुसज्जा ॥' (२।११५)

'हरास्यर्तुभिर्यतिः ।' इति विशेषः कृष्णीये ।

मालतीच्छन्दः (११।१)—'कुंतीपुत्ता पंचा दिण्णा जाणीआ

अंते कंता एक्का हारा माणीआ ।

पाआ पाआ मत्ता दिट्ठा बाईसा

मालत्तीछंदा जंपंता णाएसा ॥'

प्रा० २।११३ ॥

राजहंसीच्छन्दः (११।१५२)—**'राजहंसी** नरौ रो गौ यतिः स्यादृतुसायकैः ॥' कृष्णीये.

कुपुरुषजनिताच्छन्दः (११।१९२)—**'कुपुरुषजनिता** ननौगौं गः ॥' वृ० र० परि०.

उपस्थितच्छन्दः (११।२८६)—**'उपस्थित**मिदं जः सस्तगौ गः ॥' वृत्तसारप्रभृतिषु.

'शिखण्डितम्' इति नामान्तरम् **उपस्थित**च्छन्दसः छन्दःकौस्तुभादौ.

विध्वङ्कमालाच्छन्दः (११।२९३)—**'विध्वङ्कमाला** भवेत्तौ तगौ गः ॥' वृ० र० परि०.

चन्द्रिकाच्छन्दः (११।३२०)—'ननगगलगगैश्च**न्द्रिका** स्यात् ॥' वृत्तसारे.

मेरुरूपाच्छन्दः (११।३४५)—'मः सो जो गुरुयुग्म**मेरुरूपा** ।' वृत्तसारे.

गुणाङ्गीच्छन्दः (११।३५३)—'म्तौ ज्गौ गः स्यादब्धि· ·गुणाङ्गी ॥' अ०वृ०र०

वन्दिताच्छन्दः (११।३६३)—'नरगजा गुरु**र्वन्दिता** मता ॥' वृत्तसारे. **'कामिनी'**, **'भद्रिका'** इति नामान्तरे ।

यस्य पादे तकारौ (ऽऽ।.ऽऽ।) जकार (।ऽ।) गकारौ (ऽ) गकार (ऽ) श्च, तद्वृत्तं 'इन्द्रवज्रा' नाम । तत्रोदाहरणम्—

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

ऽ·ऽ· ।—ऽ·ऽ·।—।·ऽ·।—ऽ ऽ ऽ·ऽ· ।—ऽ·ऽ· ।—।·ऽ· ।—ऽ—ऽ

यस्यां त्रि–षट्सप्त–ममक्ष–रं स्याद् ह्रस्वं सु–जङ्घे! न–वमं च त–द्वत् ।

अनवसिताच्छन्दः (११।४००)—'अनवसिता न्यौ भ्गौ गुरुरन्ते ॥' वृत्तरत्नाकरे.

बन्धुच्छन्दः (११।४३९)—

'णीलसरूअह एक्क करीजे तिण्णि भआगण तत्थ भणीजे ।
सोलह मत्तह पाअ ठवीजे दुग्गुरु अंतहि **बंधु** कहीजे ॥'
प्रा० २।१०१ ॥

अनुकूलाच्छन्दः (११।४८७)—'स्यादनुकूला भतनगगाश्चेत् ।'

अस्या एवानुकूलायाः **'मौक्तिकमाला'** इति वृत्तरत्नाकरे, **'श्रीः'** इति वृत्तसारे गारुडे च नामान्तरे। 'पञ्चभिः षड्भिरेव च' इति यतिरप्युक्ता गारुडे पू० २०९।१० ॥

मन्दाकिनीच्छन्दः (११।५८६)—'त्रिभिर्यैर्लगाभ्यां च **मन्दाकिनी** ॥' अ० वृ० र० ॥

सुभद्रिकाच्छन्दः(११।७०४)—'ननरलगुरुभिः **सुभद्रिका** ॥' छन्दःकौस्तुभादौ.

उपचित्रच्छन्दः (११।७३२)—'उपचित्रमिदं ससमा लगौ ॥' वृत्तरत्नाकरे.

नन्दिनीच्छन्दः (११।७४८)—'नन्दिनी सजसैर्लगाभ्यां युक्ता बाणर्तुभेदिनी ॥' कृष्णीये.

धारावलिकाच्छन्दः (११।७८९)—'तोरस्तलौ गुरु**र्धारावलिका** ॥' वृत्तसारे

मोटनकच्छन्दः (११।८७७)—'स्यान्मोटनकं तजजाश्च लगौ ॥'

सुमुखीच्छन्दः (११।८८०)—

'दिअवर हार लहूजुअला वलअ परिट्ठिअ हत्थअला ।
पअ कल चोदह जंप अही कइवर जाणइ सो **सुमुही** ॥'
प्रा० २।१०३ ॥

अस्यां 'पृषत्कऋतुभिर्यतिः ।' इति कृष्णः ।

दमनकच्छन्दः (११।१०२४)—

'दिअवरजुअ लहुजुअलं पअ पअ पअलिअवलअं ।
चउपद चउवसुकलअं **दमणअ** फणि भण ललिअं ॥'
प्रा० २।१०५ ॥

सान्द्रपदच्छन्दः (११।१५११)—'सान्द्रपदं भ्तौ नगलघुभिश्च ॥' छन्दःकौस्तुभादौ.

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S S·S·I—S·S·I—I·S·I—S—S

गत्या वि-लक्षीकृ-तहंस—का-न्ते! तामिन्द्र-वज्रां ब्रु-वते क-वी—न्द्राः ॥

(श्रु० बो० २१)

अपि च—

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S S·S·I—S·S·I—I·S·I—S—S

ये दुष्ट-दैत्या इ-ह भूमि-लो-के द्वेषं व्य-धुर्गोद्वि—जदेव-स-ङ्घे।

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S S·S·I—S·S·I—I·S·I—S—S

तानिन्द्र-वज्राद-पि दारु-णा-ङ्गान् व्याजीव-[1]यद्यः स-ततं न-म-स्ते ॥

तथा—

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S S·S·I—S·S·I—I·S·I—S—S

[2]गोत्राह्म-णस्त्रीत्र-तिभिर्वि-रु-द्धं मोहात्क-रोत्यल्प-मतिर्नृ-पो यः।

तगणः तगणः जगणः गु० गु० तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S S·S·I—S·S·I—I·S·I—S—S

तस्येन्द्र-वज्राभि-हतस्य पा-तः क्षोणीध-रस्येव भवत्य-व-श्यम् ॥

पादान्ते यतिः ॥

उपे[3]न्द्रवज्रा ज्तौ ज्गौ ग् ॥ ६ । १६ ॥

यस्य पादे जकार (।ऽ।) तकार (ऽऽ।) जकारा (।ऽ।) गकारौ (ऽ.ऽ) च, तद्वृत्तम् 'उपेन्द्रवज्रा' नाम ॥ तत्रोदाहरणम्—

जगणः तगणः जगणः गु० गु० जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S I·S·I—S·S·I—I·S·I—S—S

भवन्न-खाः कुन्द-दलश्रि-यो ये नमन्ति लक्ष्मीस्त-नलेख-ने-ऽपि।

---

१. 'प्राजीजपत्' इति स्यात्। 'जि अभिभवे' (धा० पा० ११९४६) इत्यस्माण्णिजन्ताल्लुङ्। २. 'गोत्राह्मणस्त्री' इत्यादि पद्यमेकमेवोदाहृतं लि. पुस्तके. ३. उक्तैकादशाक्षरप्रस्तारस्याष्टपञ्चाशदधिकत्रिशततमोऽयं (३५८) भेदः **'उपेन्द्रवज्रा'** इति नाम्ना प्रसिद्धः। एतल्लक्षणं प्राकृतपिङ्गले यथा—

'णरेंद एक्का तअणा सुसज्जा पओहरा कण्णगणा मुणिज्जा।

उविंदवज्जा फणिराअदिट्ठा पढंति छेआ सुहवण्णसट्ठा ॥' (२।११७)

'बाणऋतुभिर्यतिः।' इति मन्दारमरन्दे। **'उपेन्द्रमाला'** इति नामान्तरमुपजातेः कृष्णीये ३।

जगणः तगणः जगणः गु० गु० जगणः तगणः जगणः गु० गु०

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ ।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ

उपेन्द्र!-वज्राधि-ककर्क-श-स्त्वं कथं ग—तास्ते रि-पुदार-णा-याम्? ॥

अत्र पादान्ते यतिः ॥

आद्यन्तावुपजातयः ॥ ६ । १७ ॥

'आद्यन्तौ'-इति अनन्तरोक्तौ इन्द्रवज्रोपेन्द्रवज्रयोः पादावाह । तौ यदा विकल्पेन यथेष्टं भवतस्तदा 'उपजातयः[1]' प्रस्तारवशाच्चतुर्दशप्रकारा जायन्ते ॥ तत्रोदाहरणम्—

इन्द्रवज्रा	इन्द्रवज्रा
तगणः तगणः जगणः गु० गु०	तगणः तगणः जगणः गु० गु०
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
अत्रोप-जातिर्वि-विधा वि-द-ग्धैः	संयोज्य[2]-ते तु व्य-वहार-का-ले ।
उपेन्द्रवज्रा	**उपेन्द्रवज्रा**
जगणः तगणः जगणः गु० गु०	जगणः तगणः जगणः गु० गु०
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
अतः प्र-यत्नः प्र-थमं वि-धे-यो	नृपेण पुंरत्न-परीक्ष-णा-द ॥

---

१. उपजायतश्च प्रस्तारगत्या चतुर्दश भवन्ति. तन्नामलक्षणोदाहरणादीनि प्रदर्श्यन्ते यथा— २. 'प्रयोज्यते तद्व्यवहारकाले' इति पाठः ।

'कीर्ति (१) वाणी (२) माला (३) शाला (४) हंसी (५) माया (६) जाया (७) बाला (८)। आर्द्रा (९) भद्रा (१०) प्रेमा (११) रामा (१२) ऋद्धि (१३) बुद्धि (१४) स्तासां नामानि (प्रा० पि० सू० २।१२२)

(१) कीर्तिः—

यथा—

'उपेन्द्रवज्रा'	'इन्द्रवज्रा'
जगणः तगणः जगणः गु० गु०	तगणः तगणः जगणः गु० गु०
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
स भानु-र्मी मेरु-सखः पि-तृ-णां	[illegible]आ कु-लस्य स्थि-तये स्थि-ति-ज्ञः ।

'इन्द्रवज्रा'					'इन्द्रवज्रा'				
तगणः	तगणः	जगणः	गु०	गु०	तगणः	तगणः	जगणः	गु०	गु०
ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ	ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ
मेनां मु–	नीनाम–	पि मान–	नी–	या–	मात्मानु–	रूपां वि–	धिनोप–	ये–	मे ॥

(कुमारसं० १।१८)

(२) वाणी—

यथा—

इन्द्रवज्रा					उपेन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	जगणः	तगणः	जगणः	गु०	गु०
ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ	।·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ
यः पूर–	यन्कीच–	करन्ध्र–	भा–	गान्	दरीमु–	खोत्थेन	समीर–	णे–	न ।

इन्द्रवज्रा					इन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	तगणः	तगणः	जगणः	गु०	गु०
ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ	ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ
उद्गास्य–	तामिच्छ–	ति किन्न–	रा–	णां	तानप्र–	दायित्व–	मिवोप–	ग–	न्तुम् ॥

(कुमारसं० १।८)

(३) माला—

यथा—

उपेन्द्रवज्रा					उपेन्द्रवज्रा				
जगणः	तगणः	जगणः	गु०	गु०	जगणः	तगणः	जगणः	गु०	गु०
।·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ	।·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ
कपोल–	कण्डूः क–	रिभिर्वि–	ने–	तुं	विघट्टि–	तानां स–	रलद्रु–	मा–	णाम् ।

इन्द्रवज्रा					इन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	तगणः	तगणः	जगणः	गु०	गु०
ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ	ऽ·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ	ऽ
यत्र स्रु–	तक्षीर–	तया प्र–	सू–	तः	सानूनि	गन्धः सु–	रभीक–	रो–	ति ॥

(कुमारसं० १।९)

(४) शाला—
यथा—

इन्द्रवज्रा　　　　　　इन्द्रवज्रा
तगणः तगणः जगणः गु० गु०　　तगणः तगणः जगणः गु० गु०
S·S·I—S·S·I—I·S· I—S—S　　S·S· I—S·S·I—I·S· I—S—S
उद्वेज-यत्यङ्गु-लिपार्ष्णि-भा-गान्　मार्गे शि-लीभूत-हिमेऽपि य-त्र ।

उपेन्द्रवज्रा　　　　　　इन्द्रवज्रा
जगणः तगणः जगणः गु० गु०　　तगणः तगणः जगणः गु० गु०
I·S·I—S·S·I—I·S·I—S—S　　S·S· I—S·S· I—I·S·I—S—S
न दुर्व-हश्रोणि-पयोध-रा-र्ता　भिन्दन्ति मन्दां ग-तिमश्व-मु-ख्यः ।
(कुमारसं० १।११)

(५) हंसी—
यथा—

उपेन्द्रवज्रा　　　　　　इन्द्रवज्रा
जगणः तगणः जगणः गु० गु०　　तगणः तगणः जगणः गु० गु०
I·S· I—S·S·I—I·S·I—S—S　　S·S·I—S·S· I—I·S·I—S—S
पदं तु-षारस्रु-तिधौत-र-क्तं　यस्मिन्न-दृष्ट्वापि हतद्वि-पा-नाम् ।

उपेन्द्रवज्रा　　　　　　इन्द्रवज्रा
जगणः तगणः जगणः गु० गु०　　तगणः तगणः जगणः गु० गु०
I·S· I—S·S· I—I·S· I—S—S　　S·S·I—S·S·I—I·S· I—S—S
विदन्ति मार्गं न खरन्ध्र-मु-क्तै-　मुक्ताफ-लैः केस-रिणां कि-रा-ताः ॥
(कुमारसं० १।६)

'विपरीताख्यानिकी—' (पिं० सू० ५।४८) इत्यनुसारेण **'विपरीताख्यानिकी'** इति नामान्तरं **हंसी**च्छन्दसः ।

(६) माया—
यथा—

उपेन्द्रवज्रा　　　　　　उपेन्द्रवज्रा
जगणः तगणः जगणः गु० गु०　　जगणः तगणः जगणः गु० गु०
I·S·I—S·S·I—I·S·I—S—S　　I·S·I—S·S· I—I·S· I—S—S
प्रसीद विश्राम्य-तु वीर ! व-ज्रं　शरैर्म-दीयैः क-तमः सु-रा-रिः ? ।
छ० शा० ११

उपेन्द्रवज्रा					इन्द्रवज्रा				
जगणः	तगणः	जगणः	गु०	गु०	तगणः	तगणः	जगणः	गु०	गु०
। · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ	ऽ · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ
बिभेतु	मोघीकृ	तबाहु	वी	र्यः	स्त्रीभ्योऽपि	कोपस्फु	रिताध	रा	भ्यः ॥

(कुमारसं० ३।९)

(७) जाया—

यथा—

इन्द्रवज्रा					उपेन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	जगणः	तगणः	जगणः	गु०	गु०
ऽ · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ	। · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ
कालक्र	मेणाथ	तयोः प्र	वृ	त्ते	स्वरूप	योग्ये सु	रतप्र	स	ङ्गे ।

उपेन्द्रवज्रा					उपेन्द्रवज्रा				
जगणः	तगणः	जगणः	गु०	गु०	जगणः	तगणः	जगणः	गु०	गु०
। · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ	। · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ
मनोर	मं यौव	नमुद्व	ह	न्त्या	गर्भोऽभ	वद्भूध	रराज	प	त्न्याः ॥

(कुमारसं० १।१९)

(८) बाला—

यथा—

इन्द्रवज्रा					इन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	तगणः	तगणः	जगणः	गु०	गु०
ऽ · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ	ऽ · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ
यं सर्व	शैलाः प	रिकल्प्य	व	त्सं	मेरौ स्थि	ते दोग्ध	रि दोह	द	क्षे

इन्द्रवज्रा					उपेन्द्रवज्रा				
तगणः	तगणः	जगणः	गु०	गु०	जगणः	तगणः	जगणः	गु०	गु०
ऽ · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ	। · ऽ · ।	ऽ · ऽ · ।	। · ऽ · ।	ऽ	ऽ
भास्वन्ति	रत्नानि	महौष	धी	श्च	पृथूप	दिष्टां दु	दुहुर्ध	रि	त्रीम् ॥

(कुमारसं० १।२)

(९) आर्द्रा—

यथा—

उपेन्द्रवज्रा	इन्द्रवज्रा
जगणः तगणः जगणः गु० गु०	तगणः तगणः जगणः गु० गु०
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
दिवाक–राद्रक्ष–ति यो गु–हा–सु	लीनं दि–वाभीत–मिवान्ध–का–रम् ।

इन्द्रवज्रा	उपेन्द्रवज्रा
तगणः तगणः जगणः गु० गु०	जगणः तगणः जगणः गु० गु०
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
क्षुद्रेऽपि नूनं श–रणं प्र–प–न्ने	ममत्व–मुच्चैःशि–रसां स–ती–व ॥

(कुमारसं० १।१२)

(१०) भद्रा—

यथा—

इन्द्रवज्रा	उपेन्द्रवज्रा
तगणः तगणः जगणः गु० गु०	जगणः तगणः जगणः गु० गु०
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
अस्त्युत्त–रस्यां दि–शि देव–ता–त्मा	हिमाल–यो नाम नगाधि–रा–जः ।

इन्द्रवज्रा	उपेन्द्रवज्रा
तगणः तगणः जगणः गु० गु०	जगणः तगणः जगणः गु० गु०
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
पूर्वाप–रौ तोय–निधी व–गा–ह्य	स्थितः पृ–थिव्या इ–व मान–द–ण्डः ॥

(कुमारसं० १।१)

'आख्यानिकी–' (पिं० सू० ५।३७) इत्यनुसारेण 'आख्यानिकी' इति नामान्तरं भद्राच्छन्दसः ।

(११) प्रेमा—

यथा—

उपेन्द्रवज्रा	उपेन्द्रवज्रा
जगणः तगणः जगणः गु० गु०	जगणः तगणः जगणः गु० गु०
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ—ऽ
अनन्त–रत्नप्र–भवस्य य–स्य	हिमं न सौभाग्य–विलोपि जा–तम् ।

इन्द्रवज्रा

तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S

एको हि दोषो गु–णसंनि–पा–ते

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

निमज्ज–तीन्दोः कि–रणेष्वि–वा–ङ्कः ॥

(कुमारसं० १।३)

(१२) रामा—

यथा—

इन्द्रवज्रा

तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S

यश्चाप्स–रोविभ्र–ममण्ड–ना–नां

इन्द्रवज्रा

तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S

संपाद–यित्रीं शि–खरैर्बि–भ–र्ति।

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

बलाह–कच्छेद–विभक्त–रा–गा–

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

मकाल–सन्ध्यामि–व धातु–म–त्ताम् ॥

(कुमारसं० १।४)

(१३) ऋद्धिः—

यथा—

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

प्रसन्न–दिक्पांसु विविक्त–वा–तं

इन्द्रवज्रा

तगणः तगणः जगणः गु० गु०

S·S·I—S·S·I—I·S·I—S—S

शङ्खस्व–नानन्त–रपुष्प–वृ–ष्टि।

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

शरीरि–णां स्थाव–रजङ्ग–मा–नां

उपेन्द्रवज्रा

जगणः तगणः जगणः गु० गु०

I·S·I—S·S·I—I·S·I—S—S

सुखाय तज्जन्म–दिनं ब–भू–व ॥

(कुमारसं० १।२३)

(१४) बुद्धिः—

यथा—

(कुमारसं० १।१४)

एवमन्यान्यप्युपजात्युदाहरणानि कुमारसंभवादिकाव्येषु द्रष्टव्यानि । समवृत्तप्रस्तावे प्रसङ्गादुपजातीनामुपन्यासो लाघवार्थः । केचिदिदं सूत्रं न्यायोपलक्षणपरं व्याचक्षते । तेन वंशस्थ–इन्द्रवंशापादयोरपि संकरादुपजातयो भवन्ति । शालिनी–वातोर्मीपादयोः, अन्येषामपि स्वल्पभेदानां प्रयोगानुसारेणोपजातयो ज्ञेयाः ।

---

१. अत्र वंशस्थेन्द्रवंशयोरपि प्रस्तारे कृते चतुर्दशधा उपजातयो भवन्ति, तासां स्वरूपोदाहरणादीनि यथाक्रमं प्रकाश्यन्ते, यथा—

प्रथमो भेदः—

यथा—

इन्द्रवंशा	वंशस्थम्
तगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
S·S·I—S·S·I—I·S·I—S·I·S	I·S·I—S·S·I—I·S·I—S·I·S
किं ब्रूथ रे! व्योम—चरा म—हासुराः	स्मरारि—सूनुप्र—तिपक्ष—वर्तिनः ।
वंशस्थम्	वंशस्थम्
जगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
I·S·I—S·S·I—I·S·I—S·I·S	I·S·I—S·S·I—I·S·I—S·I·S
मदीय—बाणव्र—णवेद—ना हि साऽ—	धुना क—थं विस्मृ—तिगोच—रीकृता? ॥

(कुमारसं० १५।४०)

द्वितीयो भेदः—

यथा—

वंशस्थम्	इन्द्रवंशा
जगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
पुरोग-तं दैत्य-चमूस-हार्णवं	दृष्ट्वाभि-तश्चक्षु-गिरे म-हा-सुराः।

वंशस्थम्	वंशस्थम्
जगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
स्मरारि-सूनोर्न-यनैक-कोणके	ममुर्भ-टास्तस्य-रणेऽव-हेलया॥

(कुमारसं० १५।४९)

तृतीयो भेदः—

यथा—

इन्द्रवंशा	इन्द्रवंशा
तगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।—ऽ·ऽ·।—ऽ·।·ऽ
निम्नाः प्र-देशाः स्थ-लतासु-पागमन्	निम्नत्व-मुच्चैर-पि सर्व-तश्च ते।

वंशस्थम्	वंशस्थम्
जगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
तुरङ्ग-माणां व्र-जतां खु-रैः क्षता	रथैर्ग-जेन्द्रैः प-रितः स-मीकृताः॥

(कुमारसं० १४।४४)

चतुर्थो भेदः—

यथा—

वंशस्थम्	वंशस्थम्
जगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
परस्प-रं वज्र-धरस्य सैनिका	द्विषोऽपि योद्धुं प्र-वरोद्ध-तायुधाः।

इन्द्रवंशा	वंशस्थम्
[illegible] [illegible] जगणः रगणः	जगणः तगणः जगणः रगणः
[illegible] ऽ·।—ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
[illegible]—[illegible]भावि—तमान—सत्क्रमा—	मिधान—मीयुर्वि—जयैषि—णो रणे ॥

(कु० सं० १५।५२)

पञ्चमो भेदः—

यथा—

इन्द्रवंशा	वंशस्थम्
तगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।　ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
ऊर्ध्वीकृ—तास्या र—विदत्त—दृष्टयः	समेत्य सर्वे सु—रविद्वि—षः पुरः ।

इन्द्रवंशा	वंशस्थम्
तगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।　ऽ·।·ऽ
श्वानः स्व—रेण श्र—वणान्त—शातिना	मिथो रु—दन्तः क—रुणेन निर्ययुः ॥

(कु० सं० १५।२४)

षष्ठो भेदः—

यथा—

इन्द्रवंशा	इन्द्रवंशा
तगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।　।·ऽ·।—ऽ·।·ऽ
अभ्याज—तोऽभ्याग—ततूर्ण—तर्णका—	च्छिर्याण—हस्तस्य पुरो दु—धुक्षतः ।

इन्द्रवंशा	वंशस्थम्
तगणः तगणः जगणः रगण	जगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ।·ऽ
वर्गान्न—वा हुंकृ—तिचारु निर्यती—	मरिमे—घोरैक्ष—त गोम—तल्लिकाम् ॥

(शिशुपा० १२।४१)

सप्तमो भेदः—

यथा—

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

न जाम–दग्न्यः क्ष–यकाल–रात्रिकृत्

इन्द्रवंशा

तगणः तगणः जगणः रगणः

S·S·I—S·S·I—I·S·I S·I·S

स क्षत्रि–याणां स–मराय वल्गति

इन्द्रवंशा

तगणः तगणः जगण रगणः

S·S·I—S·S·I—I·S·I—S·I·S

येन त्रि–लोकीस–भटेन तेन ते

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

कुतोऽव–काशः स–ह विग्र–हग्रहे ? ॥

(कु० सं० १५।३७)

अष्टमो भेदः—

यथा—

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

निवार्य–माणैर–भितोऽनु–यायिभि–

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

र्गृहीतु–कामैरि–व तं मु–हुर्मुहुः ।

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

अपाति गृध्रैर–भिमौलि चाकुलै–

इन्द्रवंशा

तगणः तगणः जगणः रगणः

S·S·I—S·S·I—I·S·I—S·I·S

र्भविष्य–देतन्म–रणोप–देशिभिः ॥

(कु० सं० १५।२९)

नवमो भेदः—

यथा—

इन्द्रवंशा

तगणः तगणः जगणः रगणः

S·S·I—S·S·I—I·S·I—S·I·S

ख्यातं गु–रै रथ्य–तुरङ्ग–[illegible]–

वंशस्थम्

जगणः तगणः जगणः रगणः

I·S·I—S·S·I—I·S·I—S·I·S

[illegible]–कानां क–नकस्थ–लीरजः ।

वंशस्थम्

जगणः तगणः जगणः रगणः

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

गतं दि–गन्तान् प्र–खरैः स–मीरणै-

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

र्दोहभ्र–मं भूरि बभार भूयसा ॥

(कु० सं० १४।२०)

दशमो भेदः—

यथा—

वंशस्थम्

जगणः तगणः जगणः रगणः

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

नितान्त–मुत्तुङ्ग–तुरङ्ग–हेषितै-

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

रुद्दाम–दानद्वि–पबृंहि–तैः शतैः ।

वंशस्थम्

जगणः तगणः जगणः रगणः

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

चलद्ध्व–जस्यन्द–ननेमि–निःस्वनै-

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

श्वाभूत्नि–रुच्छ्वास–मथाकु–लं नभः ॥

(कुमारसं० १४।४१)

एकादशो भेदः—

यथा—

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

श्रुत्वेति वाचं वि–यतो ग–रीयसीं

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

क्रोधाद–हंकार–परो म–हासुरः ।

वंशस्थम्

जगणः तगणः जगणः रगणः

।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

प्रकम्पि–ताशेष–जगत्र–योऽपि स-

इन्द्रवंशा

तगणः तगणः जगणः रगणः

ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ

मा–कम्प–तोच्चैर्दि–वमभ्य–धात्त सः ॥

(कु० सं० १५।३९)

द्वादशो भेदः—

यथा—

वंशस्थम्	वंशस्थम्
जगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
कदुख–रैः प्राल–पथाम्ब–रस्थिताः	शिशोर्ब–लात्षड्दि–नजात–कस्य किम् ? ॥

इन्द्रवंशा	इन्द्रवंशा
तगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
श्वानः प्र–मत्ता इ–व कार्ति–के निशि	स्वैरं व–नान्ते मृ–गधूर्त–का इव ॥

(कुमारसं० १५।४१)

त्रयोदशो भेदः—

यथा—

इन्द्रवंशा	वंशस्थम्
तगणः तगणः जगणः रगणः	जगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
पद्मै–र–नन्वीत–वधूमु–खद्युतो	गता न हंसैः श्रि–यमात–पत्रजाम् ।

इन्द्रवंशा	इन्द्रवंशा
तगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
दूरेऽभ–वन्भोज–बलस्य गच्छतः	शैलोप–मातीत–गजस्य निम्नगाः ।

(शिशुपा० १२।६१)

चतुर्दशो भेदः—

यथा—

वंशस्थम्	इन्द्रवंशा
जगणः तगणः जगणः रगणः	तगणः तगणः जगणः रगणः
।·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ	ऽ·ऽ·।—ऽ·ऽ·।—।·ऽ·।—ऽ·।·ऽ
महाच–मूनाम–धिपाः स–मन्ततः	संनह्य सद्यः सु–तरामु–दायुधाः ।

तथा शालिनीवातोर्मीपादयोरन्येषामपि स्वल्पभेदानां प्रयोगानुसारेणोपजातयो ज्ञेयाः ।

दोधकं भौ भ्गौ ग् ॥ ६ । १८ ॥

इन्द्रवंशा			
नगणः	तगणः	जगणः	रगणः
S·S·I	S·S·I	I·S·I	S·I·S
तस्थुर्वि	नम्रक्षि	तिपाल	सङ्कुले

इन्द्रवंशा			
तगणः	तगणः	जगणः	रगणः
S·S·I	S·S·I	I·S·I	S·I·S
तस्याङ्ग	णद्वारि बहिः	प्र	कोष्ठके ॥

(कुमारसं० १५।६)

१. तुल्यसंख्याकवर्णपादयोरेवोपजातित्वमिति न नियमः, किंतु भिन्नसंख्याकवर्णपादयोरपि ।

यथा—

"रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणामयं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे रामाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥"

इति पद्ये ऊनविंशत्यक्षरपादकेन (१९) शार्दूलविक्रीडितेन सहैकविंशत्यक्षरपादकस्रग्धरावृत्तस्य पादद्वयेन मिश्रणादुपजातित्वम् । एवमेवानुष्टुब्बृहत्योरपि संकरादुपजातिः । इति **नव्याः** । वस्तुतस्तु—सर्वैरपि छन्दःशास्त्रकारैरुपजातेः समवृत्ताधिकार एवाम्नानात्, विषमाक्षरवृत्तमिश्रणस्याप्युपजातित्वेऽर्धसमविषमवृत्तेष्वतिव्याप्तेः, 'अत्रानुक्तं गाथा' (पि० सू० ८।१) इति सूत्रवैयर्थ्यप्रसङ्गात्, छन्दोभङ्गदोषस्य निर्विषयत्वापत्तेश्च समाक्षरयोर्द्वयोर्मिश्रणमेवोपजातित्वमिति युक्तम् । तथा च रत्नाकरे—'इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ।' (३।४) इति तल्लक्षणे 'इत्थं' पदप्रयोगोऽपि स्वरसतः सङ्गच्छते । यत्तु—'रामं लक्ष्मणपूर्वजं' इत्युदाहृतम्, तत्र गाथात्वमेव सुवचम् । अत एव—

'यो विश्वात्मा विधिजविषयान् प्राश्य भोगान् स्थविष्ठान्
पश्चाच्चान्यान् स्वमतिविभवाज्ज्योतिषा स्वेन सूक्ष्मान् ।
सर्वानेतान् पुनरपि शनैः स्वात्मनि स्थापयित्वा
हित्वा सर्वान् विशेषान् विगतगुणगणः पात्वसौ नस्तुरीयः ॥'

(मां० उ० भा० २)

इति शङ्करभगवत्पादीय श्लोके 'न च चतुर्थपादे वृत्तलक्षणाभावादसाङ्गत्यमाशङ्कनीयम्, गाथालक्षणस्य तत्र सुसम्पादत्वात् ।' इत्यानन्दज्ञानोक्तिः । एतेन—'कल्लोलवेल्लितदृषत्परुषप्रहारै रत्नानि रत्नाकर ! मावमंस्थाः ।' इत्याद्यपि व्याख्यातम् । भागवताद्युदाहरणानि त्वार्षत्वाल्लौकिके नातीवोपयुज्यन्ते । क्वचिल्लौकिके तथा दर्शनं तु दोष एवेति 'समाक्षरजातिद्वयमिश्रणमेवोपजातित्वमि'ति प्राचां मतमेव निर्बाधम् ॥

यस्य पादे भगणास्त्रयो (ऽ।।.ऽ।।.ऽ।।) गकारौ (ऽ.ऽ) च भवतस्तद् 'दोधकं' नाम वृत्तम्। तत्रोदाहरणम्—

भगणः भगणः भगणः गु० गु० भगणः भगणः भगणः गु० गु०
ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ
दोधक–मर्थवि–रोधक–सु–प्रं स्त्री–चप–लं युधि कातर–चि–त्तम्।

भगणः भगणः भगणः गु० गु० भगणः भगणः भगणः गु० गु०
ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ ऽ·।·।—ऽ·।·।—ऽ·।·।—ऽ—ऽ
स्वार्थप–रं मति–हीनम–मा–त्यं मुञ्चति यो नृप–तिः स सु–खी स्यात्॥

अत्र पादान्ते यतिः। दोग्धीति दोधकः। केनाप्युपायेन राजानं दोग्धि।

शालिनी म्तौ त्गौ ग् समुद्रऋषयः॥ ६। १९॥

यस्य पादे मगणतगणौ, (ऽऽऽ. ऽऽ।) तगणो, (ऽऽ।) गकारौ (ऽ. ऽ) च भवतस्तद्वृत्तं 'शालिनी' नाम। चतुर्षु, सप्तसु च यतिः। तत्रोदाहरणम्—

मगणः तगणः तगणः गु० गु०
ऽ·ऽ·ऽ—ऽ · ऽ·।—ऽ·ऽ·।—ऽ—ऽ
शस्त्रश्या–मा(४)स्निग्ध–मुग्धाय–ता–क्षी(७)

मगणः तगणः तगणः गु० गु०
ऽ·ऽ·ऽ—ऽ · ऽ·।—ऽ·ऽ·।—ऽ—ऽ
पीनश्रो–णि(४)र्दक्षि–णावर्त–ना–भिः(७)।

मगणः तगणः तगणः गु० गु०
ऽ·ऽ·ऽ—ऽ · ऽ·।—ऽ·ऽ·।—ऽ—ऽ
मध्ये क्षा–मा(४)पीव–रोरुस्त–नी या(७)

मगणः तगणः तगणः गु० गु०
ऽ·ऽ·ऽ—ऽ ·ऽ·।—ऽ·ऽ·।—ऽ—ऽ
श्लाघ्या भ–र्तुः(४)शालि–नी कामि–नी स्यात् (७)॥

वातोर्मी म्भौ त्गौ ग् च[३]॥ ६। २०॥

---

१. उक्तैदशाक्षरप्रस्तारस्योनचत्वारिंशधिकचतुःशततमो (४३९) भेदो '**दोधक**' इति नाम्ना' प्रसिद्धः। '**बन्धुः**' इति नामान्तरं वा० भू०. २. उक्तैकादशाक्षरप्रस्तारस्योननवत्यधिकद्विशततमोऽयं (२८९) भेदः '**शालिनी**' इति नाम्ना ख्यातः। ३. 'गश्चतुःस्वरा' इति लि. पुस्तकेऽधिकः पाठः।

यस्य पादे मगणभगणतगणाः (ऽऽऽ. ऽ।।. ऽऽ।) गकारौ (ऽ.ऽ) च भवतस्तद्वृत्तं 'वातोर्मी' नाम । चतुर्भिः सप्तभिश्च यतिः । चकारो यत्यनुकर्षणार्थः । तथोदाहरणम्—

मगणः　भगणः　तगणः　गु० गु०

ऽ·ऽ·ऽ—ऽ · ।·।—ऽ·ऽ·।— ऽ— ऽ

यात्युत्से-कं(४)सप-दि प्राप्य-किं-चि(७)-

मगणः　भगणः　तगणः　गु० गु०

ऽ · ऽ · ऽ—ऽ · ।·।—ऽ · ऽ · ।—ऽ—ऽ

त्स्याद्वा य-स्या(४)श्चप-ला चित्त-वृ-त्तिः (७)।

मगणः　भगणः　तगणः　गु० गु०

ऽ · ऽ · ऽ—ऽ　।·।—ऽ · ऽ·।—ऽ—ऽ

या दीर्घा-ज्ञी(४)स्फुट-शब्दाट्ट-हा-सा (७)

मगणः　भगणः　तगणः　गु० गु०

ऽ · ऽ · ऽ　ऽ · ।·।—ऽ·ऽ· ।—ऽ—ऽ

त्याज्या सा स्त्री(४)द्रुत-वातोर्मि-मा-ला (७)।

वातोर्मीति स्त्रियां 'कृदिकारादक्तिनः'(व्या. वार्ति.) इति ङीष् ।

भ्रमरविलसितं म्भौ न्लौ ग् ॥ ६ । २१ ॥

यस्य पादे मगणभगणनगणलकारगकाराः (ऽऽऽ. ऽ।।. ।।।. ।. ऽ) भवन्ति तद् 'भ्रमरविलसितं' नाम । चतुर्भिः सप्तभिश्च यतिः ।

तत्रोदाहरणम्—

मगणः　भगणः　नगणः ल० गु०

ऽ · ऽ·ऽ—ऽ · ।·।—·।·।—।—ऽ

किं ते व-क्रं(४)चल-दलक-चि-तं? (७)

मगणः　भगणः　नगणः ल० गु०

ऽ · ऽ · ऽ—ऽ · ·।—·।·।—।—ऽ

किं वा प-द्मं(४)भ्रम-रविल-सि-तम्? (७)।

---

१. उक्तैकादशाक्षरप्रस्तारस्य पञ्चाधिकत्रिशततमो (३०५) भेदो **'वातोर्मी'** इति नाम्ना ख्यातः । वातोर्मीशालिन्योर्भगणतगणस्थान एव भेदः । अतएवानयोर्मिश्रणात्पूर्ववदुपजातयो भवन्ति । एकलघुविभिन्नतायामिव लघुद्वयविभिन्नतायामप्युपजातयो भवन्तीति वृत्तिकृता 'तथा शालिनी' (पृ० १३१ पं० १) त्यादिना सिद्धान्तितत्वात् । २. उक्तैकादशाक्षरप्रस्तारस्य नवाधिकसहस्रतमो (१००९) भेदो **'भ्रमरविलसितम्'** इति नाम्ना प्रसिद्धः । अत्र चतुर्थपादान्ते 'सि' इति वर्णस्य 'गन्ते' (१।१०) इति सूत्राद्गुरुत्वातिदेशः ।

मगणः भगणः नगणः ल० गु०

S·S·S S · ।·।—।·।·।—।—S

इत्येवं मे(४)जन-यति म-न-सि (७)

मगणः भगणः नगणः ल० गु०

S · S · S—S · ।·।—।·।·।—।—S

भ्रान्तिं का-न्ते !(४)परि-सरस-र-सि (७) ॥

रथोद्धता र्नौ र्लौ ग् ॥ ६ । २२ ॥

यस्य पादे रगणनगणरगणलकारगकारा (SIS. ।।।. SIS. ।. S) भवन्ति तद्वृत्तं 'रथोद्धता' नाम ।[1]

तत्रोदाहरणम्—

रगणः नगणः रगणः ल० गु० रगणः नगणः रगणः ल० गु०

S· ।·S—। · ।· ।—S·।·S—।—S S·।·S—।·।·।—S·।·S—।—S

या करो-ति विवि-धैर्विटैः स-मं सङ्गतिं परगृ-हे रता च या ।

रगणः नगणः रगणः ल० गु० रगणः नगणः रगणः ल० गु०

S · ।·S—।·।·।—S · । · S— ।—S S·।·S—।·।·।—S·।·S—।—S

म्लानय-त्युभय-तोऽपि बा-न्ध-वान् मार्गधू-लिरिव सा रथो-द्ध-ता ॥

पादान्ते यतिः ।

स्वागता र्नौ भ्गौ ग् ॥ ६ । २३ ॥

यस्य पादे रगणनगणौ (SIS. ।।।) भगणो (S।।) गकारौ (S. S) च तद्वृत्तं 'स्वागता' नाम ।[2] तत्रोदाहरणम्—

रगणः नगणः भगणः गु० गु० रगणः नगणः भगणः गु० गु०

S·।·S—।·।·।—S·।·।—S—S S·।·S—।·।·।—S·।·।—S—S

आहवं प्रविश-तो यदि रा-हुः पृष्ठत-श्चरति वायुस-मे-तः ।

रगणः नगणः भगणः गु० गु० रगणः नगणः भगणः गु० गु०

S·।·S—।·।·।—S·।· ।—S—S S·।· S—।·।·।—S· । · ।—S—S

प्राणवृ-त्तिरपि यस्य श-री-रे स्वागता भवति तस्य ज-य-श्रीः ॥

पादान्ते यतिः ।

वृन्ता नौ स्गौ ग् ॥ ६ । २४ ॥

---

१. उक्तैकादशाक्षरप्रस्तारस्यैकोनशताधिकषट्शततमो (६९९) ऽयं भेदो **'रथोद्धता'** इति नाम्ना प्रसिद्धः । २. उक्तैकादशाक्षरप्रस्तारस्य त्रिचत्वारिंशदधिकचतुःशततमो (४४३) भेदः **'स्वागता'** इति नाम्ना ख्यातः । **'पद्मिनी'** इति चन्द्रिकायाम् ।

यस्य पादे नगणौ (।।।. ।।।.) सगणः (।।ऽ) गकारौ (ऽ.ऽ) च तद्वृत्तं 'वृन्ता' नाम। अत्र मण्डूकप्लुतिन्यायेन 'समुद्रऋषय' इत्यनुवर्तन्ते । तेन चतुर्भिः सप्तभिश्च यतिः ।

तत्रोदाहरणम्—

नगणः नगणः सगणः गु० गु०

।·।·।—। · ।·।—।·।·ऽ—ऽ—ऽ

द्विजगु–रु(४)परि–भवका–री–यो (७)

नगणः नगणः सगणः गु० गु०

।·।·।—। · ।·।—।·।·ऽ— ऽ — ऽ

नरप–ति(४)रति–धनलु–ब्धा–त्मा (७) ।

नगणः नगणः सगणः गु० गु०

।·।·।—। · ।·।—।·।·ऽ— ऽ — ऽ

ध्रुवमि–ह(४)निप–तति पा–पो–ऽसौ (७)

नगणः नगणः सगणः गु० गु०

।·।·।—। · ।·।—।·।·ऽ—ऽ—ऽ

फलमि–व(४)पव–नहतं–वृ–न्तात् (७) ॥

श्येनी रजौ रलौ ग् ॥ ६ । २५ ॥

यस्य पादे रगणजगणौ (ऽ।ऽ. ।ऽ।) रगणलकारौ (ऽ।ऽ. ।) गकार (ऽ) श्च तद्वृत्तं 'श्येनी' नाम । तत्रोदाहरणम्—

रगणः जगणः रगणः ल० गु०　　रगणः जगणः रगणः ल० गु०

ऽ·।·ऽ—।·ऽ·।—ऽ·।·ऽ—।—ऽ　　ऽ·।·ऽ—।·ऽ·।—ऽ·।·ऽ—।—ऽ

क्रूरद–ष्टिराय–ताम्रना–सि–का　　चञ्चला–कठोर–तीक्ष्णना–दि–नी ।

रगणः जगणः रगणः ल० गु०　　रगणः जगणः रगणः ल० गु०

ऽ·।·ऽ—।·ऽ·।—ऽ·।·ऽ—।—ऽ　　ऽ·।·ऽ—।·ऽ·।—ऽ·।·ऽ—।—ऽ

युद्धका–ङ्क्षिणी स–दामिष–प्रि–या　　श्येनिके–व सा वि–गर्हिता–ङ्ग–ना ॥

अत्र पादान्ते यतिः ।

विलासिनी[3] जरौ जगौ ग् ॥ ६ । २६ ॥

१. उक्तैकादशाक्षरप्रस्तारस्य षट्पञ्चाशदधिकद्विशततमो (२५६) भेदो 'वृन्ता' इति नाम्ना प्रसिद्धः । 'वृत्ता' इति वैदिकपाठः । 'पृथ्वी' इति क्वचित् । २. उक्तैकादशाक्षरप्रस्तारस्य त्र्यशीत्यधिकषट्शततमो (६८३) भेदः 'श्येनी' इति नाम्ना प्रसिद्धः 'सेनिका' वा० भू० । 'वैतिका' त्र० र० । ३. सूत्रमेतद्वैदिकैर्न पठ्यते

यस्य पादे जगणरगणौ (।ऽ।, ऽ।ऽ) जगणो (।ऽ।) गकारौ (ऽ.ऽ) च तद्वृत्तं 'विलासिनी' नाम । तत्रोदाहरणम्—

जगणः रगणः जगणः गु० गु० जगणः रगणः जगणः गु० गु०
।·ऽ·।—ऽ·।·ऽ—।·ऽ·।—ऽ—ऽ ।·ऽ·।—ऽ·।·ऽ—।·ऽ·।—ऽ—ऽ
विलासि–नी विलो–कितैः स–का–मं दधाति–कामस–त्त्वचेष्टि–तं या ।
जगणः रगणः जगणः गु० गु० जगणः रगणः जगणः गु० गु०
।·ऽ·।—ऽ·।·ऽ—।·ऽ·।—ऽ—ऽ ।·ऽ·।—ऽ·।·ऽ—।·ऽ·।—ऽ—ऽ
करोति चञ्चला–क्षिदृष्टि–पा–तै– र्यतात्म–नश्च यो–गिनोऽपि म–त्तान् ॥
(जगत्याम्)

---

१. उक्तैकादशाक्षरप्रस्तारस्य द्विचत्वारिंशदुत्तरत्रिशततमो (३४२) भेदो **'विलासिनी'** इति नाम्ना प्रसिद्धः । २. जगतीछन्दःपादघटकीभूतानां द्वादशसंख्यकानामक्षराणां प्रस्तारे कृते षण्णवत्यधिकचतुःसहस्रभेदा (४०९६) जायन्ते । तेषु चात्र षोडशभेदा एव निर्दिष्टाः, परं प्राकृतपिङ्गलादिग्रन्थेष्वन्येऽपि भेदा उपलभ्यन्ते; ते चात्र विनिर्दिश्यन्ते । यथा—

विद्याधरच्छन्दः (१२।१)—
'चारी कण्णा पाए दिण्णा सव्वासारा पाआअंते दिज्जे कंता चारी हारा ।
छण्णावेआ मत्ता गण्णा चारी पाआ **विज्जाहारा** जंपे सारा णाआराआ ॥'
प्रा० पि० सू० २।१२८ ॥

जलधरमालाच्छन्दः (१२।२४१)—'अब्ध्यष्टाभिर्**जलधरमाला** म्भौ स्मौ' वृत्तरत्नाकरे ।

अभिनवतामरसच्छन्दः (१२।८८०)—**'अभिनवतामरसं** नजजाद्यः' । एतदेव **'ललित'**पदनाम्ना प्रसिद्धं वृत्तरत्नाकरे ।

मालतीच्छन्दः (१२।१३९२)—'भवति नजावथ **मालती** जरौ' वृत्तरत्नाकरे ।

दुग्धच्छन्दः (१२।१३९५)—**'दुग्धवृत्तं** रभजैरुदीरितम् ।'

ललिताच्छन्दः (१२।१३९७)—'धीरैरभाणि **ललिता** तभौ जरौ' वृत्तरत्नाकरादिषु ।

प्रियंवदाच्छन्दः (१२।१४००)—'भुवि भवेन्नभजरैः **प्रियंवदा'** वृत्तरत्नाकरादिषु ।

महितोज्ज्वलाच्छन्दः (१२।१४७२)—'ननभरसहिता **महितोज्ज्वला'** वृत्तरत्नाकरे ।

मताच्छन्दः (१२।१४९६)—**'मता** नरौ नरौ भिन्ना वज्रकोणैर्गुहाननैः ।' **'बहुमता'** इति छ० म० को०

जगती ॥ ६ । २७ ॥

अधिकारोऽयमाध्यायपरिसमाप्तेः । यदित ऊर्ध्वमनुक्रमिष्यामस्तज्जगतीत्येवं वेदितव्यम् । वक्ष्यति च "तोटकं सः" (६।३२), तज्जगतीपादस्य लक्षणं भवति ।

वंशस्था ज्तौ ज्रौ ॥ ६ । २८ ॥

यस्य पादे जगणतगणौ (।ऽ।. ऽऽ।) जगणरगणौ (।ऽ।. ऽ।ऽ) च भवतस्तद्वृत्तं 'वंशस्था'[1] नाम । तत्रोदाहरणम्—

जगणः	तगणः	जगणः	रगणः	जगणः	तगणः	जगणः	रगणः
।·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ·।·ऽ	।·ऽ·।	ऽ·ऽ·।	।·ऽ·।	ऽ·।·ऽ

विशुद्ध–वंशस्थ–मुदार–चेष्टितं　　गुणप्रि–यं मित्र–मुपास्स्व सज्जनम् ।

जलमालाच्छन्दः (१२।१५९१)—'**जलमाला** भभमसाः सागरैर्वसुभिर्यतिः ।'

चन्द्रवर्त्मच्छन्दः (१२।१९७९)—

चन्द्रवर्त्म गदितं तु रनभसैः' वृत्तरत्नाकरछन्दोमञ्जर्यादिषु ।

ललनाच्छन्दः (१२।२०२३)—'**ललना** स्याद्भतनसैरिछन्ना स्वर्द्रुमहीधरैः ।'

सारङ्गच्छन्दः (१२।२३४१)—

'जा चारितक्कारसंभेअउक्किट्ठ **सारंगरूअक** सो पिंगले दिट्ठ ।
जा तीअवीसामसंजुत्त पाएहि णाजाणिए कांति अण्णोण्णभाएहि ॥'
प्रा० पि० सू० २।१३७ ॥

मौक्तिकदामच्छन्दः (१२।२९२६)—

'चतुर्जगणं वद मौक्तिकदाम' वृ० र० परिशिष्टे, प्रा० पि० सू० २।१३९ ॥'

भामिनीच्छन्दः (१२।३५११)—'**भामिनी** स्याद्भभभाास्त्रिभिर्यतिचतुष्टयम् ।'

मोदकच्छन्दः (१२।३८९५)—

'तोडअछं विपरीअ ठ्ठविज्जसु **मोदह**छंदह णाम करिज्जसु ।
चारि गणा भगणा सुपसिद्धउ पिंगल जंपउ कित्तिहिलुद्धउ ॥'
प्रा० पि० सू० २।१४१ ॥

तोटकच्छन्दसो विपरीतस्थापनेन **मोदक**च्छन्दो जायते ।

तरलनयनीच्छन्दः (१२।४०९६)—

'णगण णगण कर चउगुण सुकइ कमलमुहि फणि भण ।
तरलणअणि सब करु लहु सब गुरु जवउ णवरि कहु ॥'
प्रा० पि० सू० २।१४३ ॥

१. उक्तद्वादशाक्षरप्रस्तारस्य त्रिशतद्व्यशीत्यधिकैकसहस्रतमो भेदो (१३८२) 'वंशस्था' इति नाम्ना ख्यातः । छन्दोमञ्जरीप्रभृतिषु च ग्रन्थेष्वेतद्वृत्तं '**वंशस्थविलम्**' इति नाम्ना प्रसिद्धम् । अत्र 'गुहास्यऋतुभिर्यतिः ।' मं० म० ।

जगणः तगणः जगणः रगणः
I·S·I—S·S·I—I·S·I—S·I·S
विपत्ति–ममस्य कराव–लम्बनं

जगणः तगणः जगणः रगणः
I·S·I—S·S·I—I·S·I—S·I·S
करोति यत्प्राण–परिक्र–येण सः ॥

पादान्ते यतिः ।

इन्द्रवंशा तौ ज्रौ ॥ ६ । २९ ॥

यस्य पादे तगणौ (SSI. SSI) जगणरगणौ (ISI. SIS) च तद्वृत्तं 'इन्द्रवंशा' नाम।[1] तत्रोदाहरणम्—

तगणः तगणः जगणः रगणः
S·S·I S·S·I—I·S·I—S·I·S
कुर्वीत यो देव–गुरुद्वि–जन्मना–

तगणः तगणः जगणः रगणः
S·S·I—S·S·I—I·S·I—S·I·S
मुर्वीप–तिः पात–नमर्थ–लिप्सया ।

तगणः तगणः जगणः रगणः
S·S·I—S·S·I—I·S·I—S·I·S
तस्येन्द्र–वंशेऽपि गृहीत–जन्मनः

तगणः तगणः जगणः रगणः
S·S·I—S·S·I—I·S·I—S·I·S
संजाय–ते श्रीः प्र–तिकूल–वर्तिनी ॥

अत्रापि पादान्ते यतिः ।

द्रुतविलम्बितं न्भौ भ्रौ ॥ ६ । ३० ॥

यस्य पादे नगणभगणौ (III. SII) भगणरगणौ (SII. SIS) च भवतस्तद्वृत्तं 'द्रुतविलम्बितं' नाम।[2] तत्रोदाहरणम्—

नगणः भगणः भगणः रगणः
I·I·I—S·I·I—S·I·I—S·I·S
द्रुतग–तिः पुरु–षो धन–भाजनं

नगणः भगणः भगणः रगणः
I·I·I—S·I·I—S·I·I—S·I·S
भवति मन्दग–तिश्च सु–खोचितः ।

नगणः भगणः भगणः रगणः
I·I·I—S·I·I—S·I·I—S·I·S
द्रुतवि–लम्बित–खेलग–तिर्नृपः

नगणः भगणः भगणः रगणः
I·I·I—S·I·I—S·I·I—S·I·S
सकल–राज्यसु–खं प्रिय–मश्नुते ॥

तोटकं सः ॥ ६ । ३१ ॥

---

१. उक्तद्वादशाक्षरप्रस्तारस्य त्रिशतैकाशीत्यधिकैकसहस्रतमो (१३८१) भेदः 'इन्द्रवंशा' नाम्ना प्रसिद्धः । २. उक्तद्वादशाक्षरप्रस्तारस्य चतुःशतचतुःषष्ठ्यधिकैकसहस्रतमो (१४६४) भेदो 'द्रुतविलम्बित'नाम्ना ख्यातः, 'उज्ज्वला' इति नामान्तरम् मं० म० । 'सुन्दरी' इति प्रा० पि० सू० २।१४५.

जगतीत्यधिकारे यावद्भिः सकारैः (॥ऽ)जगतीपादः पूर्यते, तावन्त एकपादे सकारा भवन्ति तद्वृत्तं 'तोटकं' नाम । तत्रोदाहरणम्—

सगणः सगणः सगणः सगणः
।·।·ऽ—।·।·ऽ—।·।·ऽ—।·।·ऽ
त्यज तो–टकम–र्थनियो–गकरं

सगणः सगणः सगणः सगणः
।·।·ऽ—।·।·ऽ—।·।·ऽ—।·।·ऽ
प्रमदा–धिकृतं व्यसनो–पहृतम् ।

सगणः सगणः सगणः सगणः
।·।·ऽ—।·।·ऽ—।·।·ऽ—।·।·ऽ
उपधा–भिरशु–द्धमतिं सचिवं

सगणः सगणः सगणः सगणः
।·।·ऽ—।·। · ऽ—।·।·ऽ—।·।·ऽ
नरना–यक! भी–रुकमा–युधिकम् ।

पादान्ते यतिः ।[2]

पुटो नौ म्यौ वसुसमुद्राः ॥ ६ । ३२ ॥

यस्य पादे नगणौ (।।।. ।।।) मगणयगणौ (ऽऽऽ. ।ऽऽ) च तद्वृत्तं 'पुटो' नाम । अष्टभिश्चतुर्भिश्च यतिः । तत्रोदाहरणम्—

नगणः नगणः मगणः यगणः
।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ
न विच–लति कु–थ चि(८)द्या–यमार्गा(४)–

नगणः नगणः मगणः यगणः
।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ
द्रुमुनि शिथिल–मुष्टिः(८)पा–र्थिवो यः(४) ।

नगणः नगणः मगणः यगणः
।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ
अमृत–पुट इ–वासौ(८)पु–ण्यकर्मा(४)–

नगणः नगणः मगणः यगणः
।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ
भवति जगति सेव्यः(८)स–र्वलोकैः (४) ॥

---

१. उक्तद्वादशाक्षरप्रस्तारस्य सप्तशतषट्पञ्चाशदधिकैकसहस्रतमो (१७५६) भेदः **'तोटक'** इति नाम्ना प्रसिद्धः । २. इतः परं "अस्य चोदाहरणान्तरमपि यथा—

अमुना यमुनाजलकेलिमृता सहसा तरसा परिरभ्य धृता ।
हरिणा हरिणाकुलनेत्रवती न ययौ नवयौवनभारवती ॥"

इति क्वचिद्दृश्यते । एतत्प्रक्षिप्तमिव प्रतिभाति; भेदान्तराभाव उदाहरणान्तरस्य वैयर्थ्यात् । ३. उक्तद्वादशाक्षरप्रस्तारस्य षट्सप्तत्यधिकपञ्चशततमो (५७६) भेदः **'पुट'** इति नाम्ना ख्यातः । ग्रन्थान्तरेषु चास्यैव **'श्रीपुट'** इति नाम प्रसिद्धम् ।

जलोद्धतगतिर्ज्सौ ज्सौ रसर्तवः ॥ ६ । ३३ ॥

यस्य पादे जगणसगणौ (।ऽ।. ॥ऽ) पुनरपि तावेव (।ऽ।. ॥ऽ), तद्वृत्तं 'जलोद्धतगति'र्नाम । षड्भिः षड्भिश्च यतिः ।

जगणः सगणः जगणः सगणः जगणः सगणः जगणः सगणः
।·ऽ·। ।·।·ऽ ।·ऽ·।—।·।·ऽ ।·ऽ·।—।·।·ऽ ।·ऽ·।—।·।·ऽ
भनक्ति समरे(६) बहून-पि रिपून्(६) हरिः प्र-भुरसौ(६) भुजोर्जि-तबलः(६)।

जगणः सगणः जगणः सगणः जगणः सगणः जगणः सगणः
।·ऽ·।—।·।·ऽ ।·ऽ·। ।·।·ऽ ।·ऽ·।—।·।·ऽ ।·ऽ·। ।·।·ऽ
जलोद्ध-तगति-(६)र्यथैव मकर-(६) स्तरङ्ग-निकरं(६) करेण परितः(६) ॥

तंतं[2] नौ म्रौ ॥ ६ । ३४ ॥

यस्य पादे नगणौ (।।।. ।।।) मगणरगणौ (ऽऽऽ. ऽ।ऽ) च तत् 'तंतं'[3] नाम ॥

नगणः नगणः मगणः रगणः नगणः नगणः मगणः रगणः
।·।·।—।·।·।—ऽ·ऽ·ऽ—ऽ·।·ऽ ।·।·।—।·।·।—ऽ·ऽ·ऽ—ऽ·।·ऽ
कुरु क-रुणमि-यं गाढो-त्कण्ठिका यदुत-नय! च-कोरीभा राधिका ।

नगणः नगणः मगणः रगणः नगणः नगणः मगणः रगणः
।·।·।—।·।·।—ऽ·ऽ·ऽ—ऽ·।·ऽ ।·।·।—।·।·।—ऽ·ऽ·ऽ—ऽ·।·ऽ
विरह-दहन-सङ्गाद-ङ्गैः कृशा पिबतु तव मु-खेन्दोर्बि-म्बं दृशा ॥

कुसुमविचित्रा न्यौ न्यौ ॥ ६ । ३५ ॥[4]

---

१. उक्तद्वादशाक्षरप्रस्तारस्याष्टशतषडशीत्यधिकैकसहस्रतमो (१८८६) भेदो **'जलोद्धतगतिः'** इति नाम्ना ख्यातः । २. एतदादीनि 'चञ्चलाक्षिका-' इत्यन्तानि सूत्राणि वैदिकैर्न पठ्यन्ते । ३. उक्तद्वादशाक्षरप्रस्तारस्य अष्टाशीत्यधिकैकसहस्रतमभेदः (१०८८) **'ततम्'** इति नाम्ना प्रसिद्धः । ४. अत्र क्वचित्—

मणिमाला त्यौ त्यौ ।

इति सूत्रमधिकं पठ्यते । व्याख्यातं चैतदन्यैः-'अत्र प्रतिपादं तगणः, यगणः, तगणः, यगणश्च एतद्वृत्तं मणिमालाख्यं भवति । अस्मिन् वृत्ते षड्भिः षड्भिर्यतिरि'ति । द्वादशाक्षरप्रस्तारस्य एकाशीत्यधिकसप्तशततमोऽयं भेदः (७८१)। उदाहरणं तु—

वृन्दारकवृन्दामन्दीकृतवन्द्यं वन्दे जननन्दं स्कन्दं शिवकन्दम् ।
चण्डीकृतसन्धं बन्धुं गुणसिन्धुं कुन्दं पदकुन्दं वन्देऽमरवन्द्यम् ॥

इति । **'त्यौ त्यौ मणिमाला** छिन्ना गुहवक्त्रैः'-वृ॰ र॰ ।

यस्य पादे नगणयगणौ (।।।.।ऽऽ) पुनरपि तावेव (।।।.।ऽऽ) तत् 'कुसुमविचित्रा' नाम ।

नगणः यगणः नगणः यगणः नगणः यगणः नगणः यगणः

।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ

विगलि–तहारा सकुसु–ममाला सचर–णलाक्षा वलय–सुलक्षा ।

नगणः यगणः नगणः यगणः नगणः यगणः नगणः यगणः

।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ ।·।·।—।·ऽ·ऽ

विरचि–तवेषं सुरत–विशेषं कथय–ति शय्या कुसुम–विचित्रा ॥

चञ्चलाक्षिका नौ रौ ॥ ६ । ३६ ॥

यस्य पादे नगणौ (।।।.।।।) रगणौ (ऽ।ऽ.ऽ।ऽ) च भवतस्तद्वृत्तं 'चञ्चलाक्षिका' नाम ।

नगणः नगणः रगणः रगणः नगणः नगणः रगणः रगणः

।·।·।—।·।·।—ऽ·।·ऽ—ऽ·।·ऽ ।·।·।—।·।·।—ऽ·।·ऽ—ऽ·।·ऽ

अति सु–रभिर–भाजि पु–ष्पश्रिया– मतनु–तरत–येव सं–तानकः ।

नगणः नगणः रगणः रगणः नगणः नगणः रगणः रगणः

।·।·।—।·।·।—ऽ·।·ऽ—ऽ·।·ऽ ।·।·।—।·।·।—ऽ·।·ऽ—ऽ·।·ऽ

तरुण–परभृ–तः स्वनं रागिणा– मवनु–त रत–ये वसं–तानकः ॥

(शि० व० ६।६७)

भुजङ्गप्रयातं यः ॥ ६ । ३७ ॥

यस्य पादे चत्वारो यगणा (।ऽऽ.।ऽऽ.।ऽऽ.।ऽऽ) भवन्ति, तद् 'भुजङ्गप्रयातं' नाम ।

यगणः यगणः यगणः यगणः यगणः यगणः यगणः यगणः

।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ ।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

पुरः सा–धुवद्वे–क्ति मिथ्या विनीतः परोक्षे करोत्य–र्थनाशं हताशः ।

यगणः यगणः यगणः यगणः यगणः यगणः यगणः यगणः

।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ ।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

भुजङ्ग–प्रयातो–पमं य–स्य चित्तं त्यजेत्ता–दृशं दु–श्चरित्रं कुमित्रम् ॥

अत्र पादान्ते यतिः ।

---

१. उक्तद्वादशाक्षरप्रस्तारस्य षट्सप्तत्यधिकनवशततमो (९७६) भेदः **'कुसुमविचित्रा'** इति नाम्ना प्रसिद्धः । अत्र 'भिद्रसै रसैः' मं० म० । २. उक्तद्वादशाक्षरप्रस्तारस्य द्विशतषोडशाधिकैकसहस्रतमो भेदः (१२१६) **'चञ्चलाक्षिका'** इति नाम्ना ख्यातः । इयमेव **'गौरी'**–(पि० सू० ८।५), **'मुदितवदना'**–ग० पु०, **'प्रमुदितवदना'**–वृ० र०, सप्तसु पञ्चसु च यतिनियमादियमेव **'प्रभा'** च । तदुक्तम्—'स्वरशरविरतिर्ननौ रौ **प्रभा'** वृ० र० । ३. उक्तद्वादशाक्षरप्रस्तारस्य षडशीत्युत्तरपञ्चशततमो भेदः (५८६) **'भुजङ्गप्रयातम्'** इति नाम्ना विख्यातः । ४. 'भाति' क० मु० पुस्तके ।

स्रग्विणी रः ॥ ६ । ३८ ॥

यस्य पादे रगणा(ऽ।ऽ. ऽ।ऽ. ऽ।ऽ. ऽ।ऽ)श्चत्वारस्तत् 'स्रग्विणी' नाम ।

रगणः रगणः रगणः रगणः रगणः रगणः रगणः रगणः

ऽ·।·ऽ ऽ·।·ऽ ऽ·।·ऽ ऽ·।·ऽ ऽ·।·ऽ—ऽ·।·ऽ—ऽ·।·ऽ—ऽ·।·ऽ

यो रणे युध्यते निर्भरं निर्भय– स्त्यागिता यस्य स–र्वस्वदा–नावधिः ।

रगणः रगणः रगणः रगणः रगणः रगणः रगणः रगणः

ऽ·।·ऽ ऽ·।·ऽ—ऽ·।·ऽ—ऽ·।·ऽ ऽ·।·ऽ—ऽ·।·ऽ—ऽ·।·ऽ—ऽ·।·ऽ

तं नरं वीरल–क्ष्मीर्यशः–स्रग्विणी नूनम–भ्येति स–त्कीर्तिशु–भ्रांशुका ॥

प्रमिताक्षरा सजौ सौ ॥ ६ । ३९ ॥

यस्य पादे सगणजगणौ (।।ऽ. ।ऽ।) सगणौ (।।ऽ. ।।ऽ) च भवतस्तद्वृत्तं 'प्रमिताक्षरा' नाम । तत्रोदाहरणम्—

सगणः जगणः सगणः सगणः सगणः जगणः सगणः सगणः

।·।·ऽ—।·ऽ·।—।·।·ऽ—।·।·ऽ ।·।·ऽ—।·ऽ·।—।·।·ऽ—।·।·ऽ

परिशु–द्धवाक्य–रचना–तिशयं परिषि–ञ्चती श्र–वणयो–रमृतम् ।

सगणः जगणः सगणः सगणः सगणः जगणः सगणः सगणः

।·।·ऽ—।·ऽ·।—।·।·ऽ—।·।·ऽ ।·।·ऽ—।·ऽ·।—।·।·ऽ ।·।·ऽ

प्रमिता–क्षरापि विपुला–र्थवती तव भा–रती ह–रति मे हृदयम् ॥

अत्र पादान्ते यतिः ।

कान्तोत्पीडा भ्मौ स्मौ ॥ ६ । ४० ॥

यस्य पादे भगणमगणौ (ऽ।।. ऽऽऽ) सगणमगणौ (ऽ।।. ऽऽऽ) च भवतस्तद्वृत्तं 'कान्तोत्पीडा' नाम । तत्रोदाहरणम्—

भगणः मगणः सगणः मगणः भगणः मगणः सगणः मगणः

ऽ·।·।—ऽ·ऽ·ऽ ।·।·ऽ—ऽ·ऽ·ऽ ऽ·।·।—ऽ·ऽ·ऽ ।·।·ऽ—ऽ·ऽ·ऽ

कामश–रैर्व्याप्ता खलु का–न्तोत्पीडा– मासव–ती दुःखैः परिमु–ह्यन्ती या ।

भगणः मगणः सगणः मगणः भगणः मगणः सगणः मगणः

ऽ·।·।—ऽ·ऽ·ऽ—।·।·ऽ—ऽ·ऽ·ऽ ऽ·।·।—ऽ·ऽ·ऽ—।·।·ऽ—ऽ·ऽ·ऽ

सा लभ–ते चेत्का–मुकयो–गं गाढं दुःखवि–मुक्ता स्या–त्परमा–नन्दाप्ता ॥

---

१. उक्तद्वादशाक्षरप्रस्तारस्यैकशतैकसप्तत्यधिकैकसहस्रतमो (११७१) **'स्रग्विणी'** इति नाम्ना प्रसिद्धः । **'लक्ष्मीधर'** इति नामान्तरं प्रा० पि० सू० २।१३३ । २. उक्तद्वादशाक्षरप्रस्तारस्य सप्तशतद्विसप्तत्यधिकैकसहस्रतमो भेदः (१७७२) **'प्रमिताक्षरा'** इति नाम्ना ख्यातः । ३. उक्तद्वादशाक्षरप्रस्तारस्य एकोनशताधिकैकशततमो भेदः (१९९) **'कान्तोत्पीडा'** इति नाम्ना ख्यातः ।

वैश्वदेवी मौ याविन्द्रियऋषयः ॥ ६ । ४१ ॥

यस्य पादे मगणौ (ऽऽऽ. ऽऽऽ) यगणौ (।ऽऽ. ।ऽऽ) च भवतस्तद्वृत्तं 'वैश्वदेवी' नाम । पञ्चसु सप्तसु च यतिः । तत्रोदाहरणम्—

धन्यः पु–ण्यात्मा(५)जा–यते क्वा–पि वंशे(७)

तादृक्पु–त्रोऽसौ(५)ये–न गोत्रं पवित्रम्(७) ।

गोविप्र–ज्ञाति(५)स्वा–मिकार्ये प्रवृत्तः(७)

शुद्धः श्रा–द्धादौ(५)वै–श्वदेवी भवेद्यः(७) ॥

वाहिनी त्यौ म्यावृषिकामशराः ॥ ६ । ४२ ॥

यस्य पादे तगणयगणौ (ऽऽ।. ।ऽऽ) मगणयगणौ (ऽऽऽ. ।ऽऽ) च भवतस्तद्वृत्तं 'वाहिनी' नाम । सप्तभिः पञ्चभिश्च यतिः । तत्रोदाहरणम्—

तगणः यगणः मगणः यगणः

ऽ·ऽ·।—।·ऽ·ऽ—ऽ · ऽ·ऽ—।·ऽ·ऽ

[शक्ता ज–गतीं कृ–त्स्नां(७)जेतुं सुयोधा(५)

तगणः यगणः मगणः यगणः

ऽ·ऽ·।—।·ऽ·ऽ—ऽ · ऽ·ऽ—।·ऽ·ऽ

हस्त्यश्व–रथोदा–रा(७)सा वा–हिनी ते(५) ।

---

१. उक्तद्वादशाक्षरप्रस्तारस्य सप्तसप्तत्यधिकपञ्चशततमो (५७७) भेदो 'वैश्वदेवी' इति नाम्ना प्रसिद्धः । २. 'तकारयकारौ मकारगकारौ' क० मु० पुस्तके । ३. उक्तद्वादशाक्षरप्रस्तारस्य एकोनसप्तत्यधिकद्विशततमो भेदः (२६९) 'वाहिनी' इति नाम्ना ख्यातः ।

तगणः यगणः मगणः यगणः

S·S·I—I·S·S—S · S·S—I·S·S

छन्ने र–जसा भा–नौ(७)यस्याः प्रयाणे(५)

तगणः यगणः मगणः यगणः

S·S· I—I·S·S—S · S·S—I·S·S

घस्रेऽपि निशाभ्रा–न्तिं(७)धत्ते नृलोकः(५) ॥][1]

नवमालिनीं नृजौ भ्याविति ॥ ६ । ४३ ॥

यस्य पादे नगणजगणभगणयगणा (।।।. ।S।. S।।. ।SS) भवन्ति तद्वृत्तं 'नवमा[2]लिनी' नाम । तत्रोदाहरणम्—

नगणः जगणः भगणः यगणः नगणः जगणः भगणः यगणः

I·I·I—I·S·I—S·I · I—I·S·S I·I·I—I·S·I—S·I · I—I·S·S

धवल–यशोंऽशु–केन(८)प–रिवीता(४) सकल–जनानु–राग(८)घु–सृणाक्ता(४) ।

नगणः जगणः भगणः यगणः नगणः जगणः भगणः यगणः

I·I·I—I·S·I—S·I · I—I·S·S I·I·I—I·S·I—S·I · I—I·S·S

दृढ[illegible]–णबद्ध–कीर्ति(८)कु–सुमौघै(४) स्तव न–वमालि–नीव(८)नृ–प लक्ष्मीः(४) ॥

अत्र वसुसमुद्रैर्यतिरित्याम्नायः ।

इति भट्टहलायुधविरचितायां छन्दोवृत्तौ षष्ठोऽध्यायः ।

---

१. अत्र प्राचीनमुदाहरणं न लब्धमित्येतदस्माभिः स्वीयं निवेशितम् । केचित्तु—**'वाहिनी त्मौ य्या**–'विति सूत्रं पठन्ति । तत्रोक्तद्वादशाक्षरप्रस्तारस्य एकविंशत्यधिकपञ्चशततमो (५२१)ऽयं भेदः । उदाहरणं च—

'यो वाहिनीं क्रव्यादां त्रुट्यर्धमात्रात् हन्तुं हि शक्तोऽनन्तः सोऽप्यद्य मूर्च्छाम् ।
प्राप्तः किमेतच्चित्रं पौलस्त्यशक्त्या? ज्ञातुं न शक्यतेऽज्ञैश्चारित्र्यमेषाम् ॥'

इति द्रष्टव्यम् । वस्तुतस्तु–सूत्रमेतद्वैदिकैर्न पठ्यते, न चाग्रेये नूद्यत इति प्रक्षिप्तमेवेत्यन्यदेतत् । २. उक्तद्वादशाक्षरप्रस्तारस्य चतुश्चत्वारिंशदधिकनवशततमो (९४४) भेदो **'नव-मालिनी'** इति नाम्ना प्रसिद्धः । श्रीकृष्णेन तु 'अर्वसायकैश्छिन्ना ।'. इत्यन्यथैव यतिरुक्ता ।

सप्तमोऽध्यायः ।

इदानीमतिजगतीं शक्वर्यतिशक्वर्यष्टिरत्यष्टिर्धृतिरतिधृतिश्चेति सप्त अतिच्छन्दांसि एकैकाक्षरवृद्ध्या क्रमेणोदाहियन्ते ।

तत्र—

(अतिजगत्याम्)

---

१. 'अतिजगतीच्छन्दःपादघटकीभूतानां त्रयोदशसंख्याकानामक्षराणां प्रस्तारे कृते एकशतद्विनवत्यधिकाष्टसहस्र(८१९२)मेदा जायन्ते । तेषु च मेदचतुष्कमेवात्र समुपदिष्टमिति ग्रन्थान्तरेभ्यः समुपलभ्यमाना मेदा अत्र विनिर्दिश्यन्ते । यथा—

सुनन्दिनीच्छन्दः (१३।२३६)—'**सुनन्दिनी** सजसा मगौ ।'
ग० पु० १।२०९।२१.

कन्दुकच्छन्दः (१३।५८६)—'इदं **कन्दुकं** यत्र येभ्यश्चतुर्भ्यो गः ।'

चञ्चरीकावलीच्छन्दः (१३।११५४)—'यमौ रौ विख्याता **चञ्चरीकावली** गः ।' वृ० र० **'मञ्जरीकावली'** इति क्वचित् ।

विश्वच्छन्दः (१३।११७१)—'रैश्चतुर्भिर्युतं गेन युक्तं च **विश्वम्** ।' अ० वृ० र०

चन्द्रलेखाच्छन्दः (१३।११८४)—'नसरयुगगैश्चन्द्र**लेख**र्तुलोकैः ।'
वृत्तरत्नाकरपरिशिष्टे ।

उर्वशीच्छन्दः (१३।१३२४)—'**उर्वशी** नस्ततरगा राज्याङ्गैर्ऋतुभिर्यतिः ।'
मं० म०

मोहप्रलापच्छन्दः (१३।१३२९)—'**मोहप्रलापः** श्रुतिभिर्ग्रहैर्भिन्नो भभत्रगाः ।' मं० म०

चन्द्रिकाच्छन्दः (१३।१३४४)—'ननतरगुरुभिश्च**न्द्रिका**श्वर्षभिः ।' वृ० र०

मृगेन्द्रमुखच्छन्दः (१३।१३९२)—'भवति **मृगेन्द्रमुखं** नजौ जरौ गः ।'

तारकच्छन्दः (१३।१७५६)—'यदि तोटकवृत्तपदे गुरुरेको भवतीह तदा किल **तारकवृत्तम्**' वाणीभूषणे २।१५१.

चण्डीच्छन्दः (१३।१७९२)—'नयुगलसयुगलगैरिति **चण्डी** ।'
वृत्तरत्नाकरछन्दोमञ्जर्यादिषु ।

उपस्थितच्छन्दः (१३।१८२२)—'**उपस्थित**मिदं ज्सौ त्सौ सगुरुकौ चेत् ।'

कुटजगतिच्छन्दः (१३।२०९६)—'**कुटजगति**र्नजौ पञ्चर्तु भ्तौ गुरुः ।'

क्षमाच्छन्दः (१३।२३६८)—'तुरगरसयतिनौं ततौ गः **क्षमा** ।' वृ० र०
अस्यैव छन्दसः **'विद्युत्', 'उत्पलिनी'**ति च नामान्तरे ।

मञ्जुहासिनीच्छन्दः (१३।२७९०)—'जतौ सजौ गो भवति **मञ्जुहासिनी** ।'

प्रहर्षिणी म्नौ जरौ ग् त्रिकदशकौ ॥ ७ । १ ॥

यस्य पादे मगणनगणौ (SSS. ।।।) जगणरगणगकाराश्च (।S।. S।S. S) भवन्ति, तद्वृत्तं 'प्रहर्षिणी' नाम । त्रिभिर्दशभिश्च यतिः । तत्रोदाहरणम्—

मगणः नगणः जगणः रगणः गु०
S·S·S — ।·।·।—।·S·।—S·।·S—S
उत्तुङ्ग(३)स्तनक–लशद्व–योन्नता–ङ्गी(१०)

मगणः नगणः जगणः रगणः गु०
S·S·S ।·।·।—।·S·। S·।·S S
लोलाक्षी(३)विपुल–नितम्ब–शालिनी च(१०) ।

मगणः नगणः जगणः रगणः गु०
S· S· S ।·।·।—।· S·।—S·।·S— S
बिम्बोष्ठी(३)नरव–र! मुष्टि–मेयम–ध्या(१०)

मगणः नगणः जगणः रगणः गु०
S·S·S ।·।·। ।·S·।—S·।·S S
सा नारी(३)भवतु मनःप्र–हर्षिणी ते(१०) ॥

मञ्जुभाषिणीच्छन्दः (१३।२७९६)—'राजसा जगौ भवति **मञ्जुभाषिणी** ।' अस्यैव '**कलहंसः, प्रबोधिता, सिंहनादः, नन्दिनी,**'ति च नामान्तराणि वृत्तरत्नाकरपरिशिष्टादिषूपलभ्यन्ते ।

कलहंसीच्छन्दः (१३।३२७७)—'**कलहंसी** तयसभाः गौ यती रससिद्धिभिः ।' मं० म० ।

रतिच्छन्दः (१३।४०८४)—'चतुर्भिर्नवभिश्छिन्ना **रतिः** सभनसा गुरुः ।' मं० म० ।

कन्दच्छन्दः (१३।४६८२)—

'धजा तूर हारो पुणो तूर हारेण गुरू सद्द किज्जे अ एक्का तआरेण ।
कएसा कला कंदु जंपिज्ज णाएणं असी होइ चउअग्गला सव्वपा एण ॥'
प्राकृतपिङ्गलसूत्रे २।१६३.

पङ्क्तावलीच्छन्दः (१३।६९३९)—

'चामर पढमहि पापगणो धुअ सल्ल चरणगण ठावहि तं जुअ ।
सोलह कलअ पआपअ जाणिअ पिंगल पभणइ **पंकअवालिअं** ॥'
प्राकृतपिङ्गलसूत्रे २।१६५.

१. उक्तत्रयोदशाक्षरप्रस्तारस्य चतुःशतैकाधिकैकसहस्रतमो भेदः (१४०१) '**प्रहर्षिणी**' इति नाम्ना ख्यातः ।

रुचिरा ज्भौ स्जौ ग् चतुर्नवकौ ॥ ७ । २ ॥

यस्य पादे जगणभगणौ (।ऽ।. ऽ।।) सगणजगणौ (।।ऽ. ।ऽ।) गुरुश्च (ऽ), तद्वृत्तं 'रुचिरा'[1] नाम । चतुर्भिर्नवभिश्च यतिः । तत्रोदाहरणम्—

जगणः　भगणः　सगणः　जगणः　गु०
।·ऽ·।—ऽ · ।·।—।·।·ऽ—।·ऽ·।—ऽ
मृगत्व–चा(४)रुचि–रतरा–म्बरक्रि–यः(९)

जगणः　भगणः　सगणः　जगणः　गु०
।·ऽ·।—ऽ · ।·।—।·।·ऽ—।·ऽ·।—ऽ
कपाल–मृ(४)त्कपि–लजटा–प्रपल्ल–वः(९) ।

जगणः　भगणः　सगणः　जगणः　गु०
।·ऽ·।—ऽ · ।·।—।·।·ऽ—।·ऽ·।—ऽ
ल्लाट–दृ(४)ग्दह–नतृणी–कृतस्म–रः(९)

जगणः　भगणः　सगणः　जगणः　गु०
।·ऽ·। ऽ · ।·।—।·।·ऽ—।·ऽ · ।—ऽ
पुनातु वः(४)शिशु–शशिशे–खरः शि–वः(९) ॥

मत्तमयूरं म्तौ य्सौ ग् समुद्रनवकौ ॥ ७ । ३ ॥

यस्य पादे मगणतगणयगणसगणगकाराः (ऽऽऽ. ऽऽ।. ।ऽऽ. ।।ऽ. ऽ) भवन्ति, तद्वृत्तं 'मत्तमयूरम्'[2] नाम । पूर्वैव यतिः । तत्रोदाहरणम्—

मगणः　तगणः　यगणः　सगणः　गु०　मगणः　तगणः　यगणः　सगणः　गु०
ऽ·ऽ·ऽ—ऽ·ऽ·।—।·ऽ·ऽ—।·।·ऽ—ऽ　ऽ·ऽ·ऽ—ऽ·ऽ·।—।·ऽ·ऽ—।·।·ऽ—ऽ
व्यूढोर–स्कः सिंह–समाना–नतम–ध्यः　पीनस्क–न्धः सिन्धु–रहस्ता–यतबा–हुः ।

मगणः　तगणः　यगणः　सगणः　गु०　मगणः　तगणः　यगणः　सगणः　गु०
ऽ·ऽ·ऽ—ऽ·ऽ·।—।·ऽ·ऽ—।·।·ऽ—ऽ　ऽ·ऽ·ऽ—ऽ·ऽ·।—।·ऽ·ऽ—।·।·ऽ—ऽ
कम्बुग्री–वः स्निग्ध–शरीर–स्तनुलो–मा　भुङ्क्ते रा–ज्यं मत्त–मयूरा–कृति ने–त्रः ॥

गौरी नौ न्सौ ग् ॥ ७ । ४ ॥

यस्य पादे नगणत्रयं (।।।. ।।।. ।।।) सगणो (।।ऽ) गुरुश्च (ऽ), तद्वृत्तं 'गौरी'[3] नाम । तत्रोदाहरणम्—

१. उक्तत्रयोदशाक्षरप्रस्तारस्याष्टशतषडधिकद्विसहस्रतमो (२८०६) भेदः **'रुचिरा'** इति नाम्ना ख्यातः । अस्यैव **'अतिरुचिरा'** इत्यपि नाम । २. उक्तत्रयोदशाक्षरप्रस्तारस्य षट्शतत्रयस्त्रिंशदधिकैकसहस्रतमो (१६३३) भेदः **'मत्तमयूरम्'** इति नाम्ना प्रसिद्धः । ३. उक्तत्रयोदशाक्षरप्रस्तारस्याष्टचत्वारिंशदधिकद्विसहस्रतमो (२०४८) भेदो **'गौरी'** इति नाम्ना ख्यातः ।

नगणः नगणः नगणः सगणः गु०	नगणः नगणः नगणः सगणः गु०
।·।·।—।·।·।—।·।·।—।·।·S—S	।·।·।—।·।·।—।·।·।—।·।·S—S
सकल–भुवन–जगण–नतपा–दा	निजप–दभंज–नशमि–त विषा–दा ।
नगणः नगणः नगणः सगणः गु०	नगणः नगणः नगणः सगणः गु०
।·।·।—।·।·।—।·।·।—।·।·S—S	।·।·। ।·।·।—।·।·।—।·।·S—S
विजित–सरसि–रुहन–यनप–द्मा	भरतु सकल–मिह ज–गति गौ–री ॥

(शर्कर्याम्)

---

१. केषुचित् पुस्तकेषु एषैव शक्करी 'शर्करी' इत्युद्दिश्यते । शक्करीच्छन्दःपादघटकीभूतानां चतुर्दशसंख्याकानामक्षराणां प्रस्तारे कृते त्रिशतचतुरशीत्यधिकषोडशसहस्रभेदा (१६३८४) जायन्ते; परमत्र **असंबाधा, अपराजिता, प्रहरणकलिता, वसन्ततिलका** चेति भेदचतुष्टयमेव निर्दिष्टम् । ग्रन्थेष्वन्येष्वन्येऽपि भेदा उपलभ्यन्ते तेऽत्र क्रमशो विलिख्यन्ते—

वासन्तीच्छन्दः (१४।४८१)—'मात्तो नो मो गौ यदि गदिता **वासन्ती**यम् ।'

मध्यक्षामाच्छन्दः (१४।४९७)—'**मध्यक्षामा** युगदशविरामा म्भौ न्मौ गौ ।' '**हंसश्येनी**' इति नामान्तरमन्यत्र ।

कुटिलच्छन्दः (१४।१००९)—'मो भो न्यौ गौ यदि **कुटिल**कमुक्तं वृत्तम् ।' अ० वृ० र०

गोवृषच्छन्दः (१४।१६३३)—'वेदैर्दिग्भिर्मात्तयसा **गोवृष** उक्तो गौ ।' अ० वृ० र०

नान्दीमुखीच्छन्दः (१४।२३६८)—'स्वराभद्वि यदि नौ तौ च **नान्दीमुखी** गौं ।'

नदीच्छन्दः (१४।२८८०)—'ननतजगुरुगैः सप्तयति**र्नदी** स्यात् ।'

कुमारीच्छन्दः (१४।२९९२)—'नजभजगैर्गुरुश्च वसुषट् **कुमारी** ।'

अलोलाच्छन्दः (१४।३०९७)—'द्विसप्तच्छिद**लोला** म्सौ म्भौ गौ चरणे चेत् ।'

इन्दुवदनाच्छन्दः (१४।३८२३)—'**इन्दुवदना** भजसनैः सगुरुयुग्मैः ।'

लक्ष्मीच्छन्दः (१४।३९२५)—'**लक्ष्मी**रन्तविरामा म्सौ तनगुरुयुग्मम् ।'

सुपवित्रच्छन्दः (१४।४०९६)—'त्रिननगगिति वसुयति **सुपवित्रम्** ।'

मञ्जरीच्छन्दः (१४।४८४४)—'सजसा यलौ गिति शरग्रहै**र्मञ्जरी** ।'

पथ्याच्छन्दः (१४।४८४४)—'**पथ्या** सजसयलगैः स्यात्ककुब्भिः श्रुतिभिर्यतिः ।' इयं यतिभेदमात्रेण 'मञ्जर्या' भिद्यते । मं० म०

चन्द्रौरसः (१४।५१०५)—म्भौ न्यौ लगौ चेदिह भवति च **चन्द्रौरसः** ।'

सुकेशरच्छन्दः (१४।५५९२)—'नरनरैर्लगौ च गदितं **सुकेशरम्** ।'

असंबाधा म्तौ न्सौ गाविन्द्रियनवकौ ॥ ७ । ५ ॥

यस्य पादे मगणतगणनगणसगणा (ऽऽऽ. ऽऽ।. ।।।. ।।ऽ) गकारौ (ऽ. ऽ) च भवनस्तद्वृत्तम् 'असंबाधा' नाम । पञ्चभिर्नवभिश्च यतिः । तत्रोदाहरणम्—

मगणः तगणः नगणः सगणः गु० गु०

ऽ · ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।·।·ऽ—ऽ—ऽ

भङ्क्त्वा दु–र्गाणि(५)द्रु–मवन–मखिलं छि–त्त्वा (९)

मगणः तगणः नगणः सगणः गु० गु०

ऽ·ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।·।·ऽ—ऽ—ऽ

हत्वा त–त्सैन्यं(५)क–रितुर–गबलं ह–त्वा (९) ।

मगणः तगणः नगणः सगणः गु० गु०

ऽ·ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।· ।·ऽ—ऽ—ऽ

येनासं–बाधा(५)स्थि–तिरज–नि विप–क्षा–णां (९)

मगणः तगणः नगणः सगणः गु० गु०

ऽ·ऽ·ऽ—ऽ·ऽ · । ।·।·। ।·।·ऽ—ऽ—ऽ

सर्वोर्वी–नाथः(५)स जयति नृपति–र्मु–ञ्जः (९) ॥

अपराजिता नौ र्सौ ल्गौ स्वरऋषयः ॥ ७ । ६ ॥

यस्य पादे नगणौ (।।।. ।।।) रगणसगणलकारा गकारश्च (ऽ।ऽ. ।।ऽ. ।. ऽ) तद्वृत्तम् 'अपराजिता'[2] नाम । सप्तभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

नगणः नगणः रगणः सगणः लं० गु०

।·।·।—।·।·।—ऽ · ।·ऽ—।·।·ऽ—।—ऽ

फणिप–तिवल–यं(७)जटा–मुकुटो–ज्ज्व–लं (७)

नगणः नगणः रगणः सगणः ल० गु०

।·।·।—।·।·।—ऽ · ।·ऽ—।·।·ऽ—।—ऽ

मनसि–जमथ–नं(७)त्रिशू–लविभू–षि–तम् (७) ।

प्रमदाच्छन्दः (१४।७०८८)—'नजभजला गुरुश्च भवति **प्रमदा** ।'

चक्रपदच्छन्दः (१४।८१९१)—'**चक्रपद**मिह भनननलगुरुभिः ।'

वृत्तरत्नाकरपरिशिष्टच्छन्दोमञ्जर्यादिषु ।

१. उक्तचतुर्दशाक्षरप्रस्तारस्य सप्तदशाधिकद्विसहस्रतमो (२०१७) भेदः '**असंबाधा**' इति नाम्ना प्रसिद्धः । २. उक्तचतुर्दशाक्षरप्रस्तारस्याष्टशतचतुर्विंशत्यधिकपञ्चसहस्रतमो (५८२४) भेदः '**अपराजिता**' इति नाम्ना ख्यातः ।

नगणः नगणः रगणः सगणः ल० गु०

।.।.। ।.।.।—S • ।.S ।.।.S—।—S

स्मरसि यदि स–खे(७)शिवं शशिशे–ख–रं (७)

नगणः नगणः रगणः सगणः ल० गु०

।.।.। ।.।.।—S • ।.S—।.।.S—।—S

भवति तव त–नुः(७)परै–रपरा–जि–ता (७) ॥

प्रहरणकलिता नौ भ्नौ ल्गौ च ॥ ७ । ७ ॥

यस्य पादे नगणौ (।।।. ।।।) भगणनगणौ, (S।।. ।।।) लकारो गकारश्च (।. S) भवन्ति, तद्वृत्तं 'प्रहरणकलिता'[1] नाम । चकारात्पूर्वोक्तैव यतिः । तत्रोदाहरणम्—

नगणः नगणः भगणः नगणः ल० गु०

।.।.।—।.।.।—S • ।.।—।.।.।—।—S

सुरमु–निमनु–जै(७)रुप–चितच–र–णां (७)

नगणः नगणः भगणः नगणः ल० गु०

।.।.।—।.।.।—S • ।.।—।.।.।—।—S

रिपुभ–यचकि–त(७)त्रिभु–वनश–र–णाम् (७) ।

नगणः नगणः भगणः नगणः ल० गु०

।.।.।—।.।.।—S • ।.।—।.।.।—।—S

प्रणम–त महि–षा(७)सुर–वधकु–पि–तां (७)

नगणः नगणः भगणः नगणः ल० गु०

।.।.।—।.।.।—S • ।.।—।.।.।—।—S

प्रहर–णकलि–तां(७)पशु–पतिद–यि–ताम् (७) ॥

वसन्ततिलका त्भौ जौ गौ ॥ ७ । ८ ॥

यस्य पादे तगणभगणौ (SS।. S।।) जगणौ (।S।. ।S।) गकारौ (S. S) च तद्वृत्तं 'वसन्ततिलका'[2] नाम । तत्रोदाहरणम्—

तगणः भगणः जगणः जगणः गु० गु०

S.S.।—S.।.।—।.S.।—।.S.।—S—S

उद्धर्षि–णी जन–दृशां स्त–नभार–गु–र्वी

१. उक्तचतुर्दशाक्षरप्रस्तारस्यैकशताष्टाविंशत्यधिकाष्टसहस्रतमो (८१२८) भेदः **'प्रहरणकलिता'** इति नाम्ना ख्यातः । वृत्तरत्नाकरछन्दोमञ्जर्योस्तु 'प्रहरणकलिका' इति पाठः । २. उक्तचतुर्दशाक्षरप्रस्तारस्य नवशतत्रयस्त्रिंशदधिकद्विसहस्रतमो (२९३३) भेदो **'वसन्ततिलका'** इति नाम्ना विख्यातः ।

तगणः मगणः जगणः जगणः गु० गु०

S・S・।—S・।・।—।・S・।—।・S・।—S S

नीलोत्प–लद्युति–मलिम्लु–चलोच–ना च ।

तगणः मगणः जगणः जगणः गु० गु०

S・S・।—S・।・।—।・S・।—।・S・।—S—S

सिंहोन्न–तत्रिक–तटी कु–टिलाल–का–न्ता

तगणः भगणः जगणः जगणः गु० गु०

S・S・।—S・।・।—।・S・।—।・S・।—S—S

कान्ता व–सन्तति–लका नृ–पवल्ल–भा–सौ ॥

पादान्ते यतिः[1] ।

सिंहोन्नता काश्यपस्य ॥ ७ । ९ ॥

इयमेव वसन्ततिलका काश्यपस्याचार्यस्य मतेन 'सिंहोन्नता'[2] नाम भवति । पूर्वमेवोदाहरणम् ।

उद्धर्षिणी सैतवस्य ॥ ७ । १० ॥

इयमेव वसन्ततिलका सैतवस्याचार्यस्य मते 'उद्धर्षिणी'[3] नाम । पूर्वमेवोदाहरणम् ।

(अतिशक्कर्याम्[4])

---

१. 'विरतिः सप्तसप्ताक्षरैर्मता ।' इति कृष्णः । २. 'सिंहोद्धता' इति मं० म० । ३. 'मधुमाधवी' इति गोमानसः, 'चेतोहिता' इति रामकीर्तिः । मं० म० । ४. अतिशक्करीछन्दःपादघटकीभूतानां पञ्चदशसंख्याकानां वर्णानां प्रस्तारे कृते सप्तशताष्टषष्ट्यधिकद्वात्रिंशत्सहस्रभेदा (३२७६८) जायन्ते। तेष्वत्र द्वावेव भेदौ निर्दिष्टौ। अतोऽन्येभ्यो ग्रन्थेभ्य आकृष्योपलभ्यमाना भेदा निर्दिश्यन्ते। यथा—

लीलाखेलच्छन्दः (१५।१)—'एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ।' अस्यैव **'कामक्रीडा'** इति **'सारङ्गिका'** इति च नामान्तरे ।

चित्राच्छन्दः (१५।४६०८)—**'चित्रानामच्छन्दश्चित्रं चेत्त्रयो मा यकारौ ।'**

चन्द्रलेखाच्छन्दः (१५।४६२५)—'म्रौ म्यौ यान्तौ भवेतां सप्ताष्टभिश्चन्द्रलेखा ।' **'चन्द्रसेना'** इति नामान्तरं कृष्णीये ।

चन्द्रकान्ताच्छन्दः (१५।५६५१)—'**चन्द्रकान्ता** मता रौ मः स्यौ विरतिः स्वराष्टौ ।'

ऋषभच्छन्दः (१५।५८६८)—'**ऋषभाख्यमेतदुदितं सजसाः सयौ चेत् ।**'

एलाच्छन्दः (१५।८१७२)—'सजना नयौ शरदशयतिरियमेला ।' **'रेखा'** इत्यस्या नामान्तरम् ।

चन्द्रावर्ता नौ नौ स् ॥ ७ । ११ ॥

यस्य पादे नगणाश्चत्वारः (।।।. ।।।. ।।।. ।।।) सगणश्च (।।ऽ), तद्वृत्तं 'चन्द्रावर्ता' नाम । तत्रोदाहरणम्—

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—। · ।·।—।·।·।—।·।·ऽ

पटुज–वपव–न(७)चलि–तजल–लहरी (८)

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—। · ।·।—।·।·।—।·।·ऽ

तरलि–तविह-ग(७)निव–हरव—मुखरम् (८)।

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—। · ।·।—।·।·। ।·।·ऽ

विकसि–तकम–ल(७)सुर–भिशुचि सलिलं (८)

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—। · ।·।—।·।·।—।·।·ऽ

विचर–ति पथि–क(७)मन–सि शर–दि सरः (८) ॥

विपिनतिलकच्छन्दः (१५।९६९६)—'**विपिनतिलकं** नसनरेफयुग्मैर्भवेत् ।'

प्रभद्रकच्छन्दः (१५।१११८४)—'भवति नजौ भजौ रसहितौ **प्रभद्रकम्** ।'

अस्यैव '**सुखेलकम्**' इति नामान्तरम् ।

उपमालिनीच्छन्दः (१५।११५८४)—'ननतभरकृताष्टस्वरैरु**पमालिनी** ।'

मानसहंसच्छन्दः (१५।११६२८)—'कथयन्ति **मानसहंस**नाम सजौ जभर् ।'

निशिपालकच्छन्दः (१५।१२००५)—'शंस **निशिपालक**मिदं भजसनाश्च रः ।'

वृत्तरत्नाकरतत्परिशिष्टच्छन्दोमञ्जर्यादिषु ।

नलिनीच्छन्दः (१५।१३०४४)—'सगणैः शिववक्त्रमितैर्गदिता **नलिनी** ।'

भ्रमरावलीच्छन्दः (१५।१४०४४)—

'कर पंच पसिद्ध विलद्धवरं रअणं पभणंति मणोहर छंदवरं रअणं ।
गुरु पंच दहा लहु एरिसिअं रइअं **भमरावलि** छंद पसिद्ध किअं ठइअं ॥'
(प्रा० पि० सू० २।१८५)

तूणकच्छन्दः (१५।१९०२३)—'**तूणकं** समानिकापदद्वयं विनान्तिमम् ।'

अत्र–'द्वीपवसुभिर्यतिः ।' इति कृष्णः । अस्यैव '**चामर**' इति नामान्तरम् ।

१. उक्तपञ्चदशाक्षरप्रस्तारस्य त्रिशतचतुरशीत्यधिकषोडशसहस्रतमो (१६३८४) भेदः '**चन्द्रावर्ता**' इति नाम्ना ख्यातः । अत्रोदाहरणे 'चन्द्रावर्ता' इति चतुर्गुरुकं नाम प्रवेष्टुमशक्यमिति न प्रवेशितम् । अत एव वृत्तरत्नाकरादिषु '**शशिकला**' इत्येव नाम समुपलभ्यते । प्राकृतपिङ्गलसूत्रे च अस्यैव छन्दसः '**शरभः**' इति नाम.

अत्र स्वरैर्वसुभिश्च यतिरित्याम्नायः ।

मालर्तुनवकौ चेत् ॥ ७ । १२ ॥

सैव चन्द्रावर्ता 'माला' नाम भवति; यदा षष्ठे, नवमे च वर्णे यतिः । तत्रोदाहरणम्-

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·। — ।·।·।—।·।·।—।·।·ऽ

नववि–कसित(६)–कुवल–यदल–नयने (९)

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·। — ।·।·। ।·।·। ।·।·ऽ

निशम–य नव(६)–जलध–रमिह गगने (९)।

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·। — ।·।·।—।·।·। ।·।·ऽ

अपन–य रुष(६)–मुपस–र मम सविधं (९)

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·। — ।·।·।—।·।·।—।·।·ऽ

यदि र–तिसुख(६)–मभिल–षसि ब–हुविधम् (९) ॥

मणिगुणनिकरो वस्वृषयः ॥ ७ । १३ ॥

सैव चन्द्रावर्ता 'मणिगुणनिकरो' नाम भवति, यदाष्टभिः, सप्तभिश्च यतिः । तत्रोदाहरणम्—

नगणः नगणः नगणः नगणः सगणः

।·।·।—।· ।·।—।·। · ।—।·।·।—।·।·ऽ

कथम–पि निप–तित(८)म–तिमह–ति पदे (७)

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—।·। · ।—।·।·।—।·।·ऽ

नरम–नु–सर–ति न(८)फ–लमनु–पचितम् (७)।

नगणः नगणः नगणः नगणः सगणः

।·।·।—।·।·।—।·। · ।—।·।·।—।·।·ऽ

अपि व–रयुव–तिषु(८)कु–चतट–निहितः (७)

---

१. अत्र यतिभेदादेव नामान्तरम् । २. 'मणिगणनिकरो' क० मु० पुस्तके । ३. अत्र यतिभेदादेव नामान्तरम् ।

नगणः नगणः नगणः नगणः सगणः

।·।·। ।·।।—।·। · ।—।·।·।—।·।·ऽ

स्पृशति न वपु–रिह(८)म–णिगुण–निकरः (७) ॥

मालिनी नौ म्यौ य् ॥ ७ । १४ ॥

यस्य पादे नगणौ, मगणयगणौ, यगणश्च (।।।. ।।।. ऽऽऽ. ।ऽऽ. ।ऽऽ) भवति, तद्वृत्तं 'मालिनी' नाम । पूर्वैव यतिः । तत्रोदाहरणम्—

नगणः नगणः मगणः यगणः यगण

।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ—।·ऽ·ऽ

अतिवि–पुलल–लाटं(८)पी–वरोरः–कपाटं (७)

नगणः नगणः मगणः यगणः यगणः

।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ—।·ऽ·ऽ

सुघटि–त दश–नोष्ठं(८)व्या–घ्रतुल्य–प्रकोष्ठम् (७) ।

नगणः नगणः मगणः यगणः यगणः

।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ—।·ऽ·ऽ

पुरुष–मशनि–लेखा(८)ल–क्षणं वी–रलक्ष्मी (७)

नगणः नगणः मगणः यगणः यगणः

।·।·।—।·।·।—ऽ·ऽ · ऽ—।·ऽ·ऽ—।·ऽ·ऽ

रतिसु–रभिय–शोभि(८)र्मा–लिनी–वा–भ्युपैति (७) ॥

(अष्टौ[२])

---

१. उक्तपञ्चदशाक्षरप्रस्तारस्य षट्शतद्विसप्तत्युत्तरचतुःसहस्रतमो (४६७२) भेदो **'मालिनी'** इति नाम्ना ख्यातः । २. अष्टिच्छन्दःपादघटकीभूतानां षोडशाक्षराणां वर्णप्रस्तारनियमेन प्रस्तारे कृते पञ्चशतषट्त्रिंशदधिकपञ्चषष्टिसहस्रभेदा (६५५३६) जायन्ते । तेष्वत्र ऋषभगजविलसितनामैक एव भेदो निर्दिष्टः । तदतिरिक्ता ग्रन्थान्तरेषूपलभ्यमानभेदा यथा—

ब्रह्मरूपकच्छन्दः(१६।१)—

'उम्मत्ता जोहा उट्ठे कोहा उप्पांउप्पी जुज्झंता
मेणक्का रंभा णाहे दंभा अप्पाअप्पी बुज्झंता ।
धावंता रळा छिण्णाकंठा मत्थापिट्ठी सेक्खत्ता
संमग्गा भग्गा जाए अग्गा लुद्धा उद्धा हेरंता ॥'

(प्रा० पिं० स० २।२०९)

प्रवरललितच्छन्दः (१६।१०१७८)—

'यमौ नः स्रौ गश्च **प्रवरललितं** नाम वृत्तम् ।'

चञ्चलाच्छन्दः (१६।१०९२३)—

'दिज्जिआ सुपण्ण आइ एक्क तो पओहराइँ
हिण्णिरूअ पंच वंकसव्वलो मणोहराइँ
अंत दिज्ज गंधवण्ण अक्खराइ सोलहाइँ
चंचला विणिम्मिआ फणिंदु एहु दुल्लहाइँ ॥'

(प्रा० पि० सू० २।२०६)

वाणिनीच्छन्दः (१६।११९८४)—'नजभजरैर्यदा भवति **वाणिनी** गयुक्तैः ।'

मन्दाकिनीच्छन्दः (१६।१७४७७)—

'**मन्दाकिनी**तमयर्ना गो वेदैर्वेदयतिर्भवेत् ।' मं० म० ।

गरुडरुतच्छन्दः (१६।१९४०६)—'**गरुडरुतं** नजौ भजतगा यदा स्युस्तदा ।'

छन्दोमञ्जर्याम् ।

नराचच्छन्दः (१६।२१८४६)—

'णरेंद जत्थ सव्वलो सुपण्ण वेवि दीसए पइक्क ठाम पंचमे कला चतूरवीसए ।
पलंत हारु चारु सारु अंत जस्स वट्टए पसिद्ध ए **णराउ** जंपु गंधवंक अट्ठए ॥'

(प्रा० पि० सू० २।२०२)

अस्यैव ग्रन्थान्तरेषु '**पञ्चचामर**'मिति नामान्तरम् ।

प्रमदाच्छन्दः (१६।२६२१२)—'**प्रमदा** सत्यसभगा वर्णैर्वर्णयतिर्भवेत् ।'

मं० म० ।

मणिकल्पलताच्छन्दः (१६।२७८२४)—

'नजरभभेन गेन च स्यान्**मणिकल्पलता** ।'

नीलच्छन्दः (१६।२८०८७)—

'**णील**सरूअ विआणहु मत्तह बाइसही
पंच भगण्ण पणा पड आसिअ एरिसही ।
अंत ठिआ जहिं हार मुणिज्जइ हे रमणी
बावण अग्गल तिण्णि सआ धुअ रूअ मुणी ॥'

(प्रा० पि० सू० २।२०४)

अस्या '**अश्वगतिः**' इति नामान्तरं वृ० र० प० ।

मदनललिताच्छन्दः (१६।२९१६९)—

'म्भौ नो म्नौ गो **मदनललिता** वेदैः षड्तुभिः ।'

धीरललिताच्छन्दः (१६।३०१५१)—

'संकलिता भरौ नरनगाश्च **धीरललिता** ।

ऋषभगजविलसितं भ्रौ नौ नृगौ स्वरनवकौ ॥ ७ । १५ ॥

यस्य पादे भगणरगणौ, नगणास्त्रयो, गकारश्च भवति (ऽ॥. ऽ।ऽ. ।।।. ।।।. ।।।. ऽ) तद्वृत्तं 'ऋषभगजविलसितं' नाम । सप्तभिर्नवभिश्च यतिः । तत्रोदाहरणम्—

भगणः रगणः नगणः नगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—। ।·।—।·।·।—।·।·।—ऽ

आयत–बाहुद–ण्ड(७)मुप–चितपृ–थुहृद–यं (९)

भगणः रगणः नगणः नगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—। · ।·।—।·।·।—।·।·।—ऽ

पीनक–टिप्रदे–श(७)मृष–भगज–विलसि–तम् (९) ।

भगणः रगणः नगणः नगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—। · ।·।—।·।·।—।·।·।—ऽ

वीरमु–दारस–त्त्व(७)मति–शयगु–णरसि–कं (९)

भगणः रगणः नगणः नगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—। · ।·।—।·।·।—।·।·।—ऽ

श्रीरति–चञ्चला–पि(७)न प–रिहर–ति पुरु–षम् (९) ॥

(अत्यष्टौ)

चकिताच्छन्दः (१६।३०७५१)—'भात्समतनगैरष्टच्छेदे स्यादिह **चकिता** ।'

वरयुवतिच्छन्दः (१६।३२३४३)—

'भो रयना नगौ च यस्यां **वरयुवति**रियम् ।'

सुललिताच्छन्दः (१६।३२४८८)—

'न्मौजन्नगाः **सुललिता** युगैर्युगयतिर्भवेत् ।' मं० म० ।

चित्रच्छन्दः (१६।४३६९१)—'**चित्र**संज्ञमीरितं समानिकापदद्वयं तु ।'

अचलधृतिच्छन्दः (१६।६५५३६)—'द्विगुणितवसुलघुभि**रचलधृति**रिह ।'

१. उक्तषोडशाक्षरप्रस्तारस्य सप्तशतसप्तविंशत्यधिकद्वात्रिंशत्सहस्रतमो भेदः (३२७२७) **'ऋषभगजविलसितम्'** इति नाम्ना प्रसिद्धः । **'गजविलसितम्'** इति नामान्तरं मं० म० । **'ऋषभगजविजृम्भित'**मिति गारुडे । २. अत्यष्टिछन्दः-पादघटकीभूतानां सप्तदशसंख्याकानामक्षराणां प्रस्तारे कृते एकसहस्रद्विसप्तत्यधिकत्रयोदशलक्षसंख्याका (१३०१०७२) भेदा जायन्ते तेष्वत्र चतुर्णामेव भेदानां निर्देशः । ग्रन्थान्तरेषु निम्नलिखितनामानोऽन्येऽपि प्राप्यन्त इति तत उद्धृत्य लिख्यन्ते यथा—

हरिणी न्सौ म्रौ स्लौ गृतुसमुद्रऋषयः ॥ ७ । १६ ॥

यस्य पादे नगणसगणमगणरगणसगणलकारगकाराश्च (।।।. ।।ऽ. ऽऽऽ. ऽ।ऽ. ।।ऽ. ।. ऽ), तद्वृत्तं 'हरिणी'[1] नाम । षड्भिः, चतुर्भिः, सप्तभिश्च यतिः ।

नगणः सगणः मगणः रगणः सगणः ल० गु०

।·।·।—।·।·ऽ — ऽ·ऽ·ऽ—ऽ · । ऽ—।·।·ऽ—।—ऽ

कुवल-यदल(६)-श्यामा पी-नो(४)न्नत-स्तनशा-लि-नी (७)

नगणः सगणः मगणः रगणः सगणः ल० गु०

।·।·।—।·।·ऽ — ऽ·ऽ·ऽ— ऽ · ।·ऽ—।·।·ऽ—।—ऽ

चकित-हरिणी(६)नेत्रच्छा-या(४)मंदा[2]-लसलो-च-ना (७) ।

चित्रलेखाच्छन्दः (१७।२२९००)—

'ससजा भजगा गुदिक्स्वरैर्भवति **चित्रलेखा** ।'

वृत्तरत्नाकरतत्परिशिष्टछन्दोमञ्जर्यादिषु ।

मालाधरच्छन्दः (१७।३८७५२)—

'पढम दिअ विप्पआ तहवि भूअइ त्थप्पिआ
चरणगण तीअओ तह अ भूअइ दीअओ
चमरजुअअग्गला विमलगंध हारुजला
भणइ फणिणाहरा मुणहु छंद **मालाहरा** ॥'

(प्रा० पि० सू० २।२१९)

घनमयूरच्छन्दः (१७।४२९५४)—'कथितं च **घनमयूरं** ननभसरलगं स्वरै रसैश्छिन्नम् ।' मं० म० ।

हरिच्छन्दः (१७।४६१४४)—'रसयुगहययुङ्नौ स्रौ सो लगौ हि यदा **हरिः** ।'

कान्ताच्छन्दः (१७।४६५७६)—'भवेत्**कान्ता** युगरसहयैर्यभौ नरसा लगौ ।' **'भाराक्रान्ता'** अ० वृ० र० ।

नर्कुटकच्छन्दः (१७।५६२४०)—'हयदशभिर्नजौ भजजला सगु **नर्कुटकम्** ।' वृ० र०-तत्कुटकम्-इति पा० ।

कोकिलकच्छन्दः (१७।५६२४०)—'मुनिगुहकार्णवैः कृतयति वद **कोकिलकम्** ।'-नर्कुटकमेव यतिभेदात् **'कोकिलकम्** ।'

कलातन्त्रच्छन्दः (१७।५९३६२)—

'कलातन्त्रं यो तनसभलघुभिर्गेन सहितम् ।'

१. उक्तसप्तदशाक्षरप्रस्तारस्यैकशतद्वादशाधिकषट्चत्वारिंशत्सहस्रतमो (४६११२) भेदो **'हरिणी'** इति नाम्ना ख्यातः । २. 'मलिम्लुचलोचना' इति पाठः ।

नः मगणः रगणः सगणः ल० गु०

।·।·।—। S·S·S—S · ।·S—।·।·S—।—S

मनरि -जधनु(२ ांनिर्घा-षैं(४)रिव-श्रुतिपे-श-लैं (७)—

नगणः सगणः मगणः रगणः सगणः ल० गु०

।·।·। ।·।·S — S·S·S—S · ।·S—।·।·S—।—S

मनसि ललना(६)-लीलाला-पैः(४)करो-ति ममो-त्स-वम् (७) ॥

एतद्वृषभविलसितमित्यपरे ।

पृथ्वी जसौ जसौ यलौ ग् वसुनवकौ ॥ ७ । १७ ॥

यस्य पादे जगणसगणौ (।ऽ।. ।।ऽ) पुनर्जगणसगणौ (।ऽ।. ।।ऽ) यगणलकारगकाराश्च (।ऽऽ. ।. ऽ), तद्वृत्तं 'पृथ्वी' नाम । अष्टभिर्नवभिश्च यतिः । तत्रोदाहरणम्—

जगणः सगणः जगणः सगणः यगणः ल० गु०

।·S· ।—।·।·S—।·S · ।—।·।·S ।·S·S ।—S

हताः स-मिति श-त्रव(८)स्त्रि-भुवने विकीर्णं य-शः (९)

जगणः सगणः जगणः सगणः यगणः ल० गु०

।·S·। ।·।·S ।·S · ।—।·।·S—।·S·S—।—S

कृतश्च गुणिनां गृहे(८)नि-रवधि-र्महानु-त्स-वः (९) ।

जगणः सगणः जगणः सगणः यगणः ल० गु०

।·S·।—।·।·S—।·S · ।—।·।· S—।· S·S—।—S

त्वया कृ-तपरि-ग्रहे(८)क्षि[2]-तिप वी-र! सिंहा-स-ने (९)

जगणः सगणः जगणः सगणः यगणः ल० गु०

।·S·।—।·।·S—।·S · ।—।·।·S ।·S·S ।—S

नितान्त-निरव-ग्रहा(८)फ-लवती च पृथ्वी कृ-ता (९) ॥

वंशपत्रपतितं भ्रौ न्भौ न्लौ ग् दिगृषयः ॥ ७ । १८ ॥

यस्य पादे भगणरगणनगणभगणनगणलकारगकारा (ऽ।।. ऽ।ऽ. ।।।. ऽ।।. ।।।. ।. ऽ) भवन्ति, तद्वृत्तं 'वंशपत्रपतितम्' नाम । दशभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

---

१. उक्तसप्तदशाक्षरप्रस्तारस्य सप्तशतपञ्चाशदधिकाष्टात्रिंशत्सहस्रतमो (३८७५०) भेदः **'पृथ्वी'** इति नाम्ना प्रसिद्धः । २. 'तुडिगवीरासिंहासने' इति लि० पुस्तके । ३. उक्तसप्तदशाक्षरप्रस्तारस्य नवशतत्रिनवत्युत्तरैकषष्टिसहस्रतमो (६१९९३) भेदो **वंशपत्रपतितम्'** इति नाम्ना प्रसिद्धः ।

भगणः रगणः नगणः भगणः नगणः ल० गु०

S·I·I—S·I·S—I·I·I—S · I·I—I·I·I—I—S

अथ कु–रुष्व क–र्म सुकृ–तं(१०)यद–परदि–व–से (७)

भगणः रगणः नगणः भगणः नगणः ल० गु०

S·I·I—S·I·S—I·I·I—S · I·I I·I·I—I S

मित्र! वि–धेयम–स्ति भव–तः(१०)किमु चिरय–सि तत्? (७)।

भगणः रगणः नगणः भगणः नगणः ल० गु०

S·I·I—S·I·S—I·I·I—S · I·I—I·I·I—I—S

जीवित–मल्पका–लकल–ना(१०)लघु–तरत–र–लं (७)

भगणः रगणः नगणः भगणः नगणः ल० गु०

S·I·I S·I·S—I·I·I—S · I·I—I·I·I—I—S

नश्यति वंशप–त्रपति–तं(१०)हिम–सलिल–मि–व (७) ॥

मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः ॥ ७ । १९ ॥

यस्य पादे मगणभगणनगणाः, (SSS. SII. III) तगणौ, (SSI. SSI) गकारौ च (S. S) तद् 'मन्दाक्रान्ता' नाम। चतुर्षु षट्सु सप्तसु च यतिः। तत्रोदाहरणम्—

मगणः भगणः नगणः तगणः तगणः गु० गु०

S·S·S—S · I·I—I·I·I—S · S·I—S·S·I S—S

प्रत्यादि–ष्टं(४)सम–रशिर–सः(६)कान्दि–शीभूय न–ष्टं (७)

मगणः भगणः नगणः तगणः तगणः गु० गु०

S· S·S—S · I·I—I·I·I—S · S·I—S·S·I S—S

त्वं निःशे–षं(४)कुरु रिपुब–लं(६)मार्ग–मासाद्य स–द्यः (७)।

मगणः भगणः नगणः तगणः तगणः गु० गु०

S · S · S—S · I·I—I·I·I—S · S·I—S·S·I—S—S

किं नाश्रौ–षीः(४)परि–णतधि–यां(६)नीति–मार्गोप–दे–शं? (७)

मगणः भगणः नगणः तगणः तगणः गु० गु०

S·S· S—S · I·I—I·I·I—S · S·I—S·S · I—S—S

मन्दाक्रा–न्ता(४)भव–ति फलि–नी(६)वारि–लक्ष्मीः क्ष–या–य (७) ॥

शिखरिणी यमौ न्सौ भ्लौ गृतुरुद्राः ॥ ७ । २० ॥

---

१. उक्तसप्तदशाक्षरप्रस्तारस्य नवशतैकोनत्रिंशदुत्तराष्टादशसहस्रतमो (१८९२९) भेदो 'मन्दाक्रान्ता' इति नाम्ना प्रसिद्धः।

18929

यस्य पादे यगणमगणनगणसगणभगणलकारगकाराश्च (।ऽऽ. ऽऽऽ. ।।।. ।।ऽ. ऽ।।. ।. ऽ) भवन्ति, तद्वृत्तं 'शिखरिणी' नाम । षड्भिरेकादशसु च यतिः । तत्रोदाहरणम्—

यगणः मगणः नगणः सगणः भगणः ल० गु०

।·ऽ·ऽ—ऽ·ऽ·ऽ ।·।·। ।·।·ऽ—ऽ·।·।— ।—ऽ

यशःशे–षीभूते(६) जगति नरना–थे गुण–नि–धौ (११)

यगणः मगणः नगणः सगणः भगणः ल० गु०

।·ऽ·ऽ ऽ·ऽ·ऽ ।·।·।—।·।·ऽ—ऽ · ।·।—।—ऽ

प्रवृत्ते वैराग्ये(६) विषय–रसनि–ष्क्रान्तम–न–साम् (११)

यगणः मगणः नगणः सगणः भगणः ल० गु०

।·ऽ·ऽ—ऽ·ऽ·ऽ ।·।·।—।·।·ऽ—ऽ·।·।—।—ऽ

इदानी–मस्माकं(६) घनत–रुलता–निर्झर–व–तीं (११)

यगणः मगणः नगणः सगणः भगणः ल० गु०

।·ऽ·ऽ—ऽ·ऽ·ऽ ।·।·। ।·।·ऽ—ऽ · ।·।—।—ऽ

तपस्त–मुं चेतो(६) भवति गिरिमा–लां शिख–रि–णीम् (११) ॥

(धृत्याम्)

---

१. तथैव चतुःशतत्रिंशदधिकोनषष्टिसहस्रतमो (५९४३०) भेदः **'शिखरिणी'**-इति नाम्ना प्रसिद्धः । २. 'तुडिगनरनाथे' इति लि० पुस्तके । ३. धृतिच्छन्दःपादघटकीभूतानामष्टादशाक्षराणां प्रस्तारगत्या लक्षद्विकमेकशतचतुश्चत्वारिंशदुत्तरद्विषष्टिसहस्राणि (२६२१४४) च भेदाः । तेषु 'कुसुमितलतावेल्लिता' नाम वृत्तमेकमेवात्र निर्दिष्टम् । प्राकृतपिङ्गलसूत्रछन्दोमञ्जरीवृत्तरत्नाकरपरिशिष्टेषु त्वधिका भेदा उदाहृताः सन्तीति तत उद्धृत्य तेषां नामानि लिख्यन्ते—

शार्दूलच्छन्दः (१८।१००७३)—

'शार्दूलं वद मासषट्कयति मः सौ जसौ रो मश्चेत् ।

मञ्जीराच्छन्दः (१८।१२६७३)—

'कुंतीपुत्ता तिण्णा दिण्णउ मंथा संठवि एक्का पाए
हारा हत्था दुण्णा कंकणु गंधा संठवि जुग्गा जाए।
चारी हारा भव्वाकारउ पाआअंतहि सज्जीआए
सप्पाराआ सुद्धाकाअउ जंपे पिंगल **मंजीरा** ए ॥'

(प्रा० पि० सू० २।२२७)

चित्रलेखाच्छन्दः (१८।१८८९१)—

'वर्णाश्चैर्मगननततमकैः कीर्तिता **चित्रलेखेयम्** ।'

क्रीडाचन्द्रच्छन्दः (१८।३७४५०)—

'ज इंदासणा एक गण्णा सु होवेइ पाए हि पाए
दहा अट्ठ वण्णा सुहावेइ दंडा सुठाए सुठाए ।
दहा तिण्णिगुण्णा जहा सव्वला होइ मत्ता सुपाए
फणिंदा भणंता **किलाचंद** छंदा णिबद्धाइ जाए ॥'

(प्रा० पि० सू० २।२२९)

चित्ररेखाच्छन्दः (१८।३७८७३)—

'मन्दाक्रान्ता नपरलघुयुता कीर्तिता **चित्ररेखा** ।'

नाराचच्छन्दः (१८।७४९५४)—'इह ननरचतुष्कसृष्टं तु **नाराच**माचक्षते ।' षोडशाक्षरप्रस्तारे नराचः, अत्र तु नाराच इत्यनयोर्भेदः । नाराचस्यैव '**सिंह-विक्रीडितम्**' '**महामालिका**' इति नामान्तरे अन्यत्र । अस्यैव यतिभेदात् '**लालसा**' इति नामोक्तमन्यैः–'दशवसुविरतिर्ननौ रैश्चतुर्भिर्युतौ **लालसा**' इति । '**निशा**' इति मं० म०

विलासच्छन्दः (१८।७४९६९)—'**विलासो** मः ससौ राश्च गुणषड्वसुभि-र्यतिः ।' मं० म०

नन्दनच्छन्दः (१८।७६७२०)—'नजभजरैस्तु रेफसहितैः शिवैर्हयैर्**नन्दनम्** ।'

हरिणप्लुतच्छन्दः (१८।९२९५७)—

'मात्सो जौ भरसंयुतौ करिबाणकैर्**हरिणप्लुतम्** ।'

चर्चरीच्छन्दः (१८।९२९५९)—

'पाअ णेउर झंझणक्कइ हंससद्दसुसोहणा
थोलथोलथणग्ग णच्चइ मोत्तिदाम मणोहरा ।
वामदाहिण वाण धावइ तिक्खचक्खुकडक्खआ
काहि पूरिस गेहमंडणि एह सुंदरि पेक्खआ ॥'

(प्रा० पि० सू० २।२३२)

'**हरनर्तनम्**' इति नामास्या वृ० र० । '**विबुधप्रिया**' इति ।

हरनर्तनच्छन्दः (१८।९२९८९)—'सौ जजौ भरसंयुतौ करिबाणकैर्**हरनर्तनम्** ।'–वृ० र० । '**कुमुद्वती**' इति वृ० म० को०

मल्लिकाच्छन्दः (१८।९३०११)—'**मल्लिका** स्याद्रसजजा भरौ छिन्नाष्टपङ्क्तिभिः ।' मं० म०

चलच्छन्दः (१८।९३१०९)—

'म्भौ न्जौ भ्रौ चेच्चलमिदमुदितं युगैर्मुनिभिः स्वरैः ।'

शार्दूलललितच्छन्दः (१८।११६५०९)—

'मः सो जः सतसा दिनेशऋतुभिः **शार्दूलललितम्** ।'

(छन्दोमञ्जर्याम्)

कुसुमितलतावेल्लिता[1] म्तौ न्यौ याविन्द्रियर्तुस्वराः ॥ ७ । २१ ॥

यस्य पादे मगणतगणनगणयगणा (SSS. SSI. III. ISS) यगणौ (ISS. ISS) च तद्वृत्तं 'कुसुमितलतावेल्लिता' नाम । पञ्चसु, षट्सु, सप्तसु च यतिः । तत्रोदाहरणम्—

मगणः नगणः नगणः यगणः यगणः यगणः
S·S·S—S·S · —·I·I—··S · S—I·S·S—I·S·S
अन्याना–मंताः(५)कु–सुमित–लता(६)वे–ल्लितोत्फु–ल्लवृक्षाः (७)

मगणः नगणः नगणः यगणः यगणः यगणः
S·S·S S·S —·I·I—··S · S—I·S·S—I·S·S
सोत्कण्ठं कूज(५)त्प–रभृत–कला(६)ला–पकोला–हलिन्यः (७) ।

मगणः तगणः नगणः यगणः यगणः यगणः
S·S·S S·S · I—·I·I—I·S · S—I·S·S—I·S·S
मध्वादौ माद्य(५)न्म–धुकर–कलो(६)द्गी–तझङ्का–ररम्या (७)

मगणः तगणः नगणः यगणः यगणः यगणः
S·S·S—S·S · I—I·I·I—I·S · S—I·S·S—I·S·S
ग्रामान्तः–स्रोतः(५)प–रिसर–भुवः(६)प्री–तिमुत्पा–दयन्ति (७) ॥

(अतिधृतौ[2])

सुधाच्छन्दः (१८।११६६१४)—'सुधातर्कैस्तर्कैर्भवति ऋतुभिर्यो मो नसतसाः ।'

महासेनच्छन्दः (१८।११८६१३)—

'म्रौ भ्रौ त्सौस्वररुद्रैर्यतिरिति **महासेन**मुदितम् ।'

अश्वगतिच्छन्दः (१८।१२६३३१)—

'पञ्चभकारकृता**श्वगति**र्यदि चान्तसरचिता ।'

शुभच्छन्दः (१८।१२६८४४)—'शुभं सनजना भः सः पापाङ्गाङ्गगुणैर्यतिः ।'— मं० म० । **'शुभचरितं'** इति वृ० म० को०

भ्रमरपदकच्छन्दः (१८।१३०९७१)—

'भाद्रनना नसौ **भ्रमरपदक**मिदमभिहितम् ।'

१. उक्ताष्टादशाक्षरप्रस्तारस्याष्टशतसप्तपञ्चाशदधिकसप्तत्रिंशत्सहस्रतमो (३७८५७) भेदः **'कुसुमितलतावेल्लिता'** इति नाम्ना प्रसिद्धः । २. अतिधृतिच्छन्दःपादघटकीभूतानामूनविंशत्यक्षराणां प्रस्तारे कृते लक्षपञ्चकम्, चतुर्विंशतिसहस्राणि, अष्टाशीत्यधिकद्विशतं (५२४२८८) भेदा जायन्ते तत्र शार्दूलविक्रीडितमन्तरा ग्रन्थान्तरेषूपलभ्यमाना भेदा यथा—

शम्भुच्छन्दः (१९।३१७२)—'दशबाणाधैर्यतिधारी स्तौ यभमा मो गः **शम्भुः** प्रोक्तः ।' अ० वृ० र०–'नवबाणाक्षैरि'ति पाठान्तरम् ।

मेघविस्फूर्जिताच्छन्दः (१९।७५७१३)—

'रसर्त्वश्वैर्म्यौ न्सौ ररगुरुयुतौ **मेघविस्फूर्जिता** स्यात् ।' वृ० र०

पुष्पदामच्छन्दः (१९।७५७४५)—

'भूताश्वाश्वान्तं मतनसररगैः कीर्तितं **पुष्पदाम** ।'

अस्य **'फुल्लदाम'** इति संज्ञान्तरं छ० मं०

छायाच्छन्दः (१९।८३९०५)—

'भवेत्सैव **च्छाया** तयुगगयुता स्याद्वादशान्ते यदा ।'

बिम्बच्छन्दः (१९।१४९४७३)—

'वृत्तं **बिम्बाख्यं** शरमुनितुरगैर्म्तौ न्सौ ततौ चेद्गुरुः ।'

छायाच्छन्दः (१९।१५७६३४)—

'इयं **च्छाया** ख्याता ऋतुरसहयैर्यौ मनसा भ्तौ गुरुः ।'

पञ्चचामरच्छन्दः (१९।१७४८४८)—

'नयुगललगुरु निरन्तरं यदा स **पञ्चचामरः** ।'

मणिमञ्जरीच्छन्दः (१९।१८५३३०)—

'युगाश्वैः स्याद्भनयजजगाः कीर्तिता **मणिमञ्जरी** ।'

सरलच्छन्दः (१९।१८६०४०)—

'नवभिर्दशभिश्छिन्नं **सरलं** न्भ्रसजा जगौ ।' मं० म०

मकरन्दिकाच्छन्दः (१९।१८६३०६)—

'रसैः षड्भिर्लोकैर्यमनसजजा गुरु**र्मकरन्दिका** ।'

वरूथिनीच्छन्दः (१९।१९४४९४)—

'शरत्रयैर्युगैश्छिन्ना जन्भम्नज्गा **वरूथिनी** ।' मं० म०

समुद्रतताच्छन्दः (१९।२१५८७८)—

'गजाब्धितुरगैर्जसौ जसतभा गश्चेत्**समुद्रतता** ।'

(वृत्तरत्नाकरपरिशिष्टे)

सुरसाच्छन्दः (१९।२३७४५७)—

'म्रौ भ्नौ यो नो गुरुश्चेत्स्वरमुनिकरणैराह **सुरसाम्** ।'

चन्द्रमालाच्छन्दः (१९।५२३२६४)—

'ठइवि दिअवरजुअल मज्झ करअल करहिँ

पुण वि दिअवरजुअल मज्झ करअल करहिँ ।

सरसगण विमल जहि सुण्णि ठवइ मनगइ

विमलमइ उरअवइ **चंदमल** कहइ सइ ॥'

(प्रा० पिं० सू० २।२४२)

शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः ॥ ७ । २२ ॥

यस्य पादे मगणसगणौ (SSS. IIS) जगणसगणौ (ISI. IIS) तगणौ गकारश्च (SSI. SSI. S), तद्वृत्तं 'शार्दूलविक्रीडितं' नाम । द्वादशभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

मगणः सगणः जगणः सगणः तगणः तगणः गु०
S·S·S—I·I·S—I·S·I—I·I·S S·S·I—S·S·I—S
कम्बुग्री–वमुद–प्रबाहु–शिखरं(१२)रक्तान्त–दीर्घेक्ष–णं (७)

मगणः सगणः जगणः सगणः तगणः तगणः गु०
S·S·S—I·I·S—I·S·I—I·I·S S·S·I—S·S·I—S
शालप्रां–शुशरी–रमाय–तभुजं(१२)विस्तीर्ण–वक्षःस्थ–लम् (७) ।

मगणः सगणः जगणः सगणः तगणः तगणः गु०
S·S·S—I·I·S—I·S·I—I·I·S S·S·I—S·S·I—S
कीलस्क–न्धमनु–द्धतं प–रिजने(१२)गम्भीर–सत्यस्व–रं (७)

मगणः सगणः जगणः सगणः तगणः तगणः गु०
S·S·S I·I·S—I·S·I—I·I·S —S·S·I—S·S·I—S
राज्यश्रीः समुपै–ति वीर–पुरुषं(१२)शार्दूल–विक्रीडि–तम् (७) ॥

इदानीं कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिश्चेति सप्त कृतयः क्रमेणैकाक्षरवृद्ध्योदाह्रियन्ते—

(तत्र–कृतौ)

धवलाच्छन्दः (१९।२६२१४४)—

'करइ वसु सुणि जुवइ विमलमइ महिअले
ठइअ ठइ रमणि सरसगण पअपअ पले ।
दिअगण चउ चउपअहिँ भण फणिवइ सही
कमलगण सरसमण सुमुहि **धवलअ** कही ॥'
(प्रा० पि० सू० २।२४४)

१. उक्तोनविंशत्यक्षरप्रस्तारस्य त्रिशतसप्तत्रिंशदुत्तरैकोनपञ्चाशत्सहस्राधिकैकलक्षतमो (१४९३३७) भेदः **'शार्दूलविक्रीडितम्'** इति नाम्ना प्रसिद्धः । २. कृतिच्छन्दःपादघटकीभूतानां विंशतिवर्णानां प्रस्तारे कृते लक्षदशकम्, अष्टाचत्वारिंशत्सहस्राणि, षट्सप्तत्यधिकपञ्चशतं च (१०४८५७६) भेदा जायन्ते तेषु सुवदनावृत्ताख्यौ भेदावत्र निर्दिष्टौ । ग्रन्थान्तरेषु तु यथा—

सुवदना म्रौ भ्नौ य्भौ लगावृषिस्वरर्तवः ॥ ७ । २३ ॥

यस्य पादे मगणरगणभगणनगणयगणभगणलकारगकारा (SSS. SIS. SII. III. ISS. SII. I. S) भवन्ति, तद्वृत्तं 'सुवदना' नाम । सप्तसु सप्तसु षट्सु च यतिः । तत्रोदाहरणम्—

मगणः रगणः भगणः नगणः यगणः भगणः ल० गु०

S · S · S—S · I · S—S · I · I—I · I · I—I · S · S—S · I · I—I—S

या पीनो–द्गाढतु–ङ्ग(७)स्तन–जघन–घना(७)भो–गालस–ग–ति (६)—

मगणः रगणः भगणः नगणः यगणः भगणः ल० गु०

S · S · S—S · I · S—S · I · I—I · I · I—I · S · S—S · I · I—I—S

यस्याः क–र्णावतं–सो(७)त्पल–रुचिज–यिनी(७)दी–र्घे च न–य–ने (६) ।

शोभाच्छन्दः (२०१९५१४९०)—'रसैरश्वैरश्वैर्यमननततगैर्गे शोभेयमुक्ता ।'

मत्तेभविक्रीडितच्छन्दः (२०१२९८६२८)—

'सभरा नम्ललगिति त्रयोदशयतिर्**मत्तेभविक्रीडितम्** ।' वृ० र०

उत्पलमालिकाच्छन्दः (२०१३५५७९९)—

'भ्रन्भभ्रलगा ग्रहै रुद्रैर्विच्छिन्नोत्**पलमालिका** ।' मं० म०

गीतिकाच्छन्दः (२०१३७२०७६)—

'सजजा भरौ सलगा यदा कथिता तदा खलु **गीतिका** ।'

अस्यैव छन्दसः प्राकृतपिङ्गलसूत्रे **'गीता'** इति नाम । **'प्रमदाननम्'** इति वृ० र०

मदकलनीच्छन्दः (२०१५०६८८०)—

'**मदकलनी** नजनभसा नलगाश्छिन्ना शराङ्गबाणाङ्गैः ।' मं० म०

कनकलताच्छन्दः (२०१५२४२८८)—

'**कनकलता** सा कथिता षण्नैर्युक्ता तथा लगाभ्यां च ।' मं० म०

गण्डकाच्छन्दः (२०१६९९०५१)—

'रगणा पलंतआ पुणो णरेंद कंतआ सुछकएण
हार एक्क दिज्जही सुसद्द पाअ किज्जही सुसक्कएण ।
गंडआ गणेहु एहु वंकसंखसंखले फणिंद गाउ
तीस मत्त पाअ पत्त हार तीअभागए सुसद्द आउ ॥'

(प्रा० पि० सू० २।२५५)

१. उक्तविंशत्यक्षरप्रस्तारस्य चतुःशतसप्तदशोत्तराष्टसप्ततिसहस्राधिकद्विलक्षतमो (२७८४१७) भेदः **'सुवदना'** इति नाम्ना प्रसिद्धः ।

मगणः रगणः भगणः नगणः यगणः भगणः ल० गु०

ऽ·ऽ·ऽ—ऽ·।·ऽ—ऽ · ।·।—।·।·। ।·ऽ · ऽ ऽ·।·।—।—ऽ

श्यामा स्री–मन्तिनी–नां(७)तिल–कमिव मुखे(७)या च त्रिभु–व–ने (६),

मगणः रगणः भगणः नगणः यगणः भगणः ल० गु०

ऽ·ऽ·ऽ ऽ·।·ऽ ऽ · ।·।—।·।·।—।·ऽ · ऽ—ऽ·।·।—।—ऽ

सम्प्राप्ता साम्प्रतं मे(७)नय–नपथ–मसौ(७)दै–वात्सुव–द–ना (६)॥

ग्लिति वृत्तम् ॥ ७ । २४ ॥

यस्य पादे गकारलकाराः (ऽ.।) क्रमेण भवन्ति, तद् 'वृत्तं' नाम वृत्तम्। कृतिप्रकरणेन यावद्भिरेव विंशत्यक्षराणि पूर्यन्ते, तावतां ग्लां ग्रहणम्। तत्रोदाहरणम्—

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)(१६)(१७)(१८)(१९)(२०)

ऽ·।·ऽ·।·ऽ·।·ऽ·।·ऽ·।· ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।·

ज-न्तु-मा-त्र-दुः-ख-का-रि क-र्म-नि-र्मि-तं भ--व--त्य--न-र्थ--हे--तु

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)(१६)(१७)(१८)(१९)(२०)

ऽ·।·ऽ·।·ऽ· ।·ऽ· ।·ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।·ऽ· ।· ऽ· ।·

ते-न स-र्व-मा-त्म-तु-ल्य-मी-क्ष-मा-ण उ--त्त-मं सु-खं ल--भ--स्व।

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)(१६)(१७)(१८)(१९)(२०)

ऽ·।·ऽ· ।·ऽ· ।·ऽ· ।·ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।·

वि-द्धि बु–द्धि-पू–र्व-कं म-मो–प--दे-श–वा-क्य–मे–त–दा–द—रे—ण

(१)(२)(३)(४)(५)(६)(७)(८)(९)(१०)(११)(१२)(१३)(१४)(१५)(१६)(१७)(१८)(१९)(२०)

ऽ·।·ऽ·।· ऽ·।·ऽ·।·ऽ· ।· ऽ· ।· ऽ· ।· ऽ· ।·ऽ· ।· ऽ· ।·

वृ–त्त-मे–त–दु-त्त–मं म-हा-कु–ल--प्र--सू--त--ज--न्म–नां हि—ता–य।

अत्र पादान्ते यतिः।

(२प्रकृतौ)

---

१. उक्तविंशत्यक्षरप्रस्तारस्यैकपञ्चाशदुत्तरनवनवतिसहस्राधिकषड्लक्षतमो (६९९०५१) भेदो **'वृत्तम्'** इति नाम्ना प्रसिद्धः। 'वृत्तं रजौ रजौ पादे रजौ गो लः' इति गारुडे १।२०९।३५ अस्यैव **'मालवम्'** इति संज्ञा मं० म०। २. प्रकृतिच्छन्दः-पादघटकीभूतानामेकविंशत्यक्षराणां प्रस्तारे कृते लक्षविंशतिः, सप्तनवतिसहस्राणि, एकशतद्विपञ्चाशच्च (२०९७१५२) भेदा जायन्ते। तेषु येऽत्र नोक्तास्ते ग्रन्थान्तरेभ्यः समुद्धृत्य लिख्यन्ते—

नरेन्द्रच्छन्दः (२१।४५०५१९)—

'आइहिँ जत्थ पाअगण पअलिअ जोहल अंत ठवीजे
काहल सद्द गंध ऍम मुनिगण कंकण जाह करीजे।

स्रग्धरा म्रौ भ्नौ यौ य् त्रिःसप्तकाः ॥ ७ । २५ ॥

यस्य पादे मगणरगणभगणनगणास्त्रयश्च यगणाः (ऽऽऽ. ऽ।ऽ. ऽ।।. ।।।. ।ऽऽ. ।ऽऽ. ।ऽऽ), तत् 'स्रग्धरा' नाम वृत्तम् । सप्तसु सप्तसु सप्तसु च यतिः । तत्रोदाहरणम्—

मगणः रगणः भगणः नगणः यगणः यगणः यगणः

ऽ·ऽ·ऽ—ऽ·।·ऽ—ऽ·।·।—।·।·।—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

रेखा–भ्रूः शुभ्रद–न्त(७)द्युति–हसित–शर(७)च–न्द्रिकाचा–रुमूर्ति (७)–

मगणः रगणः भगणः नगणः यगणः यगणः यगणः

ऽ·ऽ·ऽ—ऽ·।·ऽ—ऽ·।·।—।·।·।—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

र्मध्यन्मा–तङ्गली–ला(७)गति–रतिवि–पुला(७)भो–गतुङ्ग–स्तनी या (७)।

मगणः रगणः भगणः नगणः यगणः यगणः यगणः

ऽ·ऽ·ऽ—ऽ·।·ऽ—ऽ·।·।—।·।·।—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

रम्भास्त–म्भोपमो–रू(७)रलि–मलिन–घन(७)स्नि–ग्धधम्मि–ल्लहस्ता (७)

मगणः रगणः भगणः नगणः यगणः यगणः यगणः

ऽ·ऽ·ऽ ऽ·।·ऽ—ऽ·।·।—।·।·।—।·ऽ·ऽ—।·ऽ·ऽ—।·ऽ·ऽ

बिम्बोष्ठी रक्तक–ण्ठी(७)दिश–तु रति–सुखं(७)स्र–ग्धरा सु–न्दरीयम् (७) ॥

(आकृतौ)

सद्दइ एक्क तत्थ चल णरवइ पूरहु संख सुभव्वा

चामरजुग्ग अंत जहि पअलिअ एहु णरेंदउ कव्वा ॥'

प्रा० पि० सू० २।२६३ ।

सरसीच्छन्दः (२१।७११६००)—

'नजभजजा जरौ यदि तदा गदिता **सरसी** कवीश्वरैः ॥'

सरसीवृत्तमेव **'सलिलनिधि'** नाम्ना प्रसिद्धम् । अन्येषां मते **'सिद्धक'**मिति संज्ञितमेतत् ।

सुरनर्तकीच्छन्दः (२१।७६५६१७)—

'सुरनर्तकी रनरना रनरा विरती रसर्तुशास्त्रगुणैः ।' मं० म०

१. उक्तैकविंशत्यक्षरप्रस्तारस्य द्विसहस्रनवशतत्रिनवत्युत्तरत्रिलक्षतमो (३०२९९३) भेदः **'स्रग्धरा'** इति नाम्ना प्रसिद्धः । २. 'चारुकण्ठी' लि० पुस्तके । ३. आकृतिच्छन्दःपादघटकीभूतानां द्वाविंशत्यक्षराणां प्रस्तारे कृते (४१९४३०४) भेदा जायन्ते । तेष्वत्र ये नोक्ताः, परत्र चोक्तास्ते तत आकृष्य लिख्यन्ते—

हंसीच्छन्दः (२२।१०४८३२१)—

'णेत्ताणंदा उग्गे चंदा धवलचमरसमसिअकरविंदा

उग्गे तारा तेआ हारा विअसु कमलवण परिमलकंदा

मद्रकं भ्रौ न्रौ न्रौ न्गौ दिगादित्याः ॥ ७ । २६ ॥

यस्य पादे भगणरगणौ (ऽ।।. ऽ।ऽ) नगणरगणं, (।।।. ऽ।ऽ) पुनर्नगणरगणौ (।।।. ऽ।ऽ) नगणो गकारश्च (।।।. ऽ) भवतस्तद्वृत्तं 'मद्रकम्' नाम । दशभिर्द्वादशभिश्च यतिः । तत्रोदाहरणम्—

भगणः रगणः नगणः रगणः नगणः रगण नगणः गु०

ऽ·।·।—ऽ·।·ऽ ।·।·।—ऽ · ।·ऽ—।·।·। ऽ·।·ऽ—।·।·।—ऽ

मद्रक–गीतिभिः सकृद–पि(१०)स्तुव–न्ति भव! ये भव–न्तमभ–वं (१२)

भगणः रगणः नगणः रगणः नगणः रगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—।·।·।—ऽ · ।·ऽ—।·।·। ऽ·।·ऽ—।·।·।—ऽ

भक्तिभ–रावन–म्रशिर–सः(१०)प्रण–म्य तव पादयोः सुकृति–नः (१२)।

भगणः रगणः नगणः रगणः नगणः रगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—।·।·।—ऽ · ।·ऽ—।·।·।—ऽ·।·ऽ—।·।·।—ऽ

ते पर–मेश्वर–स्य पद–वी(१०)मवा–प्य सुख–माप्नुव–न्ति विपु–लं

भगणः रगणः नगणः रगणः नगणः रगणः नगणः गु०

ऽ·।·।—ऽ·।·ऽ—।·।·।—ऽ ।·ऽ—।·।·।—ऽ·।·ऽ—।·।·।—ऽ

मर्त्यभु–वं स्पृश–न्ति न पु–न(१०)र्मनो–हरसु–राङ्गना–परिवृ–ताः (१२)॥

(विकृतौ)

भासा कासा सव्वा आसा महुरपवण लहलहिअ करता
हंसा सद्दू फुल्लावंधू सरअ समअ सहि हिअअ हरंता ॥'

(प्रा० पि० सू० २।२६८)

मत्तेभच्छन्दः (२२।१९१५७६५)—

'**मत्तेभाख्यं** तभजजसरनगयुक्तं स्वरार्कफणिभिन्नम् ।' मं० म० ।

मदिराच्छन्दः (२२।१६९७५५९)—

'सप्तभकारयुतैकगुरुर्गदितेयमुदारतरा **मदिरा** ।'

१. उक्तद्वाविंशत्यक्षरप्रस्तारस्य (१९३०७११) तमो भेदो '**मद्रकम्**' इति नाम्ना प्रसिद्धः । अस्यैव '**प्रभद्रकम्**' इति नामान्तरं रत्नाकरे । २. अस्य छन्दसः त्र्यशीतिलक्षाणि, अष्टाशीतिसहस्राणि, अष्टोत्तराणि षट्शतानि (८३८८६०८) च भेदा भवन्ति । तेषु भेदद्वयमेवात्र निर्दिष्टम् । परत्र च येऽधिका भेदास्ते यथा—

सुन्दरीच्छन्दः (२३।३५९००४४)—

'जहिँ आइहि हत्थो करअल तत्थो पाअ लहूजुअ वंक तिआ
ठवि सल्ल पहिल्लो चमरहि हिल्लो सल्लजुअं पुणु वंकठिआ ।

अश्वललितं नजौ भजौ भजौ भलौ गुद्रादित्याः ॥ ७ । २७ ॥

यस्य पादे नगणजगणौ (।।।. ।ऽ।) भगणजगणौ (ऽ।।. ।ऽ।) पुनर्भगणजगणौ (ऽ।।. ।ऽ।) भगणौ (ऽ।।) लकारगकारौ (।. ऽ) च भवतः, तद्वृत्तम् 'अश्वललितम्' नाम । एकादशभिर्द्वादशभिश्च यतिः । तत्रोदाहरणम्—

नगणः जगणः भगणः जगणः भगणः जगणः भगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।·।—।·ऽ · ।—ऽ·।·।—।·ऽ·।—ऽ·।·।—।—ऽ

पवन–विधूत–वीचि च–पलं(११)वि–लोकय–ति जीवि–तं तनु–भृ–तां (१२)

नगणः जगणः भगणः जगणः भगणः जगणः भगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।·।—।·ऽ · ।—ऽ·।·।—।·ऽ·।—ऽ·।·।—।—ऽ

वपुर–पि ह्रीय–मान म–निशं(११)ज–रावनि–तया व–शीकृत–मि–दम् (१२) ।

नगणः जगणः भगणः जगणः भगणः जगणः भगणः ल० गु०

।·।·। ।·ऽ·।—ऽ·।·।—।·ऽ · ।—ऽ·।·। ।·ऽ·।—ऽ·।·।—।—ऽ

सपदि निपीड–न व्यति–करं(११)य–मादिव नराधि–पान्नर–प–शुः (१२)

नगणः जगणः भगणः जगणः भगणः जगणः भगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।·।—।·ऽ ।—ऽ·।·।—।·ऽ·।—ऽ·।·।—।—ऽ

परव–नितास–वेक्ष्य कु–रुते(११)त–थापि ह–तबुद्धि–रश्वल–लि–तम् (१२) ॥

मत्ताक्रीडा मौ त्नौ नौ नूलौ ग् वसुपञ्चदशकौ ॥ ७ । २८ ॥

यस्य पादे मगणौ, (ऽऽऽ. ऽऽऽ) तगणो, (ऽऽ।) नगणाश्चत्वारो (।।।. ।।।. ।।।. ।।।) लकारगकारौ (।. ऽ) च तद्वृत्तं 'मत्ताक्रीडा' नाम । अष्टभिः पञ्चदशभिश्च यतिः । तत्रोदाहरणम्—

पअअंतहि हत्थागण पभणिज्जे तेइस वण्ण पमाण किआ
एँहु मत्तहि पाआ पइ पभणिज्जे वण्णहि **सुंदरि**आ भणिआ ॥'
(प्रा० पि० सू० २।२७१)

सुधालहरीच्छन्दः (२३।३५९४२४०)—
'नगणेन तर्कजलगै रुद्रर्तुरसैर्यतिः **सुधालहरी** ।' मं० म०

अद्रितनयाच्छन्दः (२३।३८६१४२४)—
'नजभजभा जभौ लघुगुरू बुधैस्तु गदितेयम**द्रितनया** ।'

१. उक्तत्रयोविंशत्यक्षरप्रस्तारस्य (२८१२८४८) तमो भेदः **'अश्वललितम्'** इति नाम्ना प्रसिद्धः । २. उक्तत्रयोविंशत्यक्षरप्रस्तारस्य (४२३४०४९) तमो भेदः **'मत्ताक्रीडा'** नाम्ना ख्यातः ।

4194049

मगणः मगणः तगणः नगणः नगणः नगणः नगणः ल० गु०

ऽ·ऽ· ऽ—ऽ· ऽ·ऽ ऽ·ऽ · ।—।·।·।—।·।·।—।·।·।—।·।·।—।—ऽ

ह्यं म–थं पीत्वा नारी(८)स्ख–लितग–तिरति–शयर–सिरुह–द–या (१५)

मगणः मगणः तगणः नगणः नगणः नगणः नगणः ल० गु०

ऽ·ऽ·ऽ—ऽ·ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।·।·।—।·।·।—।·।·।—।—ऽ

मत्ताक्री–डा लोलै–रङ्गै(८)र्मु–दमखि–लविट–जनम–नसि कु–रु–वे (१५)।

मगणः मगणः तगणः नगणः नगणः नगणः नगणः ल० गु०

ऽ·ऽ·ऽ—ऽ·ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।·।·।—।·।·।—।·।·।—।—ऽ

वीतव्री–डाश्शीला–लापैः(८)श्र–वणसु–खसुभ–ग सुल–लितव–च–ना (१५)

मगणः मगणः तगणः नगणः नगणः नगणः नगणः ल० गु०

ऽ·ऽ·ऽ—ऽ·ऽ·ऽ—ऽ·ऽ · ।—।·।·।—।·।·।—।·।·।—।·।·।—।—ऽ

नृत्यैर्गी–तैर्भ्रूवि–क्षेपैः(८)क–लमणि–त विवि–धविह–गकुल–रु–तैः (१५)॥

(संकेतौ)

---

१. अत्रापि प्रस्तारे चतुर्विंशत्यक्षरस्यैका कोटिः सप्तषष्टिलक्षाणि सप्तसप्ततिसहस्राणि षोडशोत्तरं शतद्वयं च (१६७७७२१६) भेदाः। तेषु ग्रन्थान्तरे केचिद्दृश्यन्ते। यथा—

स्वैरिणीक्रीडनवृत्तम् (२४१४७९३४९१)—

'**स्वैरिणीक्रीडनं** प्रोक्तमष्टभी रगणैर्युतम्।'–मं० म०।

दुर्मिलाच्छन्दः (२४१७१९०२६६)—

'**दुमिलाइ** पआसहु वण्ण विसेसहु दीस फणिंदह चारुगणा
भणु मत्त बतीसह जाणिअ सेसह अट्ठहि ठाम ठई सगणा।
गण अण्ण ण किज्जइ कित्ति मुणिज्जइ लग्गइ दोस अणेअ जही
कहि तिण्णि विरामहि पाअह ता दइ अट्ठ चउद्दह मत्त सही॥'

(प्रा० पि० सू० २।२७७)

'**द्रुमिला**' इत्याख्यान्तरं चन्द्रिकायामस्याः, '**घोटक**'मिति मणिकोशे।

वेश्याप्रीतिवृत्तम् (२४१८४५१८५७)—

'**वेश्याप्रीति**र्भयमनभनसयुक्ता हि फणिगजैश्छिन्ना।'–मं० म०।

किरीटच्छन्दः (२४१४३८०४७१)—

'ठावहु आइहि सक्कगणा तह सल्ल विसज्जहु वे वि तहापर
णेउर सद्दजुअं तह णेउरए परिबारह सक्कगणा कर।
काहलजुग्गल अंत करिज्जसु एपरि चौविस वण्ण पआसहु
बत्तिस मत्त पअप्पअ लेखउ अट्ठ अआर **किरीट** विसेसहु॥'

(प्रा० पि० सू० २।२७९)

तन्वी भ्तौ न्सौ भौ न्याविन्द्रियस्वरमासाः ॥ ७ । २९ ॥

यस्य पादे भगणतगणौ, (ऽ॥. ऽऽ।) नगणसगणौ, (॥।. ॥ऽ) भगणौ (ऽ॥. ऽ॥) नगणयगणौ (॥।. ।ऽऽ) च, तद्वृत्तं 'तन्वी' नाम । पञ्चसु, सप्तसु, द्वादशसु च यतिः । तत्रोदाहरणम्—

भगणः　तगणः　नगणः　सगणः　भगणः　भगणः　नगणः　यगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ　ऽ·।·।—ऽ·।·।—।·।·।—।·ऽ·ऽ

चन्द्रमु–खी सु(५)न्द–रघन–जघना(७)कुन्दस–मानशि–खरद–शनाग्रा (१२)

भगणः　तगणः　नगणः　सगणः　भगणः　भगणः　नगणः　यगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ　ऽ·।·।—ऽ·।·।—।·।·।—।·ऽ·ऽ

निष्कल–वीणा(५)श्रु–तिसुख–वचना(७)त्रस्तकु–रङ्गत–रलन–यनान्ता (१२) ।

भगणः　तगणः　नगणः　सगणः　भगणः　भगणः　नगणः　यगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ　ऽ·।·।—ऽ·।·।—।·।·।—।·ऽ·ऽ

निर्मुख–पीनो(५)न्न–तकुच–कलशा(७)मत्तग–जेन्द्रल–लितग–मना च (१२)

भगणः　तगणः　नगणः　सगणः　भगणः　भगणः　नगणः　यगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ　ऽ·।·।—ऽ·।·।—।·।·।—।·ऽ·ऽ

निर्भर–लीला(५)नि–धुवन–विधये(७)मुञ्जन–रेन्द्र! भ–वतु त–व तन्वी (१२)॥

(अभिकृतौ)

क्रौञ्चपदा भ्मौ स्भौ नौ नौ ग् भूतेन्द्रियवस्वृषयः ॥ ७ । ३० ॥

यस्य पादे भगणमगणौ, (ऽ॥. ऽऽऽ) सगणभगणौ, (॥ऽ. ऽ॥) नगणाश्चत्वारो (॥।. ॥।. ॥।. ॥।) गकार (ऽ) श्च तद्वृत्तं 'क्रौञ्चपदा' नाम । पञ्चभिः, पञ्चभिः, अष्टभिः, सप्तभिश्च यतिः । तत्रोदाहरणम्—

---

१. 'द्विरादित्या' इति वैदिकपाठः । 'द्विरादित्या' इत्यपहायेन्द्रियस्वरमासा इति प्रतीच्याः पठन्ति, अग्निपुराणे च तथोपबृंहणं दृश्यते ।–व्यङ्कटाचलसूरिः । २. उक्तचतुर्विंशत्यक्षरप्रस्तारस्य (४१५५३६७) तमो भेदः 'तन्वी' इति नाम्ना प्रसिद्धः । ३. अत्रापि प्रस्तारगत्या पञ्चविंशत्यक्षरस्य कोटित्रयम्, पञ्चत्रिंशल्लक्षाणि, चतुःपञ्चाशत्सहस्राणि द्वात्रिंशदुत्तराणि चतुःशतानि च (३३५५४४३२) भेदाः । तेषु ग्रन्थान्तरेऽधिकम् यथा—

कलकण्ठच्छन्दः (२५।१५५००९६०)—

'**कलकण्ठा**ख्यं सजनजभनरनगाश्चाहिभोगिनिधिभिन्ना ।' मं० म०

४. उक्तपञ्चविंशत्यक्षरप्रस्तारस्य (१६८७४४७) तमो भेदः '**क्रौञ्चपदा**' इति नाम्ना प्रसिद्धः ।

भगणः मगणः सगणः भगणः

S·।·।—S·S · S—।·।·S—S · ।·।—

या कपि–लाक्षी(५)पि–ङ्गलके–शी(५)कलि—

नगणः नगणः नगणः नगणः गु०

।·।·।—।·।·।—।·।·।—।·।·।—S

रुचिर–नुदिन(८)मनुन–यकठि–ना (७)।

भगणः मगणः सगणः भगणः

S·।·।—S·S · S—।·।·S—S · ।·।—

दीर्घत–राभिः(५)स्थू–लशिरा–भिः(५)परि—

नगणः नगणः नगणः नगणः गु०

।·।·।—।·।·।—।·।·।—।·।·।—S

वृतव–पुरति(८)शयकु–टिलग–तिः (७) ॥

भगणः मगणः सगणः भगणः

S·।·।—S·S · S—।·।·S—S · ।·।—

आयत–जङ्घा(५)नि–म्नकपो–ला(५)लघु—

नगणः नगणः नगणः नगणः गु०

।·।·।—।·।·।—।·।·।—।·।·।—S

तरकु–चयुग(८)परिचि–तहृद–या (७)।

भगणः मगणः सगणः भगणः

S·।·।—S·S · S—।·।·S S ।·।—

सा परि–हार्या(५)कौ–श्वपदा स्त्री(५)ध्रुव—

नगणः नगणः नगणः नगणः गु०

।·।·।—।·।·।—।·।·।—।·।·।—S

मिह नि–रवधि(८)सुखम–भिलष–ता (७) ॥

(उत्कृतौ)

---

१. अत्रापि प्रस्तारगत्या रसलोचन(२६)वर्णस्य कोटिषट्कम्, एकसप्ततिलक्षाणि वसुसहस्राणि, चतुःषष्ट्युत्तराण्यष्टौ शतानि च (६७१०८८६४) भेदाः। तत्र ग्रन्थान्तरेषूपलब्धो विशेषो यथा—

रञ्जनवृत्तम् (२६।१४६६३५५१)—

'भञ्जभ्नभगगैरर्वार्वावेषुभिदि रञ्जनम्।'–मं० म०

भुजङ्गविजृम्भितं मौ तौ नौ रसौ लगौ वसुरुद्रऋषयः ॥७।३१॥

यस्य पादे मगणौ (SSS. SSS) तगणनगणौ (SSI. III) नगणौ (III. III) रगणसगणौ (SIS. IIS) लकारगकारौ (I. S) च तद्वृत्तं 'भुजङ्गविजृम्भितम्' नाम । अष्टभिरेकादशभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

मगणः मगणः तगणः नगणः
S·S·S—S·S·S—S·S · I—I·I·I—
ये संन–द्धानेका–नीकै(८)र्न–रतुर—

नगणः नगणः रगणः सगणः ल० गु०
I·I·I—I·I·I—S · I·S—I·I· S—I—S
गकरि–परिवृ–तैः(११)समं–तव श–त्र–वो (७)

मगणः मगणः तगणः नगणः
S·S·S—S·S·S—S·S · I—I·I·I—
युद्धश्र–द्धालुब्धा–त्मान्(८)त्त्वं–दभिमु—

नगणः नगणः रगणः सगणः ल० गु०
I·I·I—I·I·I—S · I·S—I·I·S—I—S
खमप–गतभि–यः(११)पतं–न्ति धृता–यु–धाः (७)।

मगणः मगणः तगणः नगणः
S·S·S—S·S·S—S·S · I—I·I·I—
ते त्वां दृ–ष्ट्वा संग्रा–माग्रे(८)नृ–पतिव—

नगणः नगणः रगणः सगणः ल० गु०
I·I·I—I·I·I—S · I·S—I·I·S—I—S
र! कृप–णमन–स(११)श्चल–न्ति दिग–न्त–रं (७)

चेटीगतिवृत्तम् (२६।१९१७०८९०)—

'**चेटीगति**श्च गायत्री या लगौ छिदिनैर्मगैः ।'—मं० म०

कमलावृत्तम् (२६।५०३२३३९४)—

'यस्यां नकारयुगलं परतो भकार-
स्तस्मान्नजौ च नगणत्रयतो गलौ स्तः ।
खण्डैर्नगैर्दशभिरत्र यतिर्विशाला
सा पिङ्गलेन कथिता **कमला**तिरम्या ॥'

(वृत्तचन्द्रिका २।१३९)

१. उक्तषड्विंशत्यक्षरप्रस्तारस्य (१३८३४७४९) तमो **भेदः 'भुजङ्गविजृम्भितम्'** इति नाम्ना प्रसिद्धः । २. 'तुडिगनृप ! कृपणमनसः पलन्ति दिगन्तरम्' क० मु० पुस्तके, लिखितपुस्तके च ।

मगणः मगणः तगणः नगणः

S·S·S—S·S·S S·S · I—I·I·I—

किंवा सो-ढुं शक्यं भेकै(८)र्ब-हुमिर—

नगणः नगणः रगणः सगणः ल० गु०

I·I·I—I·I·I—S · I·S—I·I·S— I—S

पि सवि-षविष-मं(११)भुज-ङ्गविजृ-म्भि-तम्? (७)॥

अत्र **कात्यायनेनाप्युक्तम्**—

मगणः मगणः तगणः नगणः

S·S·S—S·S·S—S·S · I—I·I·I—

ध्यानैका-ग्रालम्बा-दृष्टिः(८)क-मलमु—

नगणः नगणः रगणः सगणः ल० गु०

I· I·I—I·I·I—S · I·S I·I·S—I—S

खि! लुलि-तमल-कं(११)करे स्थितमा-न-नं (७)

मगणः मगणः तगणः नगणः

S·S·S—S· S·S—S·S · I—I·I·I—

चिन्तास-क्ता शून्या-बुद्धि(८)र्द्धि-रदग—

नगणः नगणः रगणः सगणः ल० गु०

I·I·I—I·I·I—S · I·S—I·I·S I—S

तिपति-तरस-ना(११)तनु-स्तनुतां ग-ता (७)

मगणः मगणः तगणः नगणः

S·S · S—S·S·S S·S · I—I·I·I—

पाण्डुच्छा-यं क्षामं वक्त्रं(८)म-दजन—

नगणः नगणः रगणः सगणः ल० गु०

I· I·I—I· I·I—S · I·S—I·I· S—I—S

नि! रह-सि सर-सां(११)करो-षि न सं-क-थां (७)

मगणः नगणः नगणः नगणः

S· S·S—S·S·S S·S · I—I·I·I—

को नामा-यं रम्यो व्याधि(८)स्त-व कथ—

नगणः नगणः रगणः सगणः ल० गु०

I·I·I—I· I·I—S · I· S—I·I· S—I—S

य सुत-नु! किमि-दं(११)न ख-ल्वसि ना-तु-रा (७)॥

अपवाहको म्नौ नौ नौ न्सौ गौ नवर्तुरसेन्द्रियाणि ॥ ७ । ३२ ॥

यस्य पादे मगणः, (ऽऽऽ) नगणाः षट्, (।।।. ।।।. ।।।. ।।।. ।।।. ।।।) सगणो, (।।ऽ) गकारौ (ऽ. ऽ) तद्वृत्तं 'अपवाहको' नाम । नवसु, षट्सु, षट्सु, पञ्चसु च यतिः । तत्रोदाहरणम्—

मगणः नगणः नगणः नगणः नगणः

ऽ·ऽ·ऽ ।·।·।—।·।·। — ।·।·।—।·।·।

श्रीकण्ठं त्रिपुर–दहन(९)ममृत–किरण (६)—

नगणः नगणः सगणः गु० गु०

।·।·।—।·।·। — ।·।·ऽ ऽ–ऽ

शकल–ललित(६)शिरसं रु–द्रं (५)

मगणः नगणः नगणः नगणः नगणः

ऽ·ऽ·ऽ ।·।·।—।·।·।—।·।·।—।·।·।

भूतेशं हतमु–निमख(९)मखिल–भुवन (६)—

नगणः नगणः सगणः गु० गु०

।·।·।—।·।·। — ।·।·ऽ—ऽ—ऽ

नमित–चरण(६)युगमी–शा–नम् (५) ।

मगणः नगणः नगणः नगणः नगणः

ऽ·ऽ·ऽ ।·।·।—।·।·। — ।·।·।—।·।·।

सर्वज्ञं वृषभ–गमन(९)महिप–तिकृत (६)—

नगणः नगणः सगणः गु० गु०

।·।·।—।·।·। — ।·।·ऽ—ऽ—ऽ

वलय–रुचिर(६)करमा–रा–ध्यं (५)

मगणः नगणः नगणः नगणः नगणः

ऽ·ऽ·ऽ ।·।·।—।·।·। — ।·।·।—।·।·।

तं वन्दे भवभ–यभिद(९)ममिम–तफल (६)—

नगणः नगणः सगणः गु० गु०

।·।·।—।·।·। — ।·।·ऽ ऽ–ऽ

वितर–णगुरु(६)मुमया यु–क्तम् (५) ॥

इति कृतयः समाप्ताः ।

---

१. तेष्वेव (८३८८६०१) तमो भेदः 'अपवाहकः' इति ख्यातिमाससाद

इदानीं दण्डकजातयः कथ्यन्ते—

दण्डको नौ रः ॥ ७ । ३३ ॥

यत्र पादे द्वौ नगणौ (।।।. ।।।) रगणाश्च सप्त (ऽ।ऽ. ऽ।ऽ. ऽ।ऽ. ऽ।ऽ. ऽ।ऽ. ऽ।ऽ. ऽ।ऽ) भवन्ति, दण्डको नाम सः । उत्कृतेः षड्विंशत्यक्षरायाः समनन्तरं दण्डकस्य पाठात्सप्तविंशत्यक्षरत्वमेव युक्तम्; सर्वेषां छन्दसामेकैकाक्षरवृद्ध्या प्रवृत्तेः । इत ऊर्ध्वं पुनरेकैकरेफवृद्ध्या प्रस्तारः । दण्डको नौ र इति श्रवणात् । तत्रोदाहरणम्—

नगणः नगणः रगणः रगणः रगणः
।।। ।।। ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
इह हि भवति दण्डका–रण्यदे–शे स्थिति

रगणः रगणः रगणः रगणः
ऽ।ऽ—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
पुण्यभा–जां मुनी–नां मनो–हारिणी

नगणः नगणः रगणः रगणः रगणः
।।।—।।।—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
त्रिदश–विजयि–वीर्य द–प्यद्दश–ग्रीवल–

रगणः रगणः रगणः रगणः
ऽ।ऽ—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
क्ष्मीविरा–मेण रा–मेण सं–सेविते ।

नगणः नगणः रगणः रगणः रगणः
।।।—।।।—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
जनक–यजन–भूमिसं–भूतसी–मन्तिनी–

रगणः रगणः रगणः रगणः
ऽ।ऽ—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
सीमसी–तापद–स्पर्शपू–ताश्रमे

नगणः नगणः रगणः रगणः रगणः
।।।—।।।—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
भुवन–नमित–पादप–द्माभिधा–नाम्बिका

रगणः रगणः रगणः रगणः
ऽ।ऽ—ऽ।ऽ—ऽ।ऽ—ऽ।ऽ
तीर्थया–त्रा गता–नेकसि–द्धाकुले ॥

अत्र पादान्ते यतिः ।

१. सप्तविंशत्यक्षरस्य प्रस्तारे (१३४२१७७२८) भेदा भवन्ति, तत्र—(४८४४७९६८) तमो भेदः 'चण्डवृष्टिप्रयात' इति प्रसिद्धः ।

प्रथमश्चण्डवृष्टिप्रयातः[1] ॥ ७ । ३४ ॥

यः सप्तविंशत्यक्षरपादः प्रथमो दण्डकः स चण्डवृष्टिप्रयातो नाम । पूर्वमेवोदाहरणम् ।

अन्यत्र रातमाण्डव्याभ्याम् ॥ ७ । ३५ ॥

रातमाण्डव्याभ्यां ऋषिभ्यामन्यत्रास्याभिधानमेतदेव, ताभ्यां पुनरन्यैव संज्ञा कृतास्य वृत्तस्य ॥ रातमाण्डव्यग्रहणं पूजार्थम् ।[2]

[3]**शेषः प्रचित इति** ॥ ७ । ३६ ॥

---

१. प्रपात इति क्वचित्पाठः । २. अत्र रातमाण्डव्योक्तसंज्ञान्तरसत्त्वे 'स्कन्धोग्रीवी क्रौष्टुकेः' (३।२९) 'सिंहोन्नता काश्यपस्य' (७।९) इत्यादिवत् तन्निर्देशस्यैव न्याय्यत्वात्, ग्रन्थान्तरेष्वप्यस्य संज्ञान्तरादर्शनात्, प्रथमपदसूचितानामन्येषां संज्ञानुक्तेर्न्यून त्वापादकत्वात्, एतदीयानुवादेऽ**ग्निपुराणे** (३३४।३०)—'रेफवृद्ध्यार्णार्णवाः स्युर्व्यालजीमूतमुख्यकाः ।' इति तत्संज्ञोक्तेरनुपपद्यमानत्वाच्च सूत्रमिदमन्यथा व्याख्येयम्—अन्यत्र द्वितीयादिषु दण्डकेषु संज्ञा रातमाण्डव्याभ्यामुक्ताः । ता एव स्वस्यापि सम्मता इति न पुनरुच्यन्त इति भावः । यद्वा—उत्तरसूत्रयोगेन व्याख्येयम्—रातमाण्डव्याभ्यामन्यत्र शेषोऽवशिष्टो दण्डकप्रस्तारः प्रचितसंज्ञः । ताभ्यां पुनः प्रत्येकं पृथक् संज्ञा अर्णार्णवादयः कृताः प्रसिद्धा एवेति ॥

तथा च **रत्नाकरे** (३।१२)—'प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव–व्याल–जीमूत–लीलाकरो–द्दाम–शङ्खादयः ।' इति । आदिपदात् पञ्चदशादिभी रगणैर्घटितपादाः क्रमेण–'आराम–सङ्ग्राम–सुराम–वैकुण्ठ–सार–कासार–विसार–संहार–नीहार–मन्दार–केदार—आसार–सत्कार–संस्कार–माकन्द–गोविन्द–सानन्द–सन्दोह–आनन्द' इत्येते ग्राह्या इति **तर्कवाचस्पतिः** । सिंहसमुद्रभुजङ्गाद्या इति **रत्नाकरपञ्चिका** ।

'एवमेकैकरगणवर्धनात्सकलाङ्घ्रिषु ।
एकन्यूनसहस्रार्णपर्यन्तं दण्डका मताः ॥'–इति **श्रीकृष्णः** ।

३. शेष इति । अनुक्तनाम्नां दण्डकानां प्रचित इत्येव संज्ञा इति **भास्करः** । शेषो रगणेतरयगणादिघटितः **इत्यन्ये** । तथा च **रत्नाकरे** (३।१३)—'प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डको नद्वयादुत्तरैः सप्तभिर्यैः ।' इति । 'यैरित्यन्येषामपि गणानामुपलक्षणम्, कविप्रयोगात् तद्घटितानामपि दण्डकानामिष्टत्वात् ।' इति **सेतुः** । **पञ्चिकाकृत्तु**—'नद्वयात्परतस्तकारेणापि क्वचिद्दण्डका दृश्यन्ते' इति सूत्रमेव पपाठ ।

'नगणद्वितयादेवमेकैकगणवर्धनात् ।
कुमुदाब्जतरङ्गादिनाम्नां भेदाश्च पूर्ववत् ॥'–इति **कृष्णः** ।

इतश्चण्डवृष्टिप्रयातादूर्ध्वं दण्डकप्रस्तारः प्रचित इति संज्ञां लभते । पूर्वमेकैकाक्षरक्रमेण छन्दसां वृद्धिरुक्ता । इदानीं तु रेफोपलक्षिताक्षरत्रयेण वृद्धिः । तत्रोदाहरणम्—

नगणः नगणः रगणः रगणः रगणः

।·।·।—।·।·।—S·।·S—S·।·S—S·।·S

प्रथम–कथित–दण्डक–श्चण्डवृ–ष्टिप्रपा–

रगणः रगणः रगणः रगणः रगणः

S·।·S—S·।·S S·।·S—S·।·S—S·।·S

ताभिधा–नो मुनेः **पिङ्गला–चार्य**ना–म्नो मतः

नगणः नगणः रगणः रगणः रगणः

।·।·।—।·।·।—S·।·S—S·।·S—S·।·S

प्रचित–इति त–तः **परं** **द**ण्डका–नामियं

रगणः रगणः रगणः रगणः रगणः

S·।·S–S·।·S–S·।·S—S·।·S–S·।·S

जातिरे–कैकरे–फाभिवृ–द्ध्या यथे–ष्टं भवेत् ।

इत ऊर्ध्वमष्टाविंशत्यक्षरादिपादान्यपि वृत्तानि कैश्चिदभ्युपगतानि । यथा **वृत्तचन्द्रिकायाम्—**

मनोजशेखरच्छन्दः (२८)—

'जरौ जरौ जरौ जरौ जगौ क्रमेण चेद्यदा ।
तदा भुजङ्गनायको मनोजशेखरं जगौ ॥'

अशोकपुष्पमञ्जरी (२८)—

'रजौ रजौ रजौ रजौ रलौ क्रमेण चेद्यदा ।
अशोकपुष्पमञ्जरी समीरिता फणीश्वरैः ॥'

शालूरच्छन्दः (२९)—

'तगणात्परतो यत्र नगणाष्टकमुज्ज्वलम् ।
ततो लगौ भुजङ्गेन प्रोक्तं शालूरमद्भुतम् ॥'

घनाक्षरीच्छन्दः (३१)—

'विचारचर्चा गलयोर्गणानां न यत्र भूपैस्तिथिभिर्यतिर्गुरुः ।
अन्ते धरापावकवर्णपादा समीरितासौ फणिना घनाक्षरी ॥'

रूपघनाक्षरीच्छन्दः (३२)—

'भूपैर्भूपैर्विरामः स्याद्गणभेदगलोज्झितैः ।
ज्ञेयान्ते लघुना युक्ता रूपपूर्वा घनाक्षरी ॥'

इत्यादीनि । एतेषामत्र दण्डकगाथादिष्वन्तर्भाव ऊह्य इति ।

नगणः　नगणः　रगणः　रगणः　रगणः

।·।·।—।·।·।—ऽ·।·ऽ　ऽ·।·ऽ—ऽ·।·ऽ

स्वरुचि–रचित–संज्ञया तद्विशे–षैरशे–

रगणः　रगणः　रगणः　रगणः　रगणः

ऽ·।·ऽ　ऽ·।·ऽ—ऽ·।·　ऽ—ऽ·।·ऽ—ऽ·।·ऽ

षैः पुनः काव्यम–न्येऽपि कु–र्वन्तु वा–गीश्वराः

नगणः　नगणः　रगणः　रगणः　रगणः

।·।·।　।·।·।—ऽ·।·ऽ—ऽ·।·ऽ–ऽ·।·ऽ

भवति यदि स–मानसं–ख्याक्षरै–र्यत्र पा–

रगणः　रगणः　रगणः　रगणः　रगणः

ऽ·।·ऽ—ऽ·।·ऽ　ऽ·।·ऽ　ऽ·।·ऽ—ऽ·।·ऽ

दव्यव–स्था ततो दण्डकः पूज्यते–ऽसौ जनैः ॥

अत्र पादान्ते यतिः ।

इति दण्डकाः समाप्ताः ।

इति श्रीभट्टहलायुधविरचितायां पिङ्गलछन्दोवृत्तौ सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

अत्रानुक्तं गाथा ॥ ८ । १ ॥

---

१. अत्र ग्रन्थे उक्तच्छन्दोभ्यो यदन्यद्विषमाक्षरपादं पादैरसमं वा छन्दस्तद्गाथाख्यम् । तथा प्रागुक्तेषु समानाक्षरपादेष्वपि विशिष्य यस्याभिधानं नोक्तम्, तद्गाथा । तदेतदर्थद्वयं सूत्रावृत्त्या लभ्यमिति **केचित्** । तत्र समच्छन्दसामुक्थादिसंज्ञाभिरुक्तत्वेनानुक्तत्वाभावात् न गाथात्वम्, अन्यथा उक्थादिसंज्ञानामनवकाश **इत्यपरे** ।

अत एव **वृत्तचन्द्रिकायाम्**—'गाथोक्ता चरणैः षड्भिस्तथैव चरणैस्त्रिभिः ।' इत्युक्तम् । **रत्नाकरे**ऽपि—'विषमाक्षरपादं वा पादैरसमं दशधर्मवत् । यच्छन्दो नोक्तमत्र गाथेति तत्सूरिभिः प्रोक्तम् ॥' इति । अत्र **सेतुः**—विषमेति–क्रमभेदात् सङ्ख्याभेदाच्च विषमाणि अक्षराणि लघुगुरवो येषु ते विषमाक्षराः । ते पादा यस्मिंस्तथोक्तम् । वा अथवा, चतुःसङ्ख्याकपादैः श्रीप्रभृतिभिर्विसदृशम्–पञ्चादिसङ्ख्यपादमित्यर्थः । तदेवाह—यच्छन्दः प्राङ् नोक्तं तस्य गाथेति नामेत्यर्थः । यत्तु—पदचतुरूर्ध्वादीनां गाथात्वं निवारयितुमाहे–ति, तच्चिन्त्यम्, पादैरसममित्यनेनैव तेषां गाथात्वस्य निरस्तत्वात् ।··· विषमाक्षरपादे त्वियमेव कारिकोदाहरणम्; क्रमेणाष्ट–दश–सप्त–नवाक्षरपादघटितत्वात् ।

अत्र शास्त्रे नामोद्देशेन यन्नोक्तं छन्दः, प्रयोगे च दृश्यते. तद्गाथेति मन्तव्यम्।

(तत्र-त्रिष्टुभि)

कुड्मलदन्ती भ्तौ न्गौ गिन्द्रियरसाः ॥ ८। २ ॥

यस्य पादे भगणतगणौ (SII. SSI) नगणो (III) गकारौ (S. S) च भवतस्तद्वृत्तं 'कुड्मलदन्ती' नाम (११।३८७)। पञ्चभिः षड्भिश्च यतिः। तत्रोदाहरणम्—

48

भगणः तगणः नगणः गु० गु०

S·I·I—S·S · I—I·I·I—S—S

कुड्मल–दन्ती(५)वि–कटनि–त–म्बा (६)

भगणः तगणः नगणः गु० गु०

S·I·I—S·S · I—I·I·I—S—S

किन्नर–कण्ठी(५)ल–घुतर–म–ध्या (६)।

भगणः तगणः नगणः गु० गु०

S·I·I—S·S · I—I·I·I—S—S

बिम्बफ–लोष्ठी(५)मृ–गशिशु–ने–त्रा (६)

भगणः तगणः नगणः गु० गु०

S·I·I—S·S · I—I·I·I—S—S

मित्र! भ–वन्तं(५)सु–खयतु–का–न्ता (६) ॥

(जगत्याम्)

वरतनुर्न्जौ ज्रौ षड्रसाः ॥ ८। ३ ॥

यस्य पादे नगणजगणौ (III. ISI) जगणरगणौ (ISI. SIS) च तद्वृत्तं 'वरतनु'-र्नाम (१२।१३९२)। षड्भिः षड्भिश्च यतिः। तत्रोदाहरणम्—

नगणः जगणः जगणः रगणः

I·I·I I—I·S·I I·S·I—S·I·S

अयि! वि–जहीहि(६) दृढोप–गूहनं (६)

पादैरसममित्यस्योदाहरणं 'दशधर्मं वदिति। तच्च **महाभारते** (उद्यो० ३३।१०१)—'दश धर्मं न जानन्ति धृतराष्ट्र! निबोध तान्। मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः। त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ॥' इति।

१. इतः प्रभृति 'शशिवदना-' (८।१९) इति सूत्रान्तं सप्तदशसूत्राणि वैदिकैर्नाधीयन्ते, अग्निपुराणेऽपि नानूद्यन्ते, तस्मात्प्रक्षिप्तान्येवेति सम्भाव्यते।

नगणः जगणः जगणः रगणः

।·।·।—।·S·। — ।·S·। S·।·S

त्यज न–वसन्त(६)–मभीरु! वल्लभम् (६)।

नगणः जगणः जगणः रगणः

।·।·।—।·S·। — ।·S·। S·।·S

अरुण–करोद्ग(६)–म एष वर्तते (६)

नगणः जगणः जगणः रगणः

।·।·।—।·S·। — ।·S·। S·।·S

वरत–नु! संप्र(६)–वदन्ति कुक्कुटाः (६) ॥

जलधरमाला म्भौ स्मौ समुद्रवसवः ॥ ८ । ४ ॥

यस्य पादे मगणभगणौ (SSS. S।।) सगणमगणौ (।।S. SSS) च भवतस्तद्वृत्तं 'जलधरमाला' नाम (१२।२४१)। चतुर्भिरष्टभिश्च यतिः । तत्रोदाहरणम्—

मगणः भगणः सगणः मगणः

S·S·S—S · ।·।—।·।·S—S·S·S

धत्ते शो–भां(४)कुव–लयदा—मश्यामा (८)

मगणः भगणः सगणः मगणः

S·S·S—S · ।·।—।·।·S—S·S·S

शैलोत्स–ङ्गे(४)जल–धरमा–ला लीना (८) :

मगणः भगणः सगणः मगणः

S·S·S—S · ।·।—।·।·S—S·S·S

विद्युल्ले–खा(४)कन–कक्लृता–लङ्कारा (८)

मगणः भगणः सगणः मगणः

S·S·S—S · ।·।—।·।·S—S·S·S

क्रीडासु–प्ता(४)युव–तिरिवा–ङ्के पत्युः (८) ॥

गौरी नौ रौ ॥ ८ । ५ ॥

यस्य पादे नगणौ (।।।. ।।।) रगणौ (S।S. S।S) च भवतस्तद्वृत्तं 'गौरी' नामेति गाथा (१२।१२१६)। पादान्ते यतिः । तत्रोदाहरणम्—

नगणः नगणः रगणः रगणः नगणः नगणः रगणः रगणः

।·।·।—।·।·।—S·।·S—S·।·S ।·।·।—।·।·।—S·।·S—S·।·S

प्रणम–त चर–णारवि–न्दद्वयं त्रिभुव–नतमि–तस्य गौ–रीपतेः ।

नगणः नगणः रगणः रगणः नगणः नगणः रगणः रगणः

।·।·।—।·।·।—ऽ·।·ऽ ऽ·।·ऽ ।·।·।—।·।·।—ऽ·।·ऽ—ऽ·।·ऽ

सकृद्–पि मन–सैव यः सेवितः प्रवित–रति य–थेष्टम–ष्टौ गुणान् ॥

इयमेव गौरी दण्डकात्पूर्वमेकैकरेफवृद्ध्या नामान्तराणि लभते ।

ललना भ्तौ न्साविन्द्रियर्षयः ॥ ८ । ६ ॥

यस्य पादे भगणतगणौ (ऽ।।. ऽऽ।) नगणसगणौ (।।।. ।।ऽ) च भवतस्तद्वृत्तं 'ललना' नाम गाथा (१२।१९२३)। पञ्चभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

भगणः तगणः नगणः सगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ

या कुच–गुर्वी(५)मृ–गशिशु–नयना (७)

भगणः तगणः नगणः सगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ

पीननि–तम्बा(५)म–दकरि–गमना (७)।

भगणः तगणः नगणः सगणः

ऽ·।·।—ऽ·ऽ · ।—।·।·।—।·।·ऽ

किन्नर–कण्ठी(५)सु–रुचिर–दशना (७)

भगणः तगणः नगणः सगणः

ऽ·।·। ऽ·ऽ · ।—।·।·। ।·।·ऽ

सा तव सौख्यं(५)वि–तरतु ललना (७) ॥

(अतिजगत्याम्)

कनकप्रभा स्जौ स्जौ ग् ॥ ८ । ७ ॥

यस्य पादे सगणजगणौ (।।ऽ. ।ऽ।) पुनः सगणजगणौ (।।ऽ. ।ऽ।) गकारश्च (ऽ) तद्वृत्तं 'कनकप्रभा' नाम गाथा (१३।२७९६)। पादान्ते यतिः । तत्रोदाहरणम्—

सगणः जगणः सगणः जगणः गु०

।·।·ऽ—।·ऽ·।—।·।·ऽ—।·ऽ·।—ऽ

कनक–प्रभा पृ–थुनित–म्बशालि–नी

सगणः जगणः सगणः जगणः गु०

।·।·ऽ—।·ऽ·।—।·।·ऽ—।·ऽ·।—ऽ

विपुल–स्तनी ह–रिणशा–वकेक्ष–णा ।

सगणः जगणः सगणः जगणः गु०

।·।·ऽ—।·ऽ·।—।·।·ऽ ।·ऽ·।—ऽ

इयम–ङ्गना न–यनयोः पथि स्थि–ता

सगणः जगणः सगणः जगणः गु०

।·।·ऽ ।·ऽ·। ।·।·ऽ—।·ऽ·।—ऽ

कुरुते न कस्य मदना–तुरं म–नः ? ॥

कुटिलगतिर्नौ तौ ग् स्वरर्तवः ॥ ८ । ८ ॥

यस्य पादे नगणौ (।।।. ।।।) तगणौ (ऽऽ।. ऽऽ।) गकारश्च (ऽ) भवति तद्वृत्तं 'कुटिलगति'र्नाम गाथा (१३।२३६८) । सप्तभिः षड्भिश्च यतिः । तत्रोदाहरणम्—

नगणः नगणः तगणः तगणः गु०

।·।·।—।·।·।—ऽ · ऽ· ।—ऽ·ऽ·।—ऽ

अधर–किसल–ये(७)कान्त–दन्तक्ष–ते (६)

नगणः नगणः तगणः तगणः गु०

।·।·।—।·।·।—ऽ · ऽ· ।—ऽ·ऽ·।—ऽ

हरिण–शिशुद–शां(७)नृत्य–ति भ्रूयु–गम् (६) ।

नगणः नगणः तगणः तगणः गु०

।·।·।—।·।·।—ऽ · ऽ·।—ऽ·ऽ· ।—ऽ

ध्रुवमि–दमुचि–तं(७)यद्वि–पत्तौ स–ता (६)

नगणः नगणः तगणः तगणः गु०

।·।·।—।·।·।—ऽ · ऽ · ।—ऽ·ऽ·।—ऽ

मतिकु–टिलग–तेः(७)स्यान्म–हानुत्स–वः (६) ॥

(शक्वर्याम्)

वरसुन्दरी भ्जौ स्नौ गौ ॥ ८ । ९ ॥

यस्य पादे भगणजगणसगणनगणा (ऽ।।. ।ऽ।. ।।ऽ. ।।।) गकारौ (ऽ. ऽ) च भवतस्तद्वृत्तं 'वरसुन्दरी' नाम गाथा (१४।३८२३) । पादान्ते यतिः । तत्रोदाहरणम्—

भगणः जगणः सगणः नगणः गु० गु०

ऽ·।·।—।·ऽ· ।—।·।·ऽ—।·।·।—ऽ–ऽ

स्वादुशि–शिरोज्ज्व–लसुग–न्धिजल–पू–र्णं

भगणः जगणः सगणः नगणः गु० गु०

ऽ·।·।—।·ऽ·।—।·।·ऽ—।·।·।—ऽ–ऽ

वीचिच–यचञ्च–लविचि–त्रशत–प–त्रम् ।

भगणः जगणः सगणः नगणः गु० गु०

S·I·I—I·S·I—I·I·S—I·I·I—S—S

हंसक–लकूजि–त मनो–हरत–टा–न्तं

भगणः जगणः सगणः नगणः गु० गु०

S·I·I—I·S·I—I·I·S—I·I·I—S–S

पश्य व–रसुन्द–रि! सरो–वरमु–दा–रम् ॥

कुटिला म्भौ न्यौ गौ वेदरससमुद्राः ॥ ८ । १० ॥

यस्य पादे मगणभगणनगणयगणा (SSS. SII. III. ISS) गकारौ (S. S) च भवतस्तद्वृत्तं 'कुटिला' नाम गाथा (१४।१००९)। चतुर्भिः षड्भिश्चतुर्भिश्च यतिः । तत्रोदाहरणम्—

मगणः भगणः नगणः यगणः गु० गु०

S·S·S—S ·I·I—I·I· I—I · S·S—S—S

अध्वस्था–नां(४)जन–यति सु–ख(६)मुच्चैः–कू–ज (४)–

मगणः भगणः नगणः यगणः गु० गु०

S·S·S—S ·I·I I·I·I—I · S·S—S—S

न्दात्यूहो–ऽयं(४)पथि निचुलि–नि(६)तोयो–पा–न्ते (४) ।

मगणः भगणः नगणः यगणः गु० गु०

S·S·S—S · I·I—I·I·I—I · S·S—S—S

कर्णाट–स्त्री(४)रति–कुहरि–त(६)तुल्य–च्छे–दै (४)–

मगणः भगणः नगणः यगणः गु० गु०

S·S·S—S · I·I—I·I·I—I · S·S—S—S

र्नादैः क–ण्ठ(४)स्खल–नकुटि–ल(६)मन्दा–व–र्तैः (४) ॥

(अष्टौ)

शैलशिखा भ्रौ न्भौ भ्गौ भूतरसेन्द्रियाणि ॥ ८ । ११ ॥

यस्य पादे भगणरगणौ (SII. SIS) नगणभगणौ (III. SII) भगणो (SII) गकार-(S)श्च भवति तद्वृत्तं 'शैलशिखा' नाम गाथा (१६।२८११९) ॥ पञ्चभिः षड्भिः पञ्चभिश्च यतिः । क्वचित् पादान्ते यतिं पठन्ति । तत्रोदाहरणम्—

भगणः रगणः नगणः भगणः भगणः गु०

S·I·I—S·I · S—I·I·I—S·I · I—S·I·I—S

शैलशि–खानि(५)कु–ञ्जशयि–तस्य(६)ह–रेः श्रव–णे (५)

भगणः　रगणः　नगणः　भगणः　भगणः गु०

S·I·I—S·I · S—I·I·I—S·I · I—S·I·I—S

जीर्णतृ–णं क(५)रे–ण निद–धाति(६)क–पिश्वप–लः (५) ।

भगणः　रगणः　नगणः　भगणः　भगणः गु०

S·I·I—S·I · S—I·I·I—S·I · I—S·I·I—S

क्षुद्रव–धाप(५)वा–दपरि–हार(६)वि–नीतम–ते (५)–

भगणः　रगणः　नगणः　भगणः　भगणः गु०

S·I·I S·I · S—I·I·I—S·I · I—S·I·I—S

स्तस्य न ताव(५)तै–व लघु–ता द्वि(६)प–यूथभि–दः (५) ॥

वरयुवती भ्रौ य्नौ न्गौ ॥ ८ । १२ ॥

यस्य पादे भगणरगणौ (SII. SIS) यगणनगणौ (ISS. III) नगणो (III) गकारश्च (S) भवति, तद्वृत्तं 'वरयुवती' नाम गाथा (१६।३२३४३) । पादान्ते यतिः । तत्रोदाहरणम्—

23343

भगणः　रगणः　यगणः　नगणः　नगणः गु०

S·I·I—S·I·S—I·S·S—I·I·I—I·I·I—S

कुञ्जर–कुम्भपी–ठ–पीनो–न्नतकु–चयुग–ला

भगणः　रगणः　यगणः　नगणः　नगणः गु०

S·I·I—S·I·S—I·S·S—I·I·I—I·I·I—S

पार्वण–शर्वरी–शगर्वा–पहमु–खकम–ला ।

भगणः　रगणः　यगणः　नगणः　नगणः गु०

S·I·I—S·I·S—I·S·S—I·I·I—I·I·I—S

पीननि–तम्बबि–म्बसंवा–हनशि–थिलग–ति—

भगणः　रगणः　यगणः　नगणः　नगणः गु०

S·I·I—S·I·S—I · S·S—I·I·I—I·I·I—S

मुञ्च न–राधिरा–ज ! भूया–त्तव व–रयुव–तिः ॥

(अत्यष्टिः)

अतिशायिनी सौ ज्भौ ज्गौ ग् दिक्स्वराः ॥ ८ । १३ ॥

यस्य पादे सगणौ (IIS. IIS) जगणभगणौ (ISI. SII) जगणो (ISI) गकारौ (S. S) च भवतस्तद्वृत्तं 'अतिशायिनी' नाम गाथा (१७।२३९००) । दशभिः सप्तभिश्च यतिः । तत्रोदाहरणम्—

सगणः सगणः जगणः भगणः जगणः गु० गु०

।·।·ऽ—।·।·ऽ—।·ऽ·।—ऽ · ।·।—।·ऽ·।—ऽ—ऽ

इति धौ-तपुर-न्धिमत्स-रा(१०)न्सर-सि मज्ज-ने-न (७)

सगणः सगणः जगणः भगणः जगणः गु० गु०

।·।·ऽ—।·।·ऽ— ।·ऽ·।—ऽ · ।·।—।·ऽ·।— ऽ—ऽ

श्रियमा-प्तवतो-ऽतिशायि-नी(१०)मप-मलाङ्ग-भा-सः (७) ।

सगणः सगणः जगणः भगणः जगणः गु० गु०

।·।·ऽ— ।· ।·ऽ—।·ऽ·।—ऽ · ।·।—।·ऽ·।—ऽ—ऽ

अवलो-क्य तदै-व याद-वा(१०)नप-रवारि-रा-शेः (७)

सगणः सगणः जगणः भगणः जगणः गु० गु०

।·।·ऽ-।·।·ऽ—।·ऽ·।—ऽ · ।·।—।· ऽ·।—ऽ—ऽ·

शिशिरे-तररो-चिषाप्य-पां(१०)तति-षु मञ्जु-मी-षे (७) ॥

(शि० व० ८।७१)

अवितथं नूजौ भूजौ जूलौ गू ॥ ८ । १४ ॥

यस्य पादे नगणजगणौ (।।।. ।ऽ।) भगणजगणौ (ऽ।।. ।ऽ।) जगणलकारौ (।ऽ।.।) गकारश्च (ऽ) भवति तद्वृत्तम् 'अवितथम्' नाम गाथा (१७।६११४०) भवति । यतिः पादान्ते । तत्रोदाहरणम्—

56240

नगणः जगणः भगणः जगणः जगणः ल० गु०

।·।·।—।·ऽ·।–ऽ·।·।—।·ऽ·।—।·ऽ·।—।—ऽ

श्रुतिप-रिपूत-वक्त्रम-तिसुन्द-रवाग्वि-भ-वं

नगणः जगणः भगणः जगणः जगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।·।—।·ऽ·।—।·ऽ·।—।—ऽ

तमखि-लजैमि-नीयम-तसाग-रपार-ग-तम् ।

नगणः जगणः भगणः जगणः जगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।·।—।·ऽ·।—।·ऽ·।—।—ऽ

अवित-थवृत्त-विप्रज-नपूजि-तपाद-यु-गं

नगणः जगणः भगणः जगणः जगणः ल० गु०

।·।·।—।·ऽ·।—ऽ·।· ।—।·ऽ·।—।·ऽ·।—।—ऽ

पितर-महं न-मामि ब-हुरूप-मुदार-म-तिम् ॥

वस्विन्द्रियसमुद्राश्चेत्कोकिलकम् ॥ ८ । १५ ॥

यस्य पादे पूर्वोक्ता गणा भवन्ति, अष्टभिः पञ्चभिश्चतुर्भिश्च यतिर्भवति तद्वृत्तं 'कोकिलकम्' इति गाथा (१७८६११४०)। तत्रोदाहरणम्—

नगणः जगणः भगणः जगणः जगणः ल० गु०

।।।—।ऽ।—ऽ।। । ।—।ऽ।—। । ऽ।—।—ऽ

नवस–हकार–पुष्प(८)म–धुनिष्क–ल(५)कण्ठ–त–या (४)

नगणः जगणः भगणः जगणः जगणः ल० गु०

।।।—।ऽ।—ऽ।। । ।—।ऽ।—। । ऽ।—।—ऽ

मधुर–तरख–रेण(८)प–रिकूज–ति(५)कोकि–ल–कः (४)।

नगणः जगणः भगणः जगणः जगणः ल० गु०

।।।—।ऽ।—ऽ।। । ।—।ऽ।—। । ऽ।—।—ऽ

प्रथम–ककार–विद्ध(८)व–चनैर्ध–न(५)लुब्ध–म–ते (४)–

नगणः जगणः भगणः जगणः जगणः ल० गु०

।।।—।ऽ। ऽ।। । ।—।ऽ।—। । ऽ।—।—ऽ

स्तव ग–मनस्य भङ्ग(८)मि–व संप्र–ति(५)कर्तु–म–नाः (४) ॥

(धृतौ)

विबुधप्रिया रसौ जौ भरौ वसुदिशः ॥ ८ । १६ ॥

यस्य पादे रगणसगणौ (ऽ।ऽ. ।।ऽ) जगणौ (।ऽ।. ।ऽ।) भगणरगणौ (ऽ।।. ऽ।ऽ) च भवतस्तद्वृत्तं 'विबुधप्रिया' नाम गाथा (१८१९३०१९) भवति । अष्टभिर्दशभिश्च यतिः । तत्रोदाहरणम्—

रगणः सगणः जगणः जगणः भगणः रगणः

ऽ।ऽ—।।ऽ—।ऽ । ।—।ऽ।—ऽ।।—ऽ।ऽ

कुन्दकु–ड्मलको–मल(८)द्यु–ति दन्त–पङ्क्तिवि–राजिता (१०)

रगणः सगणः जगणः जगणः भगणः रगणः

ऽ।ऽ—।।ऽ—।ऽ । ।—।ऽ। —ऽ।।—ऽ।ऽ

हंसग–द्गदवा–दिनी(८)व–निता भ–वेद्विबु–धप्रिया (१०)।

रगणः सगणः जगणः जगणः भगणः रगणः

ऽ।ऽ—।।ऽ—।ऽ । ।—।ऽ।—ऽ।।—ऽ।ऽ

पीनतु–ङ्गपयो–धर(८)द्व–यभार–मन्थर–गामिनी (१०)

रगणः सगणः जगणः जगणः भगणः रगणः

S·I·S—I·I·S—I·S · I—I·S·I—S·I·I—S·I·S

नेत्रका-न्तिविनि-र्जित(८)श्र-वणाव-तंसित-कैरवा (१०) ॥

नाराचकं नौ रौ रौ ॥ ८ । १७ ॥

यस्य पादे नगणौ (III. III) रगणाश्चत्वारो (SIS. SIS. SIS. SIS) भवन्ति तद्वृत्तं 'नाराचकं' नाम गाथा (१८।७४९४४)। दशभिरष्टभिश्च यतिः । तत्रोदाहरणम्—

नगणः नगणः रगणः रगणः रगणः रगणः

I·I·I—I·I·I S·I·S—S · I·S—S·I·S—S·I·S

रघुप-तिरपि जातवे-दो(१०)विशु-द्धां प्रगृ-ह्य प्रियां (८)

नगणः नगणः रगणः रगणः रगणः रगणः

I·I·I—I·I·I—S·I·S S · I·S—S·I·S—S·I·S

प्रियसु-हृदि वि-भीषणे सं(१०)क्रम-य्य श्रियं-वैरिणः (८)।

नगणः नगणः रगणः रगणः रगणः रगणः

I·I·I—I·I·I—S·I·S—S · I·S—S·I·S—S·I·S

रविसु-तसहि-तेन ते-ना(१०)नुया-तः ससौ-मित्रिणा (८)

नगणः नगणः रगणः रगणः रगणः रगणः

I·I·I—I·I·I—S·I·S—S · I·S—S·I·S—S·I·S

भुजवि-जितवि-मानर-त्ना(१०)धिरू-ढः प्रत-स्थे पुरीम् (८) ॥

(र० वं० १२।१०४)

(अतिधृतौ)

विस्मिता य्मौ न्सौ रौ ग् रसर्तुस्वराः ॥ ८ । १८ ॥

यस्य पादे यगणमगणौ (ISS. SSS) नगणसगणौ (III. IIS) रगणौ (SIS. SIS) गकारश्च (S) भवति तद्वृत्तं 'विस्मिता' नाम गाथा (९९।७५७१४) ॥ षड्भिः, षड्भिः, सप्तभिश्च यतिः । तत्रोदाहरणम्—

यगणः मगणः नगणः सगणः रगणः रगणः गु०

I·S·S—S·S·S I·I·I—I·I·S—S·I·S S·I·S—S

श्रिया जु-ष्टं दिव्यैः(६)सपट-हरवै(६)रन्वितं पुष्पव-र्षैः (७)-

यगणः मगणः नगणः सगणः रगणः रगणः गु०

I·S·S—S·S·S I·I·I—I·I·S S·I·S—S·I·S—S

वपुष्ट-श्चैद्यस्य(६)क्षणमृ-षिगणैः(६)स्तूयमा-नं निरी-य (७)।

यगणः मगणः नगणः सगणः रगणः रगणः गु०

I·S·S—S·S·S — I·I·I—I·I·S — S·I·S—S·I·S—S

प्रकाशे–नाकाशे(६)दिनक–रकरा(६)न्विक्षिप–द्विस्मिता–क्षै (७)–

यगणः मगणः नगणः सगणः रगणः रगणः गु०

I·S·S—S·S·S — I·I·I—I·I·S — S·I·S—S·I·S—S

नरेन्द्रै–रौपेन्द्रं(६)वपुर–थ विश(६)द्धाम वी–क्षांबभू–वे (७) ॥

(शि० व० २०।७९)

(कृतौ)

शशिवदना नूजौ भूजौ जू जूरौ रुद्रदिशः ॥ ८ । १९ ॥

यस्य पादे नगणजगणौ (III. ISI) भगणो (SII) जगणात्रयो (ISI. ISI. ISI) रगणश्च (SIS) भवति, तद्वृत्तं 'शशिवदना' नाम गाथा (२१५४११६००)। एका-दशभिर्दशभिश्च यतिः । 'पञ्चकावली'ति केचित् । तत्रोदाहरणम्—

711600

नगणः जगणः भगणः जगणः जगणः जगणः रगणः

I·I·I—I·S·I—S·I·I—I·S · I—I·S·I—I·S·I—S·I·S

तुरग–शताकु–लस्य प–रितः(११)प–रमेक–तुरङ्ग–जन्मनः (१०)

नगणः जगणः भगणः जगणः जगणः जगणः रगणः

I·I·I—I·S·I—S·I·I—I·S I—I·S·I I·S·I—S·I·S

प्रमथि–तभूभृ–तः प्रति–पथं(११)म–थितस्य भृशं म–हीभृता (१०)।

नगणः जगणः भगणः जगणः जगणः जगणः रगणः

I·I·I—I·S·I—S·I·I—I·S · I I·S·I—I·S·I—S·I·S

परिच–लतो ब–लानुज–बल(११)स्य पुरः स–ततं धु–तश्रिय (१०)–

नगणः जगणः भगणः जगणः जगणः जगणः रगणः

I·I·I—I·S·I—S·I·I—I·S · I I·S·I—I·S·I—S·I·S

श्चिरवि–गतश्रि–यो जल–निधे(११)श्च तदाभ–वदन्त–रं महत् (१०) ॥

(शि० व० ३।८२)

एवमादीनि वृत्तानि कोटिशः प्रस्तारेषु महाकविप्रयोगेषु च दृश्यन्ते । विशेषसंज्ञाभावात्तानि शास्त्रकारेण नामनिर्देशं कृत्वा नोक्तानि तानि गाथाशब्देन कथ्यन्ते ।

इदानीं प्रस्तारादीन् प्रत्ययानुपक्रमते[1] । तत्र गायत्र्यादिप्रस्तारसिद्ध्यर्थमेकाक्षरप्रस्तारपूर्वकं द्व्यक्षरप्रस्तारं सूत्रद्वयेनाह—

द्विकौ ग्लौ ॥ ८ । २० ॥

उपरिष्टाद् गकारं लिखित्वाधस्ताल्लकारं विन्यसेदित्येकाक्षरप्रस्तारः । तस्य द्विकत्वाद् द्वौ ग्लौ द्विकौ स्थापयेत् । द्वे आवृत्ती प्रमाणमनयोरिति द्विकौ । 'संख्याया अतिशदन्तायाः कन्' (पाणि० ५।१।२२) इति कन्प्रत्ययः । ततश्च गकारं ततोऽधस्ताल्लकारं लिखित्वा विस्पष्टार्थमधस्तिर्यग्रेखां दद्यात् । अधस्ताच्च पूर्ववद् गकारलकारौ स्थापयेत् ॥

अत्र किं कर्तव्यमित्याह—

मिश्रौ च ॥ ८ । २१ ॥

अनेन द्वितीयाक्षरप्रस्तारं दर्शयति । चकारः पूर्वप्रस्तारसमुच्चयार्थः । द्विकौ ग्लौ स्थापयित्वा अनन्तरं द्वितीयस्थानेषु मिश्रौ ग्लौ विन्यसेत् । गकारो गकारेण संश्लिष्टो मिश्र उच्यते, लकारश्च लकारेण । मिश्राविति गकारलकाराभ्यां प्रत्येकमभिसम्बध्यते । 'द्वन्द्वात्परो यः श्रूयत' इति न्यायात् । ततश्च प्रथमायामावृत्तौ गकारौ मिश्रौ स्थापयेत् । द्वितीयायां लकाराविति । ततो मध्ये लेखामपनयेत् । एवं चतुःप्रकारो द्व्यक्षरप्रस्तारो भवति । तद्यथा—गौ ल्गौ ग्लौ लाविति ॥

इदानीं द्व्यक्षरप्रस्तारपूर्वकमेकैकाक्षरवृद्ध्या त्र्यक्षरादिप्रस्तारं दर्शयितुमाह—

पृथग्ला मिश्राः ॥ ८ । २२ ॥

द्व्यक्षरप्रस्तारस्य पूर्वन्यायेन द्विकं लेखाविभक्तं स्थापयित्वा तृतीयाक्षरस्थानेषु प्रथमावृत्तौ गकारा मिश्रा दातव्याः । द्वितीयावृत्तौ लकारा मिश्रास्ततो मध्यात् लेखामपनयेत् । एवं त्रिकः प्रस्तारः सिद्ध्यति । पृथगिति विजातीयासंसर्गमाह । तेन प्रथमायामावृत्तौ न लकारप्रवेशः । द्वितीयायां न गकारस्य । एवं त्रिकप्रस्तारं द्विः स्थापयित्वा पृथग् ग्ला मिश्रा दातव्या इति चतुरक्षरः प्रस्तारः । एवं तत्पूर्वकः पञ्चाक्षरः प्रस्तारः । तथैव तत्पूर्वकः षडक्षरो गायत्रीसमवृत्तप्रस्तारः । एवमुष्णिगादीनामप्येकैकाक्षरवृद्ध्या अयमेव न्यासः । तत्रेदं सूत्रं त्र्यक्षरात् प्रभृति पुनः पुनरावर्तनीयं यावदभिमतः प्रस्तारः[2] ॥

---

१. छन्दसां भेदादिप्रत्यायकत्वात्प्रत्ययाः । ते च दर्शिताः **केदारेण**—'प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलगक्रिया । सङ्ख्यानमध्वयोगश्च षडेते प्रत्ययाः स्मृताः ॥' इति ।

१. प्रकारान्तरमुक्तं **रत्नाकरे**—

'पादे सर्वगुरावाद्याल्लघु न्यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥
ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवेत् ।
प्रस्तारोऽयं समाख्यातश्छन्दोविचितिवेदिभिः ॥'

वसवस्त्रिकाः ॥ ८ । २३ ॥

एवं पूर्वोक्ते त्र्यक्षरप्रस्तारे अष्टौ त्रिका जायन्ते । ते च मकारादयः शास्त्रादौ कथिता एव । प्रदर्शनार्थं चैतत्; तेन षोडश चतुष्का द्वात्रिंशत्पञ्चका भवन्ति । एवं चतुःषष्टिर्गायत्रीसमवृत्तानि सर्वगुरुलघ्वाद्यन्तानि भवन्ति । द्विगुणोत्तरमुष्णिगादीनाम्; एकैकाक्षराधिक्यात् । विस्पष्टार्थमिदं सूत्रम्; प्रस्तारादेव सङ्ख्यापरिच्छित्तेः[1] ॥

१. 　प्रस्तारस्य क्रमे बीजं नोचुः प्राञ्चोऽत्र यद्यपि ।
　　स्पष्टतायास्तथाप्यस्मि वदामि सुधियां मुदे ॥

सर्वगुरुपादस्य भेदाकाङ्क्षायां द्वितीयपङ्क्तौ प्रथमस्थान एवोपस्थितत्वात् गुरुनिरासपूर्वं लघुप्रयोगेण सर्वगुरुपादो भिद्यत इति तस्यादौ कल्पनम्,–(।. ऽ. ऽ)। ततस्तृतीयपङ्क्तौ द्वितीये स्थाने गुरुनिरासपूर्वं लघुप्रयोग इति द्वितीयो भेदः,–(ऽ. ।. ऽ) । अस्यैव शेषभूतश्चतुर्थपङ्क्तिस्थस्तृतीयो भेद इति तस्य कल्पनम्,–(।. ।. ऽ) ततः पञ्चमपङ्क्तौ तृतीयस्थाने तथैव लघुप्रयोगाच्चतुर्थस्य,–(ऽ. ऽ. ।) । अस्यैव च द्विगुर्वादिस्त्रयोऽन्ये भेदाः– लघुगुर्वादिः–(।. ऽ. ।), गुरुलघ्वादिः–(ऽ. ।. ।), लघुद्वयादिश्च–(।. ।. ।) इति । इत्थं सर्वगुरुणा प्रथमेन (ऽ. ऽ. ऽ) सहितेषु मध्याया अष्टभेदेषु क्रमे बीजमुक्तम् । एवं प्रतिष्ठादिप्रस्तारक्रमेऽप्युन्नेयम् ॥

एकाक्षरादिषड्विंशत्यन्तजातिप्रस्तारपिण्डसङ्ख्योक्ता **वृत्तमौक्तिके**—

　　'षड्विंशतिः, सप्तशतानि, चैव तथा सहस्राण्यपि सप्तपङ्क्तिः ।
　　लक्षाणि दग्वेदसुसम्मितानि, कोट्यस्तथा रामनिशाकरैः स्युः ॥'

　　　(१३,४२,१७,७,२६) इति **वृत्तरत्नाकरसेतौ ।**

एवमर्धसमवृत्तेऽर्धप्रस्तारः, विषमवृत्ते च श्लोकप्रस्तार इति ज्ञेयम् । मात्रावृत्तप्रस्तारोऽपि ग्रन्थान्तरोक्तो दर्शितः **सेतुकृता**—

　　'तत्र प्रथमपङ्क्तौ स्याद्गुरुपादस्तु पूर्ववत् ।
　　द्वितीयपङ्क्तौ प्रथमादधो लेख्यो लघुर्गुरोः ॥
　　यथोपरि तथा शेषमूनस्थाने लघु न्यसेत् ।
　　तृतीयादिषु पङ्क्तिष्वप्येवमेव गुरोरधः ॥
　　लघु न्यस्यावशिष्टं तु पूर्ववत् परिकीर्तितम् ।
　　न्यूने मात्रात्रयं देयं तस्मिन्नादौ गुरुर्द्वयोः ॥
　　कलयोः स्यात्ततः पूर्वं लघुर्देयो भवेत्ततः ।
　　चतुर्थपङ्क्तावप्येवं पञ्चम्यां तु गुरोरधः ॥
　　लघुद्वयं लिखेत् पूर्वं शिष्टं तूपरिवद्भवेत् ।
　　एवं सर्वत्र विज्ञेयः कलाप्रस्तार उत्तमः ॥

नष्टवृत्तपरिज्ञानार्थमाह—

लर्द्धे ॥ ८ । २४ ॥

यदैवं विजिज्ञासेत–गायत्र्यां समवृत्तं षष्ठं कीदृशमिति, तदा तमेव षट्सङ्ख्याविशेष-मर्धयेत । तस्मिन्नर्धीकृते लघुरेको लक्ष्यते, स भूमौ विन्यास्यः ।

इदानीमवशिष्टा त्रिसंख्याविषमत्वादर्धयितुं न शक्यते। तत्र किं प्रतिपत्तव्यमित्याह—

सैके ग् ॥ ८ । २५ ॥

अर्ध इत्यनुवर्तते । विषमसङ्ख्यायामेकमधिकं निक्षिप्य ततोऽर्धयेत । तत्रैको गकारो लभ्यते । तं पूर्वलब्धाल्लकारात् परं स्थापयेत् । ततो द्विसंख्यावशिष्यते । पुनस्तामर्ध-येत, ततश्चैकलकारं दद्यात् । ततश्चैकसंख्यावशिष्यते । तत्र तावत् सैके गिति लक्षण-मावर्तनीयं यावद्वृत्ताक्षराणि षट् पूर्यन्ते । एवं सङ्ख्यान्तरेऽपि योज्यम्[1] ॥

उद्दिष्टवृत्तस्य सङ्ख्यापरिज्ञानार्थमाह—

प्रतिलोमगणं द्विर्लाद्यम् ॥ ८ । २६ ॥

यस्य वृत्तस्य सङ्ख्यां जिज्ञासेत तद्भूमौ प्रस्तारयेत । ततस्तस्यान्ते यो लकारः सजाती-यापेक्षया, तमादौ कृत्वा प्रातिलोम्येन द्विरावर्तयेत । तत्र निराकाराया आवृत्तेरसम्भवात् प्रथमातिक्रमे कारणाभावादेकसङ्ख्या लभ्यते । ततश्चैकसङ्ख्याङ्कमन्त्यलकारस्याधस्तात् स्थापयित्वा द्विगुणयेत् । ततस्तस्मादपनीय तत्पूर्वस्य वर्णस्याधस्तान्निधाय पुनर्द्विगुणयेत् । पुनस्तदपि पूर्वस्य । एवं यावन्ति वृत्ताक्षराणि प्रातिलोम्येन समाप्यन्ते । तत्र याः सङ्ख्या निष्पद्यन्ते, तावतिथं तद्वृत्तमिति ॥

तेन द्विगुरुपादस्य पञ्च भेदा भवन्त्यमी ।
सर्वान्तमध्यादिगुरुचतुर्लघुगणाः स्मृताः ॥' इति ।

वृत्तप्रत्ययकौमुद्यामत्र कश्चिद्विशेष उक्तः—

'एकमात्रे गुरुनैव त्रिपञ्चादौ लशेषतः ।
आदावेव लघुः स्थाप्यस्ततः प्रस्तारजाः क्रियाः ॥' इति ।

१. मात्रानष्टमुक्तं **रत्नाकरसेतौ**—

'संस्थाप्येह पृथङ्मात्रास्तत्र चाङ्कान् समालिखेत् ।
एकद्व्यङ्कतृतीयाङ्कानाद्यमात्रात्रये क्रमात् ॥
ततः पूर्वद्वयोर्न्मिश्रानन्त्ये पृष्टाङ्कलोपनम् ।
पूर्वपूर्वतरस्यापि लोपः सम्भवतो भवेत् ॥
यस्य यस्य भवेल्लोपस्तदधो गुरुता भवेत् ।
परया मात्रयोत्यन्तग्मात्रानष्टं वदेत्सुधीः ॥' इति ।

तत्र विशेषमाह—

ततोऽग्येकं जह्यात् ॥ ८ । २७ ॥

पूर्वोक्ते कर्मणि क्रियमाणे यदि सा सङ्ख्या गकारस्थानमापद्यते, तदा तां द्विगुणयित्वा ततः सङ्ख्यासमुदायादेकं त्यजेत् । ततः पूर्वोक्तं कर्म कुर्यात् । ततः परिपूर्णत्वात्तद्वृत्त-सङ्ख्या सिद्ध्यति[1] ॥

प्रस्ताराद्विना वृत्तसङ्ख्यापरिज्ञानार्थमाह—

द्विरर्द्धे ॥ ८ । २८ ॥

अपनीत इत्यध्याहारः । यदा जिज्ञासेत—षडक्षरे छन्दसि कति वृत्तानि भवन्ति? तदा तां छन्दोऽक्षरसङ्ख्यां भूमौ स्थापयित्वा ततोऽर्धमपनयेत । तस्मिन्नपनीते द्वौ लभ्येते । ततस्तां द्विसङ्ख्यां भूमौ पृथक् प्रस्तारयेत । ततः शेषास्त्रयोऽक्षरसङ्ख्यायां भवन्ति ॥

तेषामर्धयितुमशक्यत्वात् किं कर्तव्यमित्याह—

रूपे शून्यम् ॥ ८ । २९ ॥

प्रथमसङ्ख्यातो रूपमपनीय तस्मिन्नपनीते शून्यं लभ्यते । तत्र पूर्वलब्धाया द्विसङ्ख्याया अधस्तात् स्थापयेत्, ततो द्विसङ्ख्यावशिष्यते । ततोऽर्धेऽपनीते पुनर्द्विसङ्ख्या लभ्यते, तां शून्याधस्तात् स्थापयेत् । ततो रूपे शून्यं लभ्यते । तद् द्विसङ्ख्याया अधस्तात् स्थापयेत् ॥

ततः किं कर्तव्यमित्याह—

द्विः शून्ये ॥ ८ । ३० ॥

शून्यस्थाने द्विरावृत्तिं कुर्यात् । तत्र निराकाराया आवृत्तेरसम्भवात्, प्रथमातिक्रमे कारणाभावादेकसङ्ख्या लभ्यते । तां शून्ये स्थापयित्वा द्विगुणयेत् । ततो द्वौ भवतः । तस्योपरिष्टादर्धस्थानं द्विसङ्ख्याकं तदपनीय तस्य स्थाने तं द्विसङ्ख्याकं स्थापयेत् ॥

अनन्तरमिदं कर्तव्यमित्याह—

तावदर्धे तद्गुणितम् ॥ ८ । ३१ ॥

यदर्धस्थाने स्थितं सङ्ख्याजातं, तत्तावत् गुणितं कुर्यात् । एतदुक्तं भवति—स्वसङ्ख्ययैव गुणयितव्यमिति । ततो द्वौ द्वाभ्यां गुणितौ चत्वारो भवन्ति । तेषामुपरिष्टाच्छून्य-स्थानं तत्र तानारोपयेत् । अनन्तरं द्विःशून्य इति द्विगुणिता अष्टौ भवन्ति । तानप्यर्ध-

---

१. मात्रोद्दिष्टमुक्तं जानकीशरणेन—

'विलिख्य रूपे क्रमकाङ्कमत्र गुरूर्ध्वमङ्कं चरमे विलुम्पेत् ।
शिष्टाङ्कमेवं प्रवदेद्विधिज्ञो मात्रीयमुद्दिष्टमिदं जगाद ॥' इति ।

स्थाने निधाय तावद्गुणान् कुर्यात् । ततोऽष्टावष्टभिर्गुणिताश्चतुःषष्टिर्भवन्ति गायत्रीसम-वृत्तानि । अनेनैव न्यायेनाष्टाविंशत्यधिकशतमुष्णिहः, षट्पञ्चाशदधिके द्वे शते अनुष्टुभः, द्वादशोत्तराणि पञ्च शतानि बृहत्याः, चतुर्विंशत्यधिकं सहस्रं पङ्क्तेः, अष्टचत्वारिंशदधिके द्वे सहस्रे त्रिष्टुभः, षण्णवत्यधिकानि चत्वारि सहस्राणि जगत्याः । एवमतिच्छन्दसां कृतीनां च द्रष्टव्यम् ॥

द्विर्द्व्यूनं तदन्तानाम् ॥ ८ । ३२ ॥

गायत्र्यादिवृत्तसङ्ख्याजातं द्विगुणीकृत्य द्वाभ्यामूनं कुर्यात् । तत्तदन्तानां परिमाणं भवति । यस्य छन्दसः सङ्ख्या द्विगुणिता, तत्पर्यन्तानां पूर्वेषामेकाक्षरप्रभृतीनां सङ्ख्या भवतीत्यर्थः ॥[1]

परे पूर्णम् ॥ ८ । ३४ ॥

तदेतच्छन्दोवृत्तसङ्ख्याजातं द्विगुणितं पूर्णमेव स्थापयितव्यम्, न द्व्यूनम् । परे छन्दसि

---

१. इतः परम्—

एकोनेऽध्वा ॥ ८ । ३३ ॥

इति सूत्रमधिकं पठ्यते वैदिकैः, अनुवादोऽप्यस्याग्निपुराणे दृश्यते—(३३५।४) 'अध्वाङ्गुलमधोऽर्धतः । सङ्ख्यैव द्विगुणैकोना' इति । एतदभावे च षट्प्रत्ययपूर्तिरपि न भवति, अध्वप्रत्ययाभावात् । न चासावत्रोपेक्षित एवेति साम्प्रतम्, शास्त्रवैकल्यापत्तेः; 'षण्मात्रमुवाच पिङ्गलः सूत्रम् ।···प्रत्ययहेतोः स्वशास्त्रादौ ॥' इति परिभाषासाङ्गत्यापत्तेश्च । अतः सम्प्रदायशुद्धमावश्यकं चैतत्सूत्रम् । हलायुधेनाव्याख्यानं त्वनुपलब्धत्वादेवेति 'षष्ठप्रत्ययोऽपि' (पृ० १९६ पं० १) इत्यादितल्लेखादेव व्यक्तम् ।

अस्यार्थस्तु—

उक्तरीत्या द्विगुणीकृता वृत्तसङ्ख्या एकेन ऊना अध्वा प्रस्तारलेखनाधिकरणदेशो भवतीति ।

अत्र विशेषो **रत्नाकरे—**

'सङ्ख्यैव द्विगुणैकोनासद्भिरध्वा प्रकीर्तितः ।
वृत्तस्याङ्गुलिकी व्याप्तिरधः कुर्यात्तथाङ्गुलिम् ॥' इति ।

अयमर्थः—अङ्गुलिविस्तारा गुरुलघवो लेख्याः । अधोऽन्तरालदेशेऽप्यङ्गुलविस्तारदेशं त्यक्त्वा वृत्तप्रस्तारभेदा लेख्याः । तथा च त्र्यक्षरादौ पञ्चदशाद्यङ्गुलोच्चता स्पष्टीभवतीति ।

अत्र न्यूनाधिकप्रमाणसम्भवेऽप्यनुगतस्य शास्त्रार्थत्वादङ्गुलप्रमाणमुक्तम् । अन्तरदेशेऽङ्गुलत्यागस्तूद्दिष्टानुसारात् । वस्तुतस्तु गुरुलघूनां यत्प्रमाणम्, तत्प्रमाणकान्तरालदेशत्याग इतीह विवक्षितम् । तेन प्रस्ताराधिकरणदेशप्रमाणसङ्ख्यापि तत्प्रमाणगतैवेति ज्ञेयम् ।—इति **सेतुः** ।

जिज्ञासिते । तत्संख्याजातं द्विगुणितं परस्य छन्दसो वृत्तानां संख्या भवति । तद्यथा—चतुःषष्टिर्गायत्रीसमवृत्तानां संख्या द्विगुणीकृता सती परस्योष्णिहः समवृत्तसंख्या साष्टाविंशं शतं भवति ॥

अतोऽनेकद्वित्रिलघुक्रियासिद्ध्यर्थं यावदभिमतं प्रथमप्रस्तारवन्मेरुप्रस्तारं दर्शयति—

परे पूर्णमिति[1] ॥ ८ । ३५ ॥

उपरिष्टादेकं चतुरस्रकोष्ठं लिखित्वा तस्याधस्तादुभयतोऽर्धनिष्क्रान्तं कोष्ठकद्वयं लिखेत् । तस्याप्यधस्तात्त्रयं तस्याप्यधस्ताच्चतुष्टयं यावदभिमतं स्थानमिति मेरुप्रस्तारः ॥ तस्य प्रथमे कोष्ठे एकसंख्यां व्यवस्थाप्य लक्षणमिदं प्रवर्तयेत् । तत्र परे कोष्ठे यद्वृत्तसंख्याजातं तत् पूर्वकोष्ठयोः पूर्णं निवेशयेत् । तत्रोभयोः कोष्ठकयोरेकैकमङ्कं दद्यात्, मध्ये कोष्ठे तु परकोष्ठद्वयाङ्कमेकीकृत्य पूर्णं निवेशयेदिति पूर्णशब्दार्थः । चतुर्थ्यां पङ्क्तावपि पर्यन्तकोष्ठयोरेकैकमेव स्थापयेत् । मध्यमकोष्ठयोस्तु परकोष्ठद्वयाङ्कमेकीकृत्य पूर्णं त्रिसङ्ख्यारूपं स्थापयेत् । उत्तरत्राप्ययमेव न्यासः । तत्र द्विकोष्ठायां पङ्क्तौ एकाक्षरस्य विन्यासः । तत्रैकगुर्वेकलघुवृत्तं भवति ॥ तृतीयायां पङ्क्तौ द्व्यक्षरस्य प्रस्तारः । तत्रैकं सर्वगुरु, द्वे एकलघुनी, एकं सर्वलघ्विति कोष्ठक्रमेण वृत्तानि भवन्ति ॥ चतुर्थ्यां पङ्क्तौ त्र्यक्षरस्य प्रस्तारः । तत्रैकं सर्वगुरु त्रीण्येकलघूनि त्रीणि द्विलघूनि एकं सर्वलघु ॥ तथा पञ्चमादिपङ्क्तावपि सर्वगुर्वादिसर्वलघ्वन्तमेकद्वयादिलघु द्रष्टव्यमिति[2] ॥

---

१. सूत्रावृत्तिः शास्त्रसमाप्तिसूचनार्था ।　　२. मात्रामेरुरप्युक्तो वाणीभूषणे—

'द्वयं द्वयं समं कोष्ठं कृत्वान्त्येष्वेकमर्पयेत् ।
एकद्वयेकत्र्येकचतुष्कमेण प्रथमेष्वपि ॥
शीर्षाङ्काप्तपराङ्काभ्यां शेषकोष्ठान् प्रपूरयेत् ।
मात्रामेरुरयं दुर्गः सर्वेषामतिदुर्गमः ॥' इति ।

अत्र वृत्तप्रत्ययकौमुद्यां विशेषः—

'मात्रागलक्रिया क्वापि नोक्ता सापीह वर्ण्यते ।
कलासङ्ख्याकमेकाङ्कमौत्तराधर्यतो न्यसेत् ॥
तिर्यग्द्वितीयपङ्क्तौ चोर्ध्वस्थाङ्कं संलिखेद्बुधः ।
तृतीयादावूर्ध्वकोणयुग्माङ्कं च युतं लिखेत् ॥
योजनासम्भवे युक्तमङ्कमेव लिखेदधः ।
प्राग्युताङ्कावथ त्यक्त्वा पुनर्युक्त्वा पुरो लिखेत् ॥
युत्वा युत्वाधराङ्कान्तं लिखेद्धीमानधः स्थितैः ।
तिर्यगङ्कैर्द्वितीयाद्यैरेकगुर्वादयो मताः ॥

षष्ठप्रत्ययोऽप्यन्तरिच्छित्तिरित्येके । सोऽस्वल्पत्वात् पुरुषेच्छाविधायित्वेनानि-
यतत्वाच्च नोक्तः । एवं प्रत्ययसमासः समाप्तः ॥

पिङ्गलाचार्यरचिते छन्दःशास्त्रे हलायुधः ।
मृतसंजीविनीं नाम वृत्तिं निर्मितवानिमाम् ॥

इति श्रीभट्टहलायुधकृतायां छन्दोवृत्तौ मृतसंजीविनीनाम्न्यामष्टमोऽध्यायः ॥

यत्कलान्वयिनाङ्केनार्थैकगुर्वादिबोधनम् ।
गुरुद्विगुणितोनाङ्कास्तेनाङ्केन कला मताः ॥
आद्यैकाङ्कः कलाः सर्वा ज्ञेया अथ तदूर्ध्वगैः ।
अङ्कैरूनकलायोगि गुर्वादिज्ञानमीरितम् ॥' इति'।

१. एतत् 'एकोनेऽध्वा' (८।३३) इति सूत्रादर्शनमूलकमेवेत्युक्तमेव पुरस्तादिति

सञ्जीवितामपि विलोक्य हलायुधेन
छन्दश्चितिं भुजगराजकृतां क्षताङ्गीम् ।
नानानिबन्धगहनानि चिरं विगाह्य
काचिद् **'विशल्यकरणी'**मयकाहृतेयम् ॥ १ ॥
मूर्तिं यथा फणिपतेरिह लक्ष्मणाख्यां
प्रागक्षतामतनुत श्वसनस्य सूनुः ।
दिव्यां **विशल्यकरणी**मुपहृत्य तद्वत्
यत्नादिमामकरवं कृतिमुज्वलाङ्गीम् ॥ २ ॥
केदारेऽङ्कुरिता पूर्वं सिक्ता **सागर**वारिणा ।
वर्धिता सर्वतः सेयं **विशल्यकरणी** मया ॥ ३ ॥
भट्टधूपकरा**नन्तयज्ञेश्वर**परिष्कृता ।
श्रीवेदपुरुषस्यैषा पादयोरस्तु पादुका ॥ ४ ॥

इति श्रीमद्धूपकरोपाह्व-विद्यालङ्कार-भट्टानन्तयज्ञेश्वरपरिष्कृता
विशल्यकरण्याख्या छन्दःशास्त्रटिप्पणी ।

समाप्तश्चायं ग्रन्थः ।

चौखम्भा ओरियन्टालिया

प्राच्य-विद्या तथा दुर्लभ ग्रन्थों के प्रकाशक एवं विक्रेता

पोस्ट बॉक्स न० २२०६
बैंगलो रोड, ९ यू० बी०, जवाहर नगर,
दिल्ली-११०००७ (भारत)

दू. : ४०११७०

॥ श्रीः ॥

नि. : ३३३५०८

संख्या 3215

नकदी पुर्जा

दिनांक 27-2-04

चौखम्बा संस्कृत पुस्तकालय

सी.के. २८/१५, ज्ञानवापी-चौक

वाराणसी- २२१ ००१

प्रति	पुस्तक नाम	रू.	पै.
1	[illegible] 20/-	160	00
	Rs 160/-		
		160	00

भूल-चूक लेनी-देनी ।

बिकी हुई पुस्तकें वापस नहीं होंगी ।

हमारे अन्य महत्त्वपूर्ण प्रकाशन

1. **तैत्तिरीयोपनिषद्।** समूलशांकरभाष्य एवं 'ज्योती' हिन्दी टीका सहित। व्याख्याकार श्री कन्हैयालाल जोशी
2. **छन्दःशास्त्रम्।** श्रीपिंगलनागविरचितं। श्री हलायुधभट्टविरचितया मृतसंजीव-व्याख्यया वृत्त्या समेतम् पं. श्री मधुसूदनविद्यावाचस्पति-रचित-छन्दो निषक्तिसनाथीकृतं च। म.म.पं. श्री दुर्गाप्रसाद तनयेन पं. केदार-नाथेन संशोधितम् तच्च वि. अनन्तशर्मणा विशल्यकरणी नाम्न्या टिप्पण्या समलंत्य संस्कृतम्
3. **मृच्छकटिकम्।** महाकवि शूद्रकप्रणीतं। पृथ्वीधरकृत व्याख्या सहित
4. **रघुवंशम्।** महाकविकालिदासविरचितं मल्लिनाथ कृत संजीविनी समेतम्। काशीनाथपाण्डुरंग पर्व इत्यनेन पाठान्तरैः संयोज्य संशोधितम्
5. **सरस्वतीकण्ठाभरणम्।** (अलंकारशास्त्र) भोजकृत। 1-3 परिच्छेद तक रामसिंह विरचित टीका तथा 4 परिच्छेद को जगद्धररचित टीका सहित
6. **रुपदीपिका।** रामानन्द द्विवेदिना विरचित
7. **वेणीसंहारम्।** भट्टनारायणप्रणीत। जगद्धरकृतया टिप्पण्या समेतम् उपोद्घात शेषराज शर्मा
8. **उत्तररामचरितम्।** भवभूतिप्रणीतं। वीरराघवकृतया टीकया समेतम्। उपोद्घात-शेषराज शर्मा
9. **रीतिकालीन काव्यशास्त्र और पदुमनदास।** कुबेर राय
10. **रीतिकालीन लक्षण ग्रन्थों में भाषाभूषण का स्थान।** सावित्री श्रीवास्तव
11. **वैष्णवधर्म।** परशुराम चतुर्वेद सं. नर्मदेश्वर चतुर्वेदी
12. **सूरदास की प्रतिभा।** भगवतीप्रसाद राय
13. **कथासरित्सागर तथा भारतीय संस्कृति।** सिद्धनाथ प्रसाद
14. **अपभ्रंश और अवहट्टः एक अन्तर्यात्रा।** सं. शम्भूनाथ पाण्डेय
15. **संतसाहित्य।** राधेश्याम दूबे
16. **मणिपुरी नर्तन।** दर्शना झवेरी तथा कलावती देवी। भूमिका हरेकृष्ण मुखोपाध्याय एवं कपिला वात्स्यायन
17. **मृत्यु-रहस्य।** वेणीराम शर्मा गौड़
18. **स्वर और रागों के विकास में वाद्यों का योगदान।** (संगीतशास्त्र)। इन्द्राणी चक्रवर्ती। प्रस्तावना कु. प्रेमलता शर्मा
19. **उत्तररामचरित की शास्त्रीय समीक्षा।** (समीक्षा) सत्यनारायण चौधरी
20. **मध्यकालीन रामकाव्य धारा पर कृष्णभावना का प्रभाव।** तपेश्वर नाथ प्रसाद
21. **वैष्णव-संगीतशास्त्र।** घनश्यामदास विरचित। रागरत्नाकर, गीतचन्द्रोदयः, तालार्णवः तथा श्री श्री भक्तिरत्नाकरः (पञ्चमतरंग का संगीतांश)। संस्कृत तथा हिन्दी अनुवाद। अनुवादक गजाननरानडे शास्त्री तथा मदनलाल व्यास सम्पादक गुरुविपिन सिंह प्रस्तावना दर्शना झवेरी। 1-2 भाग सम्पूर्ण
22. **कविकर्णपूर और उनके महाकाव्य एक अध्ययन।** लेखिका डॉ. कृष्णलता सिंह प्राक्कथन डॉ. मातृदत्तत्रिवेदी
23. **शिवपुराण में वर्णित सभ्यता।** लेखक डॉ. राजकुमार पाठक
24. **प्राचीन भारत।** (आदि काल 320 से 1206 ई. तक) उपेन्द्र ठाकुर एवं महेश कुमार शरण 1-2 भाग सम्पूर्ण
25. **व्यंजनाप्रपंचसमीक्षा।** (तुलनात्मक प्रतीकतत्वविमर्शः) मुकुन्द माधव शर्मा
26. **विद्धशालभंजिका-नाटिका।** (नाटिका) राजशेखर प्रणीत। नारायण दीक्षित रचित संस्कृत व्याख्या, छिप्ति हिन्दी व्याख्या बाबूलाल शुक्ल शास्त्री सम्पादित।

प्राप्ति स्थान- **चौखम्भा ओरियन्टालिया,** पो.बा. नं. 2206, दिल्ली-7. फोन- 3911617, 3958790